THE

NÂMALINGÂNUS'ASANA

(AMARAKOSHA)

OF

AMARASIMHA

With the Commentary (Amarakoshodghâtana.)

OF

KSHÎRASVÂMIN.

Edited with critical Notes, an Essay on the time of Amarasimha and Kshîrasvâmin, a list of works and authors quoted, glossary of words, &c. &c.

BY

KRISHNAJI GOVIND OKA,

Late Sanskrit Teacher,

D. E. S., POONA.

POONA.

1913.

PREFACE.

—:o:—

My object in bringing out the edition of Amarakosha with Kshîrasvâmin's Commentary is to make this valuable commentary easily accessible to Sanskrit scholars. I have succeeded in tracing many quotations met with in this commentary to their original sources. Still there are some quotations which I have not been able to verify and there remain some difficulties which I could not solve. These latter have been shown in the Notes and in Appendix I. My acknowledgments are due to Prof. K. B. Pathak and Sirdar K. C. Mehendale for the help which I have received from them in the course of this work. I must also tender my thanks to Dr. G. K. Garde for his kindness in supplying the interesting reference to *S*aka kings in the Ash*t*ângasangraha of Vâgbha*t*a.

POONA
March, 1913.

K. G. OKA.

This edition of Amarakosha with the commentary of Kshîrasvâmin has been prepared from the following Manuscripts from the Deccan College collections :—

A—No. 88 of 1871–72. The age of the Ms. is Samvat 1678 *i. e.* 1622 A. D. It is very old and tolerably correct. It contains the text and the commentary on the 2nd and 3rd Kâ*nd*as and not on the 1st, as the first 52 leaves of the copy are wanting. It is reliable, though the copyist is somewhat careless.

B—No. 333 of 1875–76. The age of the Ms. is Samvat 1690 *i. e.* 1634 A. D. It is complete and comes from Jaipur. It is very reliable, as the copyist never interpolates extraneous information. It is therefore, taken as basis

C—No. 332 of 1875-76. This Ms. is a new copy and contains the text and the commentary on the 1st Kâ*nd*a and the first two *vargas* of the 2nd. It is said to be one of the Kâshmere collections. It is full of mistakes.

D—No. 273 of 1880-81. The age of the Ms. is Samvat 1812 *i. e.* 1756 A.D. It is complete and probably copied from the same original as A. It is, unreliable, as the copyist interpolates not only extraneous information, but his own information and that from later commentators as well. It is very incorrect and the copyist is very careless.

E—No. 505 of 1884-87. This Ms. is correct and reliable, but it contains the text and the commentary only on the 1st Kâ*nd*a.

F—No. 506 of 1884-87. This Ms. does not contain the text and the commentary on the 1st Kâ*nd*a and the first four *Vargas* of the 2nd. It is otherwise reliable and tolerably correct. It is very old and the copyist is somewhat careful.

N. B.—Besides omissions and additions of letters, ह्रस for दीर्घ a *Mâtrâ* for *anusvâra* and a line for *Visarga* are very frequent in the Manuscripts. The letters य for प or प for य, व for च or च for व, श for स or स for श, द for ड or ड for द, न for र or र for न, &c. are met with on every page.

INTRODUCTION

Amarasimha's lexicon well-known to every Sanskrit student, is the oldest work of the kind now extant. It is of great interest to note that, though the production of a Buddhist, it has been universally accepted as an authority by the Brahmans and the Jainas alike. The fact that it has been commented upon by Buddhists like Subhûtichandra, by Jainas like *As*âdharapa*n*d*ita and Nâchirâja, and by Brahmans like Kshîrasvâmin, Mallinâtha* and Appayyâdîkshita testifies to its usefulness to every class of Sanskrit students. It is a well-known fact that translations of the Amarakosha into Chinese and Thibetan have been recently discovered.

Many commentaries on the Amarakosha have been published, the most well-known of these being the one by Mahe*s*vara and the other called Vyâkhyâsudhâ by Bhânujî-Dîkshita. But the oldest and most important commentary now extant is the one by Kshîrasvâmin which is here offered to Sanskrit scholars. Its interest mainly lies in the fact that Kshîrasvâmin quotes numerous authorities, sometimes without naming them, in support of his statements. The date of this commentator is now known. He quotes Bhoja and is quoted by Vardhamâna in the Ga*n*aratnamahodadhi, and therefore belongs to the second half of the eleventh century. He was a man of profound learning, proofs of his erudition being found on every page. His works will be noticed in the Notes. He appears to have been a native of Central India from his use of the words प्राच्य, प्रतीच्य, उदीच्य, &c. His attachment to Râja*s*ekhara and to *S*rî Bhoja makes this view highly probable. His mention of many words as De*s*î, which are really found in the Hindi and other Northern dialects, points to the same conclusion. Kshîrasvâmin was a devotee of *S*iva, as is obvious from the introductory verse and other indications in the commentary, and his name seems to have been suggested by the god

---

* Mallinâtha's commentary is called Amarapadapârijâtam.

Kshîresvara Mahâdeva at Kâkupada near Kanoj. In his commentary, on page 47, he enumerates all the well-known towns situated in Central India. This circumstance may also be taken as confirmatory of the view that he was not a native of Southern India, but belonged to Central India.

A list of authorities quoted by him is given below :—

Lexicographical Authorities.

1	Kâtya	9	Abhidhânakâra
2	Muni	10	Abhidhânasesha
3	Bhâguri	11	Anekârtha
4	Mâlâ and the Mâlâkâra	12	S'riharsha
5	Nighan*t*u (*Vedic*)	13	Durga
6	S'âsvata	14	Bhoja
7	Amaramâlâ	15	Rudra.
8	Nâmamâlâ		

Commentators.

1	Upâdhyâya	4	*A*châryâh
2	Gau*d*a	5	Nârâya*n*ah
3	Bhoja	6	*T*îkâ.

Medical Authorities.

1	Susruta and Sausrutâh	6	Indu
2	Vaidyâh (chiefly Charaka)	7	Chandranandana
3	Dhanvantari and his Nighan*t*u (medical)	8	Dhâtuvidah
4	Vâha*t*a or Vâgbha*t*a	9	Nimih
5	Chandra	10	Haramekhalam.

Kesava in his Kalpadruma enumerates the Koshakâras thus:—

कात्यवाचस्पतिव्याडिभागुर्यमरमङ्ग(क)लाः । साहसाङ्कमहेशाद्या विजयन्ते जिनान्तिमाः ॥

If the order, in which Kesava enumerates the names, may be taken as chronological, Kâtya necessarily stands as foremost in time. He is cited with great respect and so often by Kshîrasvâmin as to suggest his priority to Amarasimha. We are told that the year begins with Hemanta :—हेमन्तादि वत्सरस्यारम्भः, and Kshîrasvâmin cites Kâtya as his authority thus :

From this it would appear that Kâtya is older than Amarasimha. The same remark may be made as regards muni who may probably be identified with Vyâ*d*i. The third in the list is Bhâguri, as to whose priority to Amarasimha, Kshîrasvâmin thus remarks on p. 70 :—

बृहती तु निदिग्धिकेति भागुरिवाक्याद् ग्रन्थकृद् भ्रान्तः ।

On page 148 we meet with the remark of Kshîrasvâmin that Mâlâkâra was led astray by mistaking सर for शर in Bhâguri's statement :—एतच्च ह्रस्वं शरम् and that this author, *i.e.* Amarasimha, was in his turn misled by the latter. It is thus clear that in the opinion of Kshîrasvâmin Bhâguri and the Mâlâkâra preceded Amarasimha. It may be pointed out here that the author of the Mâlâ is not only frequently quoted as an authority, but is sometimes adversely criticized by Kshîrasvâmin.

S'â*s*vata, as it contains Anekârtha Samuchchaya only, is an ncomplete work though frequently quoted by Kshîrasvâmin. It is nevertheless much fuller than Amarasimha's Nânârthavarga, though in some places both agree word for word, *e.g.* अनु and अनुबन्ध. On these grounds the S'â*s*vata may be regarded as a later work than the Amarakosha. According to the last verse in Prof. Zachariae's edition :—

महाबलेन कविना वराहेण च धीमता । सह सम्यक् परामृश्य निर्मितोऽयं प्रयत्नतः ॥

it was composed in consultation with Varâha who may be identified with Varâhamihira. On page 118 Amarasimha says that आतिथ्य means अतिथ्यर्थ, while Kâtya and Mâlâ say that आतिथ्यः means अतिथिः. Kshîrasvâmin adds that :—शाश्वतोत एवोभयमाह 'for this very reason S'â*s*vata gives both the meanings'. This constitutes a further proof of S'â*s*vata's posteriority to Amarasimha.

The next authority quoted by Kshîrasvâmin is Durga who together with Bhoja are his latest authorities. The Vedic Nigha*nt*u is twice quoted. The Amaramâlâ is thrice quoted though we know nothing as to its age and authorship. The Nâmamâlâ is thrice or four times quoted. Some quotations appear on pp. 72, 75 and 169 which are ascribed to Rudra by Bhânujî Dîkshita.

Among the commentators on Amarakosha, who preceded

Râdhâkânta, Upâdhyâya is Achyutopâdhyâya whose commentary on Amarakosha is called Vyâkhyâ-pradîpa. Gau*d*a was another commentator on Amarakosha before Kshîrasvâmin. Both these commentators are quoted and criticized. The third is Bhoja about whose commentary we know nothing. Nor do we know anything about the commentators *A*châryâh, Nârâya*n*ah, &c.

Medical Authorities.

Since Kshîrasvâmin refers by name to Susruta thus :— सुश्रुतस्त्वाह (p. 80), पवनेष्टोपीति सौश्रुताः (p. 64), it may be inferred that the frequent reference to वैद्याः may be intended generally for Charaka. The next medical authority after Charaka and Susruta is Dhanvantari who in the opinion of Kshîrasvâmin is older than Amarasimha :— बालपत्त्रो यवासः खदिरश्चेति द्व्यर्थेषु धन्वन्तरिपाठमदृष्ट्वा बालपुत्रभ्रान्त्या ग्रन्थकृद्बालतनयमाह (p. 62). द्व्यर्थे- उपचित्रा दन्ती पृश्निपर्णी चेति । अत्र दन्त्यां द्रवन्तीभ्रान्त्या ग्रन्थकृदुपचित्रामाह (p. 69). पुष्करमूले त्रीणि नामानि । पद्मपत्रमिति ग्रन्थकृद् भ्रान्तः । पद्मवर्णेति लिपिभ्रान्त्या पद्मपर्णमिति बुद्धवान् । यदाह- मूलं पुष्करमूलं च पौष्करं पुष्कराह्वयम् । काश्मीरं पुष्करजटा धीरं तत्पद्मवर्णकम् (धन्वन्तरिः) (p. 79). शीतलवातक इत्येका संज्ञा यद्धन्वन्तरिः शणपर्णी शीतलवातक इत्याह । Amarasimha considers शीतलवातक as a compound and treats वातक and शीतल as separate terms for शणपर्णी (p. 80).

From these and other similar remarks it is obvious that Dhanvantari, whose work is known as Nigha*nt*u, must have preceded Amarasimha by a long interval. Vâha*t*a or Vâgbha*t*a, who was a Buddhist, is thrice or four times referred to in this commentary. His reference to the S'aka kings being very fond of onions enables us to assign him to the second or third century A. D.

लशुनानन्तरं वायोः पलाण्डुः परमौषधम् । साक्षादिव स्थितं यत्र शकाधिपतिजीवितम् ॥
यस्योपयोगेन शकाङ्गनानां लावण्यसारादिव निर्मितानाम् ।
कपोलकान्त्या विजितः शशाङ्को रसातलं गच्छति निर्विदेव ॥ (अष्टांगसंग्रह उत्तरस्थान Ch. 49).

Other medical writers Chandra, Indu and Chandranandana are very frequently quoted, especially in his comments on the वनौषधिवर्ग, by Kshîrasvâmin. But nothing is known about their works. A गणनिघण्टु by Chandranandana is mentioned in a list of writers of medical Nigha*nt*us. Two or three references to Nimi show him to have been a medical writer about whom nothing definite is known. Nor do we know anything about the हरमेखलतन्त्र, an ancient medical treatise mentioned on page 71; ऋतुविदः mentioned on page 156 may, for aught we know, be medical authors.

Grammarians.

प्राच्याः, प्रतीच्याः and उदीच्याः are referred to here and there in this commentary. Pâ*n*ini, Kâtyâyana and Patanjali are of course frequently referred to. The grammarian Chandragomin is cited nearly nine or ten times. Not only does Kshîrasvâmin quote Kâ*s*ikâ but reproduces even its mistakes (see Comment. on सहायता and भग pp. 188 and 192). Lastly, the grammarian Bhoja is also quoted with great respect as श्रीभोज.

Philosophical Authors.

The Dharmasûtras of Gautama are quoted on pp. 28 and 114. Jaimini's Pûrva-Mîmânsâ-Sûtra is quoted on p. 28. Sânkhya-*s*âstra is referred to on page 25, while Sânkhya-kârikâ is quoted on page 217. We find mention of the Vai*s*eshika doctrine on page 25. Yoga-*s*âstra and its Sûtras are cited on pp. 13, 119 and 191. The great Mîmânsâ-writer Kumârila-bha*tt*a is quoted on pp. 28, 166 and 207. The seven principles recognised by the Jainas are mentioned on page 187; while Buddhism and its principles are mentioned on pp. 25 and 203.

Other authors and works quoted by Kshîrasvâmin in his commentary are too numerous to mention here. For the convenience of Sanskrit scholars, they are given in a separate list. (Vide Appendix I).

The age of Amarasimha.

In the Kâlavarga, page 23, Amarasimha says :—

द्वौ द्वौ माघादिमासौ स्यादृतुस्तैरयनं त्रिभिः ।

Upon this Kshîrasvâmin remarks thus :—माघाद्युपक्रमस्ततोयनारम्भात् । It is obvious from this statement that in the days when Amarasimha lived or shortly before his time, the sun's course to the North must have commenced in the month of Mâgha. Similarly the other remark of Kshîrasvâmin :—हेमन्तादि वत्सरस्यारम्भः may be taken as confirmatory of the same view. From this it may be inferred that Amarasimha must have flourished 15 or 16 hundred years ago. Another clue to his age is found in the fact that he, though a Buddhist, follows the Pâ*n*inian system of grammar. The line :—

शालूर्थापि परा राजामनुष्यार्थादराजकात् । (p. 236)

is a rendering of Pâ*n*ini's well-known Sûtra सभाराजामनुष्यपूर्वा and not

ERRATA &c.

Page.	Line.				
16	9	for	स्मृताः	read	सृताः
,,	11	,,	रवारणम्	,,	रपवारणम्
18	17	,,	दाक्षयणी	,,	दाक्षायणी
49	17	,,	कामुखा	,,	कामुका
66	6	,,	बन्धुको	,,	बन्धूको
70	4	,,	काकचिञ्ची	,,	काकाचिञ्ची
85	18	,,	कासारः	,,	कासरः
94	15	,,	कटहारिणी	,,	कुटहारिणी
,,	30	,,	पुष्यवत्यवी	,,	पुष्पवत्यवी
104	23	,,	अंसकक्षयोः	,,	अंसवत्सयोः
115	13	,,	चन्द्रोपज्ञसंज्ञकं	,,	चन्द्रोपज्ञमसंज्ञकं
125	24	,,	दाहविलोदि	,,	दाहविलोपादि
129	28	,,	आश्वीय	,,	अश्वीयं
137	16	,,	सैन्याद्बहिः	,,	सैन्य(स्य) वहिः
145	18	,,	पथगाहुः	,,	पृथगाहुः
148	11	,,	भिवनं	,,	भिनवं
152	3	,,	(स्तभ) छाग	,,	(स्तुभ)च्छाग
160	7	,,	भृतभुक्	,,	भृतिभुक्
,,	13	,,	परास्कन्द	,,	पारिस्कन्द
165	21	,,	वाधस्तिष्ठन्त्य	,,	वाचस्तिष्ठन्त्य
168	30	,,	चीरेण	,,	चिरेण
183	30	,,	(ष्ठीवनं)	,,	(सीवनं)
184	8	,,	श्चोते	,,	श्च्योते
188	24	,,	गार्ग्यकं	,,	गार्गकं
206	22	,,	रचाना	,,	रचना
213	28	after श्रेष्ठयथा- and before वरं कूपशताद्वापी		insert	वररुचिः । ईपात्प्रिये यथा-
217	26	for	सिकतोपला ।	read	सितोपला ।
232	29	,,	ह्राह्मणाली,	,,	ह्राद् मृणाली,

Note.—A few misprints are corrected and omissions supplied in the Notes.

अथ

श्रीमदमरसिंहविरचितं

नामलिङ्गानुशासनम् ।

भट्टक्षीरस्वाम्युत्प्रेक्षितेनामरकोशोद्घाटनेन सहितम् ।

प्रथमं काण्डम् ।

श्रीगणेशाय नमः । दिश्याच्छिवानि शिवयोस्तिलकायमान-
गोरोचनारुचिललाटविलोचनं वः ।
अन्योन्यगाढपरिरम्भनिपीडनेन
पिण्डीभवन् बहिरिव स्फुटितोनुरागः ॥ १ ॥
अद्याप्यभिन्नमुद्रो योर्थार्थिभिरमरकोश एष बुधाः ।
उद्घाट्यते यथेच्छं गृह्णीध्वं नामरत्नानि ॥ २ ॥
प्रकृतिप्रत्ययवाक्यैर्व्यस्तसमस्तैर्निरुक्तनिगदाभ्याम् ।
इति सप्तभिः पथिभिर्नाम्नां पारायणं कुर्मः ॥ ३ ॥
भग्ना अभिधानकृतो विवरीतारश्च यत्र विश्रान्ताः ।
नामानि तानि भङ्क्तुं गहनमहो अध्यवसिताः स्मः ॥ ४ ॥
सहजो यः समुल्लासः क्षीराब्धेः सोपि मंस्यते ।
चान्द्र इत्यत्र किं कुर्मो गतानुगतिकं जगत् ॥ ५ ॥
वस्त्वेव तन्न हि भवेत् क्रियतेन्यथा यत्
कश्छादयेद्दिनमणिं करसंपुटेन ।
सारेतरान्तरविचारचणान् प्रतीर्ष्य-
स्तेनाहमेव बत दुर्जनचक्रवर्ती ॥ ६ ॥
(किंतु) यदतिकृपणवृत्त्या बिभ्यतो वा परस्मा-
दरचनमहार्थं नीरसं दूरसं वा ।
वरिवसितुमुदारान्– ढौकयामोतिभक्त्या
तदपि भषकवृत्त्या दूष्यते किं विदग्धैः ॥ ७ ॥
जाता विश्वसृजः क्रमेण मुनिभिः संस्कारमापादिताः
शब्दाः संवसनादसाधुभिरपभ्रष्टाः स्थ भो भ्रातरः ।
वाग्देव्याद्य कृता मदेकशरणी मात्रा यतोस्मान्मया
न्याय्ये वर्त्मनि वर्तनाय भवतां षड् वृत्तयः कल्पिताः ॥ ८ ॥

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥
समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥
प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥
भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥ ४ ॥

यस्य भगवतो ज्ञानदययोर्बोधकरुणयोः सिन्धोः समुद्रस्येव गम्भीरस्यापारस्य । अगाधस्यान्यैरप्राप्तज्ञानदयावधेः । अनघा निष्पापा गुणाः क्षान्त्यादयो बोधिपक्षाः[क्ष्याः] सप्तत्रिंशत् । सः— अक्षयः— अक्षोभ्यो जातो मारजित्त्वादनन्तज्ञानसन्तानो वा । भो धीरा योगिनः— ध्येयं प्रति धियमीरयती[न्ती]ति कृत्वा श्रिये भोगार्थं [सौख्यार्थं] अविद्यमानं मृतं मरणं यत्रेत्यमृताय मोक्षार्थं च सेव्यतामाराध्यताम् । लेशस्पृष्टोऽपि समुद्रः— अस्य विष्णोः क्षयो निवासः । अगाधोऽतलस्पर्शः । रत्नादिमत्त्वान्निर्मलगुणः । लक्ष्म्यर्थं पीयूषार्थं च सुरैः सेवितः ॥ १ ॥ ग्रन्थारम्भेऽभीप्सितसिद्धिहेतुं जिनमनुस्मृत्य श्रोतृप्रोत्साहनार्थं स्वप्रवृत्तिप्रयोजनं साभिधेयमादिवाक्येनाह । समाहृत्य संघात्य— अन्यतन्त्राण्यभिधानशास्त्राणि लिङ्गानुशासनानि वा [च] संक्षिप्तैर्लघूकृतैः प्रतिसंस्कृतैः प्रत्येकं परिपाटीस्थापनादिना कृतोत्कर्षैः संपूर्णं लक्ष्यलक्षणाभ्यां संगृह्य पूरितं, वादान्तशान्तपूर्णेति (सू०) ण्यन्तस्य निपातनात् । वर्गैः सजाति[तीय]समूहैः, सुखग्रहणार्थं वर्ज्यन्ते विजातीया अस्मिन्नित्यसारवर्जनाद्वा । नाम्नामभिधानानां लिङ्गानां च स्त्रीपुंनपुंसकानामनुशासनं व्युत्पादकं शास्त्रमुच्यते ॥ २ ॥ अथ श्लोकत्रयेण परिभाषां शास्त्रव्यवस्थापनार्थमाह । प्रायशो बाहुल्येन क्वापि चेत्यर्थः । रूपस्या[स्ये]बन्तादेर्विभक्त्यङ्गमदेः— अम्— भावादेश्चाकारस्य भेदेन विशेषेण स्त्रीपुंनपुंसकानीह ज्ञेयानि, यथा— लक्ष्मीः पद्मालया पद्मा, पिनाकोऽजगवं धनुः । तथा कुत्रचित्साहचर्यात्, यथा— अश्वयुगश्विनी, ब्रह्मात्मभूः सुरज्येष्ठः, वियद्विष्णुपदम् । अत्राश्वयुग्ब्रह्मवियन्ति साहचर्यात्स्त्रीपुंनपुंसकानि । क्वचिल्लिङ्गविशेषविधानात्, यथा— द्योदिवौ द्वे स्त्रियाम्, दुन्दुभिः पुमान्, क्लीबे त्रिविष्टपम् ॥ ३ ॥ अत्रामरकोशे भिन्नलिङ्गानां प्रातिपद्येनानुक्तानां भेदमाख्यातुं द्वन्द्वो न कृतः, परवल्लिङ्गं हि स्यान्नावयवलिङ्गम्, यथा— कुलिशं भिदुरं पविः, न तु कुलिशभिदुरपवय इति । तथैकशेषो न कृतः, शिष्यमाणलिङ्गस्यैव हि प्रतीतिः स्यात्, यथा— नभः खं श्रावणो नभाः, न तु खश्रावणौ नभसी इति । तथा संकरो न कृतः— संकरो व्यामिश्रता— साहचर्यात्तल्लिङ्गत्वं हि स्यात्, यथा— स्तवः स्तोत्रं स्तुतिर्नुतिः, न तु स्तुतिः स्तोत्रं स्तवो नुतिरिति । एतच्च क्रमादृते यत्र संग्रहश्लोकादौ क्रममात्रं विवक्षितं तत्रानुक्तानां भिन्नलिङ्गानां द्वन्द्वादयः कृता एव, यथा— वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः । नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिता इत्यत्र द्वन्द्वसंकरौ, आलादावेकशेषश्च कृतः । **उपाध्यायश्च** क्रमादृत इत्यन्तर्गडु मन्वानः क्रमेणादृते परिपाट्योपादेयेन ग्रन्थ इति व्यददरत् । **गौडोऽपी**त्थमबुद्ध्वा यथात्रायं संकरः क्रमादृतेऽनुक्रमं विना भिन्नलिङ्गानां न कृतः— अभिधानानुक्रमेणैवाभिधातुं तु कृत एव, यथा— कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः, प्रमथाः स्युः पारिषदा इति । **मालाकारो** हि स्त्रीलिङ्गादीन् प्रकरणैर्निरादिक्षत् । **श्रीभोज**स्त्वन्यथा व्याख्यत्— यथैते द्वन्द्वैकशेषसंकराः क्रमादृते पर्यायनिर्देशं विना भिन्नलिङ्गा ययुक्ता न स्युस्तदा न कृताः, पर्यायनिर्देशं विना तूक्तानां कृता एव, यथा— विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः, तथा, पुत्रौ पुत्रश्च दुहिता च, तथा नानार्थे— संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचनेति ॥ ४ ॥ यत्र लिङ्गत्रयसमाहारस्तत्र त्रिष्विति

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक् ॥ ५ ॥
स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ।
सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥ ६ ॥
अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥
आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥ ८ ॥

पदं प्रयोज्यमिति परिभाष्यते, यथा–त्रिषु स्फुलिङ्गोऽग्निकणः । तथा मिथुने स्त्रीपुंसलिङ्गे द्वयोरिति पदं ज्ञेयम्, यथा–वह्नेर्द्वयोर्ज्वालकीलौ । तथा निषिद्धं लिङ्गं यत्र तच्छेषार्थे निषिद्धालिङ्गादवशिष्टं लिङ्गं ज्ञेयं, विशेषनिषेधे शेषाभ्यनुज्ञानात्, यथा – व्योमयानं विमानोऽस्त्रीति, स्त्रीलिङ्गे निषिद्धे विमानस्य पुंनपुंसकविधिः । तथा तुशब्दोऽन्ते यस्य तत्त्वन्तमथशब्द आदिर्यस्य तदथादि च पूर्वं न भजते– अग्रिमेण संबध्यत इत्यर्थः । न्यायसिद्धं चैतत्–तुना पूर्वस्माद्विशेषद्योतनात्–अथशब्देन चार्थान्तरारम्भात्, यथा– पुलोमजा शचीन्द्राणी नगरी त्वमरावती, नित्यानवरताजस्रमप्यथातिशयो भर इति । भ्रान्तिस्थानविषयं चैतत् ॥ ५ ॥ स्वर्गे परे च लोके स्वरिति वक्ष्यमाणत्वेपीह प्रचुरप्रयोगार्थं स्वःशब्दोपादानं, वक्ष्यति च भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते । अव्ययमित्यलिङ्गत्वार्थम् । सुष्ठु–अर्ज्यते स्वर्गः, घञ् । नास्त्यकं दुःखमत्र नाकः, नाविद्यमानविरिञ्चो वा, नभ्राणनपादिति (सू०) नञ् प्रकृत्या । तृतीया द्यौर्लोकस्त्रिदिवः– श्रुतिविषये दिवौकसवद्दिवशब्दोऽप्यस्ति, दीव्यन्त्यत्रेति घञर्थेकविधानम् (वा०), पूरणार्थाधिक्यं च वृत्तौ त्रिभागवत् । त्रयाणां ब्रह्मादीनां द्यौरित्येके । त्रिदशालयाद्यः सुरसदनाद्युपलक्षणम्, एवं यौगिकेषु सर्वत्रोह्येयम् । द्योशब्दोऽप्योकारान्तोऽस्ति, भाष्ये गोतोणित् (सू०) इत्यत्र– ओतोणिदिति (वा०) न्यासान्तराम्नानात् । दीव्यन्त्यस्यां द्यौः, दिवेः क्विप् । तृतीयं विष्टपं त्रिविष्टपं भूर्भुवःस्वारिति श्रुतेः । त्रिपिष्टपमिति **प्राच्याः**, प्रायेण ह्येते पवौ शसौ च व्यत्यस्य पठन्ति । गौर्नानार्थे । ऊर्ध्वलोकाद्या अप्यूह्याः ॥ ६ ॥ न म्रियन्त इत्यमराः । निष्क्रान्ता जराया निर्जराः । दीव्यन्तीति देवाः, देवसेवमेष्वादयः पचादिषु द्रष्टव्या इति– इगुपधेति (सू०) को नास्ति । त्रिर्दश परिमाणमेषां त्रिदशाः, संख्ययाव्ययेति (सू०) बहुव्रीहिः, बहुव्रीहौसंख्येयेडजबहुगणात् (सू०) इति डच् समासान्तः, त्रयस्त्रिंशद्वै देवाः सोमपा इति श्रुतेः । तिस्रो दशा वयोवस्था येषामिति **गौडः** । विबुध्यन्ते विबुधाः । सुरन्ति सुराः, सुर–ऐश्वर्ये–कः, सुरा–एषामस्तीति वा, अर्शआदिभ्योऽच् (सू०), यतोऽब्धिजाता सुरा तैः पीता, सुष्ठु राजन्ते वा । शोभनं पर्व चरितमेषां सुपर्वाणः । सुष्ठु मन्यन्ते सुमनसः, असुन् । दिवि–ओको निवास एषां दिवौकसः, द्युसमानार्थो दिवशब्दोऽस्ति, पृषोदरादित्वात् (सू०) वा सिद्धिः ॥ ७ ॥ अदित्या अपत्यान्यादितेयाः, कृदिकारादक्तिनः (ग०) इति ङ्यन्तात्–स्त्रीभ्योढक् (सू०) । इदन्तात्तु दित्यदित्यादित्येति (सू०) ण्ये–आदित्याः । एवं दैत्यदैतेयाः । दिवि सीदन्तीति दिविषदः, सत्सूद्विषेति (सू०) क्विप्, हलदन्तात्सप्तम्याः (सू०), हृद्द्युभ्यांच (वा०) इत्यलुक्, सुषामादित्वात् (सू०) षत्वम् । पक्षे द्युसदः । लिख्यन्ते चित्रादौ ध्यानार्थं लेखाः । इयति ऋभवः । ऋशब्दोऽदितिवाची ततो भवन्तीति **गौडः**, डुप्रकरणे मितद्र्वादिभ्यउपसंख्यानात् (वा०) । नास्ति स्वप्न एषामस्वप्नाः । न म्रियन्ते–अमर्त्याः, हसिमृग्रिणितिन् (उ०), स्वार्थे यत् । अमृतमन्धोऽन्नमेषाममृता-

बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥ ९ ॥

आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥ १० ॥

विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः ।
पिशाचो गुह्यकः सिद्धो भूतोमी देवयोनयः ॥ ११ ॥

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ॥ १३ ॥

न्धसः ॥ ८ ॥ बर्हिरभिमुखमेषां बर्हिर्मुखाः । गीरेव निग्रहानुग्रहसमर्थो वाणोऽस्त्रमेषां गीर्वाणाः । प्रशस्तं वृन्दमस्त्येषां वृन्दारकाः, शृङ्गवृन्दाभ्यामारकन्वक्तव्यः (वा०) । देव एव देवता, देवात्तल् (सू०), स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेपि । देवतैव दैवतं, प्रज्ञादित्वात् (सू०) स्वार्थे- अण्, विशेषविधेः पुंस्त्वं रूपभेदात् क्लीबत्वं तच्च प्रचुरप्रयोगम् ॥ ९ ॥ एते द्वादशत्वादिना संघेन युक्ता गणदेवताः, संघचारिणो बहुवचनान्ता वा । एकत्वं तु समुदायेष्वपि वृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति । द्वादशादित्याः । त्रयोदश विश्वेदेवाः, श्राद्धाग्रे विशन्तीति । अष्टौ वसवः, वसन्तीति । षट्त्रिंशत्तुषिताः, तुष्यन्तीति । चतुःषष्टिराभास्वराः, आभासन्त इति, स्थेशभासेति (सू०) वरच् । एकोनपञ्चाशदनिलाः । षट्त्रिंशद् द्वे शते महाराजिकाः, महाराजशब्दोस्त्येषामिति । सास्य देवता (सू०) इति माहाराजिका इत्येके, महाराजप्रोष्ठपदाट्ठञ् (सू०) । द्वादश साध्याः, साध्यन्त आराध्यन्त इति । एकादश रुद्राः । तुषिताद्या **बौद्धपातञ्जलपुराणादौ** दृष्टाः ॥ १० ॥ देवा योनिरुत्पत्तिस्थानमेषां, देवांशा इत्यर्थः, देववददृष्टसंहतेभ्यः परमाणुभ्यः सद्यो जायन्ते वा । नागा अप्येवम् । तथा च द्वितीय-मर्धे– सिद्धगुह्यकभूता हि पिशाचा देवयोनय इति **भागुरिः** पपाठ । विद्याधरा जीमूतवा-हनादयः, खड्गगुटिकाञ्जनादिविद्याधारिणश्च । अप्सु सरन्त्यप्सरसो देवयोषितः– रम्भादयः । यक्षाः कुबेरादय ऋद्धीश्वराः । रक्षांसि मायाविनो लङ्काधिवासिनः । गन्धर्वास्तुम्बुरुप्रभृतयो देवगायनाः । किंनरा अश्वादिमुखाः शृङ्गारिणः । पिशाचाः पिशिताशास्तामसाः स्वयं निर्मांसाः । गुह्यका निधिपाला मणिभद्रादयः, गूहन्तीति । सिद्धाः, सिध्यन्तीति, प्राप्ताष्टगुणैश्वर्या विश्वावसु-प्रभृतयः । भवन्तीति भूता बालग्रहादयो हिंस्रा रुद्रानुचरा वा, यतोसौ भूतपतिः ॥ ११ ॥ असुराः सुराया अपानात्, सुरविरुद्धा वानर्थवत्, अस्यन्ति देवानिति वा । दितिर्दनुश्चासुर-मातरौ, अनया जातत्वाद्दैतेया इति, आदित्या आदितेयवत्सिद्धम् । अनयाद्देवत्वाद् भ्रष्टा इति पूर्वदेवाः । सुरान्द्विषन्तीति सुरद्विषः, सत्सूद्विषेति (सू०) क्विप् ॥ १२ ॥ सर्वे गत्यर्था ज्ञानार्था इति सुगतः शोभनज्ञानः । तथागतः सत्यज्ञानः, तथेति सत्यार्थे वितथवत् । बुध्यते बुद्धः । धर्मः सत्त्वोद्धरणा-दिस्तेन राजते धर्मराजः, धर्मस्य राजा वा । संपूर्णान्तं निष्पन्नं भद्रमस्य समन्तभद्रः । ऐश्वर्यस्य सम-ग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इति स्मृतः ॥ तद्वान् । मारान् काम-क्रोधादीञ्जयति मारजित् । बौद्धास्तु स्कन्धमारः क्लेशमारो मृत्युमारो देवपुत्रमारश्चेति चतुरो मारानाहुः । लोकाञ्जयति तपसा लोकजित् । जयति भवं जिनाति वा जिनः ॥ १३ ॥ दिव्यं चक्षुर्दिव्यं श्रोत्रं

षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः ॥ १४ ॥
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥ १५ ॥
ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः ॥ १६ ॥
धाताब्जयोनिर्द्रुहिणो विरिञ्चः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः ॥ १७ ॥
विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १८ ॥

पूर्वनिवासानुस्मृतिः परचित्तज्ञानमास्रवक्षय ऋद्धिश्चेति षडभिज्ञा अस्य सन्तीति । दानक्षान्तिशीलवीर्य-ध्यानशान्तिबलोपायप्रणिधानज्ञानानि दश बलान्यस्येति । अद्वयं विज्ञानाद्वैतं वदत्यवश्यमद्वयवादी । विनयति शास्तीति विनायकः । मन्यते मुनिः, मनेरुच्च (उ०), तेषामिन्द्रः । मुनिस्तु भीमवत्, सन्ति पदेषु पदैकदेशा इति । श्रिया योगविभूत्या घनो निविडः, श्रिया घन इव वर्षिता वा । शास्ति विनयति विनेयाञ्शास्ता, तृन्तृचौशंसिक्षदादिभ्यःसंज्ञायांचानिटौ (उ०) । तापी च ॥ १४ ॥ यस्तु शकेषु जातः शाक्यमुनिर्बुद्धावतारः– शकोभिजनोस्येति, शण्डिकादिभ्योञ्यः (सू०) स शाक्यः सिंह इव शाक्यसिंहः उपमितंव्याघ्रादिभिः (सू०) इति समासः । शाक्योपि भीमवत् । सर्वार्थेषु सिद्धो निष्पन्नः । अत एव सिद्धार्थः, यच्छाश्वतः– सिद्धार्थौ बुद्धसर्षपौ । शुद्धोदनस्य राज्ञोपत्यं शौद्धोदनिः, शकन्ध्वादित्वात् (वा०) पररूपम् । गौतमो गोतमगोत्रावतारात् । अर्कबन्धुः सूर्यवंश्यत्वात् । मायादेवी शुद्धोदनस्य राज्ञो भार्या तस्याः सुतः स इति । **इत्यागमोक्ता**वतारभेदात्पृथङ् नामानि । [सर्वज्ञो वीतरागोऽर्हन् केवली तीर्थकृज्जिनस्त्रिकालविदाद्या ऊह्याः] ॥ १५ ॥ बृंहति ब्रह्मा । आत्मना भवत्यात्मभूः । अत एव स्वयंभूशब्दे लब्धे स्वभूनिवृत्त्यर्थं वचः । एवं सर्वत्रोन्नेयम् । परमे पदे तिष्ठतीति परमेष्ठी, परमेस्थःकिदिति (उ०) इनिः, तत्पुरुषेकृतीति (सू०) सप्तम्या अलुक्, **स्थास्थिन्स्थॄणां** वक्तव्यात् (वा०) षत्वम् । पितॄणामपि पिता पितामहः, पितृव्यमातुलमातामहपितामहाः (सू०) इति साधुः । हिरण्यं गर्भेस्य हिरण्यगर्भः, हिरण्यस्य गर्भो वा ब्रह्माण्डप्रभवत्वात् । भूरादीन् सप्त लोका-नीष्ट इति लोकेशः ॥ १६ ॥ धाता विधाता कर्ता, वेरर्थो धातुनैवोक्तः– उपसर्गाणां द्योतकत्वात् । द्रुह्य-त्यसुरेभ्यो द्रुहिणः । विरिङ्क्ते सूते विरिञ्चः, विभिर्हंसै रिच्यते- उह्यते वा, विरिञ्चिरिति **प्राच्याः** । विदधाति सृजति विश्वमिति वेधाः, विधति सृजति वेधाः, विध विधानेऽसुन्, विधाञोवेधचेतिवा (उ०)। विश्वं सृजति विश्वसृट्, व्रश्चभ्रस्जसृजेति (सू०) षः, झलांजशोन्ते (सू०) । विधत्ते विधिः, उपसर्गेघोः किः (सू०) । शतधृतिशतानन्दौ च । स्थविरो देश्याम् ॥ १७ ॥ वेवेष्टि व्याप्नोति विश्वं विष्णुः, विषेःकिच्चेति (उ०) नुः । नरस्यापत्यं नारायणः, नडादिभ्यः फक् (सू०) । नाराः सलिलं नारमम्मयं नरसमूहो वायनमस्य, आपो नारा इति प्रोक्ता इति स्मृतेः । तथा नराज्जातानि भूतानि नाराणीति तेषा-मयनं मार्गः । कृष्णो वर्णेन कर्षति वारीन् । विकुण्ठस्यापत्यं वैकुण्ठः, विकुण्ठितसैंहादिवक्त्रो वा **संहिता-**दिषु तथा दर्शनात् । विष्टर इव श्रवसी कर्णावस्य विष्टरश्रवाः, विष्टराकृतिर्जटा श्रवोभ्यां निर्गतास्येति वा, अथवा विष्टरेश्वत्थतरौ श्रूयते वा । दाम– उदरे यस्य स दामोदरः, बाल्ये हि चापलाद्दाम्ना बद्धोभूत् । हृषीकाणामि-न्द्रियाणामीशो वशित्वाद् हृषीकेशः । प्रशस्ताः केशा विद्यन्तेस्य– यदि वा केशिनमसुरं हतवान्– केशवः, केशाद्वोन्यतरस्याम् (सू०) । मा या लक्ष्म्या धवो भर्ता माधवः, मधोरपत्यं वा ।

दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ १९ ॥
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥ २० ॥
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥ २१ ॥
विश्वंभरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।
वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥ २२ ॥
बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ।
रेवतीरमणो रामः कामपालो हलायुधः ॥ २३ ॥
नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।
संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥ २४ ॥

स्वभूः स्वतो भवतीति ॥ १८ ॥ पुण्डरीके इवाक्षिणी अस्य पुण्डरीकाक्षः, बहुव्रीहौसक्थ्यक्ष्णोः स्वाङ्गादिति (सू०) षच्, प्रसन्नलोचन इत्यर्थः । गां भुवं विन्दतीति गोविन्दः, वराहरूपेण गोः पृथिव्या उद्धर्ता, तद्वत् गोवर्धनाचलोद्धाराद् गवां त्राता, अनुपसर्गाल्लिम्पविन्देति (सू०) शः । गरुडो ध्वजश्चिह्नं वाहनत्वेस्य । पीते अम्बरे वाससी अस्य । न च्यवतेच्युतः । शृङ्गस्य विकारो धनुरस्त्यस्य शार्ङ्गी । विष्वक्सर्वव्यापिनी सेनास्येति विष्वक्सेनः । जनानर्दयति जनार्दनः, नन्द्यादित्वाल्ल्युः (.सू०)॥ १९ ॥ इन्द्रमुपगतोनुजत्वादुपेन्द्रः । इन्द्रस्यावरं जातोनुज इन्द्रावरजः । पद्मं नाभावस्य पद्मनाभः, अच्प्रत्यन्ववेति (सू०) प्राङ्निर्देशादच् । मधुनाम्नोसुरस्य रिपुर्मधुरिपुः । वसुदेवस्यापत्यं वासुदेवः, जगत्यां सर्वहृदये वसतीति वासुः– कल्पान्ते दीव्यतीति देवः, वासुश्चासौ देवश्च वासुदेवः । त्रयो विक्रमा अस्य त्रिविक्रमः, त्रिषु लोकेषु वा विक्रमः पादन्यासोस्य ॥ २० ॥ शूरस्यापत्यं शौरिः । पुरुषेषूत्तमः पुरुषोत्तम इति सप्तमीतत्पुरुषः, ननिर्धारणे (सू०) इति षष्ठीसमासनिषेधात्, कर्मधारये च सन्महत्परमोत्तमेति (सू०) उत्तमपुरुष इति स्यात् । पुष्पफलपल्लवान्विता वनमालास्यास्तीति वनमाली, व्रीह्यादित्वादिनिः (सू०) । बलिं ध्वंसते बलिध्वंसी, सुप्यजातौणिनिस्ताच्छील्ये (सू०) । अधः कृत्वाक्षाणीन्द्रियाणि जातोधोक्षजः, अधोक्षाणां जितेन्द्रियाणां वा जायते प्रत्यक्षीभवति, अक्षजं ज्ञानमधोस्य वा ॥ २१ ॥ विश्वं बिभर्तीति विश्वंभरः, संज्ञायांभृतॄवृजीति (सू०) खच् । मधुकैटभावसुरौ जितवान् । विधत्ते विधुः । श्रीवत्साख्यो रोमावर्तो वक्षसि लाञ्छनमस्य श्रीवत्सलाञ्छनः । गदाग्रजो दाशार्हो मुञ्जकेशोब्धिशायी पुराणपुरुषो बभ्रुरित्याद्यूह्यम् । हरौ जाते ह्यानका दुन्दुभयश्चास्य नेदुः, अनकदुन्दुभो वसुदेवस्य पितेत्येके ॥ २२ ॥ बलेन भद्रो बलभद्रः, बलस्त्वनुनिष्पादिन्यायेन भीमवत् । प्रलम्बं नाम्नासुरं हतवान् प्रलम्बघ्नः, अमनुष्यकर्तृकेच (सू०) इति टक् । [रेवतीं रमयतीति, नन्द्यादित्वात् (सू०) ल्युः] । रामः सिताङ्गत्वात् । कामान् पालयति कामं स्मरं वाग्रजत्वात्कामपालः ॥ २३ ॥ रोहिण्या अपत्यं रौहिणेयः, शुभ्रादित्वात् (सू०) ढक् । तालवृक्षोङ्को ध्वजोस्य तालाङ्कः । संकर्षति संहारमूर्तित्वात्संकर्षणः, नन्द्यादित्वाल्ल्युः (सू०) । कालिन्द्या यमुनाया भेदनो हलेनाकर्षणात् । सात्वतोपि । [एककुण्डलोनन्त इत्याद्यूह्यम्] ॥ २४ ॥ मदयति मदनः, ल्युः । मननं मत्– चेतना,

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कन्दर्पो दर्पकोनङ्गः कामः पञ्चशरः स्मरः ॥ २५ ॥
शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥ २६ ॥
ब्रह्मसूर्ऋष्यकेतुः स्यादनिरुद्ध उषापतिः ।
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥ २७ ॥
शंखो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः ।
कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः ॥ २८ ॥
गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥ २९ ॥
शंभुरीशः पशुपतिः शिवः शूली महेश्वरः ।
ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः ॥ ३० ॥

अनुदात्तोपदेशवनतीति (सू०) अनुनासिकलोपे तुक्, मतो मनसो मथः [मथ्नातीति] मन्मथः । म्रियन्तेनेन मारः । प्रकृष्टं द्युम्नं बलमस्य प्रद्युम्नः । मीनः केतनं ध्वजोस्य मीनकेतनः, मीनो जलचरोपलक्षणम् । कमव्ययं कुत्सायाम्, कं दर्पोस्य कंदर्पः कं दर्पयति वा । दर्पयतीति दर्पकः । न विद्यतेङ्गमस्येत्यनङ्गः, ईश्वरदग्धदेहत्वात् । कामयतेनेन कामः, कामोस्त्यस्य वा, अर्शआदित्वात् (सू०) । [पञ्च शरा अस्येति पञ्चशरः, उन्मादनं शोचनं च तथा संमोहनं विदुः । शोषणं मरणं चैव पञ्च बाणा मनोभुवः ॥ मदनोन्मादनश्चैव मोहनः शोषणस्तथा । संदीपनः समाख्याताः पञ्च बाणा इमे स्मृताः ॥] स्मरन्त्यनेनेति स्मरः, पुंसिसंज्ञायांघःप्रायेण (सू०) ॥ २५ ॥ शम्बरोसुरभेदस्तस्यारिः शम्बरारिः । मनसि जायते मनसिजः, डः, हलदन्तात्सप्तम्याः (सू०) अलुक् । न मनसोन्यस्माज्जायतेनन्यजः । पुष्पाणि धनुरस्य पुष्पधन्वा, वासंज्ञायां (सू०) इत्यनङ् । आत्मना भवत्यात्मभूः, यद्वागुरिः— शम्बरारिः स्मरः स्वजः । हृच्छयश्चैत्रसखः शृङ्गारयोनिः पुष्पकेतुश्च ॥ २६ ॥ ब्रह्म ज्ञानं सूयते ब्रह्मसूः । ऋष्यनामा मृगः केतुरस्य (ऋष्यकेतुः) । उषा बाणदुहिता (तस्याः पतिः) । बलादयो हरेर्भ्रातृपुत्रपौत्राः, **यद्वागुरिः—** ब्रह्मसूर्ऋष्यकेतुश्च विष्वक्सेनात्मजात्मजः । **संहितासु** त्वेकं ब्रह्म वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्यया चतुर्व्यूहात्मकमाहुः । विश्वकेतुरित्यपपाठः । लक्ष्यते लक्ष्मीः, लक्षेर्मुट्च (उ०) इतीप्रत्ययान्तः, अत एव ङ्यन्तत्वाभावाद्, हल्ङ्याब्भ्योदीर्घात्सुतीति (सू०) सुलोपाभावः । पद्मं विद्यतेस्याः पद्मा, अर्शआदित्वादच् (सू०) । एवं कमला । श्रयतीति श्रीः, क्विब्वचिप्रच्छिश्रि (उ०) इत्यादिना क्विब्दीर्घौ । मा रमा अब्धिजा-इन्दिरेत्याद्यूह्यम् ॥ २७ ॥ पञ्चजने पाताले भवः पाञ्चजन्यः, बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यात् (वा०) ञ्यः । लक्ष्मीपतेरिति शेषः । सुखेन दृश्यते (सुदर्शनः), भाषायांशासियुधीति (वा०) युच् । सुदर्शनः पुंसि लोकाश्रयत्वाल्लिङ्गस्य, यथा— बन्धुरेष जगतां सुदर्शनः (शिशु०) । विष्णुः कुमोदकः शौरिरिति दुर्गपाठात्, कुमोदकस्येयं कौमोदकी लक्ष्मीपतेर्गदा । **संहितासु मेण्ठादौ** कौपोदकीति पाठः, कूपोदकाज्जातेत्याम्नायात् । नन्दयतीति नन्दकः । कुं भुवं स्तुभ्नाति व्याप्नोति कुस्तुभोब्धिस्तस्यायं कौस्तुभः ॥ २८ ॥ गरुतः पक्षाः सन्त्यस्य गरुत्मान्, झयः (सू०) इति वत्वं यवादिपाठान्नास्ति । गरुद्भिर्डयते गरुडः, पृषोदरादिरित्वाल्लुक् (सू०), गिरति नागान्वा । तृक्षस्यापत्यं तार्क्ष्यः, गर्गादित्वाद्यञ् (सू०) । विनताया अपत्यं वैनतेयः, स्त्रीभ्योढक् (सू०) । सुपर्णो हेमपक्षत्वात् ॥ २९ ॥ शं भवत्यस्माच्छम्भुः, मितद्र्वादित्वाद् (वा०) डुः । ईष्टे— ईशः । पशूनां सुरनरतिरश्चां पतिः । शिवः श्रेयस्करत्वात् । ईष्टे— ईश्वरः, स्थेशभासेति (सू०) वरच् । महेश्वरो महोदधिवद्रूढः । शृणाति हिनस्ति शर्वः ।

भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।
मृत्युंजयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥ ३१ ॥
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३२ ॥
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥ ३३ ॥
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥ ३४ ॥
कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः ।
प्रमथाः स्युः पारिषदा ब्रह्माण्याद्यास्तु मातरः ॥ ३५॥

ईशानः, ताच्छील्येचानश् (सू०) शंकरः, कृञोहेत्विति (सू०) टः ॥ ३० ॥ गिरिं श्यति - उपभोगेन तनूकरोति गिरिशः, गिरिर्वास्यास्तीति, लोमादित्वाच्छः (सू०), गिरौ शेते वा गिरिशः, गिरौडश्छन्दसि (वा०), लोके त्वाशुशुक्षणिवत् । मृडति सुखयति मृडः । मृत्युं जयति मृत्युंजयः, संज्ञायांभृतृवृजीति (सू०) खच् । कृत्तिश्चर्म वासोस्य कृत्तिवासाः ॥ ३१ ॥ उच्यति कुधा समवैति- उग्रो रौद्रत्वात् । श्रीः शोभा कण्ठेस्य श्रीकण्ठः । नीलगलत्वाच्छितिर्नील: कण्ठोस्य शितिकण्ठः । वामः श्रेष्ठो देवः, संसारे वामत्वाद्वा । विरूपाणि त्रित्वादक्षीण्यस्य विरूपाक्षः, बहुव्रीहौसक्थ्यक्ष्णोःस्वाङ्गात् (सू०) षच् ॥ ३२ ॥ कृशानौ रेतोस्य कृशानुरेताः, देव्या सोढुमशक्यत्वादग्नौ हि क्षिप्तं रेतः, अत एव पावकिः कुमारः । धूर्गङ्गाः जटास्वस्य धूर्जटिरिति निरुक्तम् । नीलः कण्ठे लोहितश्च केशेतो नीललोहित इति पुराणम् । हरत्यघं हरः, हरतेः- अच् । स्मरं हरति स्मरहरः, हरतेरनुद्यमने (सू०) अच् । बिभर्ति भर्गः, भृज्ज्यन्तेनेन काम-कालादयो वा । त्रीण्यम्बकान्यस्य त्र्यम्बकः, त्रयाणां लोकानामम्बकः पितेत्यागमः, द्यौर्भूमिरापस्ति-स्रोम्बा अस्येति वा । (त्रिपुरान्तकः) त्रिपुरीति भाष्यदर्शनेपि लोकाश्रयत्वात्त्रिपुरं पात्रादौ (पात्रा-द्यन्तस्यन) ॥ ३३ ॥ गङ्गाया धरश्चक्रधरादिवत्, अन्यथा कर्मण्यण् (सू०), संज्ञायांभृतृवृजीति (सू०) खच्- वा स्यात् । अन्धको नामासुरस्तस्य रिपुः । क्रतुं दक्षयज्ञं ध्वंसतेवश्यं क्रतुध्वसी । व्योम द्यौः के मूर्ध्नि शेतेस्य व्योमकेशः, शीर्ष्णो द्यौः समवर्ततेति श्रुतेः, गङ्गां धारयितुं व्योमव्यापिनोस्य केशा वा व्योमकेशः । भवत्यस्माद्विश्वं भवः । बिभ्यत्यस्माद् भीमः, भीमादयोपादाने (सू०) । तिष्ठतीति स्थाणुः । रोदनाद्रुद्रः, सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वामिति श्रुतेः, रोदयत्यरिस्त्रीर्वा, रोदेर्णिलुक्च (उ०) । अहिर्बुध्नोष्टमूर्तिश्च [महानादो] गजासुरारिश्च । महानटो देश्याम् । शिपिविष्टो वृषाकपिर्भैरवो नानार्थे ॥ ३४ ॥ ईश्वरस्य जटाजूटः कपर्दनामा, कं शिरः पिपर्ति कपर्दः, औणादिको दः । अस्य धनुः, पिनह्यते पिनाकः, शूलार्थोप्यनेकार्थेषु वक्ष्यते । अजगवे विप्रतिपत्तिर्गम्यते, गाण्ड्यजकात्संज्ञायां (सू०) इति मत्वर्थे वे- अजकवमिति साध्यम् । अथाजगवोस्थिविकारस्तदाणि वृद्धिः स्यात्, यत्कात्यः— धनुर्वेद-न्त्याजगवं पिनाकिकरगोचरम् । **प्राच्यास्तु**, गाण्ड्यजगादिति पेठुः । अजगवं धनुः प्रोक्तमिति तु **पाश्चात्या** अपि । प्रमथ्नन्ति प्रमथाः, अच् । परिषदि साधवः पारिषदाः, भक्ताण्णः (सू०) इति प्रकृते परिषदोण्यइति (सू०) योगविभागाद् णः । संघाते प्रमथे गण इति गणा अपि । अस्याष्टौ परिवारत्वेन मान्ति वर्तन्ते मातृनाम्न्यः । ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा । कौमारी चर्ममुण्डा च काल-संकर्षणीति च । ब्रह्माणीत्यानुगाममाभावाच्चैव प्रसिद्धं नाम । कथंचिज्जातित्वात्, ब्राह्मोऽजाताविति (सू०) ब्राह्मीत्याद्या इत्येके पेठुः, यद्भागुरिः- ब्राह्मयाद्या मातरः स्मृताः । रेवत्यो देश्याम् ॥ ३५ ॥ भवन्ते

विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।
उमा कात्यायनी गौरी काली हैमवतीश्वरा ॥ ३६ ॥
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥ ३७ ॥
विनायको विघ्नराजद्वैमातुरगणाधिपाः ।
अप्येकदन्तहेरम्बलम्बोदरगजाननाः ॥ ३८ ॥
कार्तिकेयो महासेनः शरजन्मा षडाननः ।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥ ३९ ॥
बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥ ४० ॥
इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः ।
वृद्धश्रवाः सु-शु-नासीरः पुरुहूतः पुरंदरः ॥ ४१ ॥

भूतिः । अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमीशिता वशिता- ईशस्य यत्रकामावसायितेत्यष्टधैश्वर्यम् । भूतिविभूती समानार्थे लोचनविलोचनवत् । उ मेति मात्रा तपसो निषिद्धा (कुमा०) इत्युमा । कात्यशब्दाद् गर्गादिभ्यो यञ् (सू०) इति यञन्ताद् (सर्वत्र) लोहितादिकतन्तेभ्य इति ष्फः (सू०), षित्वाद् ङीष् कात्यायनी । हिमवतोऽपत्यं हैमवती । ईष्टे तच्छीला- ईश्वरा, स्थेशभासेति (सू०) वरच् । अश्नोतेराशुकर्मणि वरट् च (उ०) उपधाया ईत्वमितीश्वरी ॥ ३६ ॥ शिवा स्वतः श्रेयस्करीत्वाच्छिववत्, यच्छाश्वतः- शिवं भद्रं शिवः शंभुः शिवा गौरी शिवाभया । पुंयोगे च शिवस्य स्त्री शिवी । भवस्य स्त्री भवानी, इन्द्रवरुणभवेति (सू०) ङीषानुकौ । एवं शर्वाण्यादि । अपर्णा तपसि पर्णानामप्यनशनात् । पर्वतस्यापत्यं पार्वती । दुःखेन गन्तुं शक्यतेऽस्यां दुर्गा, सुदुरोरधिकरणे (वा०) इति डः । चण्डी कोपना, बह्वादित्वाद् (सू०) ङीष्, इकः केऽणः (सू०) इति ह्रस्वः । अम्बैवाम्बिका । जगन्माता- आर्या भैरवी सती दाक्षायणी च । गणनायिका देव्याम् ॥ ३७ ॥ विगतो नायको नियन्तास्य विनायकः, अन्येषां विनेता वा । अत एव विघ्नानां राजा विनियन्ता । द्वयोर्मात्रोरपत्यं द्वैमातुरः [गाङ्गेयोपि यतः], मातुरुत्संख्यासंभद्रपूर्वायाः (सू०) इत्यण्, अन्त्यस्योत्वं च । गुहोत्पाटितदन्तत्वादेकदन्तः । प्रत्यूषे हेरम्बते शब्दायते हेरम्ब इति नैरुक्ताः, देशीपदप्रायं तु मन्महे । आखुरथोपि ॥ ३८ ॥ कृत्तिकानां बहुलाख्यानामपत्यम् । महती सेनास्य महासेनः । शरवणे जन्मास्य शरजन्मा । षडाननः कृत्तिकाख्यानामृषिपत्नीनां षण्णां स्तनपानात् । स्कन्नं शुष्कं रेतोऽस्य स्कन्दत्यरीन्वा स्कन्दः । गूहते सेनां गुहः, कः ॥ ३९ ॥ विशाखासु जातो विशाखः, नक्षत्राल्लुब्बहुलम् (सू०) । शिखी मयूरो वाहनमस्य शिखिवाहनः । षण्णां मातॄणामपत्यं षाण्मातुरः । शक्तेर्धरः शक्तिधरः, अन्यथा शक्तिधरः शक्तिधारो वा स्यात् । कुमारो ब्रह्मचारित्वात्, कुत्सितो मारोऽस्येति वा । क्रौञ्चो गिरिस्तेन ह्यस्य कैलासमस्त्रशिक्षार्थं गच्छतो मार्गो रुद्धोऽभूत्, अतस्तं दारयति क्रौञ्चदारणः, ल्युः । स्वामी च । गाङ्गेयोपि ॥ ४० ॥ भृङ्गी भृङ्गरिटिस्तुण्डिनन्दिनौ नन्दिकेश्वरे । कर्णमोटी तु चामुण्डा चर्ममुण्डाऽऽर्चिचण्डि[च चर्चि-]केति वक्तव्यम् ॥ इन्द्रः परमैश्वर्ययोगात् । मरुतो देवाः सन्त्यस्य मरुत्वान्, तसौ मत्वर्थे (सू०) इति भसंज्ञायां पदकार्यं जश्त्वं नास्ति । मघः सौख्यमस्यास्तीति मघवा, श्वन्नुक्षन् (उ०) इत्यत्र तु निपातितस्य मघवन्नित्यस्य । पक्षे सौ त्रादेशाद्दीर्घाभावान्मघवन्, मघवा बहुलम् (सू०) । वेवेष्टि विड् व्यापकमोजोऽस्य बिडौजाः, विट्सु वा- ओजोऽस्य, पृषोदरादित्वात् (सू०) वृद्धिः । बिड भेदने वा, बिडं भेदकमोजोऽस्य । पाकानां दितिगर्भाणां शासनः । वृद्धे श्रवसी अस्येति वृद्ध-

जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ।
सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥ ४२ ॥
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ।
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ॥ ४३ ॥
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ।
आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया ॥ ४४ ॥
पुलोमजा शचीन्द्राणी नगरी त्वमरावती ।
हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम् ॥ ४५ ॥
स्यात्प्रासादो वैजयन्तो जयन्तः पाकशासनिः ।
ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ॥ ४६ ॥

श्रवाः, वृद्धेभ्यः शृणोति वा । शोभना नासीरा अग्रेसरा अस्य सुनासीरः, शुः पूजायां श्वशुरवत्, शुनासीरयोरपत्यमित्येके । पुरु प्रभूतं हूतं यज्ञेष्वाह्वानमस्येति पुरुहूतः । पुराण्यरीणां दारयति त्रिपुरं वा पुरंदरः, वाचंयमपुरंदरौ च (सू०) इति साधुः ॥ ४१ ॥ जयनशीलो जिष्णुः, ग्लाजिस्थश्च ग्स्नुः (सू०) । लेखर्षभो देवश्रेष्ठः । शक्नोति शक्रः । शतं मन्यवः क्रतवोऽस्य शतक्रतुः । दिवः स्वर्गस्य पतिः, षष्ठ्याः पतिपुत्रेति (सू०) अलुकि, कस्कादित्वात् (सू०) सत्वे च दिवस्पतिः । सुष्ठु त्रायते सुत्रामा, मनिन्, शोभनं त्राम बलं वास्य । गोत्रान् गिरीन्पक्षच्छेदाद् भिन्नवान् गोत्रभित् । वस्वपत्यं वासवः । वृत्रबलजम्भनमुचयोऽसुराः । वर्षतीति वृषा, कनिन् ॥ ४२ ॥ वास्तोर्गृहक्षेत्रस्याधिष्ठाता वास्तोष्पतिः, षष्ठ्या अलुकि षत्वं, वास्तोष्पतिगृहमेधाच्छ च (सू०) इति लिङ्गात् । हरयः पिङ्गा हया अस्य हरिहयः । स्वः स्वर्गे राजते स्वाराट्, ढ्रलोपेपूर्वस्यदीर्घोऽणः (सू०), व्रश्चभ्रस्जेति (सू०) षः ॥ ४३ ॥ संक्रन्दयति रिपुस्त्रीः संक्रन्दनः, ल्युः । दुष्टं च्यवते परदारेषु रेतस्स्रुतेर्दुश्च्यवनः, चलनशब्दार्थादिति (सू०) युच्, दुःखेन च्यवते रणाद्वा । तुरं त्वरितं साहयत्यभिभवत्यरींस्तुराषाट्, तुरं वेगं सहते वा, छन्दसि सहः (सू०) इति ण्विः, नहिवृतिवृषीति (सू०) पूर्वपदस्य दीर्घः, सहेः साडः सः (सू०) इति षत्वम् । मेघा वाहनमस्य, इन्द्रो हि मेघानाविश्य वर्षति, मेघ ऐरावतो वाऽभ्राधिष्ठातृत्वात् । आखण्डयति भिनत्त्यरीनाखण्डलः । ऋभून्देवान् क्षियत्यधिवसति ऋभुक्षाः, यद्वा– अर्तेर्भुक्षिनक् (उ०), पथिमथ्यृभुक्षामात् (सू०) । प्राचीनबर्हिररहिहा पृतनाषाट् पुलोमजित् । उग्रधन्वा च पुराणे ॥ ४४ ॥ पुलोम्नो मुनेर्जाता, अत एव पौलोमी । शचते शची, शच श्वच गतौ । इन्द्रस्य स्त्रीन्द्राणी, इन्द्रवरुणेति (सू०) ङीषानुकौ । तस्येति प्रत्येकं संबध्यते । अमरा विद्यन्तेऽस्याममरावती, मतौबह्वचोनजिरादीनां (सू०) इति दीर्घः । उच्चैः श्रवसी अस्योच्चैःश्रवाः । तस्य सूतः सारथिर्मतलस्यापत्यं मातलिः । तस्योपवनं, नन्दयति नन्दनं, ल्युः ॥ ४५ ॥ विजयते विजयन्तो जिष्णुः, झच्, तस्यायं (सू०) इत्यण्, वैजयन्ती अस्यास्तीत्येके । तस्य पुत्रो जयन्तः, पाकशासनस्यापत्यं (पाकशासनिः) । इरावत्यब्धौ जात ऐरावतः । अभ्रस्थत्वादभ्रमातङ्गः, अभ्ररूप इत्येके, यत्कात्यः— ऐरावतं विजानीयान्नागमम्बुदगोचरम् ॥ इरावणोद्भव ऐरावणः, विभाषौषधीति (सू०) वा णत्वम् । अभ्रे खे माति न भ्राम्यति वा मन्थरगामिनीत्वादभ्रमुस्तद्भार्या, यल्लक्ष्यम्– अभ्रम्वा जघनान्तदोलितकरः (बा० रा०) । सुरगजो गजमल्लश्च ॥ ४६ ॥ ह्रादः स्फूर्जथुरस्यास्तीति ह्रादिनी । वजति धात्वेव न प्रतिहन्यते वज्रम् । कुलिनः पर्वतान् स्यति पक्षच्छेदेन तनूकरोति कुलिशं, कुत्सितं लिशति तीक्ष्णोऽस्यरीन्वा । भिनत्ति तच्छीलं भिदुरम्, विदिभिदिच्छिदेःकुरच् (सू०) । पुनाति पविः, हीरकस्य पविसंज्ञया प्रसिद्धत्वात् । शतं बहवः कोटयोऽस्य शतकोटिः । स्वरति स्वरुः, शॄस्वृ इति (उ०) उः, शोभनान्यरूंषि धारा अस्येति सान्तो वा ।

ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः ।
शतकोटिः स्वरुः शंबो-न्नो दम्भोलिरशनिर्द्वयोः ॥ ४७ ॥
व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः ।
स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा ॥ ४८ ॥
मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।
मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥ ४९ ॥
पञ्चैते देवतरवो मन्दारः पारिजातकः ।
संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ ५० ॥
सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ ।
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ॥ ५१ ॥
स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ।
हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ॥ ५२ ॥

शं विद्यतेस्य शंवः, कंशंभ्यांवभेति (सू०) वः । दभ्नोति खेदयति दम्भोलिः । अश्नाति शैलानशनिः, न शनैर्याति वा । व्याधामोपि ॥ ४७ ॥ व्योम्नि यान्त्यनेन व्योमयानम् । विमान्ति वर्तन्तेस्मिन्देवा विमानम् । नारं नरसमूहं द्यति भिनत्ति कलहैर्नारदः । आद्यशब्दाद्देवलादयः । सुराश्च ते ब्रह्मादिपुत्र-त्वादृषयश्च, षष्ठीसमासो वा । सुष्ठु धर्मोस्यां सुधर्मा, यल्लक्ष्यं- सुधर्मानवमां पुरीं (सभां) (रघु०), धर्मादनिच्केवलात् (सू०) । सह भान्त्यस्यां सभा स्थानगृहम् । पीयते पीयूषं, पीयेरूषन् (उ०) । नास्ति मृतमनेनामृतम् । सुष्ठु धीयते सुधा, धेट् पाने । समुद्रनवनीतं देश्याम् ॥ ४८ ॥ मन्दमकत्यवश्यं मन्दाकिनी, अक अग कुटिलायां गतौ । सिद्धसिन्धुश्च । गङ्गामात्रस्य नामानि च वक्ष्यामः । मिनोति क्षिपत्युच्चत्वाज्ज्योतींषि मेरुः । सुमेरुरभिन्नार्थः, इन्द्रमहेन्द्रवत् । हेम्नोद्रिर्हेमाद्रिः । रत्नानि सानावस्य रत्नसानुः ॥ ४९ ॥ मन्दा आरा धारा अस्य सरलत्वान्मन्दारः । पारिणः पारवतोब्धेर्जातः पारिजातकः । संतन्यन्तेस्मिन्पुष्पाणि संतानः । कल्पवृक्षः संकल्पपूरणात् । हरेरिन्द्रस्य चन्दनं, कपे पीतं वा ॥ ५० ॥ सनन्नित्यं कुमारः । सनत्कुमारोपि । विधातुरपत्यं वैधात्रः । वैद्यसंहिताप्रणेतृत्वादत्रोक्तः । न- असत्या-वसाधू नासत्यौ, नभ्राण्नपादिति (सू०) नञ् प्रकृत्या । आश्विनौ सदश्वाधिरूढौ । दस्यतो हरतो रोगान्दस्रौ । अश्विन्या अपत्यं- ढकि- आश्विनेयौ । उभाविति द्वित्वादेकवचनाभावः । **भागुरि**स्त्वाह- नासत्यदस्रौ यमजावर्कजावश्विनौ यमौ, नासत्यसहितौ दस्राविति व्याख्येयं, न त्वेको नासत्योन्यो दस्रः ॥ ५१ ॥ घृताची मेनका रम्भा- उर्वशी च तिलोत्तमा । सुकेशी मञ्जुघोषा-द्याः कथ्यन्तेप्सरसो बुधैः । अद्भ्यः सृता अप्सरस इत्येकापि शब्दशक्तिस्वाभाव्यात्, अप्सरा इत्यपि दर्शनात् प्रायिकं बहुत्वम् । ऊरू अश्नुते नारायणस्योरूद्भवत्वादुर्वशी, पृषोदरादित्वात् (सू०) ह्रस्वः, यल्लक्ष्यं- ऊरूद्भवा नरसखस्य मुनेः सुरस्त्रीति (विक्र०) । मुखशब्दाद्रम्भादयः । हाहा एको हूहूर-न्यः, एकं नामेत्येके, गन्धर्वौ च हाहा हूहूरिति तु लक्ष्यम् । आलापानिकानुकारात्पुंस्येतौ, अव्ययाविति **श्रीभोजः** । आद्यशब्दात्तुम्बुरुमुखा गन्धर्वा देवगायनाः ॥५२॥ अङ्गत्यूर्ध्वं यात्यग्निः । विश्वानरस्यापत्यं वैश्वानरः, बिदादित्वादञ् (सू०) । वहति हव्यं वह्निः । वीतयोश्वा होत्रं हव्यमस्येत्यागमः, वीतिरशनामिति **प्राच्याः** । धनं जयति धनंजयः, संज्ञायांभृतृवृजीति (सू०) खच् । उदकनामान्युत्तराण्येकशतमिति (नि-रुक्त), कृपीटस्याम्भसो योनिर्धूमजत्वान्मेघानां, अग्नौ प्रास्ताहुतिः सम्यागिति च (मनु०), कृपीटं योनिरस्येत्येके, यदाहुः- अद्भ्योग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् (मनु०) । ज्वलति ज्वलनः, जुचङ्क्रम्येति (सू०) यु-च । जाता वेदा अस्माज्जातवेदाः, जाते जाते विद्यते वा । तनूं न पातयतीति तनूनपात्, देहधर्तृत्वात्, नभ्र-

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः ।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५३ ॥
बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ।
आशयाशो बृहद्भानुः कृशानुः पावकोऽनलः ॥ ५४ ॥
रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ।
हिरण्यरेता हुतभुग्दहनो हव्यवाहनः ॥ ५५ ॥
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ।
शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः ॥ ५६ ॥
वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् ।
त्रिषु स्फुलिङ्गोऽग्निकणः संतापः संज्वरः समौ ॥ ५७ ॥
धर्मराजः पितृपतिः समवर्ती परेतराट् ।
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः ॥ ५८ ॥

नपादिति (सू०) नञ् प्रकृत्या ॥ ५३ ॥ बर्हिःशुष्मेति व्यस्तं समस्तं वा नाम, बर्हिर्दर्भः शुष्म बलमस्येति, बर्हति वर्धते बर्हिः, यथा बर्हिर्मुखा देवाः । शुष्यन्त्यनेन शुष्मा, यल्लक्ष्यम्— शुष्मणि प्रणयनाभिसंस्थि-(स्कृ)ते (शिशु०) । बर्हिरुत्थ इत्यमरमाला, यथा– दृशां बर्हणो बर्हिरुत्थः (बा० रा०) । कृष्णो धूमो वर्त्मास्य (कृष्णवर्त्मा) । शोचींषि ज्वालाः केशा अस्य शोचिष्केशः । उषसि रात्रौ बुध्यते प्रकाशते – उषर्बुधः, अहरादीनांपत्यादिषु (वा०) इति रेफः । आशेतेऽत्रेत्याशयमाधारमश्नाती-त्याशयाशः, आश्रयाश इत्येके । बृहन्तो भानवो रश्मयोऽस्य बृहद्भानुः । कृशयति कृशानुः, कृशो यनिति वर्ध[वर्त]ते वा । पुनाति पावकः । अनित्यनेन लोक इत्यनलः ॥ ५४ ॥ रोहिताख्यो मृगोऽश्वो वाहनमस्येति रोहिताश्वः, यदि वा रोहिता लोहिता अश्वा अस्येति । वायुः सखानुचरो[वा]ऽस्य वायुसखः । आशोषु-मिच्छत्याशुशुक्षणिः, आङिशुषेःसनश्छन्दसि (उ०) इत्यनिः । हिरण्यं रेतोऽस्य हिरण्यरेताः, यत्स्मृ-[च्छु]तिः– अग्नेरपत्यं प्रथमं सुवर्णमिति । हव्यं वाहयति देवान्नयति हव्यवाहनः, हव्य(कव्य)-पुरीषपुरीष्येषुञ्युट् (सू०) ॥ ५५ ॥ दाम्यति शाम्यति विनयत्यन्नं दमुनाः, औणादिक उनस्, दमूना इत्येके, दमेरूनसिः (उ०) । शुक्रं तेजोऽस्त्यस्य शुक्रः, अर्शआदित्वादच् (सू०) । विभैव वसु धनमस्य विभावसुः । शुचिः शोधकत्वात् । अपां पित्तं सारं धूमयोनित्वादप्पित्तम् । उदर्चिश्च । क्षारस्तु भसितं भस्मेति वाच्यम् । उर्वस्यापत्यमौर्वः, वरुणभयान्मात्रा– ऊर्वौ गोपितत्वादित्येके । वाडवोऽश्वमुखत्वात् ॥ ५६ ॥ ज्वलति ज्वालः (ज्वाला वा), ज्वलितिकसन्तेभ्योणः (सू०) । (कीलः) कील बन्धे । प्रायेणार्चिः स्त्री, ज्वाला भासो न पुंस्यर्चिरिति हि वक्ष्यते, अर्च्यतेऽर्चिः । हिनोति हेतिः । शिनोति शेते वा शिखा । स्फुलति चलति स्फुलिङ्गः, जातावपि न ङीप् कन्दरावत् । संतापयति संतापः । संज्वरयति संज्वरः ॥ ५७ ॥ धर्मस्य राजा धर्मराजः । समवर्ती रिपौ मित्रे च समवर्तनात् । परेतराट् प्रेता-धिपः । कृतोऽन्तो विनाशोऽनेन कृतान्तः । शमयतीति शमनः । यमेन राजते यमराट् । यमयतीति यमः, यमलजातत्वाद्वा ॥ ५८ ॥ कलयत्यायुः कालः । श्राद्धदेवः पितृपतित्वात्, श्राद्धे देवत्वाद्वा । यद्वा विवस्वदपत्यसामान्यान्मनुवत्, यद्गुणः—श्राद्धदेवोऽर्कजो मनुः । अन्तं करोतीति, अन्तयत्यन्तकः, ण्वुल् । रक्ष एव राक्षसः, स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपीति पुंस्त्वम् । कुणपमत्ति कौणपः, शेषे (सू०) इत्यण् । क्रव्यमाममांसमत्ति (क्रव्याद्), क्रव्येचेति (सू०) क्विप् (विट्) अण् च । अस्रं रक्तं पिबत्यस्रपः, आतोऽनुपसर्गेकः (सू०), न श्रपयति क्रव्यात्त्वादश्रप इत्येके । आशृणाति हिनस्त्याशरः

कालो दण्डधरः श्राद्धदेवो वैवस्वतोन्तकः ।
राक्षसः कौणपः क्रव्यात्क्रव्यादोस्रप आशरः ॥ ५९ ॥
रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः ।
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ॥ ६० ॥
प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ।
श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥ ६१ ॥
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ।
समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥ ६२ ॥
नभस्वद्वातपवनपवमानप्रभञ्जनाः ।
प्राणोपानः समानश्चोदानो व्यानश्च वायवः ॥ ६३ ॥
शरीरस्था इमे रंहस्तरसी तु रयः स्यदः ।
जवोथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥ ६४ ॥
सत्वरं चपलं तूर्णमविलम्बितमाशु च ।
सततेनारताश्रान्तसंततविरतानिशम् ॥ ६५ ॥

॥ ५९ ॥ रात्रौ चरतीति रात्रिंचरः, चरेष्टः (सू०), रात्रेःकृतिविभाषा (सू०) इति पक्षे नुम् । कर्बुरो वर्णेन, कर्ब हिंसायां वा । निकषा रक्षसां मातेति [नाम] माला, अतो नैकषेयभ्रान्त्याकैकसेयमाहुः । यातूनि यातना धीयन्तेस्मिन् यातुधानः । पुण्यजनो विपरीतलक्षणया । निर्ऋतेर्दिक्पालस्यापत्यं नैर्ऋतः । यातयति व्यथयतीति यातुशब्दो भीमवत् । रक्षन्त्यस्माद्रक्षः । विथुरोपि । कीनाशो नानार्थे ॥ ६० ॥ प्रचेतयते प्रचेताः, असुन् । वृणोति वरुणः । यादसां जलचराणां पतिः, यादःपतिरिति वाच्ये पक्षे वाक्याभ्यनुज्ञानम् । अपां पतिरप्पतिः । श्वसन्त्यनेन श्वसनः । स्पृशति स्पर्शनः । वाति वायुः, कृवापाजीत्युण् (उ०)। मातरि खे श्वयति मातरिश्वा ॥ ६१ ॥ पृषन्मृगविशेषोश्वोस्य पृषदश्वः, पृषन्त्यम्बुकणाः सन्त्यश्वा अस्येत्यके । गन्धस्य वहः । अकारादनुपपदात्कर्मोपपदो (भवति) विप्रतिषेधेन (वा०) इत्यस्य प्रायिकत्वात्पक्षे कर्मण्यणि (सू०) गन्धवाहः । अनन्त्यनेनानिलः, न निलति वा, णिल गहने । समीरयतीत्यावि चलनशब्दार्थेति (सू०) युचि च समीरसमीरणौ, समेति समि(मी)र इत्यप्येकदेशविकृतस्यानन्यत्वात् । म्रियन्तेनेन मरुत् । मरुदेव मारुतः, स्वार्थे- अण् ॥ ६२ ॥ नभोस्यास्तीति नभस्वान्, तसौमत्वर्थे (सू०) इति भसंज्ञा । पवते पवनः, युच् । तथा पवमानः, पूङ्यजोःशानन् (सू०)। प्रभनक्ति प्रभञ्जनः । प्रकम्पनो महाबलश्च । वृष्ट्याकुलश्चण्डस्तु झञ्झामरुत् । प्रसरणेन-अपसरणेन-आसमन्तात्-ऊर्ध्वं-व्यासथा च – अनित्यनेनेति, घञ् । आनयतेर्डान्तस्यैतानि रूपाणीति योगशास्त्रम् । एते शरीरे व्यापका अपि नियतस्थानस्थाः, यदाहु :– हृदि प्राणो गुदेपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥६३॥ वायोर्धर्मानाह । रंहत्यनेन रंहः । तरन्त्यनेन तरः, असुन् । रिणाति रयते वानेन रयः, अच् । स्यन्दतेनेन स्यदः, स्यदोजवइति (सू०) साधुः । जवनं जवः, जुङ् गतौ, ऋदोरप् (सू०) । वाजोपि । वेगो नानार्थे । शिङ्घति व्याप्नोति शीघ्रम् । त्वरते स्म त्वरितं तूर्णं च, विभाषाभावादिकर्मणोः (सू०) इतीट्, ज्वरत्वरेति (सू०) उपधाया ऊठ् । लङ्घ्यते लघु । क्षिपति क्षिप्रम् । अरमव्ययं, अर्तेरचि वा नामेत्यन्ये, यच्छाश्वतः– अरमङ्गेरथाङ्गस्य शीघ्रशीघ्रगयोरपि । द्रवति स्म द्रुतम् ॥६४॥ सह त्वरया वर्तते सत्वरम् । न विलम्बते स्माविलम्बितम् । अश्नुत आशु, कृवापाजीत्युण् (उ०)। सवेगगतिवचनो जवः धर्मवचनास्तु शीघ्रादय इति – अर्थभेदः । सदागतिप्रस्तावादाह । संतन्यते स्म सततं, समोवाहिततयोरिति (का०) पक्षे मलुक् । आरतविरतावरतशब्दा विरामार्थास्ततो नञ्समासः । न श्राम्यति स्माश्रान्तम् । अविद्यमाना निशात्रानिशम्, सा हि विरतिस्थानम् ॥ ६५ ॥

नित्यानवरताजस्रमप्यथातिशयो भरः।
अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ॥ ६६ ॥

तीव्रैकान्तनितान्तानि गाढबाढदृढानि च।
क्लीबे शीघ्राद्यसत्त्वेस्यात्त्रिष्वेषां सत्त्वगामि यत् ॥ ६७ ॥

कुबेरस्त्र्यम्बकसखो यक्षराड्गुह्यकेश्वरः।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥ ६८ ॥

किंनरेशो वैश्रवणः पौलस्त्यो नरवाहनः।
यक्षैकपिङ्गैडविडश्रीदपुण्यजनेश्वराः ॥ ६९ ॥

अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः।
कैलासः स्थानमलका पूर्विमानं तु पुष्पकम् ॥ ७० ॥

स्यात्किंनरः किंपुरुषस्तुरंगवदनो मयुः।
निधिर्ना शेवधिर्भेदाः पद्मशंखादयो निधेः ॥ ७१ ॥

इति स्वर्वर्गः । १ ।

नियतं भवं नित्यम् । न जस्यति तच्छीलमजस्रं, नमिकम्पीति (सू०) रः । [संसक्तमासक्तं च ।] अतिशेते जयत्यनेनातिशयः । भरः पूर्णता, भृ भरणे, ऋदोरप् (सू०)। अतिक्रान्तं वेलामर्थं मात्रां च। बिभर्ति भृशम् । उद्गाहते स्मोद्गाढम् । निःशेषेण भरोत्र निर्भरम् ॥ ६६ ॥ तीवति तीव्रं, तीव स्थौल्ये, रक्। एको निश्चितोन्तोत्रैकान्तम् नितास्यति स्म नितान्तम् । बाहते बाढम्, क्षुब्धस्वान्तध्वान्तेति (सू०) बाढं भृशे साधु । दृढःस्थूलबलयोरिति (सू०) दृढं बलवति साधु । अतिमर्यादं दृरं च । सततमविच्छेदः प्रकर्षस्त्वतिशय इत्यर्थभेदः । असत्त्वे गुणक्रियाविशेषणत्वादद्रव्यवृत्तित्वे सति शीघ्राद्या नपुंसके, यथा – भृशं मूर्खः, भृशं याति । एतन्मध्याद्यत्सत्त्वगामि द्रव्यवृत्ति तत्त्रिलिङ्गं, यथा– शीघ्रा स्त्री, शीघ्रोश्वः, शीघ्रं कुलम् । सत्त्वगामीति किं— भरोयं, गुणातिशयोयम् ॥ ६७ ॥ कुत्सितं बेरं देहोस्येति कुबेरः, कुष्ठित्वात् । त्र्यम्बकस्य सखा त्र्यम्बकसखः, राजाहःसखिभ्यष्टच्(सू०)। मनुष्यस्येव धर्मः श्मश्रुलत्वादिरस्य मनुष्यधर्मा, धर्मादनिच्केवलात्(सू०)। धनं दयते रक्षति धनदः, एवं श्रीदः। राज्ञां यक्षाणां राजा राजराजः ॥ ६८ ॥ विश्रवसोपत्यं वैश्रवणः, विश्रवसा विग्रहो विश्रवणेन वृत्तिरविरविकन्यायेन, शिवादिभ्योऽण् (सू०)। पुलस्तेरपत्यं गोत्रं पौलस्त्यः । नरो वाहनमस्य नरवाहनः, वाहनमाहितात् (सू०) इत्यनेन नरस्यानाहितवाचित्वाद्-णत्वं नास्ति, पूर्वपदात्संज्ञायां (सू०) इत्यपि नास्ति क्षुभ्नादित्वात् (सू०)। किंनरादिस्वाम्येपि जात्या यक्षः, यजेर्यक्षेर्वा रूपम् । एकपिङ्गः पिङ्गलैकनेत्रत्वात, अतो **भागुरिणा** हर्यक्ष उक्तः । इडविडा मातास्येति, ऐलविलोपि डलयोरेकत्वस्मरणात् ॥ ६९ ॥ अस्येति प्रत्येकं संबध्यते । उद्यान्त्यस्मिन्नुद्यानम् । चित्ररथेन गन्धर्वराजेन निर्वृत्तं चैत्ररथम् । नडः कूबरं रथावयवोस्य नडकूबरः । केलयोर्जलभूम्योरास्ते, के (जले) लसनमस्य वा कैलासः स्फटिकस्तस्यायं स्फाटिकोद्रिः (कैलासः)। अलत्यलका, अल भूषणे, क्षिपकादित्वात् (वा०) इत्वाभावः । पुष्पमिव पुष्पकम्, इवेप्रतिकृतौ (सू०) कन् ॥ ७० ॥ किंचिन्नरोश्वमुखत्वात्किंनरः, कुत्सितो नरो वा, किंक्षेपे (सू०) इति समासः । मयते मयुः । नियतं धीयते निधिः, किः । शेव्यते शेवं सुखम्-प्यधनं धीयतेस्मिञ्शेवधिः । ना पुंलिङ्ग इति काकाक्षिवत् । उक्तं च— महापद्मश्च पद्मश्च शंखो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ॥ ७१ ॥ इति स्वर्वर्गः । १ ।

द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभोन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥ १ ॥
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ।
दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ॥ २ ॥
प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥
उत्तरा दिगुदीची स्याद्दिश्यं तु त्रिषु दिग्भवे ॥ ३ ॥
इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥ ४ ॥
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ ५ ॥
क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ।
अभ्यन्तरं त्वन्तरालं चक्रवालं तु मण्डलम् ॥ ६ ॥
अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ।
धाराधरो जलधरस्तडित्वान् वारिदोम्बुभृत् ॥ ७ ॥

न भ्राजतेऽभ्रम्, डः । व्यवति व्योम, ज्वरत्वरस्त्रिव्यवीति (सू०) ऊत्वम् । पुष्कं वारि राति (व्यवति) पुष्करम् । अम्बते शब्दायतेम्बरम् । न बभस्ति भाति नभः । अन्तर्ऋक्षाण्यत्रान्तरिक्षम्, पृषोदरादित्वात् (सू०) इत्वम्, द्यावापृथिव्योरन्तरीक्ष्यते वा, छान्दसमित्वम् । गच्छन्त्यनेन गगनं [वर्त्मविकारौ गमेर्गश्चेति (उ०) गः]। नास्त्यन्तोस्यानन्तम् । खन्यते खम् ॥ १ ॥ वियच्छति विरमति वियत् । विष्णोः पदं क्रमोत्र विष्णुपदम् । आकाशन्ते सूर्यादयोत्राकाशम्, न काशते वा, छान्दसो दीर्घः । विजहाति सर्वं विहायः । तारापथो मेघाध्वा च । महाबिलं देश्याम् । दिशत्यवकाशं दिक्, ऋत्विग्दधृक्स्रग्दिगुष्णिगिति (सू०) साधुः । कं स्कुभ्नाति विस्तारयति ककुप् । काशते काष्ठा । अश्नुते आशा । हरन्त्यनया हरित् ॥२॥ यथासंख्येन प्राची पूर्वा, अवाची दक्षिणा, प्रतीची पश्चिमा, सर्वनाम्नोवृत्तिमात्रेपूर्वपदस्यपुंवद्भावः (वा०) । प्राग्मध्ये पश्चाच्चार्कोञ्चत्यस्याम्, अवो मध्यार्थे । अपाचीति कात्यः, जपादित्वात्पक्षे वत्वं च । भवार्थे प्राचीनाद्याः । उत्तरत्यतिशयेनोच्चैर्वा– उत्तरा । उत्तरमञ्चत्यर्कोस्यामुदीची ॥ (दिश्यं) दिगादिभ्योयत् (सू०) ॥३॥ विदिगपि प्रसिद्ध्या दिक् । [एते क्रमात्पूर्वादीनां दिशां विदिशां च पतयः]। रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः । बुधो बृहस्पतिश्चैव दिशामीशास्तथा ग्रहाः ॥४॥ दिशां धारका गजा दिग्गजाः क्रमात्, ऐरावतः पुण्डरीकः कुमुदोऽञ्जनवामना इति **भागुरिः** क्रमं व्यत्यस्तवान् । **मालापि**– ऐरावतः सुप्रतीक इति । पुण्डरीकादिवर्णाकृतिभ्यां संज्ञा एताः । शोभनानि प्रतीकान्यङ्गान्यस्य सुप्रतीकः । करिण्योभ्रमुकपिलापिङ्गलानुपमाः क्रमात् ॥ ताम्रकर्णी शुभ्रदन्ती चाङ्गना [वामना] चाञ्जनावती ॥५॥ दिशोरिदमपदिशम्, विभक्त्यर्थेव्ययीभावः, अव्ययीभावे शरत्प्रभृतिभ्यः (सू०) समासान्तः, अव्ययीभावश्च (सू०) इति नपुंसकाव्ययत्वे । विशिष्टा दिग्विदिक्, उभयव्यपदेशात्, यदाहुः– यान्यासामन्तरालानि विदिशः प्रादिशश्च ताः (अमरमाला) । अन्तरमवकाशमालात्यन्तरालम् । चक्राकारेण वलते चक्रवालं, वाडते वा, वाडृ आप्लाव्ये । मण्ड[ण्ड्य]ते मण्डलम् । सूत्रद्वये दिशामित्यनुवर्तयन्ति प्रसङ्गात्सामान्येनेति सभ्यः ॥ ६ ॥ अभ्रत्यपो राति वाभ्रम्, अभ्र गत्यर्थः, न भ्रश्यन्त्यापोस्मादित्येके, यदुक्तं– न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः (पुराणं) । मेहति सिञ्चति मेघः, न्यङ्क्वादित्वाद् (सू०) घः । (स्तनयित्नुः) स्तनेश्चौरादिकात् स्तनिहृषिपुषिगदिमादिभ्योणेरित्नुच् (उ०) । बलाकाभिर्हीयते बलाहकः, वारिवाहको वा ॥ ७ ॥ हन्यते वायुना घनः, मूर्तौ घनः (सू०)

घनजीमूतमुदिरजलमुग्धूमयोनयः ।
कादम्बिनी मेघमाला त्रिषु मेघभवेऽभ्रियम् ॥ ८ ॥
स्तनितं गर्जितं मेघनिर्घोषे रसितादि च ।
शंपाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ॥ ९ ॥
तडित्सौदामनी विद्युच्चञ्चला चपलापि च ।
स्फूर्जथुर्वज्रनिष्पेषे मेघज्योतिरिरंमद ॥ १० ॥
इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम् ।
वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ ॥ ११ ॥
धारासंपात आसारः शीकरोऽम्बुकणाः स्मृताः ।
वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम् ॥ १२ ॥
अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ।
अपिधानतिरोधानपिधानाच्छादनानि च ॥ १३ ॥
हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ॥ १४ ॥

इति साधुः । जीवनस्य जलस्य मूतः पुटबन्धो जीमूतः । मोदन्तेऽनेन मुदिरः । धूमो योनिरस्य धूमयोनिः । कमाददते कादम्बा मेघास्ते सन्त्यस्यां कादम्बिनी, कदम्बे विकाशो वास्त्यस्याम् । मेघिका देश्याम् । (अभ्रियं) समुद्राभ्राद्घः (सू०), छान्दसत्वमतन्त्रम् ॥ ८ ॥ आदिशब्दाद् ध्वनितगर्जादि । शं पिबति शम्पा, शम्बेति प्राच्याः– शम्ब(य)ति नाशयतं तेज इति व्याख्यन् । शतह्रदोऽर्चिर्विद्यतेऽस्याः शतह्रदा, वाडवज्योतिश्शात् । ऐरावतोऽभ्रगो नागस्तस्य स्त्री– ऐरावती । क्षणप्रभा– अचिरद्युतिः ॥ ९ ॥ ताडयति तडित्, ताडेर्णिलुक्च (उ०) । सुदाम्नाद्रिणैकदिक्सौदामनी, तेनैकदिक् (सू०) इत्यण् । विद्योतते विद्युत् । चटुला [वज्रज्वाला च] देश्याम् । स्फूर्जनं स्फूर्जथुः, ट्वितोऽथुच् (सू०) । निष्पेषः संघट्टोत्थ शब्दः, अशन्याघात इत्येके । एतेन वज्राशन्योस्तडिद्भेद[द्रव]त्वं मन्यते । इरयाम्भसा माद्यति– इरंमदः, उग्रंपश्येरंमदेति (सू०) साधुः ।[धूमज्योतिःसलिलमरुतां संघ एव मेघस्तत्स्थं ज्योतिराविर्भवन्मेघज्योतिरित्युच्यते । विद्युदाख्यं वडवानलज्योतिरेव न मेघज्योतिस्तेन शम्पा शतह्रदेत्यादिशब्दा अभिलषिता इति] ॥ १० ॥ मेघप्रतिफलिता हि सूर्यरश्मयो धनुराकारेण दृश्यन्ते तदेवेन्द्रधनुरुत्पाते ऋज्ववक्रं रोहितम्, रोहः संजातोऽस्येति, लोहितत्वाद्वा, ऋत्यकः (सू०) इति प्रकृतिभावः । वर्षम्, अज्विधौ भयादीनामुपसंख्यानंनपुंसकेक्तादिनिवृत्त्यर्थम् (वा०) । तद्विघाते तस्य वर्षस्य विघाते निरोधे (अवग्राहः, अवग्रहः), अवेग्रहोवर्षप्रतिबन्धइति (सू०) घञ् (विभाषा) ॥ ११ ॥ बद्धधाराणां संततं पतनं धारासंपातः । आसरणमासारः, सृस्थिरे (सू०) इति घञ् भावे । शीकते सिञ्चति शीकरः । सृता वातेरिताः, यत्कात्यः– आसारो वेगवद्वर्षं वातास्तं वारि शीकरः । कृणोति हिनस्ति कीर्यते वा करका, क्षिपकादिः (वा०), कमण्डलौ च करक इति पुंस्यपि वक्ष्यति । अहरत्राहर्निशोपलक्षणम् । अह्नि मेघेन च्छन्नमाच्छादनमिति व्यधिकरणे सप्तम्यौ वा, यन्माधुरिः– दुर्दिनं ह्यन्धकारेऽब्दैः । वार्दलं देश्याम् ॥१२॥ अन्तर्धानमन्तर्धा, अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वात् (वा०), आतश्चोपसर्गे (सू०) इत्यङ् । (अन्तर्धिः) उपसर्गेघोःकिः (सू०) । वष्टिभागुरिरल्लोपमिति (का०) पक्षे पिधानम् । तिरोऽन्तर्धाविति (सू०) गतित्वात्समासः ॥ १३ ॥ आह्लादनाच्चन्द्रश्चासौ मिमीते कालं मस्यति परिणमते वा माश्चन्द्रमाः । मा अप्युच्यते सत्यभामाभामेतिवत् । उनत्तीन्दुः, उन्देरिच्चादेः (उ०) । विधयन्त्येनं सुरा विधुः, धेट् पाने । शुभ्रांशुः सितकरः । ओषधीरीष्ट आप्यायकत्वादोषधीशः ॥ १४ ॥ अद्भ्यो जातोऽब्जः । जीवयति जैवातृकः, जीवेरातृकन्वृद्धिश्च (उ०) । सूते सूतं

अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥ १५ ॥
कला तु षोडशो भागो बिम्बोऽस्त्री मण्डलं त्रिषु ।
भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेंऽशके ॥ १६ ॥
चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता ।
कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ॥ १७ ॥
सुषमा परमा शोभा शोभा कान्तिर्द्युतिश्छविः ॥ १८ ॥
अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ।
प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः ॥ १९ ॥
शीतं गुणे तद्वदर्थाः सुशी(षी)मः शिशिरो जडः ।
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ॥ २० ॥
ध्रुव औत्तानपादिः स्यादगस्त्यः कुम्भसंभवः ।
मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी ॥ २१ ॥

सोमः, सूयते वा, नवो नवो भवति जायमान इति श्रुतेः । ग्लायति क्षीयते ग्लौः, ग्लानुदिभ्यांडौः (उ०)। (द्विजराजः) यतः सोमो राजा द्विजातीनाम् । क्षपां करोत्युद्योतयति क्षपाकरः । सुधामूर्तिः [सुधाभृतिः] आत्रेयो रोहिणीश [सख] श्च । अमृतनिर्गमः, समुद्रनवनीतं देश्याम् ॥ १५ ॥ चन्द्रस्येति शेषः । षड्भिरधिका दश षोडश, षषउत्वंदतृदशधासूत्तरपदादेष्टुत्वंच (वा०), षोडशानां पूरणः, तस्यपूरणेडट् (सू०) । कलयति संख्याति कला । बिम्बति भाति बिम्बमाभोगः, सौत्रोयम् । भिद्यते स्म भीत्तं शकले साधुः (भित्तंशकलं) । शक्यते भेत्तुं शकलं शकलो वा । खण्डयते खण्डं खण्डो वा । खण्डलं भागच्छेदौ च । ऋध्नोति-अर्धो भागो निर्देशात्पुंसि, वाच्यलिङ्ग इत्येके, वस्तुतस्तु- खण्डमात्रवृत्तितायामभिधेयलिङ्ग इति । समप्रविभागे त्वर्धं नपुंसकम् । [सामि] दलं नेमोपि ॥ १६ ॥ चन्द्रोऽस्त्यस्यां चन्द्रिका । कुमुदानामियं विकाशहेतुत्वात्कौमुदी । ज्योतिरस्त्यस्यां ज्योत्स्ना, ज्योत्स्नातमिस्रेति (सू०) साधुः । प्रसादो नैर्मल्यम् । कल्यते लक्ष्यतेनेन कलङ्कः । अकि लक्षणे (अङ्क्यतेनेनाङ्कः) । (लाञ्छनं) लाछि लक्षणे । चहयति चिह्नं, चह परिकल्कने । लाञ्छनसाहचर्याच्चिह्नादि क्लीबे । अभिज्ञानं च ॥ १७ ॥प्रकृष्टा कान्तिः सुषमा, सुष्ठु समेति, सुषामादित्वात् (सू०) षत्वम् । काम्यते कान्तिः । छयति छिनत्त्यसारं छविः ॥ १८ ॥ अवश्यायतेऽवश्यायः, श्याद्व्यधेतिणः (सू०) । निह्रियते नीहारः । तुष्यन्त्यनेन तुषारः । तोहत्यर्दयाति तुहिनं, तुहिरर्दने । हिनोति वर्धते जलमनेनेति हिमम् । प्रलयादागतं प्रालेयं, केकयमित्रयुप्रलयानांयादेरियः (सू०) । मेहति मिहिका नीहारः, [महिकापि] । नीहाराख्या त्वन्या धूममहिषी । धूमिका च देश्याम् । (हिमानी) हिमारण्ययोर्महत्वे (वा०) ङीषानुक् च ॥ १९ ॥ गुणे जाड्ये शीतं क्लीबे, श्यैङो भावेक्तः (सू०), द्रवमूर्तिस्पर्शयोःश्यइति (सू०) संप्रसारणं, संप्रसारणस्येति (सू०) दीर्घः । तद्वदर्थाः शीतवत्पर्याया अभिधेयलिङ्गाः । सुष्ठु श्यायते सुशीमः । शिनोत्यर्थं श्यायते वा शिशिरः । जलति जडः, जल जाड्ये । शीतं लाति शीतलः । (हिमः) हिमादेः- अर्शआदित्वादच् (सू०) ॥ २० ॥ चन्द्रप्रसङ्गादागतमुक्त्वा प्रस्तुतमाह । ध्रुवति ध्रुवः, कः । उत्तानपादस्यापत्यं, ऋषित्वाद् ऋष्यन्धकेति (सू०) अणि प्राप्ते, बाह्वादित्वादिञ् (सू०) । अगं स्त्यायति स्तम्भितवानगस्त्यः । मित्रावरुणयोरपत्यं मैत्रावरुणिः, ऋषिसमुदायस्यानृषित्वादिञ्, देवताद्वन्द्वेचानङ् (सू०) । पतिशुश्रूषालोपेष्वमुद्रा, न मुदं राति, लोपामुद्रा । समानो धर्मोऽस्त्यस्याः सधर्मिणी पत्नी ॥ २१ ॥ न क्षरति नक्षत्रं, क्षर गतिहिंसनयोः, नभ्रा-

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ।
दाक्षायण्योऽश्विनीत्यादितारा अश्वयुगश्विनी ॥ २२ ॥
राधा विशाखा पुष्ये तु सिध्यतिष्यौ श्रविष्ठया ।
समा धनिष्ठाः स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियाम् ॥ २३ ॥
मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी ।
इन्वकास्तच्छिरोदेशे तारका निवसन्ति याः ॥ २४ ॥
बृहस्पतिः सुराचार्यो गीर्ष-गीष्प-तिर्धिषणो गुरुः ।
जीव आङ्गीरसो वाचस्पतिश्चित्रशिखण्डिजः ॥ २५ ॥
शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ।
अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ॥ २६ ॥
रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ ।
तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः ॥ २७ ॥

ण्नपादिति (सू०) नञ् प्रकृत्या । ऋषति गच्छति, ऋक्ष्णोति तमो वा– ऋक्षम् । भा विद्यतेस्य भम् । तरन्त्यनया तारा । (तारका) स्वार्थे कन्, तारकाज्योतिषीति (वा०) इत्वाभावः, क्लीबेपि यच्छा-श्वतः– नक्षत्रे चाक्षिमध्ये च तारकं तारकापि च, लक्ष्यं च– द्वित्रैर्व्योम्नि पुराणमौक्तिकघन(मणि)-च्छायैः स्थितं तारकैः (विद्धशाल०)। अवतेरुडुः, उड गतौ वा । दाक्षायण्योश्विनीत्यादितारा: सप्तविंशतिर्भानि । दक्षस्यापत्यं दाक्षयणी, अतइञ् (सू०) अनन्तरापत्येपि द्वैपायनवत्, यञिञोश्चेति (सू०) फक्, यद्वा– इतोमनुष्यजातेः (सू०) इत्यत्र– इञ उपसंख्यानाद् ङीष्, कौरव्यमाण्डूकाभ्यांच (सू०) इति चकारादासुरायणवत् ष्फः– तद्धितः । अश्वान् युङ्क्तेश्वयुक्, अश्वकर्मण्याम्नानात् ॥ २२ ॥ राध्नोति कार्यं राधा । विशाखति व्याप्नोति विशाखा, शाखृ व्याप्तौ । पुष्यसिध्यौनक्षत्रे (सू०) साधू, पुष्णात्यर्थान्पुष्यः, सिध्यन्त्यनेनार्थाः सिध्यः । त्विषति तिष्यः, त्विष दीप्तौ, अघ्न्यादिः (उ०) । श्रूयते शुभकर्मणि श्रविष्ठा । दधान्ति धनं करोति धनिष्ठा, श्रविष्ठनिभ्यामिष्ठन् (सू०)। प्रोष्ठौ सारौ पदावस्याः प्रोष्ठपदा, अर्थग्रहणाद् भद्रपदा, सुप्रातःसुश्वेति (सू०) साधुः, फल्गुनीप्रोष्ठपदानांचनक्षत्रे (सू०) इति वा बहुत्वम् ॥२३॥ मृगस्येव शीर्षं शिरोस्य, खे ताराणां तथावस्थानात्, शीर्षं प्रकृत्यन्तरम् । अग्रे हायनोस्या आग्रहायणी, मार्गशीर्षादारभ्य संवत्सरप्रवृत्तेः, आग्रहायण्यश्वत्थाट्ठक् (सू०) इति निर्देशादण् । इन्वका इति पञ्च तारा:, इन्वन्ति प्रीणन्तीन्वकाः, मरुतो देवता इन्वका नक्षत्रमिति श्रुतेः । इल्वलास्तारका इल्वलोसुर इति– उणादौ श्री**भोजदेवो** व्याकरोत् ॥ २४ ॥[बृहतां पतिर्बृहस्पतिः] तद्बृहतोःकरपत्योश्चोरदेव-तयोरिति (वा०) सुट्तलोपौ । गीर्पतिः– गीष्पतिः, अहरादीनांपत्यादिषु (वा०) इति वा रेफः, पक्षे कस्कादिदर्शनात् (सू०) षत्वम् । धिषणास्यास्तीति धिषणः । गृणात्युपदिशाति गुरुः, कृग्रोरुच्च (उ०) । जीव्यतेनेन मृतसंजीवनीज्ञत्वाज्जीवः । अङ्गिरसोपत्यत्वादाङ्गिरसः । चित्रशिखण्डिजः सप्तर्षिजः, समुदा-येषु हि वृत्ताः शब्दा (अवयवेषु वर्तन्ते) इति । वाचस्पतिः, अलुकि षष्ठ्याःपतिपुत्रेति (सू०) सत्वम् ॥ २५ ॥ शुक्रो रुद्रस्य शुक्रद्वारेण निर्गतत्वात् । कवेरपत्यं काव्यः, कुर्वादिभ्योण्यः (सू०), कविस्तत्भेदाद्यथा– जमदग्निर्वै पञ्चममवदानमवाद्यत्, चातुर्वर्ण्यादिष्यञ् (चतुर्वर्णादीनांस्वार्थेउपसंख्यानम्) इत्येके । वष्टीत्युशना, ऋदुशनइति (सू०) सावनङ् । भृगोरपत्यं भार्गवः । अङ्गानियर्ति पीनत्वादङ्गा-रकः, आरस्तु सीमवत् । कौ जायते कुजः । भूमेरपत्यं भौमः, शिवादित्वादण् (सू०) । वक्रोपि ॥२६॥ रोहिण्या अपत्यम् । सोमः पितापि देवतास्येति, सोमाट्ट्यण् (सू०) । श्चान्द्रमसायनिश्च । सूरस्यार्क-स्यापत्यं सौरिः, सौरस्तु तस्येदम् (सू०) इत्यणि । शनिमन्दौपङ्गुकालौ छायापुत्रोसितश्च सः ।

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ।
राशीनामुदयो लग्नं ते तु मेषवृषादयः ॥ २८ ॥
सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ।
भास्कराहस्करब्रध्नप्रभाकरविभाकराः ॥ २९ ॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥ ३० ॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ॥ ३१ ॥
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।
माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः ॥ ३२ ॥
सूरसूतोरुणोनूरुः काश्यपिर्गरुडाग्रजः ।
परिवेषस्तु परिधिरुपसूर्यकमण्डले ॥ ३३ ॥

तमस्करित्वात्तमः, सान्तत्वात्क्लीबे । रहयति भुक्त्वा चन्द्रार्कौ राहुः । स्वर्भाति स्वर्भानुः, पूर्वपदात्संज्ञायां(सू०) न णत्वम् । सिंहिकाया अपत्यं सैंहिकेयः । विधुं तुदति विधुंतुदः, विध्वरुषोस्तुदः (सू०) इति खश् । अभ्रपिशाचो ग्रहकल्लोलश्च देश्याम् । केतुः शिखीति वाच्यम् ॥ २७ ॥ सप्त च ते ऋषयश्च, दिक्संख्ये-संज्ञायामिति (सू०) द्विगुः । मुखशब्दात्क्रत्वङ्गिरोवसिष्ठपुलस्त्यपुलहाः । चित्रः शिखण्डश्चूडास्त्येषाम् । सप्तर्षिरित्येकत्वं रूढेः । (ते राशयः) मेषो वृषोथ मिथुनं कर्कटः सिंहकन्यके । तुलाथ वृश्चिको धन्वी मकरः कुम्भमीनकौ ॥ २८ ॥ सुवति सूरः । सूयते सूर्यः, राजसूयसूर्येति (सू०) साधुः । इयर्ति-अर्यमा । अदितेरपत्यमादित्यः । द्वादशात्मानो रूपाण्यस्य (द्वादशात्मा) । दिवा दिनं करोति दिवाकरः, दिवाविभाप्रभेति(सू०) टः । भास्कराहस्करौ कस्कादित्वात्(सू०) । ब्रध्नते ब्रध्नः । भासः सन्त्यस्य भास्वान् ॥ २९ ॥ विवस्तेजोस्यास्तीति विवस्वान्, तसौमत्वर्थइति (सू०) भसंज्ञायां पदकार्यं रुत्वं नास्ति । हरितो नीला अश्वा अस्य (हरिदश्वः) । विकृन्तत्यात्मानं विकर्तनः, भ्रमेण तेजःशातनात् । अर्कयति तपत्यर्कः, अर्च्यते वा । मृतण्डस्यापत्यं मार्तण्डः, मृताण्डमजाययेति मार्ताण्डो वा । मेहति मिहिरः, आदित्याज्जायते वृष्टिरिति स्मृतिः (मनु०) । अरुणोस्त्यस्यारुणः, वर्णेन वा । पूषति पर्व(वर्ध)ते पूषा, इन्-हन्पूषार्यम्णांशौ (सू०), सौच (सू०) इति नियमाद्दीर्घाभावः ॥ ३० ॥ दिवि मणिरिव द्युमणिः, अत एवाम्बरमणिर्गगनमाणिक्यादयोपि । तरन्त्यनेन तमस्तरणिः । मेद्यति मित्रः । विरोचते विरोचनः, अनुदात्तेतश्च (सू०) इति युच् । विभा दीप्तिर्वसु धनमस्य विभावसुः । अह्नः पतिरहर्पतिः, अहरादीनांपत्यादिषु (सू०) इति वा रेफः ॥ ३१ ॥ भाति भानुः । हन्ति तमो हंसः । सूयते सविता । रूयते स्तूयते रविः । कर्मसाक्षी जगच्चक्षुरंशुमाली [लोकबन्धुः] त्रयीतनुः । [इनो भगो] धामनिधिः [अ-ब्जिनीपतिरिति ज्ञेयम्] । प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः । शूरोंशुसत्तमः प्रोक्तः पद्मिनीकान्त इष्यते । मठरस्यापत्यं माठरः । दण्डोस्यास्तीति दण्डः । इन्द्रादयो ह्यष्टादश नामान्तरेणार्कपरिचारकाः, यत्सौर(तन्त्र)म्– तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः । वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो नामन[नामत]श्च सः । यमोपि दक्षिणे पार्श्वे भवेन्माठरसंज्ञया । एवमन्येयावाद्याः (पाताद्याः) [गुह-हरराहुखरादयः । तेषु प्राधान्यात्त्रय एवोक्ताः] । परितः पार्श्वे वर्तन्ते पारिपार्श्विकाः, परिमुखंच (सू०) इति चकाराट्ठक् ॥ ३२ ॥ सूतः सारथिः । (कश्यपस्यापत्यं काश्यपिः) ऋष्यन्धकेत्यण् (सू०), काश्यप इति सभ्यः पाठः, बाह्वादित्वाद्वा (सू०) । परितो (विष्यते) व्याप्यतेनेन परिवेषः । परितो धीयते परिधिः । समीपे सूर्यस्य प्रतिकृतिरुपसूर्यकम्, सूर्यमण्डलं च ॥ ३३ ॥ कीर्यते किरणः । वस-

किरणोस्रमयूखांशुगभस्तिघृणिपृश्नि(घृष्णि)यः ।
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ॥ ३४ ॥
स्युः प्रभा रुग्रुचिस्त्विड् भा भाश्छविद्युतिदीप्तयः ।
रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः ॥ ३५ ॥
कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ।
तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका ॥ ३६ ॥
इति व्योमादिग्वर्गः । २ ।

कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः ।
प्रतिपद् द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः ॥ १ ॥
घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ।
प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि ॥ २ ॥
प्रभातं च दिनान्ते तु सायं संध्या पितृप्रसूः ।
प्राह्णापराह्णमध्याह्नास्त्रिसंध्यमथ शर्वरी ॥ ३ ॥

न्त्यस्मिन् रसा उस्राः । मिनोति क्षिपति तमो मयूखः । अश्नुते– अंशुः । गां बभस्ति दीपयति गभस्तिः, पृषोदरादिः (सू०)। जिघर्ति घृणिः । पिपर्ति स्पृशति वा क्ष्मां पृश्निः, भुवं वृष्ट्यै प[व]र्षति सिञ्चति पृ[वृ]ष्णिरित्येके । कीर्यते करः । भ्रियतेऽस्मिंस्तमो मरीचिः । दीधीते दीप्यते दीधितिः ॥३४॥ प्रभादीनामादित्यरश्मित्वाभावात्पृथक्पाठः, द्युतिच्छव्योरिन्दुप्रस्तावोक्तेः पुनरिहोपादानं सामान्यार्थम् । दीप्त्यातपादयो ह्यसाधारणा अपि कविभिः साधारणीकृताः, यथा मुखदीप्तिः, चन्द्रातपः । रोचनं रुक् । भाभासौ धातुभेदात् । शोचिर्नैर्मल्यार्थोऽत्र ॥ ३५ ॥ कवंचोष्णे (सू०) इति का–कव–कत्समुदायात् त्रैरूप्यम् । एषां धर्ममात्रे क्लीबत्वं, धर्मिवृत्तित्वेऽभिधेयलिङ्गत्वम् । तेजनात्तिग्मतीक्ष्णौ । खं राति खरति वा खरम् । तद्वदिति ध क्लीबत्वं धर्मिणि त्रिष्विति दिश्यते । अत्युष्णार्थे चैतत्, यदाहुः– तिग्मं तीक्ष्णं कदुष्णं स्यात् । अन्यत्र तूपचारात्– तीक्ष्णोऽसिः । मृगाणां तृष्णास्याम् (मृगतृष्णा) । मरीचिप्रतिकृतिर्मरीचिका । ग्रीष्मे सिकतास्वर्ककराः प्रतिफलिता जलत्वेनाभान्ति, अत एव मरुमरीचिकोच्यते ॥३६॥ इति व्योमदिग्वर्गः । २ ।

कलयति कालयति वा सर्वं कालः । दिश्यते स्म दिष्टः । न– ईहतेऽत्रानेहा, अस्रुन्, ऋदुशनस्पुरुदंशोनेहसांच (सू०) इति सावनङ् । समेति समयः । पक्षस्य मूलं प्रारम्भदिनं पक्षतिः । प्रतिपद्यते उपक्रम्यतेऽनया प्रतिपत् । सा प्रतिपदाद्या यासां ताः, तन्यते तिथिः स्त्रीपुंलिङ्गः ॥ १ ॥ घसति तमो घस्यते(अद्यते)ऽस्मिन् वा घस्रः । द्यति तमो दिनम् । न जहाति कालमहः, नञिजहातेः (उ०) इति कनिन् । दीव्यति दिवसम् । वसन्त्यस्मिन् वासरम् । प्रत्यूषति निशां प्रतिरुजति, प्रतिगता– उषा वा तदा प्रत्यूषः । काले साधु काल्यं, शाश्वतः कल्यमप्याह– कल्यं प्रभातं सज्जं च कल्यो नीरोगदक्षयोः । उष(ओष)त्यर्ककरैरुषः, कसुन् । एवं प्रत्युषः ॥ २ ॥ भातुं प्रवृत्तं प्रभातं, आदिकर्मणिक्तः(सू०) । विभातं व्युष्टं च । गोसर्गो देश्याम् । प्रातः प्रगेऽव्ययम् । सायमव्ययम् । सायाह्नादिदर्शनात्, श्याद्व्यधेति(सू०) णान्तोऽपि, स्यति दिनं सायः, सायमोऽह्नि मलोपश्चेति भाष्यं त्वनिष्टनिवृत्त्यर्थम् । संध्यायन्त्यस्यां संधीयेते अहोरात्रौ वाऽस्यां संध्या । पितॄन् प्रसूते पितृप्रसूः, ब्रह्मणो ह्येषा पितृप्रसवित्री तनुः । प्रारम्भोऽपरं मध्यं चाह्नः, राजाहःसखिभ्यष्टच् (सू०), अह्नोऽह्नएतेभ्यः (सू०) । तिस्रः संध्याः समाहतास्त्रिसंध्यम् । आबन्तोवा(वा०) इति पक्षे स्त्रीत्वं नेष्टं, यन्माला– त्रिसंध्यं तु नपुंसकम् । शृणाति चेष्टाः शर्वरी ॥ ३ ॥ निश्यति तनूकरोति चेष्टा निशा, आतश्चोपसर्गे । (सू०) इति कः

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥ ४ ॥
तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्विता ।
आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ॥ ५ ॥
गणरात्रं निशा बह्व्यः प्रदोषो रजनीमुखम् ।
अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ ॥ ६ ॥
स पर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ।
पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी तु पूर्णिमा ॥ ७ ॥
कलाहीने सानुमतिः पूर्णे राका निशाकरे ।
अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः ॥ ८ ॥
सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः ।
उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ॥ ९ ॥
सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः ।
एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ॥ १० ॥

निशीथोऽस्त्यस्यां निशीथिनी, महानिशाख्या । राति सुखं रात्रिः । आद्यन्तयोरर्धयामयोर्दिनव्यवहारात्त्रियामा । क्षणमवसरं ददाति क्षणदा विश्रान्तिप्रदेत्यर्थः । क्षप्यते क्षपा, भिदादयङ् (सू०) । विभाति विभावरी, क्वनिप्, वनोरच (सू०) इति ङीप्– रश्च । रञ्जयति तमसा रजनी । यामाः सन्त्यस्यां यामिनी । ताम्यन्त्यस्यां तमी । (के भूषयन्ति स्तनमण्डलानि कीदृग्युमा चन्द्रमसः कुतः श्रीः । किमाह सीता दशवक्त्रनीता) हारा महादेवरता तमातः (विदग्ध०) इति तमापि । वासतेयी **मालायाम्** ॥ ४ ॥ रात्रिः काकाक्षिवत् । तमोऽस्त्यस्यां तमिस्रा, ज्योत्स्नातमिस्रेति (सू०)साधुः । ज्यौत्स्नी तामसीत्यण्प्रकरणे ज्योत्स्नादिभ्यउपसंख्यानं (वा०), **शाश्वतस्तु**–ज्योत्स्ना ज्योतिष्मती रात्रिर्ज्योत्स्ना चन्द्रमसः प्रभेति । पूर्वापराह्णयोः पक्षयोरिव मध्ये वर्तमानत्वात् ,वर्तमानाह्नो यदीया निशा– निशामध्येपि दिवसः– पक्षिणीत्याहुः ॥५॥ गणानां रात्रीणां समाहारः, अहःसर्वैकदेशेति (सू०) संख्यात्वादच् समासान्तः, रात्राह्नाहाःपुंसीति (सू०) असमाहारे हि पुंस्त्वम् यन्**माला**–गणरात्रं नपुंसकम् । प्रारब्धा दोषा यस्मिन् (प्रदोषः) । समाविस्येव । अर्धं रात्रेरर्धरात्रः, अर्धंनपुंसकमिति (सू०) तत्पुरुषः । नियतं शेरतेऽस्मिन् भूतानि निशीथः, अत एव **कात्यो** निशीथं सुप्तजनमाह । याति यामः । प्रह्रियतेऽस्मिन् प्रहरः, पुंसिसंज्ञायांघः (सू०) ॥ ६ ॥ स सन्धिः पर्वेति संबन्धः, **दुर्गो**ऽपि–प्रतिपत्पञ्चदश्योस्तु संधिः पर्व प्रदिक् ककुप् । **प्राच्यास्तु** पर्वसन्ध्याख्यमाख्यन् , रूपभेदात्क्लीबे । पक्षान्त इति योगकालसंज्ञा । पूर्णो माश्चन्द्रः पूर्णमास्तत्र भवा पौर्णमासी । पूर्णो मासो वर्तते वास्यां, पूर्णमासादण् । पूरणं पूर्णिः, ऋल्वादिभ्यःक्तिन्निष्ठावत् (वा०) इति नत्वं, पूर्णिं मिमीते पूर्णिमा, कः ॥ ७ ॥ सा पूर्णिमा कलाहीने निशाकरे, अनुमन्यतेऽनुमतिः । पूर्णे, राति सुखं राका । (अमाबास्या) अमा सह वसतोऽस्यां चन्द्रार्कौ । (अमावस्या) अमावस्यदन्यतरस्यां (सू०) इति ण्यति पक्षे वृध्यभावो निपात्यते । दृश्यते याज्ञिकैर्दर्शः, न दृश्यते चन्द्रोऽस्मिन् विपरीतलक्षणया । ८ ॥ सिनी सिता बाला कलास्याम् । कुहूर्विस्मापिकेत्यर्थः, कुं हन्ति तमसा वा । उपरज्यते छाद्यतेऽनेनोपरागः । ग्रहणं ग्रहः, ग्रहवृद (सू०) इत्यप् ॥ ९ ॥ इन्दू राहुग्रस्तः सोपप्लव उपरक्तश्च । एवं पूषापि । अग्निकृत उपसर्गः, उप– आसन्नमहितमस्योपाहितः, धूमकेत्वाख्य उत्पात इत्येके । एकयोक्त्या– अपृथग्वचनेन रोदसीवत्, न तु पुष्पवानिन्दुः सूर्यो वोच्यते, पुष्पं विकाशः प्रकाश इत्यर्थः ॥ १० ॥ निमेषोऽक्षिस्पन्दकालः । काशते काष्ठा । ताः काष्ठास्त्रिंशत्कलयाति कालं कला । ताः कलास्त्रिंशत्क्षणनात्क्षणः,

अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला ।
तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम् ॥ ११ ॥
ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च ।
पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ ॥ १२ ॥
द्वौ द्वौ माघादिमासौ स्यादृतुस्तैरयनं त्रिभिः ।
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः ॥ १३ ॥
समरात्रिंदिवे काले विषुवद्विषुवं च तत् ।
मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ॥ १४ ॥
पौषे तैषसहस्यौ द्वौ तपा माघेथ फाल्गुने ।
स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः ॥ १५ ॥
वैशाखे माधवो राधो ज्यैष्ठे शुक्रः शुचिस्त्वयम् ।
आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च सः ॥ १६ ॥
स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः ।
स्यादाश्विन इषोप्याश्वयुजोपि स्यात्तु कार्त्तिके ॥ १७ ॥
बाहुलोर्जौ कार्त्तिकिको हेमन्तः शिशिरोस्त्रियाम् ।
वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः ॥ १८ ॥

क्षणु हिंसायाम् । ते क्षणा द्वादश, मुहुरियार्ति मुहूर्तो द्विघटिकम् ॥ ११ ॥ ते मुहूर्तास्त्रिंशदह्ना सहिता रात्रिरहोरात्रः, अहःसर्वैकदेशेत्यच्(सू०), द्वन्द्वे त्वहोरात्राविमौ पुण्यौ । तेहोरात्राः पञ्चदश, पचाति भूतानीति पक्षः, पक्ष परिग्रहे वा । शुक्लो मासस्य पूर्वपक्षः कृष्णस्त्वपरः, यतश्चैत्रसिताद्या मासाः । तौ पक्षौ माश्चन्द्रस्तस्यायं मास इति निर्वचनेन चान्द्रेण मानेनायम् । सौरसावननाक्षत्रमानैस्त्वन्यथा, मस्यति मिमीते वा (मास) ॥१२॥ इयर्ति ऋतुः । माघाद्युपक्रमस्ततोयनारम्भात् । यदाह तैर्ऋतुभिस्त्रिभिः, अयतेर्कोनेनायनम् । उत्तरा दक्षिणा च यार्कस्य गतिः, ते द्वे अयने मिलिते वत्सरो वर्षम् ॥१३॥ समौ रात्रिंदिवौ यत्र, अचतुर– (सू०) इत्यादिना साधुः । विषु साम्येव्ययम्, तद्विद्यतेस्य विषुवत्, विषुवं च, वो मत्वर्थे लिङ्गात् (अन्येभ्योपि दृश्यते) । विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः (वा०) इति हि विषुव(ण)शब्दो युक्तः । मृगशीर्षेण युक्ता मार्गशीर्षी पौर्णमास्यस्मिन्, सास्मिन्पौर्णमासी (सू०) इत्यण् । सहोस्त्यस्मिन् सहाः, मत्वर्थेमासतन्वोरिति (सू०) यत, तस्य लुगकारेकाररेफाश्चेति (वा०) पक्ष लुक्, पुंस्त्वं लोकात्, सहश्च सहस्यश्च हैमन्तिकावृतू इति छान्दसम् । एवं तपाः– नभाः । भीमवन्मृगशीर्षस्य मृगत्वान्मार्गः । आग्रहायणी पौर्णमास्यस्मिन्नाग्रहायणिकः, आग्रहायण्यश्वत्थाट्ठक् (सू०) ॥ १४ ॥ (पौषः– तैषः) प्राग्वदण्– द्वयम् । तथा च– पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा । नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे –इति क्वचित्पाठोस्ति । सहोस्यास्तीति सहस्यः, मत्वर्थेमासतन्वोरिति (सू०) यत् । एवं तपस्यनभस्यौ । तपोस्यास्तीति तपाः । (फाल्गुनिकः) विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यष्ठक् (सू०) मधुर्वसन्तोस्यास्तीति मधुः, मघोर्णच (सू०) इति नस्य वा लुक् ॥ १५ ॥ राधया युक्ता पौर्णमासी– अस्मिन् राधः । शुच्विद्यतेस्य शुक्रः, लुगकारेकाररेफाश्च (वा०) इति रेफः । शुच्विद्यतेस्य शुचिः, इकारः । न भासनं मेघच्छन्नत्वादस्त्यस्य नभाः ॥ १६ ॥ भीमवद्भद्र(या)युक्ता भाद्री पौर्णमास्यस्मिन् भाद्रः । इष्यते– इडन्नं विद्यतेस्य– इषः, अकारः ॥१७॥ बहुलाभिर्युक्ता बाहुली पौर्णमास्यस्मिन् बाहुलः । ऊर्क्–अन्नं बलं वास्यास्तीति–ऊर्जः । हिमान्तोस्य हेमन्तः, पृषोदरादिः (सू०) । (शिशिरः) शिनोत्यर्थं शीतेन, शिञ् निशाने । वसन्त्यस्मिन् सुखं, वस्ते भुवं वा वसन्तः, झच् । सुरु-

निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ।
स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्स्त्रियाम् ॥ १९ ॥
षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ।
संवत्सरो वत्सरोऽब्दो हायनः स्त्री शरत्समाः ॥ २० ॥
मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः ।
दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम् ॥ २१ ॥
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ।
संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥ २२ ॥
अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम् ।
कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम् ॥ २३ ॥

रभते सुरभति वा सुरभिः । फल्गुर्देश्याम् । गिरन्त्यम्बु ग्रीष्मः । ऊष्मप्रतिकृतिरूष्मकः ॥१८॥ निदह्यतेऽस्मिन् निदाघः, घञ्, न्यङ्क्वादित्वात्कुत्वम् (सू०) । उष(ओष)ति– उष्णः । तपति तपः, अच्, यल्लक्ष्यम्– तपेन वर्षाः शरदा हिमागमः (शिशु०) । प्रवर्षति प्रावृट्, नहिवृतिवृषीति (सू०) दीर्घः। भूम्नि बहुत्वे, वर्षमस्त्यासां वर्षन्ति वा वर्षाः । शीर्यन्तेऽस्यां पाकेनौषधयः शरत् ॥ १९ ॥ **यत्कात्यः**— आरभ्य मार्गशीर्षाच्च द्वौ द्वौ मासावृतुः स्मृतः । हेमन्ताद्धि वत्सरस्यारम्भः । ऋतुः पुंलिङ्गः । संवसन्ति ऋतवोऽस्मिन् संवत्सरः, ऋतुपरिवर्तात्मा ह्यसौ, यद्**भागुरिः**— सर्वर्तुपरिवर्तस्तु स्मृतः संवत्सरो बुधैः । परिवत्सरोऽपि । इदावत्सर इद्वत्सरोऽनुवत्सरश्च ज्योतिषे । आप्यतेऽब्दः । जहाति--ऋतून् हायनः, ह्रश्चव्रीहिकालयोः (सू०) इति ण्युट् । समन्ति समाः, सह मान्ति वर्तन्ते ऋतवो यासां वा, स्त्रीबहुत्वेयं यथा-- जीव्यात्सहस्रं समाः । समांसमांविजायते (सू०) इत्येकत्वेऽपि दृश्यते ॥ २० ॥ मासेन पौरुषेणेति शेषः। पितॄणामयं पैत्रः, देवतार्थे पित्र्यः स्यात् । तत्र कृष्णः पक्षोऽहः शुक्लो रात्रिः । वर्षेण पौरुषेणेति शेषः ।[देवतानामयं दैवतोऽहोरात्रः] तत्रोत्तरायणमहः– दक्षिणायनं रात्रिः । [ब्रह्मणोऽयं ब्राह्मः] अहोरात्र इत्येव । दैवैर्हि सषष्टिः (षष्ट्यधिकैः) त्रिभिरहोरात्रशतैर्दिव्यं वर्षं, तैर्द्वादशभिः सहस्रैर्लौकिकं चतुर्युगं, तच्च देवानामेकं युगं, तत्सहस्रं ब्रह्मणो दिनं भूतानां स्थितिकालः, तावत्येव रात्रिर्भूतानां प्रलयकालः । [**यन्मनुः**]– चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम् । तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ॥ इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु । एकापायेन वर्तन्ते सहस्राणि शतानि च ॥ यदेतत्परिसंख्यातमादावेव चतुर्युगम् । एतद् द्वादशसाहस्रं देवानां युगमुच्यते ॥ [दैविकानां युगानां तु सहस्रं परिसंख्यया । ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरुच्यते ॥] ये द्वे दैवे युगसहस्रे तौ नृणां कल्पौ, सर्वनाम्नां विधीयमानानूद्यमानलिङ्गग्रहणे कामचारः । एकः स्थितिं कल्पयति, द्वितीयः क्षयं कल्पयति (अतः कल्प इत्युच्यते) ॥२१॥ मनूनां स्वायंभुव[स्वारोचिषौत्तमितामसिरैवत]चाक्षुषवैवस्वतादीनां प्रजापतीनामन्तरमवकाशोऽवधिर्वा । तैर्हि चतुर्दशभिर्मन्वन्तरैर्ब्रह्मणो दिनम् । संवर्तते प्रलीयते कल्पते क्षीयतेऽस्मिन् वा जगत् । कल्पस्यान्तोऽवधिः कल्पान्तः । एकः कल्पोऽत्र क्षयार्थोऽन्यो ब्रह्मदिनार्थः, यच्छ**ाश्वतः**– कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने । संहारो युगात्ययः परिवर्तश्च ॥ २२ ॥ क्षयहेतुं पापमाह । पच्यते पङ्कः । पात्यस्मात्पाप्मा पापं च । केलयति किल्बिषम् कलयति कल्मषं कलुषं च । वर्ज्यते वृजिनम् । एत्येनः । न जहात्यघम् । अंहत्यंहः । दुरेति दुरितम् । दुष्क्रियते स्म दुष्कृतम् । एनोंहश्च सान्तौ । **मालकथा** किल्बिषम् । मलोनेकार्थेषु ॥ २३ ॥ धारणाद्धर्मः,

स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।
मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः ॥ २४ ॥
स्यादानन्दथुरानन्दः शर्मशातसुखानि च ।
श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥ २५ ॥
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ।
शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥ २६ ॥
मतल्लिका मचर्चिका प्रकाण्डमुद्घतल्लजौ ।
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ॥ २७ ॥
दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः
हेतुर्ना कारणं बी-बीजं निदानं त्वादिकारणम् ॥ २८ ॥
क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् ।
विशेषः कालिकोवस्था गुणाः सत्त्वं रजस्तमः ॥ २९ ॥
जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।
प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥ ३० ॥

यागाङ्गे नपुंसकं- तानि धर्माणि प्रथमान्यासन् (श्रुतिः), फले तु पुमान्- एष धर्मः सनातनः (मनु०) इति विशेषोस्य नेष्टः । लोकधर्मा नाव्यधर्मेति पारिभाषिको धर्मन्शब्दोप्यस्ति । पुनाति पुण्यं पुण्यकर्मणि शुभे च । अतिशयेन प्रशस्यं श्रेयः । ईयसुनि प्रशस्यस्यश्रः (सू०) । सुक्रियते स्म सुकृतम् । वर्षति वृषः, कः । प्रमदसंमदौहर्षे (सू०) साधू ॥ २४ ॥ आनन्दनमानन्दथुः, ट्वितोथुच् (सू०) । शृणाति क्लेशं शर्म । श्यति दुःखं शातं, शो तनूकरणे, तन् । शोभनानि खानीन्द्रियाण्यस्मिन् सुखयति वा सुखम् । श्व आगामि श्रेयोत्र श्वःश्रेयसं, श्वोवसीयं च, श्वसोवसीयःश्रेयसः (सू०) इत्यच् । भन्दते भद्रं, भदि कल्याणे । कल्यं नीरुजत्वमणति कल्याणम् । मङ्ग्यते मङ्गलम् । शोभते शुभम् ॥ २५ ॥ भवनशीलं भावुकं, (लषपतपद)स्थाभूवृषेति (सू०) उकञ् । प्रशस्तो भवोस्यास्ति भविकम् । भवनार्हं भव्य, भव्यगेयेति (सू०) साधुः । कुशान्- लाति कुत्सितं श्यति वा कुशलम् । क्षिणोति क्लेशान् क्षेमः । शस्यते स्म शस्तम् । प्रशस्तं च । निःश्रेयसं **मालायाम्** । सूनृतं **कात्यः** । द्रव्य इति विशेष्यालिङ्गतायामभिधेयालिङ्गम् । आदिशब्दात्कलुषश्रेयःशिवभद्रादयः ॥ २६ ॥ निरस्तावयवा एवैते प्रशंसार्थाः, अत एव प्रशंसावचनैश्च (सू०) इति नित्यसमासः । प्रशस्तो गौर्गोमतल्लिका, ब्राह्मणमचर्चिका, गोप्रकाण्डम्, कठोद्घः, कुमारीतल्लजः, तल्लजक इति तु लक्ष्यम् । संघोद्घौगणप्रशंसयोरिति (सू०) उद्घोऽसमासेपि । एत्ययः ॥ २७ ॥ देवस्यात्मन इदं दैवं पूर्वकर्म । दिश्यते स्म दिष्टम् । भगस्यैश्वर्यादेरिदं भागं, भागमेव भागधेयम्, भागरूपनामभ्योधेयः (वा०) । भागाद्यच्च (सू०) भाग्यम् । नियम्यतेनया नियतिः । विधीयतेनेन विधिः । भविष्यद् भवितव्यता च । हिनोति हेतुः । कार्यतेनेन कारणम् । वीज्यतेनेन वेति वा वीजम् । निदीयते जन्यतेनेन निदानम् । आदावारम्भे कारणमुपादानकारणम्, सहकारिकारणमन्यत् ॥ २८ ॥ (क्षेत्रं) देहमात्रं चेतयते क्षेत्रज्ञः । अतति संचरत्यात्मा । पुरि शयनात्पुरणाद्वा पुरुषः । प्रधत्तेन्तः सर्वं प्रधानम् । प्रारम्भात्क्रियतेनया प्रकृतिः, सत्त्वरजस्तमसां साम्यावस्था- अव्यक्ताख्या । कालकृतो देहादेर्भेदोवस्था- अन्यथास्थितिर्यौवनादिः । गुणाः प्रकृतेर्धर्माः । सत्त्वं साधुत्वप्रकाशकं ज्ञानसुखहेतुः । रजो रागात्मकं दुःखहेतुः । ताम्यत्यनेन तम आवरकं मोहहेतुः ॥ २९ ॥ जननं जनुः, जनेरुसिः (उ०) । उत्पत्तिसाहचर्याज्जनिः स्त्री, इक्(ण्)। जन्मी, व्रीह्यादित्वात् (सू०) । जायते जन्युः ॥ ३० ॥ (व्यक्तिः)विशेषाख्या । चेतति चित्तं, क्तः,

जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता ।
चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ ३१ ॥

इति कालवर्गः । ३ ।

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥ १ ॥
धीर्धारणावती मेधा संकल्पः कर्म मानसम् ।
चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा ॥ २ ॥
अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः ।
संदेहद्वापरौ चाथ समौ निर्णयनिश्चयौ ॥ ३ ॥
मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम् ।
समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥ ४ ॥
संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ५ ॥

असुनि चेतः । ह्रियते विषयैर्हृदयम् । स्वनति स्वान्तं, क्षुब्धस्वान्तेति (सू०) साधुः । ह्रियते हृद् दान्तं प्रकृत्यन्तरमस्ति, तदाधारोपि हृत्पुण्डरीकम् । मन्यते मनः मन । एव मानसम्, स्वार्थेऽण् ॥ ३१ ॥ इति कालवर्गः । ३ ।

मनुते मनीषा, मनस एव- ईषा वा । दे(दि)धिष्टि धिषणा, धिष शब्दे । ध्यायति धीयते वास्यां धीः । शेते शेः- मोहस्तं मुष्णाति शेमुषी, शमेः क्सावेत्वाभ्यासलोपे ङीब्वा । उपलब्धिर्बा- हुलकात्क्तिन्, षित्वादङि तूपलम्भा स्यात् । प्रतिपत्तिः प्रतिपत्, सर्वे गत्यर्था ज्ञानार्थाः । ज्ञप्तिः, कथं- चित्तोषणार्थे, मितांह्रस्वः (सू०) । सांख्ये बुद्धिधर्मस्यैते पर्यायाः, वैशेषिकादौ चतुर्दशापि बुध्यर्थाः ॥ १ ॥ मेधते संगच्छतेस्यां मेधा । मनसो व्यापारः संकल्पः । विकल्पोपि । पूर्वोक्तस्य चित्तस्य संतानद्वारेण स्थै[धै]र्यमाभोग इति बौद्धाः । पुनःपुनर्मनसि करणं मनस्कारः, अतः- कृकमीति (सू०) सत्वम् । समाधानमवधानं प्रणिधानं च । चर्चनं संख्यानं विचारश्च । विमर्शो वासना भावना, संस्कारोनुभूताद्यविस्मृतिरिति वक्तव्यम् ॥ २ ॥ अध्याहरणमपूर्वोत्प्रेक्षणम् । तरत्यनेन संशयविपर्ययो तर्कः, तर्कणं वा, तर्क भाषार्थः । उभयकोटिस्पृग्ज्ञानं विचिकित्सा- एकत्रानारूढेः, कितः संशये सन् । शीङ्दिहोर्नानार्थयोः संशब्देनैषोर्थो द्योत्यते, उपसर्गस्य वा सोर्थो धातुपाधिवशात्प्रकाशते । एवं सर्वत्र । द्वौ पक्षौ परौ यत्र द्वापरः, पृषोदरादित्वात् (सू०) आत्वम् ॥ ३ ॥ मिथ्यादृष्टिः परलोकाभावबुद्धिः । नास्ति परलोक इति मतिर्यस्य, अस्तिनास्तिदिष्टंमतिः (सू०) इति ठक् । व्यापादनं व्यापादः, ण्यन्तादच् । राद्धः सिद्धोन्तो निश्चयोस्य राद्धान्तः । मिथ्यामतिरतस्मिंस्तदिति ज्ञानम् ॥ ४ ॥ पक्षोक्तिः प्रथिताङ्गीकारश्चेत्युभयीह प्रतिज्ञा । संविज्ज्ञानं, यथा- सत्संवित्करणातीता, नियमोपि, यथा- संविदं लङ्घयेच्च सः । धातूनामनेकार्थत्वादुपसर्गवशाद्वा तत्तदर्थत्वम् । आगमनमागूः, भ्रमेश्च डूः (उ०) इति चकाराड् डूः ॥ ५ ॥ मोक्षविषया मोक्षफला वा धीः (ज्ञानम्) । मोक्ष [प्रतिपादक]शास्त्रादन्यत्र शिल्पे चित्रादौ शास्त्रे च धीर्विज्ञानम् । मोचनं मुक्तिः- मोक्षः पाशेभ्य आत्मनः पृथग्भावः । अत एव कैवल्याख्या । निर्वात्यस्मिन्निति निर्वाणं, निर्वाणोऽवात इति (सू०) साधुः, पैओवै शोषणे । अतिशयेन प्रशस्यं श्रेयः । निश्चितं श्रेयो निःश्रेयसम्, अचतुरेति

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।
मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ ६ ॥
मोक्षोपवर्गोथाज्ञानमविद्याहंमतिः स्त्रियाम् ।
रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥ ७ ॥
गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् ।
कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम् ॥ ८ ॥
तुवरस्तु कषायोस्त्री मधुरो लवणः कटुः ।
तिक्तोम्ललश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु ॥ ९ ॥
विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।
आमोदः सोतिनिर्हारी वाच्यलिङ्गत्वमागुणात् ॥ १० ॥
समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः ।
इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः ॥ ११ ॥
पूतिगन्धिस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत् ।
शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ॥ १२ ॥

(सू०) साधुः । अविद्यमानं मृतमत्रामृतम् ॥ ६ ॥ भावेभ्योपवर्जनमपवर्गः । महानन्दोपुनर्भवश्च । विरुद्धं वेदनमविद्या, अधर्मानर्थवद् विपर्यये नञ्, यदाह– अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या । अहमित्यस्य मननमहंमतिः, अनात्मन्यात्माभिमानात्, अहमिति विभक्तिप्रतिरूपको निपातः । रूपाद्याः पञ्च, विसिन्वन्ति बध्नन्ति विषयाः, पचाद्यच् (सू०), परिनिविभ्यः सेवसितसयेति (सू०) षत्वम् ॥ ७ ॥ गाव इन्द्रियाणि चरन्त्येषु गोचराः, गोचरसंचरेति (सू०) साधुः । इन्द्रियैरर्थ्यन्त इन्द्रियार्थाः । अर्थाश्च । हृष्यत्यनेन हृषीकम् । विषयोस्यास्तीति विषयि । इन्द्रस्यात्मनो लिङ्गमिन्द्रियं, इन्द्रियमिन्द्रलिङ्गं (सू०) इति साधु । वाक्पाणिपादपायूपस्थाख्यं वचनादानगत्युत्सर्गानन्दरूपकर्मसाधनमिन्द्रियम् । मनःषष्ठानि नेत्रजिह्वाघ्राणत्वक्श्रोत्राणि धीहेतवो बुद्धीन्द्रियाणीत्यर्थः ॥ ८ ॥ तु इति सौत्रादावरणार्थादौणादिको वरच् । कषति कण्ठं कषायः । मधु माधुर्यमस्यास्तीति मधुरः, ऊषसुषीति (सू०) रः । लुनाति जाड्यं लवणः, नन्द्यादित्वात् (सू०) ल्युः, णत्वं च । कटत्यावृणोति कटुः । तेजति स्म तिक्तः । अम्बत्यम्ललः, अमेर्ल इत्येके– अम्लमाहुः । तुवराद्याः षट्, रस्यन्त इति रसाः । गुणमात्रे रसः पुंसि, गुणवद्वृत्तित्वे तेभिधेयलिङ्गाः ॥ ९ ॥ सुरभिमाल्यगन्धादिपरिमर्दनोत्पन्नो हृद्यो गन्धः परिमलः । स गन्धोतिदूरव्यापी मनोहारी वा, समन्तान्मोदन्तेनेनामोदः । वाच्यलिङ्गत्वमागुणात्– अधिकारोयम्, (अधिकारार्थः) गुणाः शुक्लादय इत्येतस्मात्प्रागभिधेयलिङ्गाः ॥ १० ॥ अत्र यो यं प्रति प्रसिद्धस्तदनुवादे नान्यविधिः । निर्हरत्यवश्यं निर्हारी । सुष्ठु रभते सुरभिः । शोभनो गन्धोस्य सुगन्धिः, गन्धस्येदुत्पूतीति (सू०) इत् । मुखं वासयत्यनुलिम्पति मुखवासनः, मुखवासयोग्य इत्येके, मुखवासस्यागुरुवासन इति भागुरिः, यतः–आमोदो निर्ह्रोस्यास्ति अन्ये द्वौ द्वौ भिन्नावाहुः ॥ ११ ॥ पूयी विस(श)रणे दुर्गन्धे च, पूतिर्विस्रः पूतेरिव वा गन्धोस्य । विस्यति विस्रं, विस उत्सर्गे । आमोपक्को मलस्तस्येव गन्धोस्यामगन्धि, उपमानाच्च (सू०) इतीत् । शोकति मनोस्मिञ्छुक्लः, शुक गतौ । शोभते शुभ्रः । शुच्यति शुचिः । श्विता वर्णे, श्वेतते श्वेतः । विशीयते विशदः, विशति चित्ते वा । श्यायते श्येतः । पण्डते याति मनोस्मिन्पाण्डरः– उणादौ (अरः) ॥ १२ ॥ अवद्यायते शोध्यतेवदातः । सिनोति मनः सितः, षिञ् बन्धने । गो(गु)रते मनोस्मिन्गोरः, गुरी उद्यमे

अवदातः सितो गौरोवलक्षो धवलोर्जुनः ।
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः ॥ १३ ॥
कृष्णे नीलासितश्यामकालश्यामलमेचकाः ।
पीतो गौरो हरिद्राभः पालाशो हरितो हरित् ॥ १४ ॥
लोहितो रोहितो रक्तः शोणः कोकनदच्छविः ।
अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ॥ १५ ॥
श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते ।
कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥ १६ ॥
चित्रं किर्मीरकल्माषशव-ब-लैताश्च कर्बु-र्बु-रे ।
गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ॥ १७ ॥

इति धीवर्गः । ४ ।

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।
व्याहार उक्तिर्लपितं भाषित वचनं वचः ॥ १ ॥

गौर एव गौरः । अवलक्ष्यतेवलक्षः । धूयते मलोस्य धवलः, धावेर्ह्रस्वश्चेति श्रीभोजः । अर्ज्यतेर्जुनः । हरति हरिणः । पाण्डुः पाण्डुत्वमस्यास्तीति पाण्डुरः, नगपांसुपाण्डुभ्योरः (वा०) । ईषदव्यक्तः पाण्डुः, धूनोति चेतो धूसरः ॥ १३ ॥ वर्णान् कर्षति कृष्णः । नील वर्णे, कः । सितविरुद्धोसितः । श्यायते श्यामः । श्यामं श्यामत्वं लाति श्यामलः । कालयति मनः कालः । मेचयति (मचति) मिश्रीभवति मेचकः, मेचकः शिखिकण्ठाभ इति दुर्गः । पीयते वर्णात् पीतः । पलाशस्य वर्णस्यायं पालाश : पीतरक्तकृष्णः, शाश्वतः पलाश इत्याह– राक्षसे किंशुके पर्णे पलाशाख्यं हरित्यपि । हराति हरितः ॥ १४ ॥ रोहति रोहितः, रलयोरेकत्वम् । शोणति शोणः, शोणृ वर्णे । कोकनदच्छविः पद्माभः । पीतरक्तस्तु पिञ्जरः । रागोत्र लौहित्यम् । इयर्त्यरुणः । पाटलवर्णः (पाटलः), पाटेरलज्वा ॥ १५ ॥ श्यायते श्यावो धूसरारुणः । कपेर्मर्कटस्येव वर्णोस्त्यस्य कपिशः, लोमादित्वात् (सू०) शः । धूनोति धूमं राति वा धूम्रः । धूमवर्णं लाति धूमलः । कडति कडारः । कपिवर्णं लाति कपिलः । पिञ्जति पिङ्गलः । पिंशति पिशङ्गः । कन्दते कद्रुः । पिङ्गं लाति पिङ्गलः । बभ्रुरनेकार्थे । पिशङ्गो रोचनापाण्डुरिति कात्यः ॥ १६ ॥ चीयते चित्रम् । कीर्यते किर्मीरः । कलयति वर्णान् कल्माषः । शवति याति वर्णान्शवलः । एति वर्णानेतः । क्रियते वर्णैः कर्बुरः, कर्वति वा । गुणमात्रे वर्तमाना गुणाः पुंसि, पटस्य शुक्लः । गुणवद्वृत्तितायां त्वभिधेयलिङ्गाः, शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम् । वर्णादनुदात्तात्तोपधात्तोनः (सू०) इति श्येनी श्येता, लोहिनी लोहिता ॥ १७ ॥ इति धीवर्गः । ४ ।

रूपभेदानुक्त्वा शब्दभेदानाह ब्राह्मीत्विति । ब्रह्मण इयं ब्राह्मी, ब्राह्मोजाताविति (सू०) साधुः । अत एव शब्दब्रह्मणोधिष्ठात्र्याः पर्याया एते । व्याहारादयस्त्वधिष्ठेयाः । बिभर्ति भारती । भाष्यते भाषा । गृणाति गीः । उच्यते वाक्, क्विब्वचिप्रच्छीति (वा०) क्विप्, दीर्घोसंप्रसारणं च । वाण्यते शब्द्यते वाणी । सरः प्रसरणमस्त्यस्याः सरस्वती । उच्यते वचः, असुन् ॥ १ ॥ संस्कृतादपभ्रश्यत इत्यपभ्रंशः । अपभ्रष्टः शब्दोपशब्दः, गावी गोणी गोपोतालिकादिः । शास्त्रे व्याकरणतर्कशास्त्रादौ यो वाचकः स शब्दः, लोके समुद्रघोषादिरपि । वक्तव्यं वाक्यं, चजोःकुघिण्यतोः (सू०), वचोऽशब्दसंज्ञायां (सू०) इत्यन्यत्र वाच्यम् । तिङन्तसमूहो यथा– पचति भवति– पाको भवतीत्यर्थः । सुबन्तचयो यथा– शक्तासि-

अपभ्रंशोपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः ।
तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥ २ ॥
श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ।
स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ॥ ३ ॥
शिक्षेत्यादि श्रुतेरङ्गमोङ्कारप्रणवौ समौ ।
इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ॥ ४ ॥
आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।
आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ॥ ५ ॥
प्रबन्धकल्पना कथा प्रवह्लिका प्रहेलिका ।
स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ॥ ६ ॥

क्षमिदं हि महात्मनाम् (भर्तृ०), भवत्यध्याहारस्त्वत्र हि वाचकमात्रम् । कारकैरन्विता संबद्धार्था वा क्रिया वाक्यम्– देवदत्त गामभ्याज शुक्लां दण्डेन । सर्वत्राकाङ्क्षायोग्यतावशादन्वितत्वं लक्षणं, यज्जैमिनिः— अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् । भट्टोपि— साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् । कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यते ॥ एकं शब्दात्मनोन्यदर्थात्मकस्य वाक्यस्य लक्ष्मेत्येके ॥ २ ॥ श्रूयते श्रुतिः । विदन्त्यनेन धर्मं वेदः । आम्नायते पारंपर्येणाम्नायः । त्रयोवयवास्त्रयी, अथर्वणस्त्रय्युद्धारः । त्रय्यनुवादाच्छ्रुत्यादिविधिरिति लिङ्गसंकरदोषो नोद्भावनीयः । निगमोनेकार्थे । वैदिको विधिः– चोदनालक्षणोर्थो धर्मः, यद् **गौतमः**— श्रुतिस्मृतिविहितो धर्मः । स्मृत्युक्तोपि वैदिक एव, वेदमूलत्वात्स्मृतेः । तद्विधिरिष्टाख्यस्त्रयीधर्मोन्यः पूर्ताख्य इत्येके । ऋच्यते स्तूयतेनया ऋक् । स्यति पापं साम । इज्यतेनेन यजुः ॥ ३ ॥ अङ्ग्यते ज्ञायतेनेनाङ्गमुपकारकम्, शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते । (ओङ्कारः) स्वार्थे कारः, वर्णात्कारः (वा०) इत्यत्र निर्णीतत्वात् । प्रणूयते प्रणवः । इति ह आसीदत्रेतीतिहासः, इतिरेवमर्थे, हः किलार्थे । पुरावृत्तं पूर्वचरितम् । उदात्तानुदात्तस्वरिताः, ऊर्ध्वमादीयत इत्युदात्तः । एकश्रुतिस्तु स्वराविभागः ॥४॥ प्रत्यक्षागमाभ्यामीक्षितस्य पश्चादीक्षणमन्वीक्षा, सा प्रयोजनं यस्याः सान्वीक्षिकी तर्कविद्या । दम्यतेनेन दमनं वा दण्डः, स नीयते दम्यं प्रति प्राप्यते यया सा दण्डनीतिरर्थशास्त्रम् । वार्त्ता वैश्यवर्गे वक्ष्यते । आचष्टे–आख्यायिका वृत्तार्थकथनाद्धर्षचरितादिः । पुरापि नवं (भवं) पुराणं यतः– सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चैव पुराणं पञ्चलक्षणम् (विष्णुपु०) ॥ ५ ॥ प्रबन्धस्य कल्पना कथा कादम्बर्यादिरुत्पाद्यत्वात् । प्रवह्लते प्राधान्यं भजते प्रवह्लिका । प्रहेलयत्यभिप्रायं सूचयति प्रहेलिका, हिल हावकरणे । शाब्दी प्रहेलिका यथा– पानीयं पातुमिच्छामि त्वत्तः कमललोचने । यदि दास्यसि नेच्छामि नो चेद् दास्यसि देहि मे ॥ आर्थी यथा– जइ सासुआइ भणिआ पइवासहरम्मि दीवअं देसु । ता की समुद्धऊ[अ]मुही हिअअम्मि णिवेसए[अ]दि (दि)ट्ठिम् ॥ (यदि श्वश्वा भणिता पतिवासगृहे दीपकं देहि । तत् किं समुद्धृ[द्ध]तमुखी हृदये निवेशयाति दृष्टिम् ॥) उत्सन्नविप्रकीर्णशाखानां मन्वादिभिः स्मरणं स्मृतिः । धर्मः संधीयतेस्यां धर्मसंहिता । समाहरणं संक्षेपः ॥ ६ ॥ अपूर्णःवाद्विक्षिप्तं[द्विवाक्षितं] समस्यते संक्षिप्यतेनया समस्या, संज्ञायांसमजेति (सू०) बाहुलकात्क्यप्, ऋहलोर्ण्यति (सू०) वा, संज्ञापूर्वकत्वाद् वृद्ध्यभावः, समात्क्यचि सर्वप्रातिपदिकेभ्यः (वा०) सुच् इत्येके, ततः अप्रत्ययात् (सू०), यथा– दामोदरकराघात विह्वलीकृतचेतसा । दृष्टं चाणूरमल्लेन शतचन्द्रं नभस्तलम् ॥ किं वदन्तीति किंवदन्ती लोकप्रवादः । वृत्तिर्लोकवृत्तं विद्यतेस्यां वार्त्ता, प्रज्ञाश्रद्धार्चावृत्तिभ्योणः (सू०)। वृत्तस्य चरितस्यान्तो वृत्तान्तः । उद्यते– उदन्तः, वदेर्झच् (सू०)।

समस्या तु समासार्था किंवदन्ती जनश्रुतिः ।
वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ॥ ७ ॥
आख्याह्वे अभिधानं च नामधेयं च नाम च ।
हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ॥ ८ ॥
विवादो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखम् ।
उपोद्घात उदाहारः शपनं शपथः पुमान् ॥ ९ ॥
प्रश्नोनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे ।
मिथ्याभियोगोभ्याख्यानमथ मिथ्याभिशंसनम् ॥ १० ॥
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः ।
यशः कीर्तिः समा(म)ज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ ११ ॥
आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टं तु घोषणा ।
काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥ १२ ॥
अवर्णाक्षेपनिर्वादपरीवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १३ ॥
पारुष्यमतिवादः स्याद् भर्त्सनं त्वपकारगीः ।
यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ॥ १४ ॥
तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ।
स्यादाभाषणमालापः प्रलापोनर्थकं वचः ॥ १५ ॥

आहूयतेनेनाह्वयः, बाहुलकाद् घः ॥ ७ ॥ नमत्यनेन नाम । (नामधेयं) भागरूपनामभ्योधेयः (वा०) स्वार्थे । आकारणमाकारणा, युच्, ल्युडन्तेन समाहारो वा । बहुभिः कृता या हूतिः सा संहूतिः, स्पर्द्धाह्वय इति भागुरिः ॥८॥ विविधो वादः (विवादः) । ऋणादानादिर्व्यवहारः, यत्स्मृतिः (याज्ञव०) —वि नानार्थेव संदेहे हरणं हार उच्यते। नानासंदेहहरणाद् व्यवहारः प्रकीर्तितः॥ वाचो मुखमारम्भः। उप समीप उध्दृत्य हन्यत उपोद्घातः, यदाहुः– चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते। उध्दृत्याह्रियते उदाहारः । वाचा शरीरस्पर्शनं (शपनं) । शापोपीत्यमरमाला ॥ ९ ॥ प्रच्छनं प्रश्नः, यजयाचेति (सू०) नङ्, च्छ्वोःशूडिति (सू०) शः । अनुयोगः पर्यनुयोगः । पृच्छा भिदादौ (षिद्भिदादीति) । उत्तरन्त्यनेनोत्तरं, उदो वा तरप् । मिथ्याभियोगोसत्याक्षेपः । मिथ्यादूषणमभिशाप इत्येके ॥ १० ॥ शब्दनं शब्दः प्रसिद्धः (प्रणादः), यत्कात्यः– शब्दो गुणानुरागोत्थः प्रणादः । यात्यश्नुते वा दिशो यशः । ऊतियूतीति (सू०) कीर्तिः साधुः । समाज्ञायतेनया समाज्ञा । श्लोकाभिख्ये अनेकार्थे ॥ ११ ॥ (आम्रेडितं) द्विर्भूते पूर्वाचार्यसंज्ञैषा, अतश्च म्रेडृ उन्माद इति पेठुः । द्वौ वारौ त्रीन् वारान्वेति, द्वित्रिचतुर्भ्यःसुच् (सू०) । विशब्दनाविवक्षातो घुषिरविशब्दने (सू०) इति नेट् । (घोषणा) ण्यासश्रन्थोयुच् (सू०) । कायति काकुः । आदिशब्दात्कामादिः ॥ १२ ॥ अवर्णो विपरितवर्णनम् । निष्क्रान्तो वादान्निर्वादः । उपक्रोशवदवर्णादयः पुंसीति वाच्ये प्रौढिम्नान्यथोक्तिः ॥ १३ ॥ (पारुष्यं) मैवं कृथाः (इति) वाच्यतेत्यर्थः ॥ १४ ॥ मैथुनमुद्दिश्य गाली इत्यर्थः, दूषणमित्येके। क्षारणापि, क्षारणाक्षारणाक्रोशाः साभिशापाभिमैथुना इति दुर्गः ॥ १५ ॥ (अनुलापः) पौनःपुन्येनोक्तिः । (विलापः) अनुशोचनमित्यर्थः । (विप्रलापः) विरुद्धं प्रलपनम् । मिथोन्योन्यमुक्तिप्रत्युक्ती संलापः ।

अनुलापो मुहुर्भाषा विलापः परिदेवनम् ।
विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ॥ १६ ॥
सुप्रलापः सुवचनमपलापस्तु निह्नवः ।
संदेशवाग्वाचिकं स्याद्वाग्भेदास्तु त्रिषूत्तरे ॥ १७ ॥
रुष(श)ती वागकल्याणी स्यात्कल्या तु शुभात्मिका ।
अत्यर्थमधुरं सान्त्वं संगतं हृदयंगमम् ॥ १८ ॥
निष्ठुरं परुषे ग्राम्यमश्लीले सूनृतं प्रिये ।
सत्येथ संकुलक्लिष्टे परस्परपराहते ॥ १९ ॥
लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ।
अम्बूकृतं सनिष्ठेवमबद्धं स्यादनर्थकम् ॥ २० ॥
अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् ।
अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः ॥ २१ ॥
सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ॥ २२ ॥
शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ।
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ॥ २३ ॥
आरवारावसंरावविरावा अथ मर्मरः ।
स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ॥ २४ ॥

संकथापि ॥ १६ ॥ चोद्यमाक्षेपाभियोगौ शापाक्रोशौ दुरेषणा । अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्या विकत्थनं- इति वक्तव्यम् । दुरेषणा दुरभिध्यानम् । (चाटु, चटु) प्रेम्णा श्लाघनं, चटतीति चटेः ञुण्, उन् च । के, चाटुकम् । असत्या तु श्लाघा विरुद्धं कत्थनं (विकत्थनम्) । लेखादिनाधिगतेर्थे मुखस्वरूपं वाचिकं, वाचोव्याहृतार्थायां(सू०)इति ठक् । उत्तरे वक्ष्यमाणा, यथा– रुषती वाक्, रुषञ्शब्दः, रुषद्वचः॥ १७॥ (रुषती) हिंस्रेत्यर्थः, न तां वदेद्रुषतीं (गां) पापलोक्याम् । अत उषतीत्य-सभ्यः पाठः। कलासु साधुः कल्या, काल्येति कात्यायायाः। सान्त्व्यतेनेनेति सान्त्वं, सामयतेर्वा–औणादि-कस्त्वत् । (हृदयंगमं) गमेःसुपिवक्तव्यात् (वा०) खच् ॥ १८ ॥ निशितं तिष्ठति निष्ठुरम् । विकुष्टं च । ग्रामे भवं ग्राम्यं, ग्रामाद्यखञौ(सू०)। असभ्यस्मृतिहेतुश्चाश्लीलं– अश्रीप्रदं भाण्डादि । प्रियं सत्यं वचनं सूनृतं, सुष्ठून्यते सून, सूनं च तदृतं च सूनृतम् । अन्योन्यविरुद्धं संकुलं क्लिष्टं च, यथा– अन्धो मणिमुपाविध्यत्तमनङ्गुलिरावयत् । तमग्रीवः प्रत्यमुञ्चत्तमजिह्वोभ्यपूजयत् ॥ १९ ॥ (ग्रस्तं) असंपूर्णोच्चारितम् । अनम्बुनोम्बुनः करणमम्बूकृतं, च्वौ च (सू०) इति दीर्घः । निष्ठेवस्थूत्कारः, ष्ठिवु-ष्ठिवोर्वादीर्घः (चान्द्रसू०), पक्षे सनिष्ठीवम् । असंबद्धं दशदाडिमादि वाक्यं समुदायार्थशून्यम् ॥ २० ॥ (अनक्षरं) विरोधे नञ् । (आहतं) यथा–एष वन्ध्यासुतो याति खपुष्पकृतशेखरः । मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः ॥ सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम् । श्रव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितमिति क्वचित्पाठः । म्लेच्छेर्म्लिष्टं, क्षुब्धस्वान्तध्वान्तेति (सू०) साधुः । विगतं तथा सत्यं यत्र वितथम् ॥ २१ ॥ सति साधु सत्यम् । तथा साधु तथ्यम् । समञ्चति सम्यक्, तदेव समीचीनं, समीची समीचीना वाक्, समःसमि (सू०) इत्यञ्चतावप्रत्यये समिः, नामैतत्, सम्यक्त्वव्ययम् । वाग्भेदास्त्रि-षूक्ताः, (यथा) सत्याशीः, सत्यः शब्दः, सत्यं वचः । यदा तु सत्यवाक्त्वादिना तद्वति वर्तन्ते तदापि त्रिषु, यथा सत्यं कुलं, सत्या स्त्री, सत्यः पुमान् । एवं ग्राम्यनिष्ठुरादयः ॥२२॥ (निनाद इ०) नौग-दनदाति (सू०) वा, स्वनहसोर्वा (सू०), विभाषाङिरलुवोः (सू०), उपसर्गेरुवः (सू०) इति च शास्त्रं घञपौ ॥ २३ ॥ मर्मरेति शब्दानुकरणम् । स्वनित इत्येव (भूषणानाम्), शिञ्जापि ॥ २४ ॥

निक्काणो निक्कणः क्काणः क्कणः क्कणनमित्यपि ।
वीणायाः क्कणिते प्रादेः प्रक्काणप्रक्कणादयः ॥ २५ ॥
कोलाहलः कलकलस्तिरश्चां वासि-शि-तं रुतम् ।
स्त्री प्रतिश्रुत् प्रतिध्वाने गीतं गानमिमे समे ॥ २६ ॥

इति शब्दादिवर्गः । ५ ।

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ १ ॥
काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ।
कलो मन्द्रस्तु गम्भीरे तारोत्युच्चैस्त्रयस्त्रिषु ॥ २ ॥
समन्वितलयस्त्वेकतालो वीणा तु वल्लकी ।
विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ ३ ॥
ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।
वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥ ४ ॥

एते क्कणितमात्रे वीणायामवीणायां च, क्कणोवीणायांच (सू०) इति चकारेण नावित्यनुपसर्ग इति(च) सामान्येनानुकर्षणात् । उपसर्गात्क्कणो वीणायामेव घञो विकल्पात्सोपसर्गार्थं हि तत्र वीणाग्रहणम् । एवं सुक्काणसुक्कणादिः ॥ २५ ॥ कोलान् सूकरानाहलते त्रासयति कोलाहलः । कलोऽव्यक्तः, आभीक्ष्ण्ये द्विर्भावः । रुतमनूद्य वासि-शि-तविधिः, तिर्यञ्चो मृगपक्ष्यादयः, तिर्यग्योनिश्च पञ्चधा भवतीति । प्रतीपं श्रूयते प्रतिश्रुत् । पदस्वरतालावधानात्मकं गान्धर्वरागगीत्यादिकं गीतं, प्रावेशिक्यादि ध्रुवारूपं गानमिति **भरता**द्युक्तो विशेषो नाश्रितः ॥ २६ ॥ इति शब्दादिवर्गः । ५ ।

निषीदत्यस्मिन् रागो निषादः, निषदोऽपि । ऋषभो गोरुतसंवादित्वात्, यदाहुः– षड्जं मयूरा ब्रुवते गावस्त्वृषभभाषिणः । अजाविकं तु गान्धारं क्रौञ्चः क्कणति मध्यमम् ॥ पुष्पसाधारणे काले पिकः कूजति पञ्चमम् । धैवतं हेषते वाजी निषादं बृंहते गजः ॥ गां धयति [गां वाचं धारयति] इति गान्धारः । षड्भ्यो जातः षड्जः, यदाहुः– नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन् । षड्भ्यः संजायते यस्मात्तस्मात्षड्ज इति स्मृतः । धीवतामयं धैवतः । दारवी गात्रवीणा च द्वे वीणे स्वराधारौ, वंशमुरजादयोऽनुकरणमात्रेणेति नोक्ताः ॥ १ ॥ ध्वनावित्येव, मधुरेऽल्पे शब्दे काकली, ईषत्कलोऽस्याम् ॥ कलेति कलयतीति वा कलः । मन्दते मन्द्रः, मद्रोऽपि । ध्वनावित्येव, तारयति स्वनं स्थानेभ्यस्तारः, यद्दन्तिलः– नृणामुरसि मन्द्रस्तु द्वाविंशतिविधो ध्वनिः । स एव कण्ठे मध्यः स्यात्तारः शिरसि गीयते ॥ कलमन्द्रतारा गुणिलिङ्गाः ॥ २ ॥ समन्वितोऽनुगतो लयो द्रुतादिर्यत्र, एकः समस्तालो मानमस्यैकतालः, अभिन्नकालमान इत्यर्थः । एकं तननमस्यैकतानो वा, एकतानमनाकुलमिति **दुर्गः** । वेति जायते स्वरोऽस्यां वीणा । वलते (वल्लते) स्वरोऽस्यां वल्लकी, वलतिः (वल्लिः)सौत्रो वा ह्यार्थः । विपञ्च्यते स्वरोऽस्यां विपञ्ची । घोषवती च । (परिवादिनी) परिवदत्यवश्यं सप्तस्वरत्वात् ॥ ३ ॥ तन्त्रीतननात्ततम् । आदिशब्दात्सैरन्ध्रीरावणहस्तकिन्नर्यादि । आनह्यते स्म चर्मणानद्धम् । अवनद्धं च । आदिशब्दाद् दर्दुरकरटादि । सुषिश्छिद्रं विद्यतेऽस्य सुषिरम्, शुषिरमिति **प्राच्याः**, ऊषसुषीति (सू०) रः । कांस्यमयस्तालो वादित्रम् । आदिशब्दाच्छम्यादि । हन्यते घनं, मूर्तौघनः(सू०) ॥ ४ ॥ वाद्यते (वाद्यं, वादित्रं), आतुद्यते च, यद्भरतः– ततं चैवावनद्धं च घनं सुषिरमेव च । चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम् ॥ मृद्यन्ते मृदङ्गाः, मृद्–अङ्गं वैषाम् । मुरात्संवेष्टनाज्जाता मुरजाः । भेदा एषां विशेषाः । अङ्कोऽस्यास्त्यङ्की[क्यः]

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ।
मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्यू-र्ध्वकास्त्रयः ॥ ५ ॥
स्याद्यशःपटहो ढक्का भेरी स्त्री दुन्दुभिः पुमान् ।
आनकः पटहोऽस्त्री स्यात्कोणो वीणादिवादनम् ॥ ६ ॥
वीणादण्डः प्रवालः स्यात्ककुभस्तु प्रसेवकः ।
कोलम्बकस्तु कायोऽस्या उपनाहो निबन्धनम् ॥ ७ ॥
वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ।
मर्दलः पणवोऽन्ये च नर्तकीलासिके समे ॥ ८ ॥
विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ।
तालः कालक्रियामानं लयः साम्यमथास्त्रियाम् ॥ ९ ॥
ताण्डवं नटनं नाट्यं लास्यं नृत्यं-त्तं च नर्तने ।
तौर्यत्रिकं नृत्य-त्त-गीतवाद्यं नाट्यमिदं त्रयम् ॥ १० ॥

उत्सङ्गस्थत्वात् । आलिङ्गोऽस्यास्त्यालिङ्गी[ग्यः] आलिङ्ग्य वादनात् । ऊर्ध्वीकृत्यैकेन मुखेन वादनादूर्ध्वं कायति– ऊर्ध्वक आभोगिकाख्यः, आहुश्च– हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्ध्वकः । आलिङ्ग्यश्चैव गोपुच्छो मध्यदक्षिणवामगाः ॥ नाट्ये चैतत् ॥ ५ ॥ यात्रादौ यशोऽर्थं पटहो हन्यते स यशःपटहः । ढगित्यव्यक्तं कायति ढक्का । बिभ्यत्यस्या रणे भेरी । भम्भापि । दुन्दुशब्देन भाति भाययति वा दुन्दुभिः । आ–अनित्यानकः । द्वौ द्वौ भिन्नार्थौ वाहुः । कुणत्यनेन कोणो वादनकाष्ठं ढक्काद्युपयोगी, कुण शब्दे । शततन्त्रीरप्यनेन वाद्यते, अत एव कोणो वादित्रवादनमित्याहुः ॥ ६ ॥ कुब्जवीणादण्डः प्रवालः, ज्वलादित्वाण्णः (ज्वलितिकसन्तेभ्योणः), यच्छाश्वतः– प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे । कङ्कते ककुभः, दण्डाधः शब्दगाम्भीर्यार्थं दारुमयं भाण्डं यद् भस्त्रयाच्छाद्यते । केवलम्बन्ते तन्त्र्योऽत्रेत्यपभ्रंशे कोलम्बकः, कुल संस्त्यान इत्यस्माद्वा–अम्बच् । येन चर्मणा (?) उपनह्यते (उपनाहः), यत्र तन्त्र्यो निबध्यन्ते च (निबन्धनम्) ॥ ७ ॥ डमित्यव्यक्तं शब्दमियर्ति डमरुः । मड्डु कायति मड्डूच्चारणात्, मड्डुकं जलवाद्यमाहुः । डिण्डिमझर्झरौ शब्दानुकारात् । झर्झरः करटेत्येके । मर्द्यते मर्दलः, मर्दं लाति मर्दल इति तु कवयः । पणायत्यन्तस्तान्त्रीकः पणवः । अन्ये हुडुक्कागोमुखाद्यः । नृत्याति नर्तकी, शिल्पिनिष्वुन् (सू०), नृतिखनिरञ्जिभ्यःपरिगणनं (वा०) । लसति संनमति लासिका ॥ ८ ॥ विलम्बितादीनां लयानां तत्त्वाद्याः पर्याया इत्यभिधानकारः, नाट्ये तु विलम्बितानुसारेण क्रमात्तत्त्वाद्या वाद्यप्रकाराः । कालस्य क्रियया– आवापनिष्क्रमादिकया मानं परिच्छेदकं प्रतिष्ठाहेतुस्तालः– बद्धपुटादि (?), गे[गे]याया मा[गा]नक्रियायाः कालनियमहेतुरित्येके, यद् दन्तिलः– तत्र ज्ञेयाः कलापाताः पादभागा[पादमान]स्तथैव च । मात्रा च परिवर्तश्च वस्तु चैव विशेषतः ॥ मा[गा]नमे[गे]ययोरन्यूनाधिक्ये श्लिष्टता लयो द्रुतादिः, वाद्यादीनामन्योन्यं समत्वमिति यावत् । तालविशेषस्तु लयोऽन्यः ॥ ९ ॥ [नाट्यशास्त्रे प्रत्येकं भेदोऽस्ति । तत्रोद्धतकरणाङ्गहारनिर्वर्त्यमारभटीवृत्तिप्रधानं गीतकानुसारित्वादादौ तण्डु(मुनि)ना प्रणीतं ताण्डवम् । ललिताङ्गहाराभिनयं कैशिकीवृत्तिप्रधानं वासकसज्जादिनायिकाचरितं डोम्बिलि[लि]कादिनिबद्धं श्लिष्टत्वाल्लास्यम् । नृत्यं[त्तं] त्वङ्गविक्षेपमात्रं विवाहाभ्युदयादौ ।] नाट्यं तु सर्वरसं पञ्चसंधि चतुर्वृत्ति दशरूपकाश्रयं नटकर्म, तदाह– नृत्या[त्ता]दि त्रयं समुदितं– तूर्यस्येदं त्रिप्रमाणं तौर्यत्रिकं नाट्यं च । आभ्यामन्यल्लुठनमात्रम् ॥१०॥ भ्रुवः कुंसनं भासनमस्य, इकोह्रस्वोऽङ्यो गालवस्य (सू०)

भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ।
स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका ॥ ११ ॥
भगिनीपतिरावुत्तो भावो विद्वानथावुकः ।
जनको युवराजस्तु कुमारो भर्तृदारकः ॥ १२ ॥
राजा भट्टारको देवस्तत्सुता भर्तृदारिका ।
देवी कृताभिषेकायामितरासु तु भट्टिनी ॥ १३ ॥
अब्रह्मण्यमवध्योक्तौ राजश्यालस्तु राष्ट्रियः ।
अम्बा माताथ बाला स्याद्वासूरार्यस्तु मारिषः ॥ १४ ॥
अत्तिका भगिनी ज्येष्ठा निष्ठानिर्वहणे समे ।
हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति ॥ १५ ॥
अङ्गहारोङ्गविक्षेपो व्यञ्जकाभिनयौ समौ ।
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ॥ १६ ॥
शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ च रसाः शृङ्गारः शुचिरुज्ज्वलः ॥ १७ ॥

इति ह्रस्वः, अभ्रुकुंसादीनां (वा०) इति च पक्षे– अत्वम् । एवं भ्रुकुंस्यादि । गणयतीश्वरान्– ईश्वरो गणः पेटकोस्त्यस्या वा गणिका वारमुख्या । अज्जुका– असत्प्रकृतिप्रत्ययविभागा देशीयपदप्राया । नाट्योक्तौ नाट्यविद्यायां नान्यत्रेत्यधिकारः ॥ ११ ॥ भावयति भाव इत्यवगमान्नाट्यादन्यत्राप्येषां प्रयोगे न दोषः, यद्भरतः– मान्ये भावोपि वक्तव्यः किञ्चिदूनेषु मारिषः ॥१२॥ (देवी) श्रीमहादेव्यां वासवदत्तादौ । अकृताभिषेकराज्ञीमध्यादेकैका भट्टिनी पद्मावत्यादिः ॥ १३ ॥ वधानर्हस्य ब्राह्मणस्य पूत्करणे, न ब्रह्मणि साधु (अब्रह्मण्यं), साध्वर्थे यत् (तत्रसाधुः) । नाट्यादन्यत्र राष्ट्राधिकृतो राष्ट्रियः, राष्ट्रावारपारेतिघः (सू०) । अम्ब्यते शब्द्यते बालैः, लोकेप्यम्बा ह्रस्वविधेः (अम्बार्थनद्योर्ह्रस्वः) । वास्यते प्रीत्या वासूः । आरात्पापकेभ्यः कर्मभ्यो जात आर्योरणीयोभिगम्यो वा । मर्षणात्सहनान्मारिषः । मार्षोपि यथा परिषत्पर्षत् ॥ १४ ॥ अत्ता मातेवात्तिका । नियतं स्थानं निष्ठा । निःशेषेण वहनं समाप्तिर्निर्वहणम् । मुखप्रतिमुखगर्भावमर्षनिर्वहणाख्या हि पञ्च संधयः । नाट्योक्तौ नीचां प्रति हण्डे आह्वानं, चेटीं प्रति हञ्जे, सखीं प्रति हला ॥ १५ ॥ अङ्गस्य स्थानात्स्थानान्तरानयनमङ्गहारः स्थिरहस्तादिर्द्वात्रिंशद्वा । व्यनक्ति व्यञ्जकः । आभिमुख्यं नीयतेर्थोनेनाभिनयः, वाचिकाङ्गिकाहार्यसात्त्विकाख्यो भावसूचकः । अङ्गेन यन्निर्वृत्तं तत् (आङ्गिकं), तत्र भवत्येवेति– अध्यात्मादित्वात् (वा०) ठञ् , निर्वृत्तेक्षद्यूतादिभ्यः (सू०) इति योगविभागाट्ठग्वा । सत्त्वं मनो गुणो वा तेन निर्वृत्तः सात्त्विकः, यदाहुः– सत्त्वोत्कटे मनसि ये प्रभवन्ति भावास्ते सात्त्विका इति, समाहितमनस्कत्वाद्व्यनुकर्तुर्जायन्ते ॥ १६ ॥ रत्यादयो भावा अनुक्रियमाणाः सामाजिकैः– रस्यन्त इति रसाः, यदाहुः— विभावैरनुभावैश्च युक्तोथ व्यभिचारिभिः । आस्वाद्यत्वात्प्रधानत्वात्स्थाय्येव तु रसीभवेत् ॥ वत्सलः पुत्रादिस्नेहात्मा रतिभेद एव । शान्तस्त्वलौकिकत्वान्नोक्तः, चशब्दात्संगृहीतो वा । शृङ्गमुत्तमत्वमियर्ति शृङ्गारः । उत्तमयुवप्रकृतित्वेन जुगुप्सादिरहितत्वाच्छुचिः (शुद्धः) । उज्ज्वलो वेषेणौचित्येन च । लक्षणमेतन्न त्वेतौ शृङ्गारपर्यायौ ॥ १७ ॥ उत्साहो हि वीररसस्य स्थायी भावः, एवं स्थायी भावः स्फीततयैवास्वाद्यत इति सर्वरसलक्षणं कटाक्षितम् । शोकस्थायिप्रभवः करुणो रसो धर्मद्वारेणोक्तः । [घृण्यतेनया] घृणा । दयन्तेनया दया, दय रक्षणे, भिदाद्यङ्

उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ।
कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथो हसः ॥ १८ ॥
हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयम् ।
विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम् ॥ १९ ॥
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ।
भयंकरं प्रतिभयं रौद्रं तूग्रममी त्रिषु ॥ २० ॥
चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम् ।
विकारो मानसो भावोऽनुभावो भावबोधकः ॥ २१ ॥
गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः ।
अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२ ॥
रीढावमाननावज्ञावहेलनमसूक्षणम् ।
मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः ॥ २३ ॥

(षिद्भिदादिभ्योऽङ्)। कृपेः कृपा, भिदादित्वादङ् (सू०)। अनुक्रोशन्ति समदुःखा भवन्त्यनेनानुक्रोशः ॥ १८॥ स्थाय्येव तु रसीभवेदिति भावरसयोः पर्यायत्वेन ध्वनति । (हसः, हासः) स्वनहसोर्वेत्यप् (सू०) । हसनीयं हासे साधु वा हास्यम् । बधेर्निन्दायां सन्, बीभत्सास्य बीभत्सः, अप्रत्ययात् (सू०), अर्श आदिभ्योऽच् (सू०)। जुगुप्साप्रभवत्वाद्विकृतः, यदाह— विष्ठाकृमिज उद्वेगी क्षोभणो रुधिरादिभिः । बीभत्सो द्विविध इति, रसे तु पुमान्— तद्वति त्रिलिङ्गः । (बीभत्सं, विकृतं) द्वयमित्यनयोः पर्यायतामाह । प्राग्वद्भावरसयोः पर्यायत्वम्, अद्भुतस्य विस्मयस्थायिभावात्मकत्वात्, विपूर्वः स्मिङ् अद्भुतार्थः । अत्— आश्चर्यार्थेऽव्ययम्, तस्य भवनमद्भुतम्, अदिभुवो डुतच् (उ०) । आचरणीयं, आश्चर्यमनित्ये (सू०) इति साधुः । चित्र कदाचिद्दर्शने, अच् ॥ १९ ॥ भीरोरयं त्रासनकृद् भैरवः । दारयति चित्तं दारुणः । भीषयते भीषणः । बिभ्यत्यस्माद् भीष्मः । (भीमः) भीमादयोऽपादाने (सू०) । (घोरः) घुर भीमार्थे । बिभ्यत्यस्माद्भयानकः, आनकः शीङ्भियः (उ०) । भयं करोति भयंकरः, मेघर्तिभयेषु कृञः (सू०) खच् । प्रतिगतं भयेन प्रतिभयम्, कुगतिप्रादयः (सू०) इति समासः । रुद्रस्यायं रौद्रः क्रोधात्मा । अमी अद्भुताद्या उग्रान्ता रसेषु पुंलिङ्गास्तद्वति त्रिलिङ्गाः । रौद्रादिकं तु रसे नपुंसकमिति **नारायणः** ॥ २० ॥ रसानुक्त्वोच्चावचभावानाह दरेति । दीर्यन्तेऽस्माद्दरः, लिङ्गभेदेऽर्थभेदाद् द्विलिङ्गः, दरी गुहा । साधून्स्यति साध्वसम् । भयं भीः, संपदादिभ्यः क्विप् (वा०) । भीतिर्भयं, अज्विधौ— भयादीनामुपसंख्यानंनपुंसकेक्तादिनिवृत्त्यर्थम् (वा०) । चेतसा भाव्यते सुखादिः स्वकारणाद्भवति वा चित्तवृत्तिविशेषो भावः, भावयति करोति रसान्वा, यद्भरतः— नानाभिनयसंबद्धान्भावयन्ति रसानिमान् । यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः ॥ ते च— रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्साविस्मयशमाः स्थायिभावा रसोद्भवाः ॥ भावं योऽनुभावयति मुखरागादिः, यदुक्तं— अनुभावस्त्वभिनयः पश्चादर्थप्रकाशनम् ॥ २१ ॥ व्यभिचार्यादीनाह । मत्समो नास्तीति मननं मानः । ममताहंता दर्पोऽवलेपोऽपि । (परिभव इत्यादि) परौभुवोऽवज्ञाने (सू०) इति वा घञ् । (तिरस्क्रिया) तिरोऽन्तर्धौ (सू०) गतिः, परिभवेऽन्तर्ध्युपचारात्, अतः— तिरसोगताविति (चान्द्रसू०) सत्वम् ॥ २२॥ रिह कत्थनादौ, रेहणं रीढा, क्तः, होढः (सू०), ढ्लोपेपूर्वस्यदीर्घोऽणः (सू०)। अवहेलनमवहेलं, हेडृ अनादरे, डलयोरैक्यम् । अवहेलापि । न सुष्ठु— उक्षणमसूक्षणमिति लक्षणयावज्ञा गम्यते, यत्**कौटिल्यः**— अयमुच्चैः सिञ्चतीति दीर्घश्चारायणः प्राव्राजीत् । असूर्क्षणमित्येके, सूर्क्ष्यतेः— यस्यहलः (सू०) इति यलोपात् । निकारोऽभिभवः पराभवो न्यक्कारश्च ।

क्षान्तिस्तितिक्षाभिध्या तु परस्य विषये स्पृहा ।
अक्षान्तिरीर्ष्यासूया तु दोषारोपो गुणेष्वपि ॥ २४ ॥
वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् ।
पश्चात्तापोनुतापश्च विप्रतीसार इत्यपि ॥ २५ ॥
कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियाम् ।
शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः ॥ २६ ॥
प्रेमा ना प्रियता हार्दं प्रेम स्नेहोथ दोहदम् ।
इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छालिप्सा मनोरथः ॥ २७ ॥
कामोभिलाषस्तर्षश्च सोत्यर्थं लालसा द्वयोः ।
उपाधिर्ना धर्मचिन्तापुंस्याधिर्मानसी व्यथा ॥ २८ ॥
स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे ।
उत्साहोध्यवसायः स्यात्स वीर्यमतिशक्तिभाक् ॥ २९ ॥
कपटोस्त्री व्याजदंभोपधयश्छद्मकैतवे ।
कुसृतिर्निकृतिः शाठ्यं प्रमादोनवधानता ॥ ३० ॥

मन्दमक्षि यत्र तन्मन्दाक्षम् । व्रीडावनम्रवक्त्रेन्दुरिति स्वोत्थलज्जावशाद्विवक्षुरवनमति मुखमिति मन्दास्य-मित्येके । (व्रीडा) व्रीडादमुं देवमुदीक्ष्येति पुंस्यपि । सा लज्जा परस्माल्लज्जावहे जा(य)तेपत्रपा ॥ २३ ॥ (क्षान्तिः) बाहुलकात्क्तिन् । (तितिक्षा) गुप्तिज्किद्भ्यः- (सू०), निन्दाक्षमाव्याधि-प्रतीकारेष्विति (वा०) सन् । क्षमा मर्षः सहनं च । अभिचारेण ध्यानमभिध्या, परस्वविषयस्पृहेत्येके, दोषचिन्तापूर्वं परस्वे लिप्सेत्यर्थः, **यत्कात्यः**- विषयप्रार्थनाभिध्या । भार्यादेः परदर्शनासहने रूढाऽक्षा-न्तिरीर्ष्या, अयं तु परोत्कर्षासहनं मात्सर्यमीर्ष्यां मन्यते य ईर्ष्युः परवित्तेष्विति वत् । (असूया) असूञ् कण्ड्वादिः ॥ २४ ॥ वीरस्य कर्म वैरं, द्वन्द्वाद्वुन्वैरमैथुनिकयोः (सू०) इति लिङ्गादण् । इत्थमीर्ष्या-सूयाद्वेषाणां भेदाद्- द्वेषो ना स्यादसूयेर्ष्येति **मालाकारो** भ्रान्तः । मन्यते मन्युर्दैन्यमिह, **यच्छा-श्वतः**- निगदन्ति क्रुधं मन्युं मन्युरध्वरदैन्ययोः । शोचनं शुक् । (विप्रतीसारः) उपसर्गस्यघञ्यम-नुष्येबहुलं (सू०) इति दीर्घः, पक्षे विप्रातिसारः । अनुशयो वक्ष्यते ॥ २५ ॥ प्रातिहन्यतेनेन प्रतिघः, करणेहनः (सू०), परौघः (सू०) इति बाहुलकाद् घत्वं च । शुचौ शुद्धे, तृतीयादिषुभाषितपुंस्काद् (सू०) वाव पुम् । (शीलं) शील समाधाने । चर्यतेनेन चरितम् । चरित्रं च । (उन्मादः) चित्ता-नवस्थितिर्भूताद्यावेशात् ॥ २६ ॥ प्रियस्य भावः प्रेमा, प्रियस्थिरेति (सू०) प्रादेशः । हृदयस्य कर्म हार्दम्, युवादित्वादण् (हायनान्तयुवादिभ्योण्), हृदयस्यहृल्लेखयदण्लासेषु (सू०) । प्रीतिः प्रेम, प्रीञो मनिन् (अन्येभ्योपिदृश्यन्ते) । दोहमाकर्षणं ददाति दोहदम् । मन एव रथो दूरगामि यत्र मनो-रथः । मनोगवी च ॥ २७ ॥ सातिशयेनेच्छा भृशं लसनं लालसा, लल इप्सायां वा । उप समीपे-आधिरस्य, उपपन्न आधिर्वा- उपाधिः । आधीयते चिन्तानेनेत्याधिः ॥ २८ ॥ (आध्यानं) ध्यै चिन्ता-याम् । चिन्ति (त्ति)श्च । स्त्रीत्वेनापि साम्यं (उत्कण्ठोत्कलिकयोः), आध्यानमिह संबध्नन्ति, **यत्का-शिका**- आध्यानमुत्कण्ठापूर्वक स्मरणम् । उद्यमोद्योगौ च (अध्यवसायार्थौ) । उत्साहः सातिशयो वीर्यं, वीरस्य कर्म, वीरवीर्यौच (सू०) इति गण-(सूत्र-)पाठात्साधुः ॥२९॥ के मूर्ध्नि पट इवाच्छा-दकः कपटः । उपधीयते स्फटिकस्येव सिन्दूरमुपधिः । छाद्यतेनेन रूपं छद्म, इस्मन्त्रन्क्विषुचेति (सू०) ह्रस्वः । कितवस्य कर्म कैतवम् । कुत्सिता सृतिर्हिंसार्थं कुसृतिः, पूर्वत्र तु वञ्चना फलम् । निकृष्टा कृतिर्निकृतिः । शठस्य कर्म शाठ्यम् । अनवाहितत्वं कार्येवलेपः ॥ ३० ॥ कुर्भूमिस्तुद्यतेनेन कुत्सितं

कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ॥ ३१ ॥
स्त्रीणां विलासविब्वोकविभ्रमा ललितं तथा ।
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ॥ ३२ ॥
द्रवकेलिपरीहासाः क्रीडा ली(खे)ला च नर्म च ।
व्याजोऽपदेशो लक्ष्यं च क्रीडाखेला च कूर्दनम् ॥ ३३ ॥
घर्मो निदाघः स्वेदः स्यात्प्रलयो नष्टचेष्टता ।
अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ ॥ ३४ ॥
स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक् स्मितम् ।
मध्यमः स्याद्विहसितं रोमाञ्चो रोमहर्षणम् ॥ ३५ ॥

तन्यते वा (कुतुकं), प्रज्ञादित्वात् (सू०) स्वार्थे वाण् , तुलौकिको वा ॥३१॥ शृङ्गारभावेभ्यो रत्यादिभ्यो मनोविकारेभ्यो जाताः क्रियाश्चेष्टा अलंकाराख्या लीलादयः (हावाः), ह्वयन्त्यनेनेति हावः, यदाह– स्याद् भावसूचको हावो हेलास्यैवानुभावनम् । हिल हावकरणे, हेल़ अनादरे वा । इतिशब्दात्प्रकारार्थात्किलकिञ्चितादयोऽपि । अत्र भरतः– अलंकाराश्च नाट्यज्ञैर्ज्ञेया भावरसाश्रयाः । यौवनेऽभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः । देहात्मकं भवेत्सत्त्वं सत्त्वाद्भावः समुत्थितः । भावात्समुत्थितो हावो हावाद्धेला समुत्थिता ॥ तथा– हावः शृङ्गारभावाप्तौ रम्योक्तिस्मितवीक्षितम् । शृङ्गारप्रौढिमा हेला हेवाको यौवने हि यः ॥ किं च– लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् । मोट्टायितं कुट्टमितं विब्वोको ललितं तथा । विहृतं चेति मन्तव्या दश स्त्रीणां स्वभावजाः ॥ प्रियस्यानुकृतिर्लीला श्लिष्टा वाग्वेषचेष्टितैः, लीङ् श्लेषणे । विलासोऽङ्गे विशेषो यः प्रियाप्तावासनादिषु, लस श्लेषणे । मण्डनानादरन्यासो विच्छित्ती रूपदर्पतः, विश्लिष्टा छित्तिर्भङ्गिरित्यर्थः । चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः । हर्षाद्रुदितगीतादिव्यामिश्रं किल[लि]किञ्चितं, अलीकं किञ्चितमित्यर्थः, किलीति कण्ठकूजितं वा, यथा किलिकिलारावः । मोट्टायितं प्रियं स्मृत्वा साङ्गभङ्गविजृम्भणम् , मुट्ट प्रमर्दने । दुःखोपचारः सौख्येऽपि हर्षात्कुट्टमितं मतम्, कुट्ट च्छेदनादौ, तेन मितं, इत्वं लक्ष्यात् । विब्वोकोऽभिमतप्राप्तावपि गर्वादनादरः, विवु क्षेपे, विपूर्वस्य वुक्कतेर्वापभ्रंशो विब्वोकः । अनाचार्योपदिष्टं स्याल्ललितं रतिचेष्टितम् । वक्तव्याभाषणं व्याजाद्विहृतं दर्शितेङ्गितम्, अवसरागतं वचनं व्याजादिना हृतं विहृतम् ॥ ३२ ॥ द्रवति हृदयमनेन द्रवः । किलन्त्यनेन केलिः, किल क्रीडायां, केल़ चलने वा । नृणाति नर्म । वर्करोऽपि । व्यज्यत इति व्याजोऽत्र स्वरूपाच्छादनं, यथा– ध्यानव्याजमुपेत्य चिन्तयसि काम् (नागा०) । अपदिश्यतेऽपदेशः, अतद्रूपस्य ताद्रूप्यं क्रीडार्थं वञ्चनेयम् । स इव लक्ष्यते लक्ष्यम् । निभच्छलच्छद्मादयोऽप्युपचारात् । एते केलिपरिष्वकिते रूढाः, क्रीडया खेलनं, लुक्का(वालुका ?)मणिकादीत्येके । (कूर्दनं) कुर्दनमित्येके, कुर्द क्रीडायां, उपधायां च (सू०) इति दीर्घाभावश्चिन्त्यः ॥ ३३ ॥ जिघर्त्यनेनाङ्गं घर्मः । निदह्यतेऽनेन निदाघः, न्यङ्क्वादिः (सू०) । प्रलीयते क्रियात्र प्रलयः सात्त्विको भावः, मूर्च्छेत्यर्थः, यदाहुः– स्तम्भे विचेतनत्वं प्रलये गतचेतनत्वमत एव । सहसैव निपतनं भुवि भवति महाभूतशैथिल्यात् ॥ (अवहित्था) अङ्गवैकृतस्य रोमाञ्चादेश्छादनादबहिःस्थितत्वम् , अवहित्थमित्येके । (संवेगः) भयादिना कर्मस्वावेगः ॥ ३४ ॥ उत्प्रास्यते सामर्षोऽन्यः क्रियतेऽनेन, सोपहास इत्यर्थः । आच्छुरणं परच्छेदनम् , अवच्छुरितमिति क्वाप्यः । स हास ईषत्स्मिताख्यः । रोम्णामञ्चनं रोमाञ्चः । रोमाणि हृष्यन्त्यनेन रोमहर्षणम् । पुलको रोमविक्रियापि ॥ ३५ ॥ (क्रन्दितं) भावे क्तः (नपुंसके भावे क्तः) । (जृम्भः) मुखादिविकासः, घञि पुमान्, अप्रत्यये (सू०) स्त्री, क्लीबत्वं त्वज्विभौ भयादिष्व-

क्रन्दितं रुदितं क्रुष्टं जृम्भस्तु त्रिषु जृम्भणम् ।
विप्रलम्भो विसंवादो रिङ्खणं स्खलनं समे ॥ ३६ ॥
स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ।
तन्द्री प्रमीला भ्रुकुटिर्भ्रूकुटिर्भ्रकुटिः स्त्रियाम् ॥ ३७ ॥
अदृष्टिः स्यादसौम्येक्षि संसिद्धिप्रकृती त्विमे ।
स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ॥ ३८ ॥
कम्पोथ क्षण उद्धर्षो मह उद्धव उत्सवः ॥ ३९ ॥

इति नाट्यवर्गः । ६ ।

अधोभुवनपातालबलिसद्मरसातलम् ।
नागलोकोथ कुहरं सु(शु)षिरं विवरं बिलम् ॥ १ ॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा सु(शु)षिः ।
गर्तावटौ भुवि श्वभ्रे सरन्ध्रे सु(शु)षिरं त्रिषु ॥ २ ॥
अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।
ध्वान्ते गाढेन्धतमसं क्षीणेवतमसं तमः ॥ ३ ॥

दर्शनान्नेष्टम् । अङ्गीकृतासंपादनं (विसंवादः) । स्वधर्मादेः स्खलनं (रिङ्खणं), रिखिलौकिकः, रिङ्गणमित्येके ॥ ३६ ॥ नियतं द्रात्येतस्यां निद्रा । संविशन्तीन्द्रियाण्यत्र संवेशः । स्वपनं स्वप्नः, स्वपोनन् (सू०) । इन्द्रियाणां तननं द्रात्यस्यां तन्द्री, निद्रा तन्द्रेत्याबन्तोपि । प्रमीलन्तीन्द्रियाण्यस्यां प्रमीला । भ्रूकौटिल्ये भ्रकुंसवत्त्रैरूप्यम् । अन्ये त्वदृष्टिरित्येतेन संबध्नन्ति, यदाहुः— भ्रुकुटिर्दृगसौम्या स्यात् ॥३७॥ सोमदेवताकत्वेन लक्षणयाधिकृतं सौम्यं, सोमाट्ट्यण् (सू०), शाखादित्वात् (सू०) सोम्य इत्याहुः । असौम्ये विरुद्धे दर्शन इत्यर्थः । इमे द्वे स्त्रियौ स्वरूपादेः पर्यायौ ॥३८॥ (वेपथुः) ट्वितोथुच् (सू०) । क्षणुते दुःखं क्षणः । महः— अकारान्तः, सान्तस्तु तेजोर्थः क्लीबे । उद्धुनाति दुःखमुद्धवः । उत्सूते सुखमुत्सवः । उद्धर्षणमुल्लसनं नैश्चिन्त्यं निर्वृतिः । प्रयोगार्थं संगीतकं गुणनिका । प्राङ् नाट्यात्पूर्वरङ्गः स्यात् । नाट्यार्थोपक्षेपः पूर्वं प्रस्तावना मुखं च स्यात् ॥ ३९ ॥ इति नाट्यवर्गः । ६ ।

पतन्त्यस्मिन् पातालम् । रसायास्तलमधः, रसा भूस्तलं पृष्ठं वास्य। कुत्सितं कृत्वा हरति विस्मापकं वा कुहरम् । सुषिर्धर्ममात्रेपि मधुवत्, ऊषसुषीतिरः (सू०) । शाश्वतस्तु निरस्तावयवौ सुषिर-सुषी मन्यते, यदाहुः— गर्ते गर्तान्विते वाद्यविशेषे सुषिरं त्रिषु । विव्रियते विवरम् । बिलति बिलं, बिल भेदने ॥ १ ॥ छिद्य(द्य)ते छिद्रम् । निर्व्यथतेनेन निर्व्यथनम् । रोचते प्रकाशतेनेन रौति वा रोकम् । रगति रन्ध्रम् । श्वाभिर्भाति [भ्रान्तं] श्वभ्रम् । उप्यतेस्यां वपा, भिदादित्वादङ् (सू०) । सुष्ठु स्यति सुषिः । गिरति गर्तः, गर्तापि । अवन्त्यस्मादवटः । सिद्धस्यानुवादाच्छ्वभ्रं भूरन्ध्रमेव, यत्कात्यः— श्वभ्र-गर्तावटागाधा भुवो विवरवाचकाः ॥ २ ॥ अन्धं करोत्यन्धकारः । क्षुब्धस्वान्तेति (सू०) ध्वान्तं साधुः । तमोस्यास्तीति तमिस्रं, ज्योत्स्नातमिस्रेति (सू०) साधुः, स्त्रीत्वमतन्त्रम् । तिम्यतीव तिमिरम् । ताम्यन्त्यनेन तमः, असुन् । भूमिच्छायं च । अन्धयत्यन्धं च तत्तमश्चान्धतमसम्, अवसमन्धेभ्यस्तमसः (सू०) इत्यच् । क्षीणे ध्वान्तेवहीनं च तत्तमश्चावतमसम् ॥३॥ (संतमसम्) समन्तात्तमः । न-अगा नागाः, नभ्राडिति (सू०) नञ् प्रकृत्या । कद्र्वा अपत्यानि काद्रवेयाः, शुभ्रादित्वात् (सू०) ढक्, न तु—स्त्रीभ्योढक् (सू०) कद्रुकमण्डल्वोश्छन्दस्यूङ्विधेः (सू०), सर्पेभ्योन्ये देवयोनयोमी ।

त्रिष्वक्संतमसं नागाः काद्रवेयास्तदीश्वरः ।
शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे ॥ ४ ॥
तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ ।
अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ ॥ ५ ॥
मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ।
सर्पः पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः ॥ ६ ॥
आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ ७ ॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥ ८ ॥
त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः ।
समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ॥ ९ ॥

(शेषः) शेते हरिरस्मिन् शिष्यते वा । वसुकस्यापत्यं वासुकिः । गोरिव नासिकास्य, अञ्नासिकायाः संज्ञायांनसंचास्थूलात् (सू०), गोनासाय नियोजितागदरजाः (विद्धशाल०) इति गोनासोऽपि ॥ ४ ॥ (तिलित्सः) तिल गतौ । चरीन्द्रोऽपि । अजां गिरत्यजगरः, अजो नित्यो गरोऽस्य वा । शेतेत्यर्थं शयुः । वाहं गतिं स्यति वाहसः— अचलः । चक्रमण्डली च । न लमन्नर्दयति निर्विषत्वात्, अलीव गर्दत्यलिगर्द इत्येके । राजिं देहे लाति राजिलः । डुण्डति डुण्डुभः, डुडि हुडि निमज्जने, डुण्डु[डु] भाषते डुण्डु[डु]भ इत्येके, निर्विषो द्विमुखोऽहिः, लक्ष्यं च— किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते (रघु०) ॥ ५ ॥ मालुर्मातुलाख्यौषधिस्तत्र धानमस्य मालुधानः । सर्पभेदा एते । (मुक्त-कञ्चुकः) सर्प इति शेषः । सर्पति सर्पः । म्रियते व्यायच्छति पृदाकुः । भुजेन कौटिल्येन गच्छति, गमेः सुपि (वा०), खच्चडिद्वा (वा०), गमश्च (सू०) इति डः खच, एवं त्रैरूप्यम् । अंहत्यहिः ॥ ६ ॥ आश्यां विषमस्य, आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति, पृषोदरादित्वात् (सू०) रेफलोपे आशीशब्दोऽयमिति **सभ्याः** । चक्रं मण्डलाकारतास्यास्ति चक्री । व्याडनं हन्तुमुद्यमोऽस्यास्ति व्यालः, अड उद्यमे । कुटिलं सर्पति सरीसृपः, नित्यंकौटिल्येगतौ (सू०) इति यङ्, (यङोऽचिचेति) लुक्, पचाद्यच् (नन्दिग्रहिपचादीति), रीङृतः (सू०) । गूढाः पादा अस्य गूढपात् । चक्षुषी श्रवसी अस्य चक्षुःश्रवाः, अत एव गोकर्णः । काकस्येवोदरमस्य काकोदरः, काकोलं विषमुदरेऽस्य वा ॥ ७ ॥ दर्वीरूपः फण एव करोऽस्य प्रहारादौ दर्वीकरः । गर्हितं दशति दन्दशूकः, लुपसदचरति (सू०) यङ्, यजजपदशांयङः (सू०) इत्यूकः, जपजभदहेति (सू०) अनुस्वार । बिले शेते बिलेशयः, शयवास-वासिष्वकालात् (सू०) इति सप्तम्या अलुक् । उरसा गच्छत्युरगः, उरसोलोपश्च (वा०) इति डः । पद्भ्यां न गच्छति (पन्नगः), नभ्राण्नपाद्— (सू०) इत्यस्योपलक्षणत्वान्नञ् प्रकृत्या । भोगः सर्पदेहः कुटिला गतिर्वास्यास्ति भोगी । जिह्मं वक्रं गच्छति जिह्मगः । कुम्भीनसः कञ्चुकी लेलिहानश्च । राज-सर्पो भुजंगभुक् ॥ ८ ॥ आहौ भवमाहेयं, दृतिकुक्षीति (सू०) ढञ् । स्फटन्ति विशीर्यन्तेऽनया स्फटा, द्वयोर्वर्तमानायां स्फटायां फणापि द्वयोः, फटेत्येके । फण गतौ (फणा) । दर्विः कफेलुश्च । कञ्चुकमिव कञ्चयते बध्यतेऽनेन (कञ्चुकः) । निर्मुच्यते निर्मोकोऽहित्वक् । निर्ल्वयनी च । क्ष्वेडते मोहयति क्ष्वेडः । गिरति जीवं गरः, गरं लाति गरलं श्यामश्यामलवत् ॥ ९ ॥ नवामी विषप्रकाराः । काकमेचकः काकोलः, ईषत्कोलति संस्त्यायति वा । कालस्य वर्णस्य कूटोऽत्र कालकूटः, मृत्युसंबन्धी व्याजो वा । हलति विलि-खति जठरं न विलिखति च हलाहलः, हालेव हलतीति लक्ष्ये हालाहलो हालहलश्च, यथा— स्निग्धं भव-

पुंसि क्लीबे च काकोलकालकूटहलाहलाः ।
सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ॥ १० ॥
दारदो वत्सनाभश्च विषभेदा अमी नव ।
विषवैद्यो जाङ्गुलिको व्यालग्राह्यहितुण्डिकः ॥ ११ ॥
इति पातालभोगिवर्गः । ७ ।

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ।
तद्भेदास्तपनावीचिमहारौरवरौरवाः ॥ १ ॥
संहारः कालसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः ।
प्रेता वैतरणी सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः ॥ २ ॥
विष्टिराजूः कारणा तु यातना तीव्रवेदना ।
पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ॥ ३ ॥
स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् ॥ ४ ॥
इति नरकवर्गः । ८ ।

त्यमृततुल्यमहो कलत्रं हालाहलं विषमिवाप्रगुणं तदेव, यथा— काममपायि मयेन्द्रियकुण्डैर्यदपि दुष्कृतहालहलौघः, यथा वा— मधु तिष्ठति वाचि योषितां हृदये हालहलं महाविषम् (भर्तृ०शृङ्गा०) । सुराष्ट्रशौक्लिकदरदस्तु देशेषु भवाः सौराष्ट्रिकादयः । ब्रह्मणः पुत्रः [यद् **याज्ञवल्क्यः**— त्वं विष ब्रह्मणः पुत्रः सत्ये धर्मे व्यवस्थितः] ॥ १० ॥ वत्सस्येव नाभिरस्य वत्सनाभः । (जाङ्गुलिकः) वसन्तादित्वात् (सू०) ठक्, जाङ्गुलिको विषभिषगिति **भागुरिः** । आहितुण्डेन दीव्यति (आहितुण्डिकः) ॥ ११ ॥ इति पातालभोगिवर्गः । ७ ।

नराः कायन्त्यस्मिन् नरकः । (नारकः) अन्येषामपि (अन्येभ्योऽपि दृश्यते) इति बाहुलकाद्वा दीर्घः । निष्क्रान्तः— अयान्निरयः, अयोऽनुकूलं दैवम् । तपति संतापयति तपनः, तपन्त्यनेन वा । अवन्त्यस्मादवीचिः, विरुद्धा वीचयोऽत्र वा, स्त्रियामपि । रुरुर्हिंस्रः क्रन्दश्च तत्र भवो रौरवः ॥ १ ॥ संह्रियन्तेऽत्र संहारः, संघात इत्येके । कालान्ययोमयानि सूत्राण्यत्र कालसूत्रम् । आद्यशब्दात्तामिस्रान्धतामिस्रादयः । सत्त्वाः प्राणिनः, सीदन्तीति । प्रकर्षेणेताः प्रेताः । परेता अतिवाहिका(ता)श्च । नारकी नदी, विगततरणौ व्यर्के पाताले भवा वैतरणी, विगततरणिर्विनौका वा । निष्क्रान्ता ऋतैः सन्मार्गान्निर्ऋतिः ॥ २ ॥ विशति क्लेशं विष्टिर्नरके हठात्क्षेपः । आजवते—आजूः, क्विब्वचिप्रच्छीति (वा०) क्विब्दीर्घौ, आ— अज्यते वा, आजूर्वेतनयोर्विष्टिः कर्मकृत्कर्मणोरपीति **शाश्वतः** । (कारणा) कृञ् हिंसायां, णिच् । यत निकारादौ, णिच्, यातयति यातना नारकरुक् । दुष्टानि खान्यस्मिन् दुःखम् । प्रसूतेर्जातं दुःखं, (आमनस्यं) अमनसो भावः, वैमनस्यमित्यर्थः । षडपि मनःपीडार्था इति **सभ्याः**, यन्माला— दुःखं प्रसूतिजे क्लीबे पीडा बाधा च वेदना, दुःखमाधिः प्रसूतिजमिति **कात्यः** ॥ ३ ॥ कषिष्यति कष्टं कष्टंभविष्यतीत्याहुः (का०), कृच्छ्रगहनयोः कषः (सू०) इति नेट् । कर्षति कृन्तति वा कृच्छ्रम्, आसमन्ताद्भियं लातीति- आभीलम् । एतानि शरीरपीडार्थानि, लक्ष्ये तु नवाप्येकार्थाः । एषां दुःखादीनां मध्याद्विशेष्यनिष्ठा दुःखकष्टकृच्छ्राभास्त्रिलिङ्गाः, यथा— सेयं दुःखा च दुरुपपादा च, दुःखः सुतो निर्गुणः, सर्वं दुःखं विवेकिनः ॥ ४ ॥ इति नरकवर्गः । ८ ।

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान्सागरोर्णवः ॥ १ ॥
रत्नाकरो जलनिधिर्यादःपतिरपांपतिः ।
तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ॥ २ ॥
आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥ ३ ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशं(सं)वरम् ॥ ४ ॥
मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् ।
भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ॥ ५ ॥
महत्सूल्लोलकल्लोलौ स्यादावर्तोम्भसां भ्रमः ।
पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ॥ ६ ॥
चक्राणि पुटभेदाश्च भ्रमाश्च जलनिर्गमाः ।
कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥ ७ ॥

समुनत्ति समुद्रः । अप्- उदकं धीयतेस्मिन्नब्धिरुदधिश्च, कर्मण्यधिकरणेच (सू०) इति किः, पेषवासवाहनधिषुच (सू०) इत्युदकस्योदः । न कुं पृणाति मर्यादापालनादकूपारः । पारमावृणोति पारावारः, पारमिवावारमस्य वा दुस्तरत्वात् । उदकमस्त्यस्योदन्वान् , उदन्वानुदधौच (सू०) इति साधुः । स्यन्दते सिन्धुः । सरांसि सन्त्यस्य सरस्वान् । सगरैः खातः सागरः । अर्णोस्यास्त्यर्णवः, अर्णसोलोपश्च (वा०) इति वः सलोपश्च ॥ १ ॥ यादांसि पाति यादःपतिः, पाथःपतिरित्येके । सुममेव हि मध्यमपांपतेः- इति दर्शनात्समासे षष्ठ्या अलुक् । वीचिमाली सर[शर]ध्वजोऽवारपारश्च । (क्षीरोदः) उदकस्योदःसंज्ञायाम् (सू०) । अपरे दध्युदघृतोदसुरोदेक्षूदस्वादूदाः ॥२॥ आप्नुवन्त्यापः स्त्रियां बहुत्वे । वृणोति वार्वारि च । सरति सलिलं, रलयोरैक्यम् । काम्यते कमलम् । जडति जलम् । पयते पीयते वा पयः, पय गतौ, पीङ् पाने । कीला ज्वाला अलति वारयति कीलालम् । भवत्यस्मात्सर्वं भुवनम् ॥ ३ ॥ कं बध्नाति कबन्धं, यच्छाश्वतः— कबन्धं सलिले रुण्डे । कैमन्धमिति द्वे नाम्नी इत्येके । उनत्त्युदकम् । पीयते पाति वा पाथः । पुष्णाति पुष्करम् । सर्वतोमुखं सर्वदिग्गतेः । अमत्यम्भः । ऋणोत्यर्णः । तुदति तौति वा तोयं, तुः सौत्र आवरणार्थो वा । नयति नीरम् । [घस्यते क्षियति वा क्षीरम्] । अम्बति(ते) अम्बु । शं वृणोति शंवरम् ॥ ४ ॥ मेघानां पुष्पं प्रसवः । दकं जीवनीयं च, यथा दकलावणिकाः । (अपां विकारोम्मयम्) एकाचोनित्यं (वा०) इति मयट् । आप्यं तु लक्ष्यात् , अत एव आप्यंवेति **चान्द्रं** सूत्रम् । (भङ्ग इ०) भज्यते तरत्यूर्वति चेति वाक्यानि, ऊर्मिर्वा स्त्रियामिति काकाक्षिवत् । वीची तु नित्यं स्त्री ॥ ५ ॥ ऊर्ध्वं लोलः [लोलयति] उल्लोलः । कल्लन्तेनेन नद्य इति कल्लोलः, कुत्सितो लोल इत्येके । लहरी- ओघश्च । आवर्तते मण्डलेन भ्रमत्यावर्तः । पर्षति सिञ्चति पृषत् , रूपभेदात्क्लीबं । बिन्दति बिन्दुः, बिदि अवयवे । विगतः प्रोषो दाहोस्या विप्रुट् ॥ ६ ॥ चक्राकारेण यान्त्यधः (चक्राणि) । पुटं भित्त्वा निर्यान्तीत्युपध्यायोत्प्रेक्षा । चक्राणीति **माला** । नदी-चङ्क्राख्या इति च **गौडो** भ्रान्तः । तेनातोन्ये भ्रमाः प्रणाल्याद्या जलपथाः । कूलति कूलं, कूल आवरणे । रुणद्ध्यम्भो रोधः । तरन्त्यस्मात्तीरम् । तीरप्रतीरे दीपप्रदीपवत् । तट्यत आहन्यतेम्भसा तटम् ॥ ७ ॥ (नद्याः) परे पार्श्वे कूलं पारं, पार्यते समाप्यतेस्मिन्निति वा । अर्वाक् पार्श्वे कूलमवारम्, यदाह- अर्वाक

पारावारे परार्वाची तीरे पात्रं तदन्तरम् ।
द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ॥ ८ ॥
तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् ।
निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ॥ ९ ॥
जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ।
नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरी:-रिः ॥ १० ॥
उडुपस्तु(पं तु) प्लवः कोलः स्रोतोम्बुसरणं स्वतः ।
आतरस्तरपण्यं स्याद् द्रोणी काष्ठाम्बुवाहिनी ॥ ११ ॥
सांयात्रिकः पोतवणिक्कर्णधारस्तु नाविकः ।
नियामकाः पोतवाहाः कूपको गुणवृक्षकः ॥ १२ ॥
नौकादण्डः क्षे(क्षि)पणी स्यादरित्रं केनिपातकः ।
अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनम् ॥ १३ ॥

कूलमवारं स्यात् । परावाची इत्येके, अर्वाक्शब्दस्याव्ययत्वात् । न वार्यतेस्यावारं न ध्रियते वा । तयोः कूलयोर्मध्यं, पीयते पात्रं प्रवाहः । द्विधा गता आपोऽत्र द्वीपम् । अन्तरपामन्तरीपं, द्व्यन्तरुपसर्गेभ्योपईत् (सू०), ऋक्पूरब्धूरिति (सू०) अः समासान्तः ॥८॥ तत्तटं तोयात्क्रमेणोत्थितं पुलिनं, पुलो महत्त्वमस्यास्तीति, तद् द्वीपमिति **माला**—वा ना द्वीपं च पुलिनम् । तदेव प्रकृतं पुलिनं, सिकतास्यास्ति सैकतं, देशेलुबिलैचौच (सू०) इत्यण् । [निषीदन्त्यस्मिन् निषीदन्तं वृणोति वा निषद्वरः । जमति ग्रसते जम्बालः । पञ्च्यते पङ्कः । शीयन्तेस्मिञ्शादः । कृणोति कर्दमः] । चिखल्लश्च ॥ ९ ॥ जलं प्रवृद्धमुच्छ्वासीति परिवहति यैर्निर्गममार्गैस्ते परीवाहाः, यल्लक्ष्यं—उपार्जितानामर्थानां त्याग एव हि रक्षणम् । तटाको(तडागो)दरसंस्थानां परीवाह इवाम्भसाम् (पंचतन्त्र) (चाणक्यश०) ॥ परिवाहोपि । कूपप्रतिकृतिः कूपकः, शुष्कनद्यादौ जलार्थं गर्ताः क्रियन्ते, यत्कात्यः— विवरान् कूपकानाहुः । विदारयति क्ष्मां विदारकः, **मालाच**— चुण्डी (ण्ढा) विवरोत्साश्च कूपकाः । (नाव्यं) नौवयोधर्मेति (सू०) यत् । नुद्यते नौः, ग्लानुदिभ्यांडौः (उ०) । तरन्त्यनया तरणिस्तरीश्च ॥ १० ॥ उडुप्यते— उडुपस्तृणप्लवः । कवन्त्येनेन कोलः, कोलति संस्थापयति वा कोलः, यच्छाम्बलः— पोतप्लवकयोः कोलः कोलं तु बदरीफलम् । स्रतोक्लिमम् । आतरन्त्यनेनातरः, आवाप इत्येके । पणन्त्येनेन पणः, पणे साधु पण्यं मूल्यं, साधौ (तत्रसाधु) यत् । काष्ठमुपलक्षणं, काष्ठाश्मादिमयी जलधारिणी द्रोणी, द्रवत्यम्भोस्याम्, द्रोणिका त्वम्बुवाहिनीत्येके पेठुः ॥ ११ ॥ समुदितानां यानं संयात्रा, सा प्रयोजनमस्य (प्रयोजनम्) सांयात्रिकः । पवते वातेन पोतो वाहनम् । कर्णोरित्रं, कर्णः श्रोत्रमरित्रं चेति **दुर्गः** । नावा तरति नाविकः, नौद्व्यचष्ठन् (सू०) । नियन्तुं शक्ता नियामकाः । निया(र्या)माश्च । गुणवृक्षो यत्र नौरज्ज्वा बध्यते, पोते ध्वजपटाद्याधार इत्येके । कूपे— आधारगर्ते कायति कूपकः, **गौडस्तु** जलान्तस्तरून्कूपकानाह ॥ १२ ॥ येन नौर्वाह्यतेसौ नौकादण्डः । क्षिप्यतेनया क्षेपणी, क्षेपण्यपभ्रंशः, क्षिपेत्युपाध्यायः । के जले नावो येन निपातयन्ति स केनिपातः, हलदन्तादिति (सू०) अलुक् । इयर्त्यनेनारित्रम्, स्फ्यादि कोटिपात्रं वा । न बिभर्त्यभ्रिः । काष्ठे कुद्दालः काष्ठमयो वा, येन निखन्यते भग्नं पोतादिकं कुथेन पूर्यते । (सेचनं) येन नावो जलमुद्ध्रियते ॥ १३ ॥ क्वचित्— यानपात्रं तु पोतोब्धिभवे त्रिषु समुद्रियम् । सामुद्रिको मनुष्योब्धिजातादौ नौः समुद्रिका [जाता सामुद्रिका च नौः] ॥ अर्धं नावोर्धनावं, नावोद्विगोः (सू०), अर्धाच्च (सू०) इति टच् । नावमतिक्रान्तमतिनु जलम्, अतिनौः पुमान् स्त्री वा । लिङ्गागमात्—

क्लीबेर्धनावं नावोर्धेतीतनौकेतिनु त्रिषु ।
त्रिष्वागाधात्प्रसन्नोच्छ: कलुषोनच्छ आविलः ॥ १४ ॥
निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये ।
अगाधमतलस्पर्शं कैवर्ते दाशधीवरौ ॥ १५ ॥
आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ।
मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम् ॥ १६ ॥
पृथुरोमा झषो मत्स्यो मीनो वैसारिणोण्डजः ।
विसारः शकली चाथ गडकः शकुलार्भकः ॥ १७ ॥
सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ ।
नलमीनश्चिलिचिमः प्रोष्ठी तु शफरी द्वयोः ॥ १८ ॥
क्षुद्राण्डमत्स्यसंघातः पोताधानमथो झषाः ।
रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥ १९ ॥
तिमिंगिलादयश्चाथ यादांसि जलजन्तवः ।
तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः ॥ २० ॥

अधिकारोयम्, अभिविधावाङ् । अच्छचते न च्छाद्यते वाच्छः । कं लुषति हिनस्ति कलुषः । आ— अव— एलयत्याविलः, आविल्यते— आभिद्यते वा, विल भेदने ॥ १४ ॥ नमति निमनति वा निम्नं, म्ना अभ्यासे । गमे भियं राति गभीरं गंभीरं वा । ऊर्ध्वं तन्यते— उत्तानं गभीरादन्यत् । नास्ति गाधः प्रतिष्ठास्यागाधम् । नास्ति तलेधःस्पर्शोस्यातलस्पर्शम् । के(जले) वर्तते केवर्तो मत्स्यादिस्तस्यायं (घातकः) । दाति दशति दाश्नोति वा मत्स्यान्दाशः । धीयते— आध्रियते धीवरः ॥१५॥ कुत्सितं वेणन्ते- स्यां मत्स्याः कुवेणी, वेणृ गतौ, मत्स्यबन्धनीत्यर्थः । मत्स्यकरण्डिका च । बलिनः (मत्स्यान्) श्यति बलिशम् । विध्यतेनेन वेधनं, विध विधान इत्यस्मात्, व्यधेर्व्यधनमिति स्यात् ॥ १६ ॥ रोम पक्षोत्र । झषति झषः । माद्यति मत्स्यः, मच्छोपि । मीनाति मीनः । ग्रह्यादौ (नन्दिग्रहेति) विसारी, ततो वैसारिणः, विसारिणोमत्स्ये (सू०) इति स्वार्थेऽण् । सृस्थिरे (सू०), व्याधिमत्स्य- बलेषु (वा०) इति कर्तरि विसारः । शकलानि पृष्ठे सन्त्यस्य शकली, सशल्क इत्यर्थः । शल्की च । गडति पुच्छाच्छोटनात्सिञ्चति गडकः । शकुलोत्र मत्स्यमात्रे ॥ १७ ॥ विशेषा- नाह । सहस्रदंष्ट्रो वादालो नाम मत्स्यः । पाठीनश्चित्रवल्लिः, बहुदंष्ट्रत्वात्पाटयतीति, भक्ष्यत्वेन पठ्यते वा । एतौ सादृश्यात्पर्यायौ । शिशुमारप्रतिकृतिः (शिशुकः) । उलुपीन्नन्तः, उलुम्पतीति । सुषिर- तृणान्तश्चारी नलमीनः नडाभो वा । चीयते मीयते च चिलिचिमः, चिलिचिमस्त्रिदोषकृदिति वैद्याः । प्रोषति पित्तकारित्वात्प्रोष्ठी । शफान् राति शीघ्रगत्वाच्छफरी ॥ १८ ॥ सूक्ष्माश्चाण्डान्निःसृताश्च मत्स्याः क्षुद्राण्डमत्स्याः । पोता आधीयन्तेत्र पोताधानम् । झषा मत्स्यविशेषा अमी । रोहितो रक्तत्वात् । मज्जति मद्गुरः । शलति शालते वा शालः । राज्यः सन्त्यस्य राजीवो वज्राभः । शक्नोति गन्तुं शकुलः । तिम्यति तिमिः ॥१९॥ तिमिं गिलति तिमिंगिलः, गिलेऽगिलस्य (वा०) इति मुम् । आदिशब्दात्तिमिंगिल- गिलनन्द्या[न्दी]वर्तादयः । याति यादः । जलजन्तुर्जलचरः । उनत्त्युद्रः । शङ्कतेस्माच्छङ्कुः । मा कुर्या- त्किंचिदिति त्रस्यन्त्यस्मान्मकरः । आदिशब्दाज्जलहस्तिग्राहाद्याः ॥ २० ॥ कौ लीयते कुलीरः, कुलिन- मीरयति वा, जनकभक्षकत्वात्, यत्कौटिल्यः— कर्कटसधर्माणो हि राजपुत्रा जनकभक्षाः । कृणोति कर्कटकः । कुरति कुमूर्वति वा कूर्मः । काम्यते यज्ञार्थं के मठति वा कमठः । कच्छेन पिबति कच्छपः ।

स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ।
ग्राहोवहारो नक्रस्तु कुम्भीरोथ महीलता ॥ २१ ॥
गण्डूपदः किंचुलुको निहाका गोधिका समे ।
रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ॥ २२ ॥
मुक्तास्फोटः स्त्रियां शुक्तिः शंखः स्यात्कम्बुरस्त्रियाम् ।
क्षुद्रशंखाः शंखनखाः(काः) शम्बूका जलशुक्तयः ॥ २३ ॥
भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।
शिली गण्डुपदी भेकी वर्षाभ्वी कमठी डुलिः ॥ २४ ॥
मद्गुरस्य प्रिया शृङ्गी दुर्नामा दीर्घकोशिका ।
जलाशया जलाधारास्तत्रागाधजलो ह्रदः ॥ २५ ॥
आहावस्तु निपानं स्यादुपकूपजलाशये ।
पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥ २६ ॥
नेमिस्त्रिकास्य वीनाहो मुखबन्धनमस्य यत् ।
पुष्करिण्यां तु खातं स्यादखातं देवखातकम् ॥ २७ ॥

गृह्णाति ग्राहस्तन्तुनागाख्यः, विभाषाग्रहः (सू०) इति णः । अवह्रियतेनेनेति, गोचरादिसूत्रेऽवहारोपी- स्युपसंख्यानात् (वा०) घञ्, पुंसिसंज्ञायांघःप्रायेण (सू०), अवहरति वा, श्यादूव्यधेति (सू०) णः । न क्रामति नक्रः । कुम्भिनमीरयति कुम्भीरः । (महीलता) भूमिसूर्नाम कृमिः ॥ २१ ॥ गण्ड्वो ग्रन्थयः पदान्यस्य गण्डूपदः । किंचिच्चुलुम्पति किंचुलुकः, लकान्तो वा । निजहाति गुध्यति च (निहाका, इ०), बिलेशयादन्योयं जलचरः प्राणी । टकः (गापोष्टक्) पिबतेःसुराशीध्वोरिति (वा०) नियमाद्रक्तपा, टक्, क इत्येके । आ- उच्यते, ओकउचःके (सू०), उणादौ सान्तोन्यः । शालूकादि- वज्जलूकेति श्रीभोजः ॥ २२ ॥ मुक्ता स्फुटन्त्यस्मान्मुक्तास्फोटः । शोकति शुक्तिः, शुक गतौ, क्तिच् । शं खनाति शाम्यति वा शङ्खः । काम्यते कम्बुः । सूक्ष्मनद्यादिजाः कृमयः, शंकनका इत्यसत् । क्षुल्लकाश्च । शं वान्ति शंबूका जलमात्रजाः ॥ २३ ॥ बिभेति भेकः । मण्डति मण्डते वा सरो मण्डूकः । वर्षासु भवति वर्षाभूः । शलति शालते वा शालूरः, सालूर इत्येके । प्लवते प्लवः । दृणाति शब्दैः कर्णौ दर्दुरः । शिनोति शिलति वा शिली । गण्डूपदाज्जातौ पुंयोगे वा ङीष् । (वर्षाभ्वी) भुवश्चेति (उ०) छान्दसो ङीप् । दोलयति डुलिः । कूर्मी च ॥ २४ ॥ मद्गुराख्यो मत्स्यः । शृणाति शृङ्गी, सादृश्यायोग्यतया प्रिया । जलूकाकारेयं दीर्घकोशत्वात्, दुष्टो नामो नमनमस्या दुर्नामा, दुःसंज्ञेत्येके । जलमाशयो हृदयमस्य जला- शयः, जलमाशेतेत्र वा । सामान्येनोपक्रमोयम् तत्र जलाशयेष्वमी विशेषाः संगमान्ताः । (ह्रदः) ह्रादो ह्रस्वः ॥ २५ ॥ नियतं पिबन्त्यत्र निपानम् । आहूयन्तेस्मिन्गाव आहावः, निपानमाहावः (सू०) इति साधुः, कूपसमीपे शिलादिनिबद्धं पशुपानार्थं कूपोध्दृताम्बुस्थानम् । अनन्त्यनेनान्धयाति वान्धुः । प्रज- हात्यम्बु प्रहिः । कुत्सिताः कोर्वा- आपोत्र कूपः । उदकं पीयतेस्मिन्नुदपानम् ॥२६॥ अस्य कूपस्यान्ते रज्ज्वादिधारणार्थं दारुयन्त्रं त्र्यंशं त्रिका । कूपस्योर्ध्वे- इष्टिकाभिर्विनह्यते वीनाहो नान्दीपट्टाख्यः । पुष्क- रादिभ्योदेशे (सू०) इतीनिः । नागादिकुण्डमकृत्रिममखातामित्येके ॥ २७ ॥ (तडागः) तड आघाते, तडाक इत्येके, तटान्यकति तटाकमित्यन्ये । पद्माकरो योग्यत्वात् । कमासरत्यत्र कासारः, कासमृच्छति वा नड्वलाम्बुत्वात् । महत्सरः सरसी, गौरादित्वाद्ङीष् (षिद्गौरादिभ्यश्च) । विशन्ति मज्जन्त्यस्मिन्वे- शन्तः, झच् । पल्यते पल्वलः, पल गतौ । उप्यतेस्यां वापी । दीर्घैव दीर्घिका, संज्ञायांकन् (सू०)

पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः ।
वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका ॥ २८ ॥
खेयं तु परिखाधारस्त्वम्भसां यत्र धारणम् ।
स्यादालवालमावालमावापोऽथ नदी सरित् ॥ २९ ॥
तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ।
स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा ॥ ३० ॥
गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥ ३१ ॥
कालिन्दी सूर्यतनया यमुना शमनस्वसा ।
रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ॥ ३२ ॥
करतोया सदानीरा बाहुदा सैतवाहिनी ।
शुतुद्रिस्तु शतद्रुः स्याद्विपाशा तु विपाट् स्त्रियाम् ॥ ३३ ॥
शोणो हिरण्यवाहः स्यात्कुल्याल्पा कृत्रिमा सरित् ।
शरावती वेत्रवती चन्द्रभागा(गी) सरस्वती ॥ ३४ ॥
कावेरी सरितोऽन्याश्च संभेदः सिन्धुसंगमः ।
द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरौ ॥ ३५ ॥

॥ २८ ॥ (खेयं) ईचखनः (सू०) इति यत्, दुर्गवेष्टनखातिका । परिखन्यते परिखा, डः । (आधारः) क्षेत्रादिसेकार्थं यत्र संचीयतेऽम्भः । वृक्षसेकार्थे तले द्रवतोऽम्भसः स्थानं, यदाहुः— आलवालं विदुर्धीरा धारणं द्रवतोऽम्भसः, मुनिश्च— अपां धारणमाधारस्तदल्पं चालवालकम्, आलूयते खन्यते— आलवालम् । आवलते बहिर्निर्गमादम्भोऽत्रावालम् । आ— उप्यतेऽम्भोऽत्रावापः ॥२९॥ नदट् पचादिः, ङीप् । सरति सरित् । ह्रादोऽस्त्यस्याः, ह्रदिनीत्येके । धुनोति धुनी । आ— अपगच्छति, अप्संबन्धिना वेगे(गे)नापेन च गच्छाति वापगा । कूलंकषा निर्झरिणी रोधोवक्रा सरस्वती च ॥ ३० ॥ गां गाते गच्छति गङ्गा, अगं गच्छति वा । विष्णुपदार्घोऽस्या विष्णुपदी, कुम्भपदीषु च (सू०) इति साधुः । जह्नुना पीता श्रोत्रेण त्यक्तेति जाह्नवी । भगीरथावतारिता भागीरथी ॥ ३१ ॥ (कालिन्दी) कलिन्ददेशजा । यमेन यमजा यमुना, यमी च । (रेवा) रेवृ प्लवगतौ । नर्मार्थं सोमवंश्येन पुरूरवसावतारिता (नर्मदा) । मेकलोऽद्रिः प्रभवोऽस्याः ॥३२॥ गौरीविवाहे हस्तात्प्रदानतोयाज्जाता (करतोया) । सितैव सैती (वाहिनी), यन्माला— मन्तव्या बाहुदार्जुनी । बाहुभिर्दीयते तीर्यते बाहुदा, बहुदेन कार्तवीर्यार्जुनेनावतारितेत्यागमः । शु पूजितमाशु वा तुदति शुतुद्रिः, एतदबुध्यमानाः शितद्रुः सितद्रुर्वेत्याहुः, इमं मे गङ्गे यमुने सरस्वति शुतुद्रीति हि श्रुतिः । वसिष्ठशापभयाच्छतधा द्रुता शतद्रुः । वसिष्ठं विपाशितवती विपाट् ॥ ३३ ॥ (शोणः) नदोऽयम्, शोणृ वर्णगत्योः । हिरण्यं वहति (हिरण्यवाहः) । कृत्रिमाल्पा च क्षेत्रसेकार्था कुल्या, कुले कुटुम्बे साध्वी, यदाहुः— कुल्याधीनं कुलं विद्यादित्या— (?) व्यवस्थिताः । दांपत्यं कुलमित्यन्ये कुलं वा हलमुच्यते ॥ सारणी च । शरादीनां च (सू०) इति दीर्घे शरावती । (चान्द्रभागा) चन्द्रभागाभ्यां गिरिभ्यां प्रवहति, चन्द्रभागान्नद्यामीति (ग०) साधुः, चन्द्रेण भागतोऽन्यस्ता चन्द्रभागेत्येके । सरांसि सन्त्यस्यां सरस्वती ॥ ३४ ॥ कवेरस्य जलदेहस्येयं कावेरी । सरिद्विशेषा एते, अन्याः सरयूदेविकागोदावरीवेण्याद्याः । संगमो भिन्नयोः संभेदो नदीमेलः । प्रणडत्यम्भोऽनया प्रणाली जलनिर्गमनमार्गो मकरमुखादिः, (अन्ये) स्त्रीनपुंसकयोराहुः ॥ ३५ ॥ तत्रभवः (सू०) इत्यण्, देविकाशिंशपेति (सू०) आत्वम्, दाण्डिनायनेति (सू०) सारवः साधुः । सुगन्धि(न्ध)प्रयोजनं

दीर्घिकायां सरव्वां च भवे दार्घिकतारवौ ।
सौगन्धिकं तु कह्लारं हल्लकं रक्तसंध्यकम् ॥ ३६ ॥
स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च ।
इन्दीवरं च नीलेऽस्मिन् सिते कुमुदकैरवे ॥ ३७ ॥
शालूकमेषां कन्दः स्याद्वारिपर्णी तु कुम्भिका ।
जलनीली तु शेवालं शैवलोऽथ कुमुद्वती ॥ ३८ ॥
कुमुदिन्यां नलिन्यां तु वि-वि-सिनी पद्मिनीमुखाः ।
वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ॥ ३९ ॥
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।
पङ्केरुहं तामरसं सारसं सरसीरुहम् ॥ ४० ॥
वि-वि-सप्रसूनराजीवपुष्कराम्भोरुहाणि च ।
पुण्डरीकं सिताम्भोजमथ रक्तसरोरुहे ॥ ४१ ॥
रक्तोत्पलं कोकनदं नाला नालमथास्त्रियाम् ।
मृणालं वि-वि-समब्जादिकदम्बे षण्डमस्त्रियाम् ॥ ४२ ॥
करहाटः शिफा कन्दः किञ्जल्कः केसरोऽस्त्रियाम् ।
संवर्तिका नवदलं बीजकोशो(षो) वराटकः ॥ ४३ ॥

इति वारिवर्गः । ९ ।

सौगन्धिकाख्यम् । के ह्लादते कह्लारं, शारदं शुक्लं चैतत् । हल्लति घूर्णते हल्लकम् । रक्तान् संधीनकति रक्तसंध्यकं, रक्तं संध्येव वा, रक्तोत्पलं चैतत् ॥ ३६ ॥ उत्पाल्यते उत्पलति वा उत्पलम् । कौ वलते प्राणिति कुवलयम्, कुत्सितो बाह्विर्वलयः पत्रवेष्टनमस्येति श्रीभोजः । विशेषानस्याह । इन्दतीन्दीवरं कुवलयदलनीलेति सामान्यस्य विशेषवृत्तेः । अस्मिन् सिते, कौ मोदते कुमुदं, कः । के रौति केरवो हंसस्तस्येदं प्रियं कैरवम् ॥ ३७ ॥ शालते शालूकं, कन्दो मूलमेषामुत्पलादीनाम् । ।(वारिपर्णी) वारि पिपर्ति, फङ्गा नाम शाकं, शृंगत्येके । कुम्भोस्त्यस्याः कुम्भिका, कुम्भीको वारिपर्णः स्यादित्येके । नीलिकाख्या जलशूकोपि, शेते जले शेवलं शेवालं च, शीङो- वलञ्वलन्वालनः (उ०), शैवलं शैवालमिति तु **द्राविडाः** । कुमुदिन्यां (लतायां) कुमुद्वती, कुमुदनडवेतसेभ्योड्मतुप् (सू०)॥३८॥ नडाः सन्त्यस्यां नलिनी, पुष्करादिभ्योदेशे (सू०) इतीनिः । मुखशब्दात्पुटकिन्यब्जिन्यम्भोजिन्याद्याः । पद्यते लक्ष्मीरत्र पद्मम् । नलाः सन्त्यस्य नलिनम् । अरान् राजीर्विन्दत्यरविन्दम्, अनुपसर्गाल्लिम्पविन्देति (सू०) शः ॥ ३९ ॥ शतसहस्रे बहूपलक्षणम् । कमम्भोलति भूषयति कमलम्, केन मल्यते वा कमलम् । कुशे जले शेते कुशेशयम् । तामः प्रकर्षो रसोस्य तामरसम्, तामः प्रकर्षार्थस्तारतम्यवत्, ताम्यद्भी रस्यते वा ॥ ४० ॥ राज्यः सन्त्यस्य राजीवम् । पुष्णाति पुष्करम् । नालीकं च । पुणाति मङ्गल्यत्वात्पुण्डरीकम् ॥ ४१ ॥ कोकाश्चक्राह्वा नदन्त्यस्मिन्, आहुश्च- रक्ताब्जे रक्तकुमुदे बुधैः कोकनदं स्मृतम् । पद्मादिवृन्तस्य द्विलिङ्गार्थपाठः, (नाला) णल बन्धे । मृद्यतेद्यते मृणालम् । विस्यते- उत्क्षिप्यते विसम् । षणोतेर्डे षण्डः, सत्वाभावोबाहुलकात् ॥ ४२ ॥ कं रहयतीति, करहान् कूलोत्थान् पद्मादीनटति करहाटः । शिनोति दारयति क्ष्मां शिफा । कन्द्याति कन्दं पद्मादिमूलं, कन्द्यतेन्विष्यते वा, कन्दोस्त्री । किंचिज्जलति जडीभवति किञ्जल्कः । के सरति केसरम् । संवर्तयति वेष्टयति संवर्तिका, पद्मादीनां नवोद्भिन्नं दलं शरच्चन्द्रिकाख्यम् । बीजानां पद्माक्षाणां कोशो बीजकोशः । वरमटति वराटकः, कर्णिकेत्यर्थः, **यच्छाश्वतः**- बीजकोशे सरोजस्य कपर्दे च वराटकः ॥ ४३ ॥ इति वारिवर्गः । ९ ।

उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम् ।
पातालभोगि नरकं वारि चैषां च संगतम् ॥ १ ॥

द्वितीयं काण्डम् ।

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥
भूर्भूमिरचलानन्ता रसा विश्वंभरा स्थिरा ।
धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षितिः ॥ २ ॥
सर्वंसहा वसुमती वसुधोर्वी वसुंधरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥ ३ ॥
मृन्मृत्तिका प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।
उर्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका ॥ ४ ॥
ऊषवानूषरो द्वावप्यन्यलिङ्गौ स्थलं स्थली ।
समानौ मरुधन्वानौ द्वे खिलाप्रहते समे ॥ ५ ॥

अथोक्तान्वर्गान् संग्रहेणोपसंहरति । एषां स्वर्गादीनां संगतं प्रसक्तानुप्रसक्तिकथानुगतं देवासुरमेघादिकं चोक्तम् । शब्दादीति रसगन्धादिग्रहणम् ॥१॥ [इत्यमरसिंहकृतौ नामलिङ्गानुशासने । स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ॥] इति श्रीभट्टक्षीरस्वाम्युत्प्रेक्षितेमरकोशोद्घाटने स्वर्गादि काण्डं प्रथमं संपूर्णम् ।

श्रीगणेशाय नमः । अथ द्वितीयकाण्डे वर्गान् संगृह्णाति । अङ्गैर्मृदादिभिरुपाङ्गैश्च खिलादिभिः सह वर्तमानैः पृथ्यादिभिः संपादिता वर्गा इह वक्ष्यमाणे काण्डे वदितुमारब्धा उदिताः, आदिकर्मणि क्तः (सू०), आशंसायांभूतवच्च (सू०) इति क्तः ॥१॥ भवत्यस्मात्सर्वं भूः, रेफान्तं त्वव्ययं, यथा भूर्भुवःस्वः । रसाः सन्त्यस्यां रस्यते वा रसा । विश्वं बिभर्ति विश्वंभरा, संज्ञायांभृतॄवृजीति (सू०) खच् । क्षौतिभू(रू)पं क्षोणी । जिनाति जायते वा ज्या, इज्येति मूर्खव्याख्या, यच्छाश्वतः-- ज्या मौर्वी ज्या वसुन्धरा, ज्येति **निघण्टुः** । कश्यपस्येयं काश्यपी, भार्गवेण जित्वा ह्यस्मै दत्ता । क्षियन्त्येतां क्षितिः, क्षि निवासे ॥ २ ॥ वसु धनं धत्ते वसुधा । उर्वी विस्तीर्णत्वात् । वसु धारयति वसुंधरा । गोत्राः शैलाः सन्त्यस्यां गोत्रा, गात्त्रायते वा । कायति कूयते वा कुः । प्रथते पृथुनावतारिता वा पृथिवी, प्रथेःषिवन्संप्रसारणं च (उ०) । पृथ्वीति, वोतोगुणवचनाद् (सू०) ङीष् । क्षमते भारं क्ष्मा । अवति प्रजा अव्यते वा नृपैरवनिः । दैत्यमेदोयोगान्मेदिनी । महति मही । भूतधात्री रत्नगर्भा विपुला सागराम्बरा च, रत्नवतीति **भागुरिः** । क्षमा, इला च नानार्थे ॥ ३ ॥ मृद्यते मृत् । (मृत्तिका) मृदस्तिकन् (सू०) स्वार्थे । (मृत्सा, इ०) स्वार्थे सस्नौप्रशंसायाम् (सू०) । कृष्णभूमः कृष्णमृत्तिकोदग्भूम उदङ्मृदि । पाण्डुभूमः पाण्डुमृच्च, कृष्णोदक्पाण्डुसंख्यापूर्वायाभूमेरच् (वा०) । उर्वति क्षुधमुर्वमियर्ति वा (उर्वरा) । (ऊषः) ऊष रुजायाम् ॥ ४ ॥ (ऊषरः) ऊषसुषीतिरः (सू०) । स्थलति (स्थलम्) । स्थल्यकृत्रिमा चेत्, जानपदकुण्डगोणस्थलेति (सू०) ङीष्, कृत्रिमा तु स्थला । म्रियन्ते तृषार्ता अस्मिन्मरुः । दधन्ति धन्वति वा धन्वा । खिलं शून्यं लाति खिलम् । न प्रहन्यते हलादिभिरप्रहतमकृष्टं क्षेत्रादि ॥५ ॥ जङ्गम्यते जगत्, वर्तमानेपृषद्बृहदिति (उ०) साधुः, शत्रन्तत्वाद् ङीप् । विशन्त्यस्मिन् विष्टपाति वा विष्टपम्, टपस्तप प्रतिघाते । अयं जम्बुद्वीपनवमांशो भरतस्य क्षत्रियस्येदं

त्रिष्वथो जगती लोको विष्टपं भुवनं जगत् ।
लोकोयं भारतं वर्षं शरावत्यास्तु योवधेः ॥ ६ ॥
देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः ।
प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेशस्तु मध्यमः ॥ ७ ॥
आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः ।
नीवृज्जनपदो देशविषयौ तूपवर्तनम् ॥ ८ ॥
त्रिष्वागोष्ठान्नडप्राये नड्वान्नड्वल इत्यपि ।
कुमुद्वान्कुमुदप्राये वेतस्वान्बहुवेतसे ॥ ९ ॥
शाद्वलः शादहरिते सजम्बाले तु पङ्किलः ।
जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः ॥ १० ॥
स्त्री शर्करा शर्करिलः शार्करः शर्करावति ।
देश एवादिमावेवमुन्नेयाः सिकतावति ॥ ११ ॥
देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः ।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥ १२ ॥

भारतं नाम (वर्षं) भूम्येकदेशः, वृष्यते सिच्यते वर्षम्, तथा च– हिमवान्हेमकूटश्च निषधो मेरुरन्तरे । नीलः श्वेतश्च शृङ्गीवान् गन्धमादनमष्टममिति सीमाविच्छिन्नान्यन्यानीलावृत्तादीन्यष्टौ वर्षाणि । शरावत्या नद्या मर्यादायाः प्राक्सहचरितो दक्षिणो देशः प्राच्यः ॥ ६ ॥ शरावत्या अवधेः पश्चिमेन सहचरित उत्तरो देशः (उदीच्यः), यदाह–प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा । विदुषां शब्दसिध्यर्थं सा नः पातु शरावती (**काशिका**)॥ प्रतिगतोन्तमुक्तावधेः सुटादिदेशः (?) प्रत्यन्तः । (मध्यमः) यन्**मनुः**– हिमवद्विन्ध्ययोरन्तर्यत्प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ ७ ॥ आर्या आवर्तन्तेस्मिन्नार्यावर्तः, यन्**मनुः**– आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥ नियतं वर्ततेस्मिन् नीवृत्, नहिवृतिवृषीति (सू०) दीर्घः । जनानां पदं जनपदः, पुंस्त्वं लोकात्, जनैर्वास्यमानो राष्ट्राख्योयम् । दिश्यते देशः स्थानमात्रम् । विसिनोति विषयः । उपवर्ततेस्मिन्नुपवर्तनं, उपावर्तनमिति **कात्यः** । पञ्चैकार्थानाहुः ॥ ८ ॥ गोष्ठसंशब्दनात्प्राग्वाच्यलिङ्गाः । तदस्मिन्नस्तीतिदेशेतन्नाम्नि (सू०), कुमुदनडवेतसेभ्योड्मतुप् (सू०), नडशादाड्ड्वलच् (सू०) ॥ ९ ॥ शादेन शष्पेण नीलः, यच्**छाश्वतः**– शष्पकर्दमयोः शादः । शीयते स्मिन् शादः, शादोस्त्यस्मिञ्शाद्वलो देशः, ड्वलच्, यथा– न हि कोटरसंस्थेरग्नौ तरुर्भवति शाद्वलः, शाद्वला दूर्वेति च नीलत्वोपचारात् । पङ्कोस्यास्ति पङ्किलः, पिच्छादित्वादिलच् (लोमादियामादीति) । अनुगता आपोत्रानूपम्, ऊदनोर्देशे (सू०) आकारस्य–ऊकारः, ततो दीर्घः, अप्रत्ययश्च । कषन्त्यापो यं स कच्छः, तथाविधोनूपप्रायः, कच्छमिति **माला** ॥ १० ॥ देशेलुबिलचौच (सू०), सिकताशर्कराभ्यांच (सू०) इत्यण्मतुपौ तु सार्वत्रिकौ । तदाह– मध्यान्मः (सू०) इत्यत्रादेरित्युपसंख्यानात् (आदेश्चेतिवक्तव्यम्) आदिमौ शर्कराशर्करिलौ देशे नियमात् । शर्कराश्मप्राया मृत् । सिकतासिकतिलौ देशे, सर्वत्र तु सैकतः सिकतावांश्च ॥ ११ ॥ नद्यम्बुजातसस्यसंवर्धितो नदीमातृकः । वर्षजव्रीहिवार्धितश्च देशो देवमातृकः, देवोभ्रं मातास्येति ॥ १२ ॥ नपूजनात् (सू०) इति सुराज्ञीति समासान्ताभावः, राजन्वान्सौराज्ये (सू०) इति साधुः । *देशो विषयोपलक्षणम्, यथा– राजन्वाँल्लोक उच्यते । राजमात्रयुक्ते देशे (राजवान्) । गावस्तिष्ठन्त्यत्र गोष्ठं, घञर्थेकविधानम् (वा०), अम्बाम्बगो-

सुराज्ञि देशे राजन्वान्स्यात्ततोन्यत्र राजवान् ।
गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम् ॥ १३ ॥
पर्यन्तभूः परिसरः सेतुरालौ स्त्रियां पुमान् ।
वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम् ॥ १४ ॥
अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥ १५ ॥
अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि ।
व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ॥ १६ ॥
अपन्थास्त्वपथं तुल्ये शृङ्गाटकचतुष्पथे ।
प्रान्तरं दूरशून्योऽध्वा कान्तारं वर्त्म दुर्गमम् ॥ १७ ॥
गव्यूतिः स्त्री क्रोशयुगं नल्वः किष्कुचतुःशतम् ।
घण्टापथः संसरणं तत्पुरस्योपनिष्करम् ॥ १८ ॥

इति भूमिवर्गः । १ ।

पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम् ॥ १ ॥

भूर्मात्यादिना (सू०) षत्वम् । यत्र गावः प्रागासन् (गौष्ठीनं), गोष्ठात्खञ्भूतपूर्वे (सू०) इति खञ् ॥१३॥ परितः सरन्त्यस्मिन्परिसरो ग्रामादेः परिच्छेदभूः । सिन्वन्ति बध्नन्ति तं सेतुः पुलिङ्गः । आलय(त्य)न्तेम्भोत्रालिः स्त्रीलिङ्गः, सस्यार्थं जलाधारणोयम् । संक्रमस्तु तरणार्थो यन्माला– संक्रमो दुर्गसंचरः । वामं लूयते वामैर्वा वामलूरः । न–अकति नाकुः । वलन्ते प्राणिनोत्र वल्मीकम् ॥ १४ ॥ [अयन्ते] वर्तन्ते मार्गन्ति– अतन्ति पद्यन्ते सरन्ति वानेनेति वाक्यानि । पद्भ्यां हन्यते पद्धतिः, हिमकाषिहतिषुच (सू०) इति पत् । पदमस्मिन्दृश्यं (सू०) इति यति पद्या, पद्यत्यतदर्थे (सू०) । एके पादा अस्यामेकपदी, कुम्भपद्यादौ (कुम्भपदीषुच) साधुः ॥ १५ ॥ (अतिपन्था, इ०) नपूजनात् (सू०) इत्यत स्वातिग्रहणाद्, ऋक्पूरब्धूरिति (सू०) सामासान्तो न भवति । संश्चासौ पन्थाश्च सत्पथः, समासान्तोऽच् । विरुद्धोध्वा व्यध्वः, उपसर्गादध्वनः (सू०) इत्यच् । विरुद्धः पन्था विपथः । कुत्सितोध्वा पन्थाश्च (कदध्वा, इ०), कोःकत्तत्पुरुषेचि (सू०), कापथ्यक्षयोः (सू०) । विपथं कापथं च क्लीबमाहुः, यद्वामनः– (पथःसंख्याव्ययादेः) संख्याव्ययपूर्वकस्य पथः (क्लीबता) इति ॥ १६ ॥ (अपन्थाः) पथोविभाषा (सू०) इत्यच्, अपथंनपुंसकम् (सू०) । शृङ्गैरटन्ति– अस्मिञ्शृङ्गाटकम् । संस्थानकं (संस्थानं) चत्वरं च । प्रगता अन्तरेस्मात्प्रान्तरं दूरशून्यो मार्गः । कस्याम्भसोन्तमृच्छति कान्तारम् । कान्तारप्रान्तरे एकार्थे आहुः ॥ १७ ॥ (गव्यूतिः) गोर्यूतौछन्दस्युपसंख्यानं (वा०), अध्वपरिमाणेच (वा०) इत्यवादेशः । (नल्वः) णल गन्धे (बन्धे), किष्कुर्हस्तस्तेषां चतुःशती नल्वमिति **माला, कात्यस्तु** नल्वं [विंश]हस्तशतमाह । घण्टोपलक्षितानां हस्तिनां पन्था घण्टापथः, **चाणक्योक्तो**ऽष्टदण्डः । सम्यक्सरन्त्यनेन संसरणं, यद्दुर्गः– बुधैः संसरणं वर्त्म गजादीनामसंकुलम् । पुरोपनिष्करं चोक्तम्– । तत्संसरणं पुरं राजधानी तस्या उपनिष्कराख्यमुपनिष्कीर्यतेत्र सैन्यमिति ॥ १८ ॥ द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी । दिवस्पृथिव्यौ गञ्जा तु [दिवः पृथिव्याः संज्ञेयं] रुमा स्याल्लवणाकरः ॥ इति भूमिवर्गः । १ ।

पक्षे तु पुरं नगरं च वाशब्दात्पत्तनसाहचर्यात्क्लीबे । पूर्यते पूः । नगाः सन्त्यस्य नगरं, नगपांसुपाण्डुभ्योरः (वा०) । पतन्त्यस्मिन्पत्तनम् । पुटा भाण्डवासनानि भिद्यन्तेस्मिन् पुटभेदनम् । तिष्ठन्त्य-

तच्छाखानगरं वेशो वेश्याजनसमाश्रयः ।
आपणस्तु निषाद्यायां विपणिः पण्यवीथिका ॥ २ ॥
रथ्या प्रतोली विशिखा स्याच्चयो वप्रमस्त्रियाम् ।
प्राकारो वरणः सालः प्राचीनं प्रान्ततो वृतिः ॥ ३ ॥
भित्तिः स्त्री कुड्यमेडूकं यदन्तर्न्यस्तकीकसम् ।
गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥ ४ ॥
निशान्तप(व)स्त्यसदनं भवनागारमन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ॥ ५ ॥
वासः कुटी द्वयोः शाला सभा संजवनं त्विदम् ।
चतुःशालं मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ॥ ६ ॥
चैत्यमायतनं तुल्ये वाजिशाला तु मन्दुरा ।
आवेशनं शिल्पिशाला प्रपा पानीयशालिका ॥ ७ ॥

स्मिन्निल्यष्टशतग्राममध्ये स्थानीयम् । नियतं गच्छन्त्यस्मिन्निगमः, गोचरसंचरेति (सू०) साधुः । नानार्थेधिष्ठानं, दुर्गकोट्टौ राजधानी च । मूलनगरं राजधानी ततोन्यत्समुदायस्थानं (शाखानगरं), शाखेत्युपाङ्गोपलक्षणम् ॥ १ ॥ [स्यात्साकेतमयोध्यायां विदेहा मिथिला पुरी । महोदया कन्यकुब्जा कान्यकुब्जं महोदयम् ॥ काशी वाराणस्यवन्ती विदिशा चोज्जयिन्यपि । प्राग्ज्योतिषं कामरूपं द्वारका द्वारवत्यपि ॥] विशन्त्यस्मिन्कामुखा वेशः । आपणन्तेस्मिन्नापणः, गोचरसंचरेति (सू०) साधुः । निषीदन्त्यस्यां निषद्या, संज्ञायांसमजनिषदेति (सू०) क्यप् । विपण्यन्तेस्यां विपणिर्वणिग्वीथी । आद्यौ वणिक्स्थानेन्यौ हट्टवर्त्मन्यामाहुः, यच्छाश्वतः– आपणः पण्यवीथी च द्वयं विपणिसंज्ञकम् ॥ २ ॥ रथं वहति रथ्या, तद्वहतिरथयुगेति (सू०) यत् । प्रतोल्यते प्रतोली । विगताशिखा मुण्डितेव समन्ताद्विशीर्यते जनसंमर्देन वा विशिखा । विपण्यादीन्पञ्चैकार्थानाहुः, यत्कौटिल्यः– विशिखायां सौवर्णिकप्रचारः । चीयते चयः प्राकाराधारः । उप्यतेस्मिन्वप्रः । प्रक्रियते प्राकारः, सादकारयोःकृत्रिमइति (वा०) दीर्घः । वृणोति वरणः । स्यति पर्यन्तं करोति सालः । प्रागेव प्राचीनं विभाषाञ्चेरदिक्स्त्रियाम् (सू०) इति खः, प्राचीरमित्येके । व्रियतेनया वृतिः । वाटो वाटी– आवेष्टकोपि ॥ ३ ॥ भिद्यते भित्तिः । कुड्यां साधु कुड्यं, पृषोदरादित्वात् (सू०) डत्वम् । तत्कुड्यमन्तर्न्यस्तास्थि, एडयत एडूकम् । गृह्णाति गृहं, गेहेकः (सू०) । उदवसिनोति स्मोर्ध्वमवसीयते वोदवसितम् । विशन्त्यस्मिन् वेश्म । सीदन्त्यस्मिन्सद्म सदनम् । निकेत्यतेस्मिन्निकेतनम् ॥ ४ ॥ निशाम्यन्त्यस्मिन् निशान्तं, निशाया अन्तोत्रेत्येके । अपस्त्यायति संघातीभवति पस्त्यम् । भवन्त्यस्मिन् भवनम् । अग्यतेस्मिन्नगारं, अगान्वृक्षानियर्ति वा । मन्यते सुप्यतेत्र मन्दिरम् । (गृहाः) भूम्नि बहुत्वे, गृहाणीत्यप्याहुः । निचीयते निकाय्यः, पाय्यसान्नाय्यनिकाय्येति (सू०) साधुः । निलीयन्तेस्मिन्निलयः । आलीयन्तेस्मिन्नालयः, पुंसिसंज्ञायांघः (सू०) ॥ ५ ॥ उष्यतेस्मिन्वासः । कुट्यतेस्यां कुटी । शा(श)लन्त्यस्यां शाला, शालते वा । सह भान्त्यस्यां सभा । वसतिर्वासतेयी निवेशनमावसथः संस्त्यायोपि । सजन्ति संजवन्ते वास्मिन्संजवनम् । चतस्रः शालाः समाहृताश्चतुःशालम् । इदं गृहं मुनिसंबन्धि पर्णशालाख्यम् । उटैर्देर्श्यां तृणपर्णैर्जायत उटजम् ॥६॥ चित्याया इदं चैत्यं देवकुले[ल]स्थाद्वृक्षोध्वगा[वृक्षाद्युपा]श्रयः । आयतन्तोस्मिन्नायतनम् । मन्दन्तेत्र मन्दुरा । आविशन्त्यावेशनं गृहादन्यत्कारूणां कर्मस्थानं, तेन शिल्पशालेति सभ्यः पाठः । प्रपिबन्त्यस्यां प्रपा, घञर्थेकविधानम्(वा०) ॥ ७ ॥ मठ्यतेस्मिन्मठः, मठ निवासे । छत्त्रशीला

मठश्छात्रादिनिलयो गञ्जा तु मदिरागृहम् ।
गर्भागारं वासगृहमरिष्टं सूतिकागृहम् ॥ ८ ॥
वातायनं गवाक्षोथ मण्डपोस्त्री जनाश्रयः ।
हर्म्यादि धनिनां वासः प्रासादो देवभूभुजाम् ॥ ९ ॥
सौधोस्त्री राजसदनमुपकार्योपकारिका ।
स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोपि च ॥ १० ॥
विच्छर्दकप्रभेदा हि भवन्तीश्वरसद्मनाम् ।
स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् ॥ ११ ॥
शुद्धान्तश्चावरोधश्च स्यादट्टः क्षोममस्त्रियाम् ।
प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ॥ १२ ॥
गृहावग्रहणी देहल्यङ्गनं चत्वराजिरे ।
अधस्ताद्दारुणि शिला नासा दारूपरि स्थितम् ॥ १३ ॥
प्रच्छन्नमन्तर्द्वारं स्यात्पक्षद्वारं तु पक्षकः ।
वलीकनीध्रे पटलप्रान्तेथ पटलं छदिः ॥ १४ ॥

विद्यार्थिनश्छात्राः, छत्त्रेण गुरुसेवा लक्ष्यते, छत्त्रादिभ्योणः (सू०)। सत्त्रशाला प्रतिश्रयश्च । बौद्धानां तु विहारोस्त्री । गञ्जन्ति रटन्त्यस्यां क्षीबा गञ्जा । वासाय वासमध्ये वा गृहम्, अपवरकं कोष्ठम् । [कुट्टिमोस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहम्] । न रिष्यते हिंस्रैः कृतरक्षत्वादरिष्टम् ॥ ८ ॥ गवामिवाक्षीणि यत्रेति गवाक्षः, इन्द्राक्षयोःसमासेचेत्यत्रङ् (?) । इन्द्रकोशो मतङ्गकः, [मत्तालम्बोपाश्रयः स्यात्प्रग्रीवो मत्तवारणः] । मण्ड्यते नानालोकैर्मण्डपः । हरति मनो हर्म्यम् । आदिशब्दाद्वासगृहादि । वास इत्येव, प्रसीदन्त्यस्मिन्प्रासादः, सादकारयोःकृत्रिमइति (वा०) दीर्घः ॥ ९ ॥ सुधाशुभ्रं सौधम् । उपक्रियत उपकरोति वा पटमण्डपादि राजसदनम् । स्वस्ति कायति स्वस्तिकः । नन्दी– आवर्तोत्र नन्द्यावर्तः । आदिशब्दादुचकवर्धमानाद्याः ॥१०॥ विच्छर्दकप्रभेदा रचनाविशेषाः, उच्छृदिर्दीप्तौ, विशिष्टेच्छानिर्मितो विच्छन्दक इत्येके । स्त्रीणामगारं, अवरुध्यन्तेस्मिन्नवरोधनम् ॥ ११ ॥ शुद्धाः सुरक्षा अन्ता अत्र शुद्धान्तः । एते महिष्यामपि तात्स्थ्याद्वर्तन्ते । अट्टन्त्यट्टत्य[ट्यते]त्र वाट्टोट्टालकः, अट्ट अतिक्रमहिंसयोः, प्राकाराग्रे रणगृहमिति **कौटिल्यः** । (क्षोमः) क्षुवन्ति शब्दायन्ते योधाः (अत्र), अतः क्षौमः प्राकारधारणार्थोभ्यन्तरः क्षोमाख्य इत्येके । प्रहण्यते प्रघणः प्रघाणः, अगारैकदेशेप्रघणःप्रघाणश्च (सू०)। अल्यते भूष्यतेलिन्दः । द्वारप्रकोष्ठाद्बहिर्द्वाराग्रवर्तिचतुष्किकान्ते– उपालिन्दकाख्या ॥ १२ ॥ द्वाराग्रं गृह्यते यया, वीथ्याख्येत्येके, बुध्नोदुम्बरमिति सभ्योर्थः । अवगृह्यते द्वारशाखानयावग्रहणी । दिह्यते देहली । अङ्गत्यत्राङ्गनम् । चत्यते चत्वरम् । अजन्त्यत्राजिरम् । स्तम्भादीनामाधारदारु शिलाख्यं, स्तम्भोर्ध्वे दार्वन्तरस्थापनार्थं यदासज्यते सा शिलेति **गौडः** । स्तम्भादेरित्यर्थः, द्वारशाखायऊर्ध्वेदारुणी शिलानासे इति **माला**, यदाह– नासा दारूपरि द्वारस्याधो दारु शिला स्त्रियाम् । ऊर्ध्वोदुम्बरमुत्तरासङ्गोधउदुम्बरं देहलीत्याचार्याः ॥ १३ ॥ (प्रच्छन्नं) खडक्किकाख्यम् । पार्श्वद्वारमेकमंतदिति **कात्यः**, यदाह– प्रच्छन्नमन्तर्द्वारं यत्पक्षद्वारं तदुच्यते । छादनान्तो वलीकाख्यः, वलति संवृणोतीति, कुड्याद्बहिर्वीथी येन च्छाद्यते । नियतमिन्द्ध नीयते वाम्भोनेन नीध्रम् । पटं लाति पटलम् । छाद्यतेनेनेति छदिः, इसन्तः क्लीबे, इस्मन्त्रन्क्विषुच (सू०) इति ह्रस्वः ॥ १४ ॥ गोपायति गोपानसी । पटलाधारो वंशपञ्जरो वलभी वलभ्याश्चूडा वा, ञ्वल संवरणे । विशिष्टं टङ्क्यते विटङ्कः, पक्षिवि-

गोपानसी तु वलभीछादने वक्रदारुणि ।
कपोतपालिकायां तु विटङ्कं पुंनपुंसकम् ॥ १५ ॥
स्त्री द्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ।
तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरम् ॥ १६ ॥
कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ।
कवाटमररं तुल्ये तद्विष्कम्भोऽर्गलं न ना ॥ १७ ॥
आरोहणं स्यात्सोपानं निश्रेणिस्त्वधिरोहणी ।
संमार्जनी शोधनी स्यात्संकरोऽवकरस्तथा ॥ १८ ॥
क्षिप्ते मुखं निःसरणं संनिवेशो निकर्षणः ।
समौ संवसथग्रामौ वेश्मभूर्वास्तुरस्त्रियाम् ॥ १९ ॥
ग्रामान्त उपशल्यं स्यात्सीमसीमे स्त्रियामुभे ।
घोष आभीरपल्ली स्यात्पक्कणः शबरालयः ॥ २० ॥

इति पुरवर्गः । २ ।

महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ १ ॥

श्रामार्थं बहिर्निर्गमितं दारु, वक्रदार्वाधारः, पक्षिपङ्क्तिर्हि तत्रोत्कीर्यते ॥१५॥ प्रतिह्रियन्ते प्रतिरुध्यन्तेनेन प्रतीहारः । नानार्थे वलजम् । दारुपरिष्कृता चतुरस्रा विश्रान्तिभूः, विगतं तर्दनं यत्रेति वितर्दिः । विद्न्त्यस्यां वेदी । मङ्गलार्थं तुरन्त्यत्र तोरणं द्वाराग्रे स्तम्भोपरि रचितं सिंहद्वाराख्यम् । मङ्गलस्रक्तोरणोर्ध्वे भवेद्वन्दनमालिका । गोप्यते गोपुरं प्रतोली ॥ १६ ॥ दुर्गद्वारावतरणार्थः क्रमनिम्नो हस्तिनखाभो मृत्कूटः– अपसोपानाख्यः (कूटम्), बहिरतटमन्तःसोपानयुक्तं युद्धार्थमित्येके । कं शिरः पाटयति प्रविशतां कवाटो द्वारपट्टः, जपादित्वाद्वत्वम् (ग०)। इयर्त्यररं, अररि च । विष्कम्भो बन्धनिमित्तं, विष्कम्नात्यवष्टम्नात्यवश्यम् । विष्कम्भीत्येके पेठुः । अरेणाकर्षणेन गलत्यर्गलं दारुमयो लौहो वा दण्डः । न ना पुमान्न भवति । परिघश्च ॥ १७ ॥ आरुह्यतेवरुह्यते वानेनारोहणम् । सहोपानमस्त्यस्मिन् सोपानम् । निश्रयति भित्तिं नियता श्रेणिः सोपानपङ्क्तिर्वात्र निश्रेणिः । अधिरोहन्त्यवरोहन्ति च यया दारुमय्या साधिरोहणी । बहुलाख्या रजोवारणी, मार्जन्या पूतं हि बहुलीकृतं धान्याद्याहुः । समूहनी पवनीति स्मार्ताः । बहुकरी वर्धनी च । (क्षिप्ते) धूल्यादाविति शेषः । अवकीर्यतेवकरः ॥ १८ ॥ गृहादेर्निःस्त्रियते प्रविश्यते च येन तन्मुखं, यत्कौटिल्यः– मुखसमः संक्रमो मुखानुवादेन निःसरणविधिर्वा । समन्तान्निविशन्तेत्र संनिवेशः पुरादेर्बहिर्विहरणभूः । निवृत्तं कर्षणमत्र निकर्षणः । संवसन्त्यत्र संवसथः । ग्रस्यते भोगिभिर्ग्रामः । द्रंगं ग्रामधानं खेटकं च । वसन्त्यस्मिन्वास्तुः, वसेस्तुन्गारेणिच्च (उ०) ॥ १० ॥ अन्ते चिह्नार्थं शल्यप्रक्षेपादुपशल्यं, उपशलने समीपश्रपणे साधु वा । सीयते बध्यते सीमा, [मनः] (सू०) डाबुभाभ्यामन्यतरस्याम् (सू०) । सीम्न्याघाटकटौ (?) मालकोऽस्त्री ग्रामान्तराटवी । घोषन्ति गावोऽत्र घोषः । आबिभ्यत्यभित ईरयन्ति वा गा आभीरा गोपाः । पल्लयते पल्लिः– गृहालिः, कुटीग्रामकयोः पल्लिरिति तु शाश्वतः । पच्यतेस्मिन् पक्कणः । शवान्त भ्रमन्ति शबरा आरण्यचाण्डालाः ॥ २० ॥ इति पुरवर्गः । २ ।

महीं धारयति महीध्रः, मूलविभुजादित्वात्कः (कप्रकरणेमूलविभुजादिभ्यउपसंख्यानम्)। हर्तुमशक्योहार्यः । ध्रियते धरः । पर्वाणि सन्त्यस्य पर्वतः, तप्पर्वमरुद्भ्याम् (वा०) । अद्यतेद्रिः । गां त्रायते गोत्रः । गीर्यते गिरिः । शिलानामयं शैलः, मत्वर्थेऽण् (अण्च) ॥ १ ॥ अन्तर्लीयते बहिश्च न लो-

लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ ।
अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः ॥ २ ॥
हिमवान् निषधो विन्ध्यो माल्यवान्पारियात्रि(त्र)कः ।
गन्धमादनमन्ये च हेमकूटादयो नगाः ॥ ३ ॥
पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।
कूटोऽस्त्री शिखरं शृङ्गं प्रपातस्त्वतटो भृगुः ॥ ४ ॥
कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियौ ।
उत्सः प्रस्रवणं वारिप्रवाहे निर्झरो झरः ॥ ५ ॥
दरी तु कन्दरो वा स्त्री देवखातबिले गुहा ।
गह्वरं गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ॥ ६ ॥
खनिः स्त्रियामाकरः स्यात्पादाः प्रत्यन्तपर्वताः ।
उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ॥ ७ ॥

क्यतेनकैत्वाल्लोकालोकः । चक्राकारेण वलते वाडते वा चक्रवाडः, वाडृ आप्लाव्ये, आवेष्ट्य द्वीपान् स्थितो ह्यसौ । त्रिककुत्पर्वते (सू०) इति साधुः । अस्यत्यर्कादीनस्यते वाऽस्तः । चरन्त्यत्र चरमः पश्चिमो मन्दराह्वयः। उदयन्तेऽस्माद् ग्रहा उदयः ॥ २॥ नियतं सीदन्त्यस्मिन् निषधः। वि-इध्यते विन्ध्यः, अघ्न्यादिः (उ०) । माल्याकारतास्यास्ति माल्यवान् । परियात्रायां भवः पारियात्रिकः स्त्रारोहत्वात् । गन्धेन मादयति गन्धमादनम्, [प्रयोगे च पुंलिङ्गता दृश्यते, सुगन्धिर्गन्धमादन इति कालिदासः] । आदिशब्दान्मलयमन्दराद्याः । हिमाचलोऽद्रिराजः स्यान्मलयश्चन्दनाचलः ॥ ३ ॥ पिनष्टि, प्रस्तृणाति, गिरति, उपलाति, अश्नाति, शिनोति, दृणातीति वाक्यानि । कूट(य)ति कूटं, कूट्यते वार्कदावाभ्याम्, कूट दाहे । शिखास्यास्ति शिखरं, शिखायाह्स्त्रश्चेतिरः (वा०) । शृणाति शृङ्गम् । प्रपतत्यस्मात्प्रपातः । तटशून्योऽतटः । प्रपातस्तु तटो भृगुरिति पाठे प्रपतत्यते यतस्तटात्स भृगुः । बिभर्ति भृज्ज्यते वा भृगुः ॥ ४ ॥ कटत्यावृणोति कटको मध्यभागो मेखलाख्यः । स्नौत्यम्भः स्नुः । प्रतिष्ठतेऽस्मिन्समभूभागत्वात्प्रस्थः, घञर्थेकविधानम् (वा०)। सनोति ददाति सुखं सानुः। द्वित्वात्प्रस्थोऽप्यस्त्री। उनत्त्यम्भसा— उत्सः। प्रस्रवत्यस्मात्प्रस्रवणम्। निर्झर्यते निर्झरः। प्रपाताम्बु [-नि] झीर्यते निर्झरझरावित्येके॥५॥ दीर्यते दरी, पचादित्वादच् (नन्दिग्रहेति) । कुत्सितं दीर्यते कं दृणाति वा कन्दरा, पक्षे रूनात्पुमान् कन्दरोऽपि । समे इत्यर्थः, देवखातमकृतकं, (बिलं) बिल भेदने । गूहति गुहा । अगे ह्वरति गाह्यते वा गह्वरम् । अकृतकबिलविषये गुहा गह्वरं चेत्येके पूर्वेण सह संबध्नन्ति, यत्कात्यः— देवखाते बिले गुहा, **शाश्वतो**ऽप्याह— गह्वरं बिलदम्भयोः । गण्डाः शैला इव स्थूलत्वाद् गण्डशैलाः, (च्युताः) भूकम्पादिना गलिताः ॥६॥ [दन्तकास्तु बहिस्तिर्यक्प्रदेशान्निर्गता गिरेः] । खन्यन्ते लोहादयोऽस्याः खनिः खानिश्च । आकीर्यन्ते धातवोऽस्मिन्नाकरः । गञ्जापि, यच्छाश्वतः— भाण्डागारं विदुर्गञ्जं खनौ गञ्जा सुरागृहे । मुख्यपर्वतान्ते क्षुद्रपर्वताः पादा इवाधःस्थत्वाच्चरणाच्च । अद्रेर्भूमिरित्येव, उपाधिभ्यांत्यकन्नासन्नारूढयोः (सू०), नयासयोः (सू०) इत्यत्र त्यकनः— (त्यकनश्चनिषेधः) उपसंख्यानीदित्वाभावः ॥७॥ धत्ते धातुः । आदिशब्दाद्धिङ्गुलादिः, यदाहुः— सुवर्णरूप्यताम्राणि हरितालं मनःशिला ॥ गैरिकाञ्जनकासीससलोहसीसाः सहिङ्गुलाः ॥ गन्धकोऽभ्रकमित्याद्या धातवो गिरिसंभवाः ॥ विशेषेण धातुर्धातुशब्देनैव प्रसिद्धेः, गैरिकं हेम-

धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः ।
निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ॥ ८ ॥

इति शैलवर्गः । ३ ।

अटव्यरण्यं विपिनं गहनं काननं वनम् ।
महारण्यमरण्यानी गृहारामास्तु निष्कुटाः ॥ १ ॥
आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।
अमात्यगणिकागेहोपवने वृक्षवाटिका ॥ २ ॥
पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।
स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥ ३ ॥
वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः ।
वन्या वनसमूहे स्यादङ्कुरोऽभिनवोद्भिदि ॥ ४ ॥
वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः ॥ ५ ॥
वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः ।
ओषधिः फलपाकान्ता स्यादवन्ध्यः फलेग्रहिः ॥ ६ ॥

त्येके, गिरौ भवामिति गिरिणाविग्रहोगिरिकादण् । स्थान इति शेषः । कुञ्जिरावरणार्थो लोकात् । व्याधिकरणे सप्तम्यौ ॥ ८ ॥ इति शैलवर्गः । ३ ।

अटन्त्यस्यामटवी । इयर्ति भ्राम्यन्त्यत्रारण्यम् । वेपन्ते भयेनात्र विपिनं, वेपितुह्योर्ह्रस्वश्च (उ०) इतीनन् । गाह्यते गहनम् । कन्यते गम्यतेऽस्मिन्काननम् । वन्यते सेव्यते वनं वृक्षबहुलं स्थानम् । पूर्वैः सहानयोरैक्यमाहुः । सत्त्रं नानार्थे । हिमारण्ययोर्महत्वेङीषानुकौ (वा०) । कुटाद् गृहान्निष्कान्ता निष्कुटाः ॥ १ ॥ आरमन्त्यस्मिन्नारामः । करणेन निर्वृत्तः कृत्रिमो वृक्षसमूहः । समीपं वनस्योपवनम्, तुल्यत्वेन नैकव्यात् । अमात्यगणिकयोरुपलक्षणार्थत्वात्सार्थवाहादीनामपि ॥ २ ॥ आक्रीडन्त्यस्मिन्नाक्रीडः । उद्यान्त्यस्मिन्नुद्यानम् । साधारणं राज्ञीभिः सह । प्रमदार्थं वनं प्रमदानां वा प्रमदवनम्, ङ्यापोः संज्ञाछन्दसोर्बहुलं (सू०) इति ह्रस्वः । अन्तःपुरं तत्स्था देव्यः ॥ ३ ॥ वियन्त्यनया वीथिः । आलात्यालिः । आवलत्यावलिः । पञ्च्यते पङ्क्तिः । श्रीयते श्रेणिः । सान्तरा पङ्क्तिर्निरन्तरा लेखा, यदाह मूले– लेखास्तु राजय इति । लिख्यन्ते लेखाः । राजन्ते राजयः, पङ्क्त्यपङ्क्तिसाधारणाः । (वन्या) पाशादिभ्योयः (सू०) । अङ्क्यतेऽङ्कुरः, अकि लक्षणे । उद्भिद्यत उद्भित् । प्ररोहोऽपि ॥ ४ ॥ वृश्च्यते छिद्यते वृक्षः, वृक्षति वृणोति वा । शाखी, व्रीह्यादौ (व्रीह्यादिभ्यश्च)। पादैर्मूलैः पिबति पादपः, एवमङ्घ्रिपः [चरणपश्च प्रसिद्धः] । [तरन्त्यनेनातपं तरुः । अनसः शकटस्याकं गतिं हन्ति– अनोकहो निर्वचनात्] । द्रुर्वृक्षैकदेशोऽस्यास्ति द्रुमः, द्युद्रुभ्यांमः (सू०) । द्रुशब्दोऽपि, अवयवेषु हि वृत्ताः शब्दाः समुदायेष्वपि वर्तन्त इति । न गच्छत्यगमः । अगनगौ नानार्थे । कुजोऽगच्छोऽपि ॥ ५ ॥ वनस्यपतिर्वनस्पतिः, पारस्करादित्वात् (सू०) सुट्, भवेर्थे दित्यदित्येति (सू०) ण्यः । पुष्पेभ्यो जातैः फलैर्हेतुभिः (वानस्पत्यः) । पुष्पं विना तैः फलैः (वनस्पतिः) । ओषं रुजं धयत्योषधिः, फलपाक एवान्तो यस्याः । फलानि गृह्णातीति, फलेग्रहिरात्मंभरिश्च (सू०) इति साधुः ॥ ६ ॥ बध्नाति फलं बन्ध्यः । अवके शून्ये– ईडैवकेशी । फलं बह्वस्यातीति, फलबर्हाभ्यामिनच् (वा०) । प्रफलति स्म प्रफुल्तः, ञिफला विशरणे, क्ते– उत्परस्यातः (सू०) इत्युत्वम् (तिचेत्युत्वम्) । अनुपसर्गात्फुल्लक्षीबेति

वन्ध्योऽफलोऽवकेशी च फलवान्फलिनः फली ।
प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥
फुल्लश्चैते विकसिते स्युरवन्ध्यादयस्त्रिषु ।
स्थाणुर्वा ना ध्रुवः शङ्कुर्ह्रस्वशाखाशिफः क्षुपः ॥ ८ ॥
अप्रकाण्डे स्तम्बगुल्मौ वल्ली तु व्रततिर्लता ।
लता प्रतानिनी वीरुद् गुल्मिन्युलप इत्यपि ॥ ९ ॥
नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ।
अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ॥ १० ॥
समे शाखालते स्कन्धशाखाशाले शिफाजटे ।
शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गता लता ॥ ११ ॥
शिरोऽग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामकः ।
सारो मज्जा नरि त्वक्स्त्री वल्कं वल्कलमस्त्रियाम् ॥ १२ ॥

(सू०) फुल्लः साधुः । उत्फुल्लसंफुल्लयोरुपसंख्यानम् (वा०), प्रफुल्लेति पाठे फुल्ल विकसने, अच् । विगत आकोशः संकोचोऽस्य व्याकोशः । विशेषेण कचति विकचः । स्फुटति स्फुटः ॥ ७ ॥ (त्रिषु) वाच्यलिङ्गत्वात् । (स्थाणुः, इ०) तिष्ठति ध्रुवति शङ्कतेऽस्मात् । ह्रस्वाः शाखाः शिफामूलानि चास्य, क्षुप्यते क्षुपः सूक्ष्मलतादिप्रतानः ॥ ८ ॥ प्रकाण्डो गण्डस्तद्रहिते, उद्भिद्विशेषः स्तम्बस्तृणसंघातो वा, तिष्ठतीति स्थः, स्थःस्तोऽम्बजबकौ (उ०) । गुडति गुल्मः । नानार्थे विटपः । वलते वेष्टते वल्ली गुडूच्यादिर्माधव्यादिश्च । वृक्षशाखापि (लता), यच्छाश्वतः– लता प्रततिराख्याता लता शाखा च शाखिनाम् । प्रकृष्टा ततिरस्याः प्रततिर्व्रतती च, जपादित्वाद्वत्वं (ग०) । लाति (लतति) लता । लतानां प्रतानोऽस्त्यस्याः प्रतानिनी वा लता विरुत्, यत्कात्यः– वीरुत्स्वपर्णजटिला प्रतानशतगामिनी । विरोहति[यते] वीरुत्, वीरुदिति निपातनादुपसर्गस्य दीर्घः, नहिवृतीति (सू०) दीर्घः, न्यङ्क्वादित्वाद्धत्वम् (सू०) । विरुणद्धि वा, (वीरुत्), अन्येषामपि दृश्यते (सू०) इति दीर्घः । उलप्यते उलपः, उलः सौत्रो दीप्त्यर्थः आवरणार्थो वा, उलप्यते वा (उलपः) ॥ ९ ॥ आरुह्यते आरोह औमस्यम् । उच्छ्रयणमुच्छ्रायः, उदिश्रयतियौतीति (सू०) अनित्यो घञ्, यल्लक्ष्यं– पतनान्ताः समुच्छ्रयाः । उत्सेध उन्नतिः, यच्छाश्वतः– उत्सेधो वपुरुन्नतिः । प्रकाम्यते प्रकाण्डो वृक्षजङ्घा । स्कन्यत आरुह्यते स्कन्धः ॥ १० ॥ (शाखा) शाखृ व्याप्तौ, श्यत्येनां वा । शिखापि । समे इत्येव । शालति शाला शायते वा, यच्छाश्वतः– शाला तरुस्कन्धशाखा शाला भवनमिष्यते । शिनोति शेते वा शिफा । जटति जटनं वा जटा वृक्षादिमूलं, जट संघाते, भिदाद्यङ् (षिद्भिदादिभ्योऽङ्) । एवं शिफालतयोः पर्यायानुक्त्वा स्वरूपमाह । अधो रोहन्ति शाखा(याः)शिफाः, शिफारूपा शाखावरोहोऽश्वत्थादेरित्युपाध्यायः । बुध्नादूर्ध्वं गता लता(पि), यदाह मूले– मूलाच्चाग्रं गता लतेति ॥११॥ वृक्षादेर्मूर्धाग्राख्यः । शिखरं तु वा ना पक्षे पुमान्, रूपात्पक्षे क्लीबे । (मूलं) मूल रोहणे । बुध्यतेऽनेन बुध्नो वृक्षादेः पादपर्यायः । सरति सारः, सृस्थिरे (सू०) इति घञ् । मज्जति मज्जा, [नरि पुंसि] । त्वच संवरणे । वल्यते छाद्यतेऽनेन वल्कं, वल संवरणे । वल्कं लाति वल्कलं, श्यामलवत् ॥ १२ ॥ काश्यते काष्ठम् । दीर्यते दारु । विशेषमाह– इन्धनं त्विति । इन्द्धेऽनेनाग्निरिन्धनमिध्मं च, इषियुधीन्धीति (उ०) मक् । आद्यमेध एधेरसुनि दाह्यदार्वर्थे, अपर एधः– अवोदैधौद्मेति (सू०) इन्धेर्धत्वं साधुः । होमार्थे समिध्यतेऽनया समित् । निष्कुष्यते निष्कुहस्तु वा निष्कुहः, निष्कुट इत्येके । कुटति कोटरो

काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित्स्त्रियाम् ।
निष्कुहः कोटरं वा ना वल्लरिर्मञ्जरी स्त्रियौ ॥ १३ ॥
पत्त्रं पलाशं छदनं दलं पर्णं छदः पुमान् ।
पल्लवोऽस्त्री किसलयं विस्तारो विटपोऽस्त्रियाम् ॥ १४ ॥
वृक्षादीनां फलं सस्यं वृन्तं प्रसवबन्धनम् ।
आमे फले शलाटुः स्याच्छुष्के वानमुभे त्रिषु ॥ १५ ॥
क्षारको जालकं क्लीबे कलिका कोरकः पुमान् ।
स्याद्गुच्छ(त्स)कस्तु स्तवकः कुड्मलो मुकुलोऽस्त्रियाम् ॥ १६ ॥
स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं स(सु)मम् ।
मकरन्दः पुष्परसः परागः सुमनोरजः ॥ १७ ॥
द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम् ।
आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फले ॥ १८ ॥

वृक्षगर्तः, ना पुमान्, रूपान्तरक्षे क्लीबे । वल्लते वल्लरिः । मन्यते मञ्जरी चूतादेर्नवोद्भित् ॥ १३ ॥ पतति पत्त्रम् । अपलश्यते शात्यते पलाशम् । छाद्यतेनेन छदनं छदश्च छादेर्घेद्व्युपसर्गस्य (सू०) इति ह्रस्वः । दलति दलम् । पिपर्ति पर्णम् । माढिः पत्त्रशिरा । पलति पल्लवः । किंचित्सरति किसलयम्, विकसति लीयमानं वा । नवपत्त्रं प्रवालाख्यम् । शाखादेर्विस्तृतिर्विस्तारः, प्रथनेवावशब्दे (सू०) इति घञ् । विटान्पाति विटपः, यत्कात्यः– स्कन्धादूर्ध्वं तरोः शाखा करप्रो विटपो मतः, विटन्त्याक्रोशन्त्यस्माद्वा ॥ १४ ॥ वृक्षादीनामिति पूर्वेणापि संबध्नन्ति । वृणोति वृन्तम् । प्रसवः पुष्पादिः, यत्कात्यः– बन्धनं पुष्पफलयोर्वृन्तमाहुः । शलति शलाटुः । फल इत्येव, (वानं) पैओवै शोषणे, ओदितश्च (सू०) इति निष्ठा नत्वम् । शलाटुवाने अभिधेयलिङ्गे ॥ १५ ॥ क्षरति प्रसूयते क्षारकः । जालमिव जालकं नवकलिकावृन्दम् । सूक्ष्मा कलिः कलिका, कल्यते शब्द्यते कलिका । कुर्यते (शब्द्यते) कोरकः । पुष्पसंघातो रम्यत्वाद् गूयते गुच्छः, गुङ् शब्दे । स्तूयते स्तवकः । गुलुञ्छोऽपि । ईषद्विकसिता कलिका, कुटति कुड्मलं । [मुञ्चति कलिकात्वं मुकुलः] । दुर्गाद्यास्त्ववान्तरभेदं न मन्यन्ते– मुकुलाख्या तु कलिका कुड्मलं जालकं तथा ॥ १६ ॥ सुष्ठु मन्यते सुमनसः, रूपाद्बहुत्वम् । पुष्यति पुष्पम् । प्रसूयते प्रसूनम् । कुस्यति कुसुमम् । मध्वाख्यः, मङ्क्यते मण्ड्यतेनेन पुष्पं मकरन्दः । परागच्छति परागः पुष्पधूलिः ॥ १७ ॥ वक्ष्यमाणं बदर्यश्वत्थादि वृक्षलतौषधिजातीयं स्त्रीपुंसादिलिङ्गमपि प्रसूयमाने पुष्पे फले मूले च वर्तमानं द्वाभ्यां हीनं नपुंसकलिङ्गं ज्ञेयमित्यर्थः । अवयवेचप्राण्योषधिवृक्षेभ्यः (सू०) इति विकारावयवोरुत्पन्नस्य प्रत्ययस्य लुप्प्रकरणे पुष्पमूलेषुबहुलं (वा०) इति लुप् । क्वचिद् अनुदात्तादेश्च (सू०) इत्यञो लुप् । कदम्बस्य विकारः कदम्बं पुष्पमशोकं करवीरं, बदर्याः फलं बदरं कोलं नालिकेरमात्रं फलमामलकमिति वृक्षलक्षणस्य मयटः फलेलुक् (सू०) । सूरणस्यावयवः सूरणः कन्दः लुपियुक्तिवद्व्यक्तिवचने (सू०) इति स्त्रीपुंसौ प्राप्तौ । हरीतक्याः फलं हरीतकी, अवयवेच प्राण्योषधीति (सू०) अणः– अनुदात्तादेश्च (सू०) इत्यञश्च हरीतक्यादिभ्यश्च (सू०) इति लुप्, लुपि युक्तिवद्व्यक्तिवचने (सू०) इत्यत्र च हरीतक्यादिषु व्यक्तिरिति युक्तिवद्भावात्स्त्रीत्वम् । आदिशब्दात्कोशातकीद्राक्षाबदर्यादिः । अश्वत्थादेः प्लक्षादिभ्योऽञ् (सू०) इति पुनर्विधेः फले लुप्नास्ति । वेणोः बिल्वादिभ्योऽण् (सू०) । नैयग्रोधमिति, न्यग्रोधस्यचकेवलस्य (सू०) इत्यैजागम ॥ १८ ॥ बृहत्याः फलं बार्हतम् । फलति फलं, फल निष्पत्तौ । जम्ब्वावा (सू०) इत्यणि जाम्बवम्, पक्षे ओरञ् (सू०) तस्य लुकि फलं जम्बु (फलेलुक्), लुप्च (सू०) इति जम्बूः– लुपि युक्तिवद्व्यक्तिवचनत्वात् (सू०)

बार्हतं च फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम् ।
पुष्पे जातिप्रभृतयः स्वलिङ्गा व्रीहयः फले ॥ १९ ॥

विदार्याद्यास्तु मूलेपि पुष्पे क्लीबेपि पाटला ।
बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ॥ २० ॥

अश्वत्थोथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः ।
तस्मिन्दधिफलः पुष्पफलदन्तशठावपि ॥ २१ ॥

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।
कोविदारे चमरिकः कुद्दालो युगपत्त्रकः ॥ २२ ॥

स्त्रीत्वम् । पुष्पविकाशे जातेर्लतायाः पुष्पं जातिर्मालती शेफालिका यूथिका, चम्पकं बकुलं शिरीषं, अनुदात्तादेश्च (सू०) इत्यञोणश्च पुष्पमूलेषुबहुलं (वा०) इत्येभ्यः पुष्प एव लुप् । व्रीहीणां फल एव, तदाह– व्रीहयः फले स्वलिङ्गा इत्येव, व्रीणाति व्रीहिः, व्री भ्री भरणे । यवानां फलं यवाः, माषा मुद्गास्तिलाः, व्रीहिमुद्गाभ्यां बिल्वादिभ्योऽण् (सू०), अन्यत्र अवयवेचप्राण्योषधीत्यण् (सू०), तस्य फलपाकशुषां (वा०) इति लुप्, युक्तिवद्भावः, स्वलिङ्गा इत्येव ॥१९॥ (विदार्याद्यास्तु मूले) स्वलिङ्गा इत्येव । विदार्य भुज्यते (विदारी), विदार्या मूलं विदारी, मूल प्रतिष्ठायाम् । (पाटला) अनुदात्तादेश्च (सू०) इत्यञ्, पुष्पमूलेषुबहुलं (वा०) इति लुप्, लुपि युक्तिवत्त्वम् । आद्यशब्दाद्गम्भारीबृहत्यंशुमत्याद्याः । पाटलायाः पुष्पं पाटलं, अञो बाहुलकत्वाल्लुगभावः, यच्छाश्वतः– पाटलं कुसुमे वर्णेप्याशुव्रीहिश्च पाटलः । अपिशब्दात्पाटला, बिल्वाद्यणा पाटलीत्यपि । पुष्प इति किं पाटलो नाम व्रीहिः । बोधिद्रुमो बोधिसत्त्वाख्यः सर्वोपकारित्वात् । तनुवृन्तत्वाद गुरुपर्णत्वात्स्वल्पेपि वाते चलदलः । पिप्पलानि देश्यां पत्त्राणि, तानि सन्त्यस्य, अर्शआदित्वादच् (सू०), अपल्लव इति नैरुक्ताः । एवमाद्याः प्राकृता अपीति धन्वन्तरिः, यदाह –प्रायो जनाः सन्ति वनेचराद्या गोपादयः प्राकृतनामतज्ज्ञाः । प्रयोजनार्थो वचनप्रवृत्तिर्यतस्ततः प्राकृत इत्यदोषः ॥ किं च– रसवीर्यविपाकेभ्यो मूलात्पुष्पात्फलाद्दलात् । आकारादेशकालादेर्वनौषध्यर्थमुन्नयेत् ॥२०॥ अश्वेषु तिष्ठत्यश्वत्थोश्वाश्रयः, पृषोदरादित्वात् (सू०) सस्य तत्वम् । आह धन्वन्तरिः– पिप्पली केशवावासश्चलपत्रः पवित्रकः । मङ्गल्यः श्यामलोश्वत्थो बोधिसत्त्वो गजाशनः ॥ केशवावासमङ्गल्यादयोऽत्राल्पप्रयोगत्वान्नोक्ताः । एवमुत्तरत्र । कपिषु तिष्ठति कपित्थः कपिप्रियत्वात् । दध्नि तिष्ठति दधित्थो दधिफलत्वात् । ग्राही विष्टम्भकारित्वात् । मन्मथो मदनाख्यः पर्यायेणोक्तः । दन्तेषु शठोम्लत्वात् । आह च– कपित्थोथ दधित्थस्तु ग्राही फलसुगन्धकः । अक्षस्यदो दधिफलश्चिरपाकी कपिप्रियः ॥ द्व्यर्थे पुष्पफलः कूष्माण्डः कपित्थश्च, तथा दन्तशठो जम्भीरः कपित्थश्च । त्र्यर्थे मदनः पिण्डीतकः कपित्थो धत्तूरकश्च ॥ २१ ॥ उल्लङ्घिताम्बर उदुम्बरः, उत्वं लक्ष्यात् । मशकगर्भाणि फलान्यस्य जन्तुफलः, कृमिफलः पर्यायेणोक्तः । आह च– क्षीरवृक्षे हेमदुग्ध उदुम्बरसदाफलौ । अपुष्पफलसम्बद्धो यज्ञाङ्गी श्वेतवल्कलः ॥ आहेन्दुः– उदुम्बरस्तु यज्ञाङ्गः सुचक्षुः श्वेतवल्कलः । हेमदुग्धः कृमिफलः क्षीरवृक्षः स काञ्चनः ॥ कोर्भूमेर्विदारणात्कोविदारः, अत एव कुद्दालः । चमरोस्यास्ति चमरिकः । आह च– कोविदारेथ कुद्दालः कुदारः कुण्डली कुली । ताम्रपुष्पश्चमरिको महायमलपत्त्रकः ॥ युगपत्त्रक इति यमलपत्त्रपर्यायेणोक्तः ॥ २२ ॥ शरदि पुष्यति शारदः, शारदीत्येके । आह च– सप्तपर्णः शक्तिपर्णस्त्रिपर्णस्तु सुपर्णकः । सप्तच्छदो गुल्फपुष्पस्तथा शाल्मलिपर्णकः ॥ आहुश्च–सप्तपर्णो बृहत्त्वक्कः सप्ताह्वो गुच्छपुष्पकः । सप्तच्छदः सप्तपत्त्रो युग्मपत्त्रो बहुच्छदः ॥ आसमन्ताद्रुजां वधोत्रारग्वधः, आरमत्र जयन्त्यारजो मलास्तेषां वधोस्तीति वा । राजा चासौ वृक्षश्च, रोगराजं वृश्चति वा राजवृक्षः । शमीं भिम्बिमकाति श-

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।
आरग्वधे राजवृक्षशम्याकचतुरङ्गुलाः ॥ २३ ॥
आरेवतव्याधिघातकृतमालसुवर्णकाः ।
स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः ॥ २४ ॥
वरणे वरुणः सेतुस्तिक्तशाकः कुमारकः ।
पुन्नागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥ २५ ॥
पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।
तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ २६ ॥
वञ्जुलश्चित्रकृच्चाथ द्वौ पीतनकपीतनौ ।
आम्रातके मधूके तु गुडपुष्पमधुद्रुमौ ॥ २७ ॥
वानप्रस्थमधुष्ठीलौ जलजेऽत्र मधूलकः ।
पीलौ गुडफलः स्रंसी तस्मिंस्तु गिरिसंभवे ॥ २८ ॥

म्याकः । चतुरङ्गुलपर्वा ॥२३॥ रेवती रोगदेवता, अरेवत्यां भव आरेवतः, आरेवते ज्वरोनेन वा, रेवृ प्लवगतौ । कृता मालास्य कृतमालः, उत्तम्भित इव सकर्णिकत्वात् । आह च– कर्णिकारो राजवृक्षः प्रग्रहः कृतमालकः । आरोग्यशिम्बी शम्याको व्याधिघातोपघातकः ॥ आरग्वधो दीर्घफलो व्याधातश्च-तुरङ्गुलः । आरेवतस्तथा कर्णी कर्णीवान् स च रेवतः ॥ जम्भमें[मैं]हनार्थस्यैतानि रूपाणि । दन्तशठो-म्लत्वात् । आह च– जम्भीरो जम्भलो जम्भः प्रोक्तो दन्तशठस्तथा । गम्भीरो वक्त्रशोधी(धी) च॰रोचनो दन्तहर्षणः ॥ २४ ॥ वृणोति वरुणो वरणश्च पर्णिकवृक्षत्वात् । अत एव पर्यन्ते रक्षाहेतु-त्वात्सेतुः । तिक्तरसः शाकश्च, शाकमध्ये पाठात् । कुमारको नित्यतरुणः । आह च– वरुणः श्वेतपुष्पश्च तिक्तशाकः कुमारकः । सेतुद्रुमः साधुवृक्षस्तमालो मारुतापहः ॥ पूजितः पुमान् पुन्नागः स इव प्राधा-न्यात् । प्रशस्ताः केसरा अस्य केसरः । आहेन्दुः– तुङ्गः पुष्पकसंज्ञः स्यात्पुंनामा रक्तकेसरः । पुंनागः पुरुषाह्वश्च केषांचित्पद्मकेसरः ॥ २५ ॥ पारि पारं प्राप्तं भद्रमस्य पारिभद्रः । नियमनान्निम्बः । आह च– निम्बो नियमनो नेता पिचुमन्दः सुतिक्तकः । लिम्बोथ सर्वतोभद्रः प्रभद्रः पारिभद्रकः ॥ ज्यर्थे पारि-भद्रः कोलिः पारिजातो देवदारुश्च । अतिक्रान्तो निशास्तिनिशः, चिरकालित्वात् । स्यन्दनः स्यन्दने पट्टः, रथोपयोगित्वात् । रथचक्रान्ते नयति नेमिः । अतिमुक्तो विस्तीर्णत्वात् ॥ २६ ॥ वन्यते प्रथते वञ्जुलः । चित्रकृल्लघुत्वेपि दार्ढ्यदैर्घ्याभ्यामाश्चर्यकारी । आहुश्च– तिनिशश्चित्रकृन्नेमिः स्यन्दनो रथसाधकः । तथा-रण्यो रथद्रुश्चाप्यतिमुक्तक इत्यपि ॥ ज्यर्थे वञ्जुलो वेतसः स्यन्दनोशोकश्च । पीतीक्रियतेनेन पीतनः । कपींस्तनोति कपीतनः कपिप्रियत्वात् । आम्रमतत्याम्रातकः कपिचूतत्वात् । आह च– आम्रातकः पीत-नकः कपिचूतोम्लवातकः । शृङ्गी कपिरदाव्यश्च (?) नडः कीरः कपिप्रियः ॥ ज्यर्थे कपीतन आम्रातकः प्लक्षः शिरीषश्च । कपीतनशब्दस्य पीतनोपभ्रंश इत्येके । गुडवन्मधुराणि पुष्पाण्यस्य गुडपुष्पः । मधुप्र-धानो द्रुमो मधुद्रुमः ॥ २७ ॥ वनप्रस्थे भवो वानप्रस्थः स्थलजत्वात् । मधु ष्ठीवति मधुष्ठीलः, मधु मा-धुर्यमष्ठीले गर्भेस्य मध्वष्ठीलो वा । यदाह– मधूको मधुवृक्षश्च मध्वष्ठीलो मधुस्रवः । गुडपुष्पो रोध्रपुष्पो वानप्रस्थोथ माधवः ॥ अत्र मधूके, यदाह– मधूकोन्यो मधूलस्तु जलजो दीर्घपत्रकः । ह्रस्वपुष्पः फल-स्वादुर्गैरिकाख्यो मधूलकः ॥ पीयते माधुर्यात्पीलुः पील्यते वा । स्रंसते स्रंसयति वा स्रंसी । आह च– पीलुः शीतफलः स्रंसी धारी गुडफलोपि च ॥ २८ ॥ अक्षणोत्यक्षोटः । कन्दरास्यास्तीति, कन्दरावेष्टना-त्कन्दरालः, कर्पराल इत्येके । आह च– अक्षोटः पर्वतीयश्च फलस्नेहो गुहाशयः । कीरेष्टः कन्दरालश्च स्वादुमज्जो मृदुच्छदः ॥ अङ्क्यते कीलकैरङ्क्यतेऽङ्कोटः, अङ्कोलोपि, प्राकृतेऽकोलः । निकुच्यतेस्मा-

अक्षोटकन्दरालौ द्वावङ्कोटे तु निकोचकः ।
पलाशे किंशुकः पर्णो वातपोथोथ वेतसे ॥ २९ ॥

रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः ।
द्वौ परिव्याधविदुलौ नादेयी चाम्बुवेतसे ॥ ३० ॥

सौ(शो)भाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः ।
रक्तोसौ मधुशिग्रुः स्यादरिष्टः फेनिलः समौ ॥ ३१ ॥

बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।
प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः ॥ ३२ ॥

त्कण्टकित्वान्निकोचकः । आह च– अङ्कोटाङ्कोलकौ रेची निर्दिष्टो दीर्घकीलकः । पीतसारस्ताम्रफलो गन्धपुष्पो निकोचकः ॥ प्रशस्तानि पलाशानि सन्त्यस्य पलाशः, पलमश्नुते रक्तपुष्पत्वाद्वा । किंचिच्छुको नीलः किंशुकः । वातं पोथयति वातपोथः । **चन्द्रोत्र**– पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः । क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः ॥२९॥ वेत्यम्भोनुवर्तते वितस्यते वा वेतसः । रमन्तेस्मिन्रथः । अभ्राणीव पुष्पाण्यस्याभ्रपुष्पः । विदोल्यते वेगेन विदुलः । शीतो वीर्येण लेपाद्दाहशमनात् । वनति भजत्यम्बु वानीरो वञ्जुलश्च । परिविध्यतेम्भसा परिव्याधः । नद्यां भवा नादेयी, नित्यं स्त्री, वेतसी तु द्वयोः । त्रिष्वर्थे**ष्विन्दु**र्नादेयी तर्कारी जलवेतसी भूमिजम्बूश्च । **चन्द्राद्या** विभागेनाहुः– वेतसो विदुलो नम्रो वञ्जुलो दीर्घपत्त्रकः । नादेयी गन्धपत्त्रश्च जलौकाः सभृतस्तथा ॥ नदीकूलप्रियस्त्वन्यः सुशीतो घनपुष्पकः । जलजातस्तोयकामो विदुलो जलवेतसः । निचुलो वेतसादन्यो वक्ष्यते (स्थलवेतसः) ॥३०॥ सुष्ठु भनक्ति मुखं सौभाञ्जनः । शिनोति तैक्ष्ण्याच्छिग्रुः । न क्षीवन्त्यनेन वृष्य [क्ष] त्वादक्षीवः । मुञ्चति गन्धं मोचकः । आहुश्च– शिग्रुः स्याच्छ्वेतमरिचं मुखभञ्जोतितीक्ष्णकः । सौभाञ्जनस्तीक्ष्णगन्धः सुतीक्ष्णो घनपल्लवः ॥ शिग्रुर्हरितशाकोन्यो मतो मूलकपल्लवः । घनच्छदस्तीक्ष्णगन्धो मु[म]रङ्गी दंशनक्षमः ॥ तृतीयो मधुशिग्रुः स्यात्– । त्र्यर्थे मोचकः कदली शाल्मलिः सौभाञ्जनश्च । चतुर्ष्वर्थे**ष्विन्दु**रक्षीवः समुद्रलवणं नीली महानिम्बः सौभाञ्जनश्च । मधुप्रधानः शिग्रुः (मधुशिग्रुः) । न रिष्यन्त्यनेनारिष्टो रक्षाहेतुः । फेनाः सन्त्यस्य फेनिलः । **चन्द्रोत्र**– अरिष्टस्तु सुमङ्गल्यः कृष्णबीजोर्थसाधनः । रक्षाबीजः शीतफेनः फेनिलो गर्भपातनः ॥ ३१ ॥ बिलति भिनत्ति बिल्वः । शण्डिलपौत्रः शिलूषज **इत्यागमाद्य**णौ, शाण्डिल्य इव ब्राह्मणमन्यत्वात्, शैलूष इव नानारूपपरिवर्तनाद्वा । मलते मलान्मालूरः, मां लक्ष्मीं लाति वा । श्रीप्रदानि फलान्यस्य श्रीफलः । आह च– बिल्वः शलाटुः शाण्डिल्यो हृद्यगन्धः सदाफलः । शैलूषः श्रीफलश्चाप्याहुः कङ्कटः पूतिमारुतः ॥ प्लक्षत्यधो गच्छति मूलैः प्लक्षः, प्लुष्यते (प्लक्ष्यते) वा । जटाः सन्त्यस्य जटी । अत एव पृच्यते पर्कटी, इन्नन्तोयं, ईदन्तोप्यस्ति, **यच्छाश्वतः**– विज्ञेया पर्कटी प्लक्षः प्लक्षः पिप्पलपादपः । न्यक् तिर्यग्रुणद्धि मार्गं मूलैर्न्यग्रोहति वा न्यग्रोधः, न्यङ्क्वादित्वात् (सू०) धत्वम् । बहवः पादा मूलान्यस्य बहुपात्, संख्यासुपूर्वस्येति (सू०) अन्तलोपः । वट[य]ति वेष्टयति मूलैर्वटः । आह च– वटो रक्तफलः शृङ्गी न्यग्रोधः कुन्दजो ध्रुवः । क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः ॥ ३२ ॥ आद्यौ श्वेतलोध्रे तिरीटाद्या रक्तलोध्रे । गालयति स्रावयत्यक्षि गालवः । शाबरः शबरवृक्षः । रुणद्धि व्रणं रोध्रः, रलयोरैक्याल्लोध्रोपि । तिरयति रोगांस्तिरीटः । तिलति स्निह्यत्यङ्गमनेन तिल्वः । मार्ष्टयुद्वर्तयत्यङ्गं मार्जनः, अत एवो न्मा(त्सा)दनः । आह च– लोध्रो रोध्रः शाबरकश्चिल्लकस्तिल्वकस्तरः । तिरीटः कालहीनश्च चिल्ली शबरपादपः ॥ द्वितीयः पट्टिकारोध्रो गालवः स्थूलवल्कलः । जीर्णबुध्नो बृहद्वल्कः पट्टी लाक्षाप्रसादनः ॥ **इन्दुश्च**– रोध्रः

गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ ।
आम्रश्चूतो रसालोसौ सहकारोतिसौरभः ॥ ३३ ॥
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ।
कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ॥ ३४ ॥
शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ।
राजादनं पियालः स्यात्सन्नकद्रुर्धनुःपटः ॥ ३५ ॥
गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका ।
श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः ॥ ३६ ॥
कर्कन्धु(न्धू)र्बदरी कोलिर्घोण्टा कुवलफेनिले ।
सौवीरं बदरं कोलमथ स्यात्स्वादुकण्टकः ॥ ३७ ॥

कषायकृद्वज्रश्चिल्लको मधुपुष्पकः । व्रणौषधं कालहीनो हिमपुष्पोक्षिभेषजम् ॥ उत्सादनो घनत्वकस्तरः शबरपादपः । रोध्रः शाबरकः श्वेतत्वगतीसारभेषजम् ॥ द्वितीयः पट्टिकारोध्रो बृहत्पत्रस्तिरीटकः । उत्तालकस्तिल्वकश्च पट्टी लाक्षाप्रसादनः ॥ अम्यतेभिलष्यत आम्रः, अमितम्योर्दीर्घश्च (उ०) इति रक् । च्योतति रसं चूतः, चूष्यत इति **श्रीभोजो** निरबोचत् । रसमलति रसालः । सहकारयति मेलयति स्त्रीपुंसौ सहकारः, सुरासखत्वाद्वा । यदाह– आम्रश्चूतो रसालश्च सचेष्टो मदिरासखः । कामाङ्गः सहकारश्च परपुष्टमहोत्सवः ॥ ३३ ॥ कुम्भोलूखलाकाराद् वृक्षकोशान्निर्याति कुम्भोलूखलकम् । कोशे भवः कौशिकः, उलूकाख्यैव नक्तंचरत्वात् । गुडति रक्षति वातरोगाद् गुग्गुलुः । पिपर्ति पुरः, इगुपधेति (सू०) कः, उदोष्ठ्यपूर्वस्य (सू०) इत्युत् । आह च– गुग्गुलुः कालनिर्यासो जटायुः कौशिकः पुरः । नक्तंचरः शिवो दुर्गो महिषाक्षः फ(प)लंकषः ॥ ३४ ॥ शिलति शिनोति रोगान्वा शेलुः शेलुकश्च । श्लेष्माणमतति शीतवीर्यत्वाच्छ्लेष्मातकः, अत एव शीतः । उद्दालयत्यङ्गमुद्दालकः स्पर्शेन स्फोटकारित्वात् । बहु वृणोति स्रोतांसि बहुवारः । आहेन्दुः– शेलुः श्लेष्मातकः शीतो वसन्तकुसुमस्तथा । उद्दालकः कर्बुरटः शेलुको भूतवृक्षकः ॥ पिच्छिलः शापितः शेलुस्तथासद्बीजकुत्सितः ॥ लेखवाटो बहुवार इति । राज्ञामदनं मिष्टत्वात् । पियति सरलत्वात्पियालः, रि पि गतौ, अपियाल्येके । सन्नकः खरोद्रुः स्कन्धोस्य सन्नकद्रुः । धनुष इव पटो विस्तारोस्य धनुःपटः, धनुरुकारान्तो व्यस्त इति **गौडो** भ्रान्तः, यदाहुः– पियालोथ खरस्कन्धश्चारो बहुलवल्कलः । सन्नकद्रुश्चापपटो लस्त[ल]नस्तापसप्रियः ॥ द्वयोर्थे राजादनः पियालः क्षीरिका च ॥ ३५ ॥ गमे सरसत्वाद् भारोस्या गम्भारी । कृश्यति तनूकरोति काश्मरी काश्मर्यश्च । मधूनि मिष्टानि पर्णान्यस्या मधुपर्णी, पाककर्णपर्णेति (सू०) ङीष् । आह च– काश्मर्यः काश्मरी हीरा कश्मरी मधुपर्ण्यपि । श्रीपर्णी सर्वतोभद्रा गम्भारी कृष्णवृन्तिका ॥ ३६ ॥ कर्को लोहितोन्धुः कर्कन्धुः, शकन्ध्वादित्वात्पररूपम् (वा०) । बदति बदरी, बद स्थैर्ये । कोलिः, कुल संस्त्याने, कुल(ङ) बाल्येस्माद्वा । घुणति वृक्ष[त्त]त्वाद् भ्रमति घोण्टा । कौ भूमौ वलति कुवलम् । फेनिलं कफवर्धनात् । सुवीरदेशे भवं सौवीरम् । अत्राद्यास्त्रयो वृक्षार्थाः, अन्ये फलार्थाः, घोण्टा तूभयस्पृक्, यथेन्दुः– बदरी स्निग्धपत्रा च राष्ट्रवृद्धिकरी तथा । फलं तस्याः स्मृतं कोलं कोकिलं फेनिलं कुहम् ॥ लोलं सूक्ष्मफलं तत्तु ज्ञेयं कर्कन्धु कन्दुकम् । स्वादुः कटुः सिञ्चतिका तच्च कोलं फलं मतम् ॥ **धन्वन्तरिः** सामान्येनाह– बदरं कोकिलं कोलं सौवीरं फेनिलं कुलम् । कर्कन्धुः कन्दुकं स्वादुः कटु सिञ्चतिका गुडा ॥ द्वयोर्थे कुवलं नीलाब्जं बदरं च । कोलिफलत्वात्कौलिकमिति च सभ्यः पाठः, कोकिलमिति तु **वैद्याः** । **चन्द्रो**पि– बदरी गोपघोण्टा च घोण्टा धुत्थाथ कोकिला । स्निग्धच्छदा कोलफला राष्ट्रवृद्धिकरी तथा ॥३७॥ विकङ्कते प्रसरति विकङ्कतः, कर्कभेलर्थः । स्रुवा स्रुक्, सा हि वैकङ्कती

विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ।
ऐरावतो नागरङ्गो नादेयी भूमिजम्बुका ॥ ३८ ॥
तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके ।
काकेन्दुः कुलकः काकतिन्दुकः काकपीलुके ॥ ३९ ॥
गोलिहो झाटलो घण्टा पाटलिर्मोक्षमुष्ककौ ।
तिलकः क्षुरकः श्रीमान्समौ पिचुलझावुकौ ॥ ४० ॥
श्रीपर्णिका कुमुदिका कुम्भी कैड(ट)र्यकट्फलौ ।
क्रमुकः पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः ॥ ४१ ॥
तू(नू)दस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च ।
तूलं च नीपप्रियककदम्बास्तु हलिप्रिये ॥ ४२ ॥

आम्नाता । आह च— विकङ्कतः पृथुफलो ग्रन्थिलः स्वादुकण्टकः । गोपकण्टः काकपादो व्याघ्रपादोथ किङ्करी ॥ इरावत्या विद्युत इवार्थं रक्तत्वादैरावतः । नागस्य सिन्दूरस्येव रङ्गोस्य नागरङ्गः, नागच्छति सहसा रङ्गोस्य वा । आह च— नागरङ्गस्त्वक्सुगन्धो नागरङ्गो मुखप्रियः । स चैरावतकः प्रोक्तः सुधातक्राधिवासनः ॥ नादेयी नदीजाता । भूमौ जम्यतेद्यते भूमिजम्बूः । चत्वारो नागरङ्गार्था इति गौडः । आह च— जम्बूः सुरभिपत्त्रा च राजजम्बूर्महाफला । काकजम्बूर्मेघवर्णा नादेयी चेदिशोल्यकः (?) ॥ ३८ ॥ तिम्यति तिन्दुकः । शितिः कालः सारो मज्जास्य शितिसारः । आह च— तिन्दुको नीलसारश्च कालस्कन्धोसिमत्सरु । स्फूर्जकः स्फूर्जशब्दोपीति । काकवर्णस्तिन्दुः काकेन्दुः । कुत्सितैर्लक्यते कुलकः, लक आस्वादने । द्व्यर्थे कुलकः काकतिन्दुकः पटोलोपि । आह च— तिन्दुकोन्यो द्वितीयस्तु स्फूर्जकः काकतिन्दुकः । काकेन्दुकश्च विख्यातः कुपीलुः काकपीलुकः ॥ मर्कटतिन्द्वाख्यः ॥३९॥ गोभिर्लिह्यते गोलिहः, गोलीढोपि । झाटं संघातं लाति झाटलः । हन्यते घण्टा । पाटं विस्तारं लाति पाटलिः । मोक्षति सहते मोक्षः । मुष्णाति रोगान् क्षारकत्वान्मुष्ककः । आह च— मुष्कको मोक्षको घण्टा मूषको रञ्जकस्तथा । क्षारश्रेष्ठो गोलिहश्च द्विविधः श्वेतकृष्णकः ॥ तिलाभपुष्पस्तिलकः । क्षुरति परुषत्वात्क्षुरकः । आह च— तिलकः पुरुषः श्रीमान् क्षुरकश्छत्रपुष्पकः । पिचुं तूलं लाति पिचुलः । ध्यायतेर्झावुकोपभ्रष्टः ॥४०॥ श्रीपर्णी सुपर्णत्वात्, पाककर्णपर्णेति (सू०) ङीष् । [कुमुदप्रातक्रातिः कुमुदिका, कौ मोदते वा] । कुम्भी रसाधारत्वात् । कं रसमीट्टे कैडर्यः, अविभावितप्रकृतिप्रत्ययार्थोयं वा । कटत्वात्तृणोति कषायत्वात्फलमस्य कट्फलः ।आह च— कट्फलः सोमवल्कश्च श्रीपर्णी कुमुदा तथा । महाकुम्भी च कुम्भी च भद्रा भद्रवतीति च ॥ द्व्यर्थे कैडर्यं कट्फलो मदनफलं च । क्रामति क्रमुकः । पट्टोस्यास्ति पट्टी पट्टिका, रोध्रोयम् । लाक्षां प्रसादयति, रोध्रप्रस्तावे व्याख्यातमेतत् ॥४१॥ तुद्यते तूदः । यूपप्रातिकृतित्वाद्यूपः । ब्रह्माणि वेदिके स धुर्ब्रह्मण्यः, अत एव ब्रह्मदारु । तूल्यते तूलं, तूलीति गौडः, तूल निष्कर्षे । आह च— तूलं तूदं च यूपं च क्रमुकं ब्रह्मकाष्ठकम् । ब्रह्मदारु ब्रह्मनिष्ठं ब्रह्मण्यं ब्रह्मचारि च ॥ नयति सुखं नीपः । प्रीणाति प्रियकः । के दाम्यति कदम्बः । हलिनः प्रियः सुराधिवासनात् । धाराकदम्बो राजकदम्बश्चासौ, धूलीकदम्बोन्यः । आह च— परः कदम्बः प्रावृषेण्यः कादम्बर्यो हलिप्रियः । नीपो धूलिकदम्बोन्यः सुवासावृत्त[त]पुष्पकः ॥ ४२ ॥ विशेषेणेरयति वीराणां वा वृक्षो दुःस्पर्शत्वात् । अरूंषि स्फोटैर्व्रणान् करोति— अरुष्करः, दिवाविभेति (सू०) टः । अग्निवन्मुखमस्या दाहकत्वादग्निमुखी । भल्ल इवाबाति दृणाति (भल्लातकः) । आह च— भल्लातकः स्मृतो दुःखो दहनस्तपनोग्निकः । अरुष्करो वीरतरुर्भल्ली चाग्निमुखी धनुः ॥ गर्दभ इवाण्डमस्य गर्दभाण्डः, गर्द

वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु ।
गर्दभाण्डे कन्दरालकपीतनसुपार्श्वकाः ॥ ४३ ॥
प्लक्षश्च तिन्तिडी चिञ्चाम्लिकाथो पीतसालके ।
सर्जकासनबन्धूकपुष्पप्रियकजीवकाः ॥ ४४ ॥
साले तु सर्जकार्श्या(र्ष्या)श्वकर्णकाः सस्यसंवरः ।
नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ॥ ४५ ॥
राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः ।
इङ्गुदी तापसतरुर्भूर्जे चर्मिमृदुत्वचौ ॥ ४६ ॥
पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ।
पिच्छा तु शाल्मलीवेष्टे रोचनः कूटशाल्मलिः ॥ ४७ ॥

सशब्दं भाण्डमस्येति युक्तं कन्दरालत्वात् । कं पीतयति कपीतनः, कपीते[ने]ति वा । आह च– प्लक्षः कपीतनः शु(शृ)ङ्गी सुपार्श्वश्चारुदर्शनः । प्ल।को गर्दभाण्डश्च कमण्डलु पटः प्लवः ॥ ४३ ॥ तिम्यति तिन्तिडी । चिञ्चिमायतेऽम्लत्वान्मुखं यया।सौ चिञ्चा, फलतश्चुक्रिका । आह च(चन्द्रः)– अम्लिका चुक्रिका चुक्रा साम्ला शुक्ताथ शुक्तिका । अम्लिका चा।श्वि[म्बि]का चिञ्चा तिन्तिडीकं च तिन्तिडी ॥ पीतवर्णः सालः (पीतसालः) । सृजति निर्यासं सर्जः । अस्यत्यसनः । बन्धूकस्येव रक्तानि पुष्पाण्यस्य बन्धूकपुष्पः । काम्यत्वात्प्रियत्वात्प्रियकः । जीवयति जीवकः । बीजक इति तु निघण्टुः, संज्ञया बीजको ज्ञेयो बीजपूरस्तथासनः । आहुश्च– बीजकस्त्वसनः काम्यः सौरिः कृष्णोलव[क]प्रियः । तिष्यपुष्पः पीतसालः प्रियकः प्रियसालकः ॥ सुगन्धिनीलनिर्यासस्तथा बन्धूकपुष्पकः । स स्यात्प्रियकसालश्च महासर्जश्च नामतः॥४४॥ स्यति सालः । कृश्यति कार्श्यः । अश्वकर्णाभपत्त्रः (अश्वकर्णकः) । सस्यं फलं संवृणोति सस्यसंवरः । आह च– सर्जकश्चाश्वकर्णश्च कषायी दीर्घपत्रकः । सस्यसंवरणः शूरः सर्जकः साल उच्यते ॥ वीरतरुरर्जुननामसाम्यात् । ककुभः सन्त्यस्य दिग्व्यापकत्वात्ककुभः, कंस्कुभ्नातीत्यहृद्या व्याख्या । अर्जुनः शौक्ल्यात्, इन्द्रप्रियत्वादित्येके । आहेन्दुः– ककुभस्त्वर्जुनः पार्थो नदीसर्जो धनंजयः । अश्रीफलश्चित्रयोगी वीरो वीरान्तकस्तथा ॥ त्र्यर्थे– इन्द्रद्रुः कुटजोऽर्जुनो देवदारु च ॥ ४५ ॥ क्षीरिका क्षीरस्वादुत्वात्, आद्ये तु मिष्टान्नत्वान्नामनी । आह च– क्षीरिकोक्ता च राजन्यः क्षीरी मृत्सूय[प]को नृपः । राजादनो दृढस्कन्धः कपीष्टः प्रियदर्शनः ॥ इङ्गतीङ्गुदः । तापसा ह्यरण्येऽस्याः स्नेहमुपभु(यु)ञ्जत । भृणाति भूर्जः, भूर्जातो वा । आहुश्च– भूर्जो भृर्जो बहुपटो बहुत्वक्को मृदुच्छदः ॥ ४६ ॥ पिच्छास्त्यस्याः पिच्छिला । पूरयति पूरणी । मुञ्चति रसं मोचा । स्थिरायुः कालसहत्वात् । शालते दैर्घ्याच्छलति वा शाल्मली शाल्मलिश्च । आह च– शाल्मली रक्तपुष्पा च कुक्कुटी स्थिरजीविता । पिच्छिला तूलिनी मोचा कण्टकारी च पूरणी ॥ मोचनीति च । पिच्छेव पिच्छा, आचामवदङ्गुलिसंगित्व त् । शाल्मल्या वेष्टो निर्यासः । आह च– शाल्मलीवेष्टकः पिच्छा निर्यासः स च शाल्मलः । मोचसारो मोचरसो मोचनिर्यासकस्तथा ॥ रोचते रोचनः शाल्मलिविशेषः । कूटेन कुत्सितत्वं द्योत्यते, दुर्गादेर्हि परसैन्यदलनार्थं सा क्षिप्यते । आह च– कुशाल्मलिः शाल्मलिको रोचनः कूटशाल्मलिः ॥ ४७ ॥ चिरिणं बिलति भिनत्ति चिरिबिल्वः । नक्तं रात्रावालमस्मान्नक्तमालो भूताश्रयत्वात्, रक्तमाल इत्येके । कं रञ्जयति करञ्जः (करजश्च) । प्रकीर्यते प्रकीर्यः । पूतिको दुर्गन्धः । कलेर्मारकः कलहहृत्, यदिन्दुः– करञ्जो रक्तमालश्च पूतिकश्चिरिबिल्वकः । घृतपूर्णकरञ्जोऽन्यः प्रकीर्यो गौर एव च ॥ पूतीकरञ्जः सुमनास्तथा कलहनाशनः ॥

चिरि(र)बिल्वो नक्तमालः करजश्च करञ्जके ।
प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः ॥ ४८ ॥
करञ्जभेदाः षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ।
रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ॥ ४९ ॥
गायत्री बालतनयः खदिरो दन्तधावनः ।
अरिमेदो विट्खदिरे कदरः खदिरे सिते ॥ ५० ॥
सोमवल्कोऽप्यथ व्याघ्रपुच्छगन्धर्वहस्तकौ ।
एरण्ड उरुबूकश्च रुचकश्चित्रकश्च सः ॥ ५१ ॥
चञ्चः पञ्चाङ्गुलामण्डवर्धमानव्यडम्बराः ।
अल्पा शमी शमीरः स्याच्छमी सक्तुफला शिवा ॥ ५२ ॥
पिण्डीतको मरुवकः श्वसनः करहाटकः ।
शल्यश्च मदने शक्रपादपः पारिभद्रकः ॥ ५३ ॥

द्व्यर्थे करजः करञ्जो नखश्च ॥ ४८ ॥ षड् ग्रन्थयोस्य हस्तिवारणाख्यः । मर्चत्यङ्गपाटनान्मर्कटी वल्लीकरञ्जः । अङ्गारा इव वल्ल्योस्या अङ्गारवल्लरी । आह च– उद्रकीर्यस्तृतीयोन्यः षड्ग्रन्थो हस्तिवारणी । अङ्गारवल्ली शादस्था काकघ्नी करभालिका ॥ त्र्यर्थे मर्कटी– आत्मगुप्तापामार्गौ वल्लीकरञ्जश्च । रोहयति रोहितः, रोहतीत्येके छिन्नरूढत्वात् । **चन्द्रश्च**– रोहितको रोचनकः प्लीहघ्नो रक्तपुष्पकः । रक्तघ्नो रोहितो रक्तो रोही दाडिमपुष्पकः ॥ ४९ ॥ गायतो विप्रांस्त्रायतेवश्यं गायत्री । बालपत्रो यवासः खदिरश्चेति द्व्यर्थेषु **धन्वन्तरि**पाठमदृष्ट्वा बालपुत्रभ्रान्त्या ग्रन्थकृद्बालतनयमाह । सूक्ष्मपर्णोप्यसौ । खदति खदिरः, खद स्थैर्ये । आह च– खदिरो रक्तसारश्च गायत्री दन्तधावनः । कण्टकी बालपत्रश्च जिह्मशल्यः क्षितिक्षमः ॥ अरिर्दुःसहो मेदः सारो[स्रावो]स्यारिमेदः । विड्गन्धिः खदिरः पूतिखदिराख्यः । आह च– परिमेदोरिमेदश्च गोधास्कन्धोरिमेदकः । अहिमेदोहिमारश्च रिभः पूत्यरिमेदकः ॥ कं दृणाति कफघ्नत्वात्कदरः ॥ ५० ॥ सोमवल्कोऽकण्टकित्वात्– शुक्लत्वाद्वा । आह च– कदरः श्वेतसारोन्यः सोमवल्कः पाथिद्रुमः । त्र्यर्थे सोमवल्कः खदिरः कट्फला करञ्जश्च । व्याघ्रस्येव पुच्छमस्य व्याघ्रपुच्छः । गन्धर्वस्य भूतविशेषस्येव मृगविशेषस्येव वा हस्तोस्य गन्धर्वहस्तः पञ्चाङ्गुलिपर्णत्वात् । एरयति वायुमेरण्डः । उरु वात्युरुबूकः । रोचते रुचकः ॥ ५१ ॥ चञ्चति चञ्चः, चञ्चुरित्येके । पञ्चाङ्गुलयोस्य पञ्चाङ्गुलः । आमण्डयतीत्यामण्डः, आदण्ड इत्येके दीर्घदण्डत्वात् । व्यडतिव्यडम्बरः, अड उद्यमे, व्यडम्बक[न]इत्येके । आह च– एरण्डस्तरुणः शुक्लश्चित्रो गन्धर्वहस्तकः । पञ्चाङ्गुलो वर्धमान आमण्डो दीर्घदण्डकः ॥ रक्तोपरो हस्तिकर्णो व्याघ्रो व्याघ्रतलो रुबुः[वुः] । उरुबूको हस्तिपर्णश्चञ्चुरुत्तानपत्रकः ॥ अल्पेर्थे, कुटीशमीशुण्डाभ्योरः (सू०) । शमयति दोषाञ्शमी शिवात्वात् । सक्तव इव फलान्यस्याः । आह च– शमी सक्तुफला तुङ्गा क्लेशहन्त्रिफला शिवा ॥५२॥ पिण्डीमितः पिण्डीतकः । म्रियन्तेनेन विषपुष्पत्वान्मरुवकः, मरौ वाति वा । श्वसन्त्यनेन श्वसनः । करं हन्ति दुःस्पर्शत्वात्कं रहयति वा करहाटकः । शल्यमस्यास्ति शल्यः । मदयति मदनः । आह च– मदनः शल्यको राकः [वाथ] पिण्डी पिण्डीतकस्तथा । तस्करः करहाटश्च श्वसनो विषपुष्पकः ॥ द्व्यर्थे मरुवको जम्भीरो मदनश्च, **यच्छाश्वतः**– पिण्डीतके पद्मकन्दे करहाटपदं विदुः । पारि निष्ठाप्राप्तं भद्रमस्य पारिभद्रकः॥५३॥ द्वौ स्कन्धे किलिमं निर्यासोस्य द्रुकिलिमम् । पूतिरुग्रगन्धं काष्ठमस्य पूतिकाष्ठम् । सप्तग्रहणं द्रुकिलिमस्यैकार्थं, यदाह– देवदारु स्मृतं दारु सुराह्वं किलिमं च तत् । स्नेहविद्धं महादारु भद्रदार्विन्द्रदारु च ॥

भद्रदारु द्रुकिलिमं पीतदारु च दारु च ।
पूतिकाष्ठं च सप्त स्युर्देवदारुण्यथ द्वयोः ॥ ५४ ॥
पाटलिः पाटलामोघा काला स्थाली फलेरुहा ।
कृष्णवृन्ता कुबेराक्षी श्यामा तु महिलाह्वया ॥ ५५ ॥
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ।
विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सा ॥ ५६ ॥
मण्डूकपर्णपत्त्रोर्णनटकट्वङ्गडुन्दु(टुण्टु)काः ।
स्योनाकः शुकनासर्क्षदीर्घवृन्तकुटन्नटाः ॥ ५७ ॥
शोनकश्चारलौ तिष्यफला त्वामलकी त्रिषु ।
अमृता च वयस्था च त्रिलिङ्गस्तु बिभीतकः ॥ ५८ ॥

देवकाष्ठं भद्रकाष्ठं पूतिकाष्ठं च दारु च । सुरदार्विन्द्रवृक्षश्च तथैवामरदारु च ॥ त्र्यर्थे पारिभद्रः कोलिः पारिजातो देवदारु च, तथा पीतदारुर्दारुहरिद्रा देवदारु पूतिकाष्ठं च । किलिमं च तदिति पदैकदेशत्वाद्भीमवत् ॥ ५४ ॥ पाटला ताम्रपुष्पत्वात् । अमोघा बहुफलत्वात् । काला कालवृन्तत्वात् । स्थाली रसाधारः कुम्भीत्वात् । काचस्थालीत्येके । फले रोहति (फलेरुहा) साङ्कुरफलत्वात् । कुबेराक्षी यक्षाक्षितुल्यपुष्पत्वात् । आह च– पाटलोक्ता तु कुम्भीका ताम्रपुष्पाम्बुवासिनी । स्थाली वसन्तदूती स्यादमोघा कालवृन्तिका ॥ द्वितीया पाटला श्वेता निर्दिष्टा काष्ठपाटला । सा चैव श्वेतकुम्भी स्यात्कुवेराक्षी फलेरुहा ॥ पाटली कृष्णवृन्तेति ने[नि] मिः । पाटला पाटलिर्वा नेति माला । श्यामा श्यामगौरवर्णात् । महिलाह्वया वनितापर्याया श्याम(मा) त्वाव् ॥ ५५ ॥ गवि भूमौ वन्द्यते गोवन्दनी । गुद्यते क्रीडयते गुन्द्रा । प्रीणाति प्रियङ्गुः । फलति विशीर्यते फली । विष्वक् सिनोति सर्वतो बध्नाति विष्वक्सेना । ईषद्रम्भाकारा कारम्भा । आह च– प्रियङ्गुः प्रियवल्ली च फलिनी कुञ्जिनी (?) प्रिया । वृक्षा गोवन्दनी श्यामा कारम्भा वर्णभेदिनी ॥ इन्दुर्गौर्वन्दनीति भिनत्ति, यदाह– वन्दनी पुष्पशोभना । गन्धप्रियङ्गुः कारम्भा लता गौर्वर्णभेदिनीति ॥ त्र्यर्थे गुन्द्रा– एरका प्रियङ्गुः श[स]रा च, तथा प्रियकोसनः प्रियङ्गुः कदम्बश्चेति । द्व्यर्थे गन्धफलिनी प्रियङ्गुश्चम्पककलिका च ॥ ५६ ॥ मण्डूक इव पर्णान्यस्य(मण्डूकपर्णः) । पत्त्रेषूर्णास्य पत्त्रोर्णः । नटति वातेन नटः । कट्वन्यङ्गान्यस्य रौक्ष्यात्कट्वङ्गः । दुन्द्विति शिम्बिभिः कायति डुन्दुकः । स्योनमुखनकति स्योनाकः । शुकनासेव पुष्पाण्यस्य (शुकनासः) । ऋक्ष्णोति हिनस्ति ऋक्षः, अत एव भाल्लुकः । कुटन्नकीभवन् नटति स्पन्दते कुटन्नटः ॥ ५७ ॥ शवति शोनकः, गौडाः शोणकमाहुः, शोणृ वर्णे । इयर्त्यरलुः । आह च– स्योनाकः शुकनासश्च कट्वङ्गोथ कटम्भरः । मयूरजङ्घोरलुकः प्रियजीवः कुटन्नटः ॥ सप्रोक्तः पृथुशिम्बिश्च दुन्दुको दीर्घवृन्तकः । भाल्लुकः शल्लकोफल्गुवृन्तको जम्बुको नटः ॥ तिष्यं मङ्गल्यं फलमस्यास्तिष्यफला, नित्यमामलके लक्ष्मीरिति । आमलते गुणानामलकी, अमला च । अमृता वयस्था च रसायनत्वात् । धात्री नानार्थे । आह च– वयस्थामलकं तिष्यं जातीफलरसं शिवम् । धात्रीफलं श्रीफलं च तच्चामृतफलं स्मृतम् ॥ बिभेत्यस्माद् बिभीतकः ॥ ५८ ॥ अक्ष्णोति व्याप्नोत्यक्षः, ना पुमान्– फले पुंलिङ्गः । पु(तु)ष्यति तुषः, इति निघण्टुषु न संवादस्तेषु तु मूलवर्गपाठात् । कर्षफलोक्षसामान्यात्, कर्षो बिभीतके पलचतुर्भागे च वर्तते । भूतानामावासः । कलेराश्रयो द्रुमः। आह च– बिभीतक कर्षफलो वसन्तोक्षः कलिद्रुमः । संवर्तको भूतवासः कर्षोऽहार्यो बिभीतकः ॥ इन्दुश्च– आ(अ)हार्यं बहुवीर्यं च तुमुलं च विभेदकम् । नास्ति भयमस्या अभया । न व्यथयत्यव्यथा । पथि साधुः पथ्या, हितेत्यर्थः । काये तिष्ठति निष्फला न भवति कायस्था, वयस्थेत्येके । पूतं करोति पूतना विरेचनीत्वात्, पूतनेत्येके

नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ।
अभया त्वव्यथा पथ्या कायस्था पूतनामृता ॥ ५९ ॥
हरीतकी हैमवती चेतकी श्रेयसी शिवा ।
पीतद्रुः सरलः पूतिकाष्ठं चाथ द्रुमोत्पलः ॥ ६० ॥
कर्णिकारः परिव्याधे लकुचो लिकुचो डहुः ।
पनसः कण्टकिफलो निचुलो हिज्जलोम्बुजः ॥ ६१ ॥
काकोदुम्बरिका फल्गुर्मलपूर्जघनेफला ।
अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः ॥ ६२ ॥
पिचुमर्दश्च निम्बेथ पिच्छिलागुरुशिंशपा ।
कपिला भस्मगर्भा सा शिरीषस्तु कपीतनः ॥ ६३ ॥
भण्डिलोप्यथ चाम्पेयश्चम्पको हेमपुष्पकः ।
एतस्य कलिका गन्धफली स्यादथ केसरे ॥ ६४ ॥

॥ ५९ ॥ हरति रोगान् हरीतकी । चेत्यतेनया स्रोतःशुद्धेश्चेतकी । आह च– हरीतक्यभया पथ्या प्रपथ्या पूतनामृता । जयाव्यथा हैमवती कायस्था चेतकीति च ॥ द्व्यर्थे श्रेयसी रास्ना हरीतकी हस्तिपिप्पली च । शिवाव्यथा पूतनेति चन्द्रः । सरलः, ऋजुत्वात्, आह च– सरलः पूतिकाष्ठं च चित्रा पीतद्रुरुच्छ्रितः । द्रुमोत्पलानीव पुष्पाण्यस्य द्रुमोत्पलः, सुरभिश्चायम्, अन्यो निर्गन्धः ॥ ६० ॥ कर्णिकामियर्ति कर्णिकारः । द्व्यर्थे परिव्याधो जलवेतसः कर्णिकारश्च । लक्यत आस्वाद्यते लकुचः । दह्यते डहुः । पन्यते स्तूयते पनसः, पणस इति दुर्गः । लोकोक्त्या कण्टकयुक्तफलः । महासर्गोपि । निचोल्यतेम्बुना निचोलः (निचुलः) । हितजलस्यापभ्रंशो हिज्जलोम्बुवेतसविशेषत्वात् ॥ ६१ ॥ काकप्रियोदुम्बरी । फलति फल्गुः । मलं श्वित्रं पावयति मलपूः श्वित्रभेषजम्, (मलयूः) यु जुगुप्सायाम् । जघने बुध्ने फलान्यस्या जघनेफला, आह च– काकोदुम्बरिका फल्गुरराजी फल्गुवाटिका । फल्गुनः फलभारी च मलयूः श्वित्रभेषजम् ॥ हिङ्गुगन्धिनिर्यासोस्य । माल्यते वेष्ट्यते काकैर्मालकः, शुकमालकैकदेशश्चायम् ॥ ६२ ॥ पिचुं मर्दयति पिचुमर्दः, अरोगत्वात्, पिचुमन्द इत्येके । पवनेष्टोपीति सौश्रुताः । शाश्वतस्तु– हिङ्गुनिर्यासशब्दोयं निम्बे हिङ्गुरसेपि च । चन्द्रनन्दनस्तु शुकमालकमाह । अगुरुतुल्यसारा शिंशपा अगुरुशिंशपा, यदाह– शिंशपा तु महाश्यामा कृष्णसारः स्मृतोऽगुरुः । अगुरुर्धूपद्रव्यं शिंशपासारं चाहुः । द्व्यर्थे पिच्छिला शाल्मलिः शिंशपा च, यदाह– कुशिंशपान्या कपिला भस्मगर्भा च सादिनी । शिरसीष्यते शिरीषः, शीर्यते वा सौकुमार्यात् ॥ ६३ ॥ भण्ड्यते भण्डिलः, भण्डिरोपि, आह च– शिरीषो मृदुपुष्पश्च भण्डिरः शंखिनीफलः । कपीतनः शुकतरुः श्यामवल्कः शुकप्रियः ॥ भण्डीत्येके । चम्पादेशे भवश्चाम्पेयः । चम्प्यतेद्यतेऽलिभिश्चम्पकः, चाम्पकोपि । आह च– चम्पकः सुकुमारश्च सुरभिः शीतलश्च सः । चाम्पेयो हेमपुष्पश्च काञ्चनः षट्पदातिथिः ॥ गन्धः फलमस्या गन्धफली । प्रियङ्गुश्चम्पककलिकाचेति द्व्यर्थे गन्धफली । के सरति केसराः सन्त्यस्य वा केसरः ॥ ६४ ॥ उच्यते वकुलः । आह च– वकुलः सीधुगन्धश्च मद्यगन्धोथ शारदः । मधुगन्धो गूढपुष्पः शिम्बी केसरकस्तथा ॥ अश्नुतेऽशोकः, शोकनाशकत्वाद्वा । यदाह– अशोकः शोकनाशश्च विचित्रः कर्णपूरकः । द्व्यर्थे वञ्जुलो वेतसः स्यन्दनोशोकश्च । किरति कणान्करकः । दाल्यते दाडिमः । आह च– दाडिमो दालिमः सारः कुट्टिमः फलषा(शा)डवः । स्वाद्वम्लौ रक्तबीजस्तु करकः शुकवल्लभः ॥ नागप्रियाणि केसरकान्ति पुष्पाण्यस्य नागकेसरः । आह च– नागपुष्पो

व-ब-कुलो वञ्जुलोशोके समौ करकदाडिमौ ।
चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः ॥ ६५ ॥
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ।
श्रीपर्णमग्निमन्थः स्यात्कणिका गणिकारिका ॥ ६६ ॥
जयोथ कुटजः शक्रो वत्सको गिरिमल्लिका ।
एतस्यैव कलिङ्गेन्द्रयवभद्रयवं फले ॥ ६७ ॥
कृष्णपाकफलाविग्नसुषेणाः करमर्दके ।
कालस्कन्धस्तमालः स्यात्तापिच्छोप्यथ सिन्दुकः ॥ ६८ ॥
सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि ।
वेणी ग(ख)रागरी देवताडो जीमूत इत्यपि ॥ ६९ ॥
श्रीहस्तिनी तु भूरुण्डी तृणशूल्यं(न्यं) तु मल्लिका ।
भूपदी शीतभीरुश्च सैवास्फोता वनोद्भवा ॥ ७० ॥

मतो नागः केसरोः नागकेसरः । चाम्पेयो नागकिञ्जल्कः कनकं हेम काञ्चनम् ॥ ६५॥ जयतीति जया । तर्कमियर्ति तर्कारी केतुत्वात् । अग्निं मथ्नाति दीपनत्वादग्निमन्थः, अत एवारणिः । कणाः सन्त्यस्याः कणिका । गणिकासमूहमियर्ति गणिकारी, स्वार्थेकन्, गणिं तर्कं करोति वा । त्र्यर्थे नादेयी जलजम्बूर्जलवेतसस्तर्कारी च । लिङ्गसांकर्याज्जयेत्यर्धेन जयन्तं(न्तीं) श्रीपर्णमिति चार्धेन जयपर्यायमाहुः, तन्न, वनौषधिवर्गे तस्यानादृतत्वात्, यदिन्दुः– अग्निमन्थोग्निमथनस्तर्कार्यरणिको जयः । अरणिः कणिका सैव तपनो वैजयन्तिकः ॥ **चन्द्रनन्दन**श्चाह– अग्निमन्थोग्निमथनस्तर्कारी वैजयन्तिका । वह्निमन्थोरणिः केतुर्जयः पावकमन्थनः ॥ तर्कार्यां वैजयन्ती च वह्निनिर्मथनी जया । अरणिका जयन्ती च विजया च जयावहा ॥ ६६ ॥ कुटिस्तो (कुटे) जायते कुटजः । शक्र इन्द्रवृक्षः । वस्ते त्वचं वत्सकः । आह च– कुटजः कौटजः कोटी वत्सको गिरिमल्लिका । कलिङ्गो मल्लिकापुष्प इन्द्रवृक्षोथ वृक्षकः ॥ कलिं गायति कलिंगं, कलिङ्गदेशजं वा, अत एव कालिङ्गं कालिङ्गी च । इन्द्रयवं कुटजफलं, भद्रयवं तु कुटजबीजं, यदाह– फलानि तस्येन्द्रयवा बीजं भद्रयवास्तथा ॥ ६७ ॥ कृष्णं पाके फलमस्य । आविजते स्माविग्नः । सुषेणकपिमुखाभः । करेण मृद्यते करमर्दः, कराम्ब्लोपि । आह च– करमर्दकमाविग्नं सुषेणं पाणिमर्दकम् । कराम्ब्लं करमर्दं च– ॥ [कालः स्कन्धः प्रकाण्डोस्य] । त्र्यर्थे कालस्कन्धस्तिन्दुकः श्यामखदिरस्तमालश्च । ताम्यति तमालः । तापिनश्छादयति तापिच्छः ॥६८॥ स्यन्दते सिन्दुकः । स्यन्दं वृणोति सिन्दुवारः । इन्द्रस्य सुरसो यस्मिन्, दिव्य इत्यर्थः । अत एवेन्द्राणी । निष्क्रान्ता गुडाद्वेष्टनान्निर्गुंडी निर्गुण्डी च । आह च– सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः । तिलपुष्पः शीतसहो निर्गुण्डी नीलसिन्दुकः । वेणीव वेणी । गरमागिरति गरागरी मूषिकाविषघ्नत्वात् । कर्णं ताडयति ताडः, मुख्यत्वाद्देवताडो राजताडवत् । जीमूतो ह्लादकत्वात् । आह च– जीमूतको देवताडो वृत्तकोशो गरागरी । प्रोक्ताखुविषहा वेणी देवताली च ताडकः ॥ ६९ ॥ भुवि रोहति भूरुण्डी । हस्तिकर्णपत्त्रा शाकविशेषः । इतो धत्तूरान्तानि पुष्पाणि । तृणशूले गुल्मे साधुं तृणशूल्यम् । मल्लयते मूर्ध्नि मल्लिका । भुवि पदमस्या भूपदी । शीतभीरुर्ग्रैष्मकत्वात् । आह च– मल्लिका शीतभीरुश्च मदयन्ती प्रमोदनी । मदनीया गवाक्षी च भूपद्यष्टपदी तथा ॥ द्विपुटासौ विचकिलम्– । आस्फुटत्यास्फोता गिरिमल्लिका ॥७०॥ शेरते शेफा अल-

शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ।
सितासौ श्वेतसुरसा भूतवेश्यथ मागधी ॥ ७१ ॥
गणिका यूथिकाम्बष्ठा सा पीता हेमपुष्पिका ।
अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता ॥ ७२ ॥
सुमना मालती जातिः सप्तला नवमालिका ।
माध्यं कुन्दं रक्तकस्तु बन्धुको बन्धुजीवकः ॥ ७३ ॥
सहा कुमारी तरणिरम्लानस्तु महासहा ।
तत्र शोणे कुरवकस्तत्र पीते कुरण्टकः ॥ ७४ ॥
नीला झिण्टी द्वयोर्बाणा दासी चार्तगलश्च सा ।
सैरेयकस्तु झिण्टी स्यात्तस्मिन्कुरवकोरुणे ॥ ७५ ॥
पीता कुरण्टको झिण्टी तस्मिन्सहचरी द्वयोः ।
ओड्रपुष्पं जपा(वा) पुष्पं वज्रपुष्पं तिलस्य यत् ॥ ७६ ॥

योस्यां शेफालिका । सुष्ठु वहत्यामोदं सुवहा । नीलवर्णा (नीलिका) । आह च– शेफालिका तु निर्गुण्डी यमको नीलमञ्जरी । त्र्यर्थे सुवहा रास्ना शेफालिका गन्धनाकुली च । भूतानि विशत्याच्छादयति भूतवेशी। मगधदेशे भवा मागधी ॥७१॥ गणिका चित्ताकर्षणात् । यूथो जालकमस्या यूथिका । अम्बे शब्दे तिष्ठत्यम्बष्ठा । आह च– यूथिका बालपुष्पा च पुण्यगन्धा गुणोज्ज्वला । गणिकाचारमोटा च शिखण्डी श्वेतयूथिका ॥ आह च– सुवर्णपुष्पा हरिणी पीतका पीतयूथिका । त्र्यर्थे हेमपुष्पा बिम्बी दुःस्पर्शा पीतयूथिका च । अतिक्रान्तो मुक्तान्विरक्तानतिमुक्तः । पुण्ड्रदेशे भवः पुण्ड्रकः, मण्डकोयमिति **निघण्टुश्च** । मधौ वसन्ते भवा माधवी । आह च– अतिमुक्ता माधवी च सुवसन्तो वनाश्रयः । अतिमुक्तः कामुकश्च मण्डको भ्रमरोत्सवः ॥७२॥ सुष्ठु मन्यते सुमना मनोज्ञत्वात् । मालयत्यामोदैर्मालती । जायतेनया प्रीतिर्जातिः । आह च– जातिर्मनोज्ञा सुमना राजपुत्री प्रियंवदा । मालती हृद्यगन्धा च वैदिका (?) तैलभागि(वि)नी । सप्त मनोबुध्यन्तानीन्द्रियाणि लाति सप्तला, सपति समवैति वा । नवा स्तुत्या मालास्या नवमालिका । माघे मासि भवं माघ्यम् । कुन्याति कुन्दं, कुन्द इति **माला** । बध्नाति चित्तं बन्धूकः । बन्धुर्जीवानां बन्धुजीवकः ॥७३॥ सहते परिमलं सहा। कुं भूमिष्ठान्मारयति कुमारी, कुत्सितो मारोस्या इति वा, जरां न यातीत्येके । तरत्यनया[दुःखं]तरणिः, **यच्चन्द्रनन्दनः**– कुर्यकस्तरणिर्वल्ली कुमार्यलिकुलप्रिया । त्र्यर्थे सहा मुद्गपर्णी ववा(चा) तरणी च । कुरण्टको हि म्लानिं न गच्छति तेनाम्लानः, **वात्स्यायनो**त एव कूर्चकस्थाने कुरण्टकमालाश्चेत्याह । वर्णपुष्पोपि । **महतो विमर्दस्य सहा महासहा**, आबन्तः, **यन्माला**– अम्लानस्तु कुरण्टकः । तत्राम्लाने, कौ रूयतेर्च्यते कुरवकः । कौ रम्यते कुरण्टकः, कुरण्डकोपि । आह च– अविम्लानोऽपरिम्लानस्तथैवाम्लानकः स्मृतः । रक्तपुष्पः कुरवकः पीतपुष्पः कुरण्टकः ॥ किंकिरातोसौ ॥ ७४ ॥ या नीलपुष्पा झिण्टी, शुष्का झिं रटतीति । बाणो हि द्विलिङ्गः, वण शब्दे । दस्यति क्षीयते दासी । आर्तः क्षीणो गलत्यार्तगलः । सीरे भवा सैरेयाख्या झिण्टी– अरुणपुष्पा चेत्कुरवकोसौ ॥ ७५ ॥ सहचाराख्या झिण्टी पीतपुष्पा चेत्कुरण्टकोसौ । आह च– सैरेयकः सहचरः सैरेयश्च सहाचरः । पीतो रक्तोथ नीलश्च कुसुमैस्तं विभावयेत् ॥ पीतः कुरण्टको ज्ञेयो रक्तः कुरबकः स्मृतः । नील आर्तगलो दासी बाण ओदनपाक्यपि ॥ ओड्रदेशोद्भवं पुष्पं, जपतीति जपा । वज्रमिव दारकं वज्रपुष्पम् ॥ ७६ ॥ प्रतीपो-

प्रतिहासशतप्रासचण्डातहयमारकाः ।
करवीरे करीरे तु क्रकरग्रन्थिलावुभौ ॥ ७७ ॥
उन्मत्तः कितवो धूर्तो धत्तूरः काञ्चनाह्वयः ।
मातुलो मदनश्चास्यफले मातुलपुत्रकः ॥ ७८ ॥
फलपूरो बीजपूरो रुचको मातुलुङ्गके ।
समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः ॥ ७९ ॥
जम्बीरोप्यथ पर्णासे कठिञ्जरकुठेरकौ ।
सितेर्जकोत्र पाठी तु चित्रको वह्निसंज्ञकः ॥ ८० ॥
अर्काह्ववसुकास्फोट(त)गणरूपविकीरणाः ।
मन्दारश्चार्कपर्णोत्र शुक्लेलर्कप्रतापसौ ॥ ८१ ॥

श्वघ्नत्वाद्धासो विकासोस्य प्रतिहासः । शतं बहूनि प्रासाः कुन्ता इव पुष्पाण्यस्य शतप्रासः, श्वेतश्चासौ । चण्डय(मत)ति तीक्ष्णत्वाच्चण्डातः, रक्तोसौ । करवीर इव मारकत्वात्कराः कर्तारो वीरा अत्रेति । आह च– शतकुन्तः श्वेतपुष्पः प्रतिहासोश्वरोहकः । द्वितीयो रक्तपुष्पस्तु चण्डातो लगुडस्तथा ॥ चण्डातको गुल्मकश्च प्रचण्डः करवीरकः । करिण ईरयति कण्टकैः करीरो मरुवृक्षः । क्रेति करोति क्रकरः, तीक्ष्णत्वात् । आह च– करीरं गूढपत्त्रं च शाकपत्त्रं मृदूफलम् । ग्रन्थिलं तीक्ष्णसारं च क्रकरं तीक्ष्णकण्टकम् ॥ ७७ ॥ उन्मत्त उन्मादकत्वात् । धूर्वति हिनस्ति धूर्तः, अत एव कितवः । धराति धातून् धत्तूरः (धस्तूरः), धत्तूरमिति **प्राच्याः** । काञ्चनाह्वो भुक्तेस्मिन् हेमवर्णपृथ्वीदर्शनात् , **यदिन्दुः**– संज्ञेयो हेमनामभिः । नास्ति तुलास्य मातुलः, अमानोनाः प्रतिषेधे । मदयति मदनः । आह च– धत्तूरकः स्मृतो धूर्तो देविता कितवः शठः । उन्मत्तको मदनकस्तूरी चलतलस्तथा ॥ यतो **धन्वन्तरि**र्मातुलं धत्तूरं मातुलपुत्रकं तत्फलमाह ॥ ७८ ॥ रोचयति रुचकः । आह च– फलपूरो बीजपूरः केसरी बीजपूरकः । बीजकः केसराम्लश्च मातुलुङ्गस्तु पूरकः ॥ **अनेकार्थे**– सौवर्चलं मातुलुङ्गं शिला चन्दनपेषणी । ग्रीवाभरणकं चैषु चतुर्षु रुचकं स्मृतम् । समीरयत्यामोदं समीरणः । मरौ वाति मरुवकः । प्रस्थे सानौ पुष्यति जाङ्गलत्वात्प्रस्थपुष्पः । खरत्वेन फणाभपत्त्रत्वाद्देश्यः फणिज्जकः ॥७९॥ जम्यते जम्बीरः, जम्भीरोपि । आह च– जम्बीरः खरपत्त्रश्च फणी चोक्तः फणिज्जकः । मरुतको मरुवको मरुन्मरिचकस्तथा ॥ पर्णान्यस्यति पर्णासः । कठिनं जरयति कठिञ्जरः । कुण्ठाति कुठेरकः कृष्णार्जकाख्यः । (शुक्लः कुठेरोर्जकः), अर्जयतीति । आह च– कुठेरकस्तु वैकुण्ठः क्षुद्रपत्त्रोर्जकः सितः । ष(व)टपत्त्रः कुठेरोन्यः पर्णासो बिल्वगन्धकः । पाठोस्यातीति पाठी । चेतति चित् चितो जन्तूंस्त्रायते चित्रकः, नानारूपो वा । वह्निपर्यायो दीपनत्वात् । आह च– चित्रको दहनो व्यालः पाठीनो दारुणोग्निकः । ज्योतिष्को वल्लरी वह्निः पाठी पाली कुटः शिखी ॥ ८० ॥ अर्काह्वोर्कपर्यायी । वसत्यस्मिंस्तेजो वसुकः । आस्फुटत्यास्फोटः । गणा बहवः (बहूनि) रूपाण्यस्य गणरूपः । विकिरति पुष्पाणि विकीरणः । मन्दानियर्ति मन्दारकः, मन्दा आरा अस्य वा । अर्काभानि पर्णान्यस्यार्कपर्णः । शुक्लार्कोलर्कः, अलति भूषयतीति । प्रतापं स्याति प्रतापसः, प्रकृष्टास्तापसा येन वा । आह च– अर्कः सूर्याह्वयः पुष्पी विटूछूरश्च विकीरणः । जम्भलः क्षीरपर्णः स्यादास्फोतो भास्करो रविः ॥ राजार्को वसुको व्यर्को मन्दारो गणरूपकः । एकाष्ठीलः सुदापुष्पी स चालर्कः प्रतापसः ॥ ८१ ॥ शिवप्रिया

शिवमल्ली पाशुपत एकाष्ठीलो वुको वसुः ।
वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि ॥ ८२ ॥
वत्सादनी छिन्नरुहा गुडूची तन्त्रिकामृता ।
जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ॥ ८३ ॥
मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥ ८४ ॥
पाठाम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ।
एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ॥ ८५ ॥
कटुः कटंभ(व)राशोकरोहिणी कटुरोहिणी ।
मत्स्यपित्ता कृष्णभेदा चक्राङ्गी शकुलादनी ॥ ८६ ॥

मल्लिका शिवमल्ली, उक्तं च– वुकं बिल्वं सधत्तूरं सुमना पाटला तथा । पद्ममुत्पलगोसूर्यमष्टौ पुष्पाणि शंकरे ॥ पशुपतेरयं प्रियो वा पाशुपतः । एकोष्ठीलो मज्जास्त्यस्य । वाति वुकः, बक इति प्राच्याः । वस्ते छादयति वसुः । आह च– वसुर्वसुक इत्युक्तः शिवार्कः[ङ्कः] शिवशेखरः । महापाशुपतश्चैव सुव्रतः शिवमल्लिका ॥ [जन्मवृक्षमत्ति नाशयति वृक्षादनी । वृक्षे रोहति वृक्षरुहा, वृक्षरोहेति वनेचराः] । आह च– वन्दाकः स्याद्वृक्षरुहा शेखरी कामवृक्षकः । वृक्षादनी नटरुहा कामिन्यङ्घ्रिपरोहणी ॥ त्र्यर्थे जीवन्ती गुडूची वृक्षरुहा शाकविशेषश्च ॥ ८२ ॥ वत्सानामदनं वत्सादनी । छिन्ना रोहति छिन्नरुहा । गुडति रक्षति गुडूची । तन्त्रयते धारयत्यायुस्तान्त्रिका । जीवयति जीवन्तिका । सोमवल्ल्यमृतत्वात् । मधूनि पर्णान्यस्या मधुपर्णी । आह च– गुडूच्यमृतवल्ली च छिन्ना छिन्नरुहामृता । छिन्नोद्भवामृतलता वरा वत्सादनी स्मृता ॥ सैवोक्ता सोमवल्ली च कुण्डली चक्रलक्षणा । जीवन्ती मधुपर्णी च तन्त्रिका देवनिर्मिता ॥ त्र्यर्थे विशल्या लाङ्गली दन्ती गुडूची च ॥ ८३ ॥ मूर्वति बध्नाति मूर्वा, अत एवास्या विकारो मौर्वी । मधुरो रसोस्या मधुरसा । मुरति संवेष्टयति मोरटा । तेजयत्यग्निं तेजनी । स्रवति रसं स्रवा, स्रुवेत्येके । मधूलिका माधुर्यात् । मधुनः श्रेणी पङ्क्तिर्मधुश्रेणी । गोकर्णी गोकर्णाभपत्त्रा, पाककर्णपर्णेति (सू०) ङीष् । पीलोरिव पर्णान्यस्याः पीलुपर्णी । आह च– मूर्वा मधुरसा देवी पृथुत्वक् पीलुपर्ण्यपि । रव(मधु)श्रेणी स्वादुरसा स्निग्धपर्णी च मोरटा ॥ द्व्यर्थे तेजनी तेजोवती मूर्वा च । आहेन्दुः– स्निग्धच्छदा मधुश्रेणी पृथुत्वग्प्रसवाहिनी । रवश्रेणी मधुमती मुरुङ्गी द्विजमेखला ॥ आलोलनी योगवहा मोरटा च मधुस्रवा । सुयो[खो]षिता स्निग्धपर्णी गोकर्णी सा मधूलिका ॥ पीलुपर्णी कर्मकरी प्रमथा मधुमतीति च ॥ ८४ ॥ [पठ्यते पाठा] । विद्धौ कर्णौ यया विद्धकर्णी, शास्त्रे श्रूयमाणत्वात् । स्थापनी वस्तिकर्मोपयोग्या । रस्यते रसा । पापचेली वृकीत्वात् । प्राचीभवा प्राचीना । वने तिक्तरसा वनतिक्ता । आह च– पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका । वृकतिक्ता वनेतिक्ता पापिका स्थापकी वृकी ॥ त्र्यर्थे रसा रास्ना सल्लकी पाठा च ॥ ८५ ॥ कटत्यावृणोति गलं कटंभरा । शोकहन्त्री रोहत्यगं वाशोकरोहिणी । मत्स्यपित्तास्वादा, मत्स्यानां पित्तं जीवितं वा । कृष्णो भेदश्छेदोस्याः कृष्णभेदा । शकुलानामदनं शकुलादनं शकुलादनी वा । आह च(निघण्टुः)– कटुका मत्स्यशकुला मत्स्यपित्ता च रोहिणी । कृष्णभेदा चण्डरुहा रास्ना कटुकरोहिणी । अशोकरोहिणी तिक्ता चक्राङ्गी शकुलादनी । कटुरोहिण्यरिष्टा च प्रोक्ता तिक्तकरोहिणी ॥ द्व्यर्थे कटंभरा कटुङ्गः कटुकी च ॥ ८६ ॥ आत्मना गुप्ता स्पर्शाविषयत्वात् । न जहाति शूकानजहा । न विगताङ्गान्यङ्गा । कण्डू

आत्मगुप्ताजहाव्यङ्गा कण्डूरा प्रावृषायणी ।
ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छूश्च मर्कटी ॥ ८७ ॥
चित्रोपचित्रा न्यग्रोधी द्रवन्ती शंबरी वृषा ।
प्रत्यक्श्रेणी सुतश्रेणी चण्डा मूषिकपर्ण्यपि ॥ ८८ ॥
अपामार्गः शैखरिको धामार्गवमयूरकौ ।
प्रत्यक्पर्णी के(की)शपर्णी किणिही खरमञ्जरी ॥ ८९ ॥
हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ।
अङ्गारवल्ली बालेयशाकवर्बरवर्धकाः ॥ ९० ॥
मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषि(शि)का ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥ ९१ ॥

राति कण्डूरा । प्रावृषि भवा प्रावृषायणी । ऋष्यैर्मृगैः प्रोक्ता दर्शिता ऋष्यप्रोक्ता, ऋषिभिरप्रोक्ता हेयत्वादित्येके । शूकप्रधाना सकण्टका शिम्बिरस्याः शूकशिम्बिः । कपीन् कषति कपिकच्छूः । मर्कटी कपिरोमफलत्वात् । आहेन्दुः— ऋष्यप्रोक्ता स्वयंगुप्ता कपिकच्छूश्च कण्डुरा । आत्मगुप्ता दुरालम्भा जाङ्गलिर्दुरभिग्रहा ॥ अव्यङ्गा वृषभी गुप्ता कण्डूरा शूकशिम्बिका । कपिरोमफला चैव समाना प्रावृषायणी ॥ ज्ञेया जाङ्गलिका सैव साजहा प्रावृषायणी ॥ ८७ ॥ चित्रानेकवर्णपत्त्रा । न्यग्रोहति रुणद्धि वा बहुमूलत्वान्न्यग्रोधी । द्रवति द्रवन्ती । शं वृणोति शंवरी । वर्षति वृणोति वा वृषा । प्रतीची श्रेण्यस्याः प्रत्यक्श्रेणी । सुतानां मूलानां श्रेण्यस्याः सुतश्रेणी । चण्ड्यते चण्डा । मूषिकपर्णी— आखुकर्णाभपत्त्रा । आह च (निघण्टुः)— द्रवन्ती शंवरी चित्रा न्यग्रोधी मूषिकाह्वया । प्रत्यकश्रेणी वृषा चण्डा पुत्रश्रेण्याखुपर्णिका ॥ द्व्यर्थे— उपचित्रा दन्ती पृश्निपर्णी चेति, दन्त्यां द्रवन्तीभ्रान्त्या ग्रन्थकृदुपचित्रामाह ॥८८॥ अपकृष्टः(आ)समन्तान्मार्गोऽस्यापामार्गः, अधःशय्या(ल्या)ल्यत्वाद् । शिखरे भवः शैखरिकः । अधमं मार्गं वाति धामार्गवः, धाम अर्जति वा । मयूरप्रतिकृतिर्मयूरकः । प्रत्यञ्चि पर्णान्यस्याः प्रत्यक्पर्णी । केशपर्णी कपिलोमत्वात्, अत एव केशवल्लीत्येके । किणिनो जिहीते याति किणिही, स्पर्शात्किणोत्पादनात् । आह च— अपामार्गस्तु शिखरी प्रत्यक्पुष्पी मयूरकः । अधःशय्याथ किणिही दुर्ग्रहः खरमञ्जरी ॥ स एवोक्तः शैखरिको मर्कटी दुरभिग्रहः । पत्रपुष्पी च शिखरः कूटो मर्कटपिप्पली ॥ द्व्यर्थे धामार्गवोपामार्गः कोशातकी च ॥ ८९ ॥ हन्ति रोगं हञ्जी । ब्राह्मणी पवित्रत्वात् । पद्मा पद्माभपुष्पा । भृज्जति भार्गी, भृगुजेत्येके, अत एव ब्राह्मी । अङ्गाराभा वल्ल्यस्या अङ्गारवल्ली । बालेयशाको गर्दभभोग्यत्वात् । वृणोति वर्बरो वर्चश्च, वर्बराकृतिपत्त्रो वा । आह च— भार्गी गर्दभशाकश्च पद्मा ब्राह्मणयष्टिका । अङ्गारवल्ली हञ्जी च वर्चो वर्वरकस्तथा ॥ द्व्यर्थे ब्राह्मी स्पृक्का भार्गी च । आहेन्दुः— ब्रह्मरीतिस्तथा स्पृक्का भार्गी च ब्राह्मणी मता ॥९०॥ मञ्जौ मनोज्ञे वर्णे तिष्ठति मञ्जिष्ठा, अम्बाम्बगोभूमीति (सू०) षत्वम् । विकसति दूरं विकसा । जिङ्गति प्रसरति जिङ्गी । समन्ततोऽङ्गति समङ्गा । काले मिष्य(श्य)ते शब्द्यते कालमेषी(शी) । भण्ड्यते भण्डीरी भण्डी च । योजनवल्ली दूरप्रसरा । आह च (निघण्टुः)— मञ्जिष्ठा कालमेषी च समङ्गा विकसारुणा । मञ्जुका रक्तयष्टिश्च भण्डी योजनवल्ल्यपि ॥ आहेन्दुः— विकसा कालमेषी तु कालगोष्ठी च जिङ्गिका । रक्ता भण्डीरिका चेति— ॥९१॥ याति प्रसरति

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
रोदनी कच्छुरानन्ता समुद्रान्ता दुरालभा ॥ ९२ ॥
पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका ।
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनिर्गुहा ॥ ९३ ॥
निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका ।
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ॥ ९४ ॥
नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ।
रञ्जनी श्रीफला तुत्था द्रोणी दोला च नीलिनी ॥ ९५ ॥
अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ।
कालमेषी कृष्णफला वाकुची पूतिफल्यपि ॥ ९६ ॥

यासः । यौति यवासः । दुःस्पर्शः कण्टकित्वात् । धन्वयासो मरूद्भवत्वात् । कुं नाशयति कण्टकित्वात्कुनाशः । रोदयति खेदयति रोदनी, चोदनीति सभ्याः । कच्छूं रोगं राति कच्छुरा । अनन्ता समुद्रान्ता च दूरव्याप्तेः । कृच्छ्रेण लभ्यते दृश्यते दुरालभा। आह च– यासो यवासकोनन्तो बालपत्रो विकण्टकः । चीरमूलः समुन्द्रातो दीर्घमूलो मरूद्भवः ॥ धन्वयासो दुरालम्भा ताम्रमूली च कच्छुरा । दुरालभा च दुःस्पर्शा यासो धन्वयवासकः ॥ ९२ ॥ पृश्निश्चित्रगवीव पर्णान्यस्याः पृश्निपर्णी, सूक्ष्मपर्णा वा, यदाह पृश्निरल्पतनौ । अङ्घ्रेर्बुध्नादारभ्य पर्णान्यस्या अङ्घ्रिपर्णी । क्रोष्टुभिर्विन्ना दत्तेव, क्रोष्टुपुच्छीत्वात् । सिंहस्येव पुच्छमस्याः सिंहपुच्छी, लोकोक्त्या सिंहपुच्छकः । कलशिर्गर्गरी पृथुलत्वात् । धावति प्रसरति धावनिः । गूहति रसं गुहा । आह च– पृश्निपर्णी पृथक्पर्णी कलशिर्धावनी गुहा । शृगालविन्नाघृ(ङ्घ्रि)तिलापर्णी क्रोष्टुकपुच्छिका ॥ ९३ ॥ निदिह्यते निदिग्धिका । स्पृशति कण्टकैरुपतपति स्पृशी । व्याघ्री हिंस्रत्वात् । कण्टकबाहुल्याद् बृहती । कण्टकानियर्ति कण्टकारी । प्रचोदयति कण्टकैः प्रेरयति प्रचोदनी । कोलति कुली । क्षुणत्ति क्षुद्रा हिंस्रा, क्षुद्रवार्ताक्येकदेशे वा । राष्ट्रमस्त्यस्या राष्ट्रिका । बृहती तु निदिग्धिकेति **भागुरि**वाक्याद् ग्रन्थकृद् भ्रान्तः, यतोनयोर्महान्भेदः । आह च– कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका । कण्टालिका कण्टकारी धावनी दुःप्रधर्षिणीति ॥ यथा– बृहती सिंह्यनाक्रान्ता वार्ताकी राष्ट्रिका कुली । विशदा स्थूलभण्टाकी महती तु महोटिका ॥ **भागुरि**र्हि द्वयोर्बृहतीत्वं मन्यते, यच्छाश्वतः– क्षुद्रायां क्षुद्रवार्ताक्यां बृहती छन्दसि क्वचित् ।द्व्यर्थे प्रचोदनी कण्टकारिका दुरालभा च ॥ ९४ ॥ नीली काला च वर्णे, नीलात्प्राण्योषध्योर्ङीष् (वा०) । क्लीतकं विनिमयोस्त्यस्याः क्लीतकिका । ग्रामे भवा ग्रामीणा । रञ्जयति नीलीकरोति रञ्जनी । श्रीफला रम्यफला । तुद्यते तुत्था । द्रवत्यस्याः स्पर्शाज्जनो द्रोणी, तूणीत्येके । दोल्यते दोला, मेलेत्येके । नीलोस्त्यस्या नीलिनी । आह च– नीलिनी नीलिका काला ग्राम्या तूणी विशोधनी । तुत्था श्रीफलिका मेला सारवाही च रञ्जनी ॥ त्र्यर्थे मधुपर्णी गुडूची काश्मरी नीलिका चेति, द्व्यर्थे क्लीतकिका मधुयष्टी नीलिका च ॥ ९५ ॥ अवल्गोररम्याज्जातोवल्गुजः । सोमेनाह्लादनेन राजते सोमराजी । कालेन मिष्यते शब्दयते कालमेषी कृष्णफलत्वात् । वातं संकोचयतीति निर्वचनाद्वाकुची । पूतिः फलमस्याः पूतिफली, पाककर्णेति (सू०) ङीष् । त्र्यर्थे कालमेषी मञ्जिष्ठा बृहती वाकुचिका च ॥ ९६ ॥ कर्षति कृष्णा, श्यामलत्वाद्वा ।

कृष्णोपकुल्या वैदेही मागधी चपला कणा ।
ऊषणा पिप्पली शौण्डी कोलाथ करिपिप्पली ॥ ९७ ॥
कपिवल्ली कोलवल्ली श्रेयसी वसिरः पुमान् ।
चव्यं तु चविका काकचिञ्चीगुञ्जे तु कृष्णला ॥ ९८ ॥
पलंकषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ॥ ९९ ॥
विश्वा विषा प्रतिविषातिविषोपविषारुणा ।
शृङ्गी महौषधं चाथ क्षीरावी दुग्धिका समे ॥ १०० ॥
शतमूली बहुसुताभीरुरिन्दीवरी वरा(री) ।
ऋष्यप्रोक्ताभीरुपत्रीनारायण्यः शतावरी ॥ १०१ ॥

उपकोलति संस्त्यायत्युपकुल्या । विदेहदेशे भवा वैदेही । मगधभवत्वान्मागधी । चपति चपला । कणाः सन्त्यस्या कणा । ऊषत्यूषणा, ऊष रुजायाम् । उषणापि, उष दाहे, तीक्ष्णतण्डुलत्वात् । पिपर्ति पिप्पली । शौण्डी शक्तत्वात् । कोला, कुल संस्त्याने । आह च– पिप्पली मागधी कृष्णा चपला तीक्ष्णतण्डुला । उपकुल्या कणा श्यामा कोला शौण्डी तथोषणा ॥ इन्दुश्च– पिप्पली तण्डुलफला वैदेही कृष्णतण्डुला । करिपिप्पली बृहत्त्वाद् गजयोग्या वा ॥९७॥ कपिवल्ली मर्कटरोमत्वात् । एवं कोलवल्ली । वस्यते छाद्यते रोमभिर्वसिरः । चव्यं, फलं चैतत् , चव्यते चव्यं च्यवते वा । आह च– चविका कोलवल्ली तु चव्यं चवनमेव च ॥ तस्याः फलं विनिर्दिष्टं श्रेयसी हस्तिपिप्पली ॥ **चन्द्रनन्दनः** सामान्येनाह चव्या कोला च चविका श्रेयसी गजपिप्पली । चवना कोलवल्ली तु चव्यं कुञ्जरपिप्पली । त्र्यर्थे मर्कटवल्ली– अपामार्गो हस्तिपिप्पली स्वयंगुप्ता चेति, तथा वासिरोपामार्गः समुद्रलवणं हस्तिपिप्पली चेति । काकवर्णा चिञ्ची प्रान्तोऽस्याः काकचिञ्ची । गुञ्जति शिम्ब्यां गुञ्जा । कृष्णं प्रान्तं लाति कृष्णला । रक्तिकापि ॥ ९८ ॥ पलं मांसं कषति पलंकषा । इक्षोरिव गन्धोऽस्याः स्वादुकण्टकत्वादिक्षुगन्धा । शुनो दंष्ट्रेव हिंस्रत्वाच्छ्वदंष्ट्रा । गवां कण्टको वेधको गोकण्टको गोक्षुरत्वात् । गौर्महीति तु युक्तं, अत एव वनशृङ्गाटो भूक्षुरश्चायम् । आह च– गोक्षुरः स्याद् गोक्षुरको भक्षकः स्वादुकण्टकः । गोकण्टको भक्षक[ट]कः षडङ्गः क्षुरकः क्षुरः ॥ गोकण्टो गोक्षुरः कण्टी षडङ्गस्त्रिकटस्त्रिकः । त्रिकण्टकः कण्टफलः श्वदंष्ट्र्‌व्यालदंष्ट्रकः ॥ द्व्यर्थे पलंकषो लाक्षा गोक्षुरो गुग्गुलुश्च, तथा– इक्षुगन्धा विदारी कोकिलो गोक्षुरश्च ॥९९॥ विशत्यन्तर्विश्वा । वेवेष्टि विषा । प्रतीपा विषस्य प्रतिविषा, अगदत्वात् । शृङ्गयुक्तत्वाच्छृङ्गी । आह च– अतिविषा शुक्लकन्दा ज्ञेया विश्वा च भङ्गुरा । श्यामकन्दा प्रतिविषा शृङ्गी चोपविषा विषा[तथा] ॥ महौषधं तु विषं नातिविषा । त्र्यर्थे तु हि महौषधं (विषं) शुण्ठी लशुनं चेति विषा(ष)शब्दं बुद्ध्वा भ्रान्तोऽयम् । क्षीरमवति क्षीरावी । दुग्धमस्त्यस्या दुग्धिका क्षीरकाकोलीयम् । आह च– द्वितीया क्षीरकाकोली क्षीरशुक्ला पयस्विनी । पयस्या [वयस्था] क्षीरमधुरा वीरा क्षीराविकारिका । अत्र क्षीरावी विकारिकेति च ग्रन्थकृन्मन्यते, क्षीरेति विकारिकेति तु **वैद्याः** ॥ १०० ॥ शतं बहूनि मूलान्यस्याः शतमूली । बहुधा सुवति बहुसुता । अभीरुः स्थिरपत्रा रसायनत्वाद्वा । इन्दीवर्युत्पलपुष्पा । वृणोति वरा । ऋष्यैः प्रोक्ताश्रिता द्वीपिशत्रुत्वात् । नारायणी विष्णुजाता । शतेन वृणोति शतावरी । न हिनोत्यहेरुः, अभीरोरपभ्रंशोयं वा । हरमेखलो निघण्टौ दृष्टः, यदाह– सहस्रमूली सहस्रावरी– अहेरुरिति । आह च– शतवीर्या शतपदी पीवरीन्दीवरी वरी । सहस्रवीर्याऽभीरुश्च तुङ्गिनी बहुपत्रिका ॥ ऋष्यप्रोक्ता द्वीपिशत्रुर्दी[द्वी]पिका वरकण्टकैः । मता पुरुषदन्ता च शतावर्यूर्ध्वकण्टकः ॥ १०१ ॥ कालयति दोषान्कालीयकः ।

अहेरुरथ पीतद्रुकालीं(ले)यकहरिद्रवः ।
दार्वी पचंपचा दारुहरिद्रा पर्जनीत्यपि ॥ १०२ ॥
वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ।
शुक्ला हैमवती वैद्यमातृसिंह्यौ तु वाशिका ॥ १०३ ॥
वृषोटरूषः सिंहास्यो वासको वाजिदन्तकः ।
आस्फोता गिरिकर्णी स्याद्विष्णुक्रान्तापराजिता ॥ १०४ ॥
इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षेक्षुरक्षुराः ।
शालेयः स्याच्छीतशिवश्छत्रा मधुरिका मिसिः ॥ १०५ ॥
मिश्रेयाप्यथ सीहुण्डो वज्रः स्नुक् स्त्री स्नुही गुडा ।
समन्तदुग्धाथो वेल्लममोघा चित्रतण्डुला ॥ १०६ ॥
तण्डुलश्च कृमिघ्नश्च विडङ्गं पुंनपुंसकम् ।
व-ब-ला वाट्यालको घण्टारवा तु शणपुष्पिका ॥ १०७ ॥

हरिः पीतो द्रुः स्कन्धोस्य हरिद्रुः । दार्वी दारुहरिद्रा च पिण्डहरिद्रातोन्या । अत्यर्थं पचति पचंपचा । पिपर्ति रोगेभ्यः पर्जनी । आह च– हरिद्रा पीतिका पिण्डा रजनी रञ्जनी निशा । गौरी वर्णवती पीता हरिता[द्रा] वरवर्णिनी ॥ अन्या दारुहरिद्रापि हरिद्रुः पीतचन्दनम् । निर्दिष्टा वै कटंकिनी स च कालेयकः स्मृतः ॥ कालीयको दारुनिशा दार्वीपीतद्रुपीतकाः । कटंकटेरी पर्जन्या पीतदारु पचंपचा ॥ १०२ ॥ वक्त्यनया वचा, वाक्पाटवकृत् । षड् ग्रन्थयः पर्वाण्यस्याः षड्ग्रन्था । गोरिव लोमान्यस्या लोमशत्वाद् गोलोमी । शुक्ला कृष्णा च द्वेधासौ, यदाह– वचोग्रगन्धा गोलोमी जटिलोग्रा च लोमशा । अन्या श्वेतवचा मेध्या षड्ग्रन्था हैमवत्यपि ।। त्र्यर्थे शतपर्वा दूर्वा वशा वचा च । वैद्यानां मातेव रोगजित्त्वात् । हिनस्ति रोगान् सिंही । उश्यते काम्यते वाशिका ॥ १०३ ॥ वर्षति मधु वृषः । अटान् गच्छतो रूषत्यटरूषः । सिंहास्याकारपुष्पत्वात्सिंहास्यः । वाजिदन्ता इव केसराण्यस्य वाजिदन्तकः । आह च– वासकः सिंहपर्णी च वृषो वासोथ सिंहिका । अटरूषः सिंहमुखी भिषङ्मातादरूषकः ॥ आस्फुटत्यास्फोता । गिरि(रे)रश्मवत्कर्णिकास्य(स्या) गिरिकर्णी । विष्णुनाक्रान्ता । अत एव रक्षाहेतुत्वान्न पराजिता । आह च– अश्वक्षुरा श्वेतपुष्पा श्वेता च गिरिकर्णिका । कटभी श्वेतसारा च श्वेताख्या चापराजिता ॥ द्व्यर्थे आस्फोता सारिवा गिरिकर्णिका च ॥ १०४ ॥ इक्षोरिव गन्धास्याः, स्वाद्वीत्यर्थः । इक्षुसदृक्काण्डत्वात् (काण्डेक्षुः) । कोकिलस्येवाक्षीण्यस्य कोकिलाक्षः । इक्षुं रातीक्षुरः । स एव लोकोक्त्या क्षुरः, पारुष्याद्वा । आह च– तथान्य इक्षुगन्धः स्यादिक्षुरः कोकिलाक्षकः । कामः[सः] काण्डेक्षुरुद्दिष्टः काकेक्षुर्वायसेक्षुकः ॥ शालायां भवः शालेयः, गुप्तत्वात्, अत एव शालीनः । शीतः शिवश्च । (छत्रा) छत्रातपत्रा । मस्यति परिणमति मिसिः । आह च– मिश्रेया तालपत्री च तालपर्णी मिसिस्तथा । शालेयः स च शालीनो नाम्ना शीतशिवो मतः ॥ १०५ ॥ सीहुण्डः सिंहतुण्डापभ्रंशः, यन्मेखलाकुलिशतरू सीहुण्डौ । वज्रो भेदकत्वात् । स्नौ(स्नुह्य)ति क्षीरं स्नुक् स्नुही च, स्नुहेति **वैद्याः** । गुडा वृत्तत्वात्, गुहेत्यपपाठः, यच्छाश्वतः– गुडौ गोलेक्षुविकृती स्नुही गुडिकयोर्गुडा । सुधापि । आह च– स्नुक् सुधा च महावृक्षो गुडा निस्त्रिंशपत्रकः । समन्तदुग्धा गण्डीरा सीहुण्डो वज्रकण्टकः ॥ वज्रद्रुः स्नुक् स्नुहीत्येके पेठुः । वेल्लति वेल्लम् ॥ १०६ ॥ बिलति भिनत्ति विडङ्गं विलङ्गाति वा । आह च– विडङ्गा जन्तुहन्त्री च कृमिघ्नी चित्रतण्डुला । तण्डुलः कृमिहामोघा केश[केस]ला मृगगामिनी ॥ वलन्त्यनया वला, बलकृद्वा । वटति वाट्यालकः । **चन्द्रनन्दनो** बला भद्रौदनी ह्या तथा वाट्यालक **इत्याह** । घण्टेवारौति घण्टारवा । शणस्येव पुष्पाण्यस्याः शणपुष्पी, पाककर्णपर्णेति (सू०) ङीष् । **आह च– शणपुष्पी बृहत्पुष्पी स चोक्तः शणघण्टकः** ॥ १०७ ॥ मृद्वीका सौकुमार्यात् । गोस्तनाभा

मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ।
सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ॥ १०८ ॥
त्रिभण्डी रोचनी श्यामापालिन्द्यौ तु सुषेणिका ।
काला मसूरविदलार्धचन्द्रा कालमेषिका ॥ १०९ ॥
मधुकं क्लीतकं यष्टीमधुकं मधुयष्टिका ।
विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री तु या सिता ॥ ११० ॥
अन्या क्षीरविदारी स्यान्महाश्वेतर्ष्य(र्क्ष)गन्धिका ।
लाङ्गली शारदी तोयपिप्पली शकुलादनी ॥ १११ ॥
खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः ।
गोपी श्यामा शारिवा स्याच्चन्दनोत्पलशारिवा ॥ ११२ ॥

गोस्तनीति विशेषोपि सामान्यवृत्तिः । द्राति सरसत्वाद् द्राक्षा । आह च— द्राक्षा चारुफला कृष्णा पियाला कालमोषिका । स्वाद्वी गुडा मधुरसा मृद्वीका गोस्तनी स्मृता ॥ हारहूरा च । सर्वां अनुभूतयोस्याः सर्वानुभूतिः, नानारसेत्यर्थः । सरति सरला विरोचनीत्वात्, सरडेत्येके । त्रयः पुटाश्छादका अस्यास्त्रिपुटा, त्रिपुटी च, त्र्यस्रेत्येके । त्रिभिर्व्रियते त्रिभिर्वर्त्यते छाद्यते वा त्रिवृता त्रिवृत्, त्रिपुटात्वाद्वा ॥ १०८ ॥ त्रिभिर्भण्ड्यत उद्घाट्यते त्रिभण्डी । रोचनी रुचिकर्त्री, रेचनीत्येके । शुक्लेयं, कृष्णामाह । पालयति पालिन्दी । सुषिणोति सुषेणी । आह च— श्यामा त्रिवृन्मालविका मसूरविदला च सा । कालार्धचन्द्रा पालिन्दी सुषेणी कालमेष्यपि ॥ शुक्ला चापि त्रिभण्डीस्यात्काकाक्षी सरला त्रिवृत् । सर्वानुभूतिस्त्रिपुटा त्र्यस्रा कूटरवृंहिणी ॥ आम्भसी रेचनी चैव कण्ठविक्षोभणी तथा ॥ १०९ ॥ यष्टीरूपं मधुकं यष्टीमधुकम् । एकदेशान्मधुकम् । क्लीबत्वं तकति प्रतिहन्ति वृष्यत्वात्क्लीतकं, क्लीतसंज्ञं वा । आह च— मधुयष्टी च यष्टी च यष्टीमधु मधुस्रवा । यष्टीमधूकं मधुकं यष्ट्याह्वं मधुयष्टिका ॥ तल्लक्षणं क्लीतकं च— इति । विदार्य भक्ष्यते विदारी । क्षीरेण शुक्ला । इक्षुगन्धा माधुर्यात्, क्षीरविदारीयं कृष्णो भूकूष्माण्डोयं वा [प्राक्षु देशेषु] । शुक्लो भूकूष्माण्डः सृगाली, रसं सृजतीति, क्रोष्ट्री तु लक्षणया । आह च— विदारिका मता शुक्ला स्वादुकन्दा शृगालिका । ऋष्यगन्धा विदारी च ऋष्यवल्ली विदारिका ॥ त्र्यर्थे— इक्षुगन्धा विदारी कोकिलाक्षको गोक्षुरश्च ॥ ११० ॥ ऋष्यान्गान्धयत्यर्दयति ऋष्यगन्धा । आह च— अन्या क्षीरविदारी स्यादिक्षुगन्धेक्षुवल्ल्यपि । क्षीरवल्ली क्षीरकन्दा क्षीरशुक्ला पयस्विनी ॥ त्र्यर्थे महाश्वेता नीलस्यन्दा यवशर्करा क्षीरविदारी च, तथा ऋष्यगन्धा मूलकं रक्तालुकं क्षीरविदारी च, तथा क्षीरशुक्ला क्षीरविदारी क्षीरकाकोली नीलस्यन्दा च । लाङ्गली हलाकारा । शकुलादनी मत्स्यभक्षणात् । आह च— जलपिप्पल्यभिहिता शारदी तोयपिप्पली । मत्स्यादनी मत्स्यगन्धा लाङ्गली शकुलादनी ॥ १११ ॥ खरमश्नुते खराश्वा । कारोरियं कारवी कर्मण्येत्यर्थः । दीप्योग्निदीपनः । मीनात्यग्निमान्द्यं मयूरः । लोच्यते लुच्यते वा मस्तकोस्य वर्वराकारत्वाल्लोचमस्तकः, लोचमर्कट इत्येके । आह च— अजमोदा वस्तमोदा दीप्यको लोचमस्तकः । खराश्वा कारवी वल्ली मोचा हस्तिमयूरकः ॥ त्र्यर्थे मयूरकोपामार्गोजमोदा तुत्थकश्च । गोपायति गोपी । (श्यामा)श्यामवर्णा । यच्छाश्वतः— शारिवायां निशि श्यामा श्यामौ च हरितासितौ । शीर्यन्तेनया दोषाः शारिवा । चन्दनाह्लादनत्वात्, अनन्तेत्येके । उत्पलाभपत्त्रोत्पलशारिवा । आहुश्च— शारिवा फणिजिह्वा च गोप्यास्फोता च चन्दना ॥ ११२ ॥ योजनीयं योगे साधु वा योग्यम् । ऋध्नोति ऋद्धिः । वृद्धेरोषधिविशेषस्यापि योग्यादीनि नामानि । आह च— ऋद्धिर्वृद्धिः सुखं सिद्धौ रथाङ्गं मङ्गलं वसु । ऋद्धिपुष्टा[सृष्टा] युगं योग्यं लक्ष्मीः सर्वजनप्रिया ॥ केन वायुना दल्यते कदली । वारणानां वुसो घासः, वारणवु(बु)षेत्येके । रम-

योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे ।
कदली वारणबुसा रम्भा मोचांशुमत्फला ॥ ११३ ॥
काष्ठीला मुद्गपर्णी तु काकमुद्गा सहेत्यपि ।
वार्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षिणी ॥ ११४ ॥
नाकुली सुरसा नाग(रास्ना)सुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजंगाक्षी छत्राकी सुवहा च सा ॥ ११५ ॥
विदारिगन्धांशुमती शा(सा)लपर्णी स्थिरा ध्रुवा ।
तुण्डिकेरी समुद्रान्ता कर्पासी बदरेति च ॥ ११६ ॥
भारद्वाजी तु सा वन्या शृङ्गी तु वृ-ऋ-षभो वृषः ।
गाङ्गेरुकी नागबला झषा ह्रस्वा गवेधुका ॥ ११७ ॥
धामार्गवो घोषकः स्यान्महाजाली स पीतकः ।
ज्यौत्स्नी पटोलिका जाली नादेयी भूमिजम्बुका ॥ ११८ ॥

तेस्या रम्भा । मुञ्चति रसं मोचा। अंशुमानिव फलान्यस्या अंशुमत्फला, भानुफलाख्या ॥११३॥ ईषदष्ठील-मस्याः काष्ठीला, काष्र्णी[ष्ठी]रस इत्येके । आह च (धन्वन्तरिः)– कदली सुकुमारा च रम्भा भानु-फला मता । काष्र्णी[ष्ठी]रसश्च निःसारा मोचा हस्तिवि(बु)षा तथा ॥ सहा क्षुद्रा, सहाख्यात्र । त्र्यर्थे हि सहा मुद्गपर्णी बला नाकुली च, यतो महासहा माषपर्ण्युच्यते । वार्ताकं देशयाम् । भण्टाकी कण्टकार्या अन्येयमित्ययं मन्यते, वैद्यास्त्वभिन्ना प्राहुः, यदाह– हिङ्गुली बृहतीति च ॥ ११४ ॥ नकुलानां प्रिया नाकुली । नागसुगन्धा सर्पसुगन्धत्वात् । छत्राकी छत्राभपर्णा । सुष्ठु वहत्यामोदं सुवहा । अर्धेन रास्नार्धेन सर्पाक्षीति गौडाः, वैद्यास्तु नाकुलीगन्धनाकुल्यौ विदारीक्षीरविदारीवद् भिन्ने मन्यन्ते । आह च– नाकुली सर्पगन्धा च सुगन्धा भोगिगन्धिका । सैव सर्पसुगन्धेति– । तथा– अन्या महासु-गन्धा च सुवहा गन्धनाकुली । सर्पाक्षी नकुलेष्टा च छत्राकी विषमर्दनी ॥ ११५ ॥ विदार्या गन्धोस्या विदारिगन्धा । अंशवः सन्त्यस्या अंशुमती दीर्घमूलत्वात् । शालस्येव पर्णान्यस्याः शालपर्णी । आह च– शालपर्णी स्थिरा सौम्या त्रिपर्ण्यतिगुहा ध्रुवा । विदारिगन्धांशुमती दीर्घमूला च पीतनी ॥ तुण्डि-कान् गन्धादीनीरयति कण्टकित्वात्तुण्डिकेरी । समुद्रः कण्टकैः कृतरक्षोन्तोस्याः समुद्रान्ता, दूरप्रसरत्वाद्वा । कल्पते कर्पासी । बदराणीव फलानि सन्त्यस्या बदरा, यन्माला– कर्पासो बदरः प्रोक्तो बादरः पिच-वश्च ह । द्व्यर्थे तुण्डिकेरी चिञ्चा कर्पासी च, त्र्यर्थे समुद्रान्ता कर्पासी यवासकः स्पृक्का च ॥ ११६ ॥ वने भवा वन्या । सा कर्पासी । (भारद्वाजी)भरद्वाजसृष्टेत्यागमः । भद्रापि । शृङ्गाणि सन्त्यस्य शृङ्गी । अत एव वृषाख्यः । आह च– ऋषभो धूर्वहो वी[धी]रो मातृको वृषभो वृषः । वितानी ककुदिन्द्राक्षो बन्धुरो गोपतिः स्मृतः ॥ गाङ्गमीरयति पवित्रत्वात् गाङ्गेरुकी । नागानां बलकृन्नागबला । झषति हिनस्ति गन्धेन झषा । गवि जले–इन्द्धे (एधते)·गवेधुका । आह च– गाङ्गेरुकी नागबला खरगन्ध-निका झषा । विश्वदेवा तथारिष्टा ख[च]ण्डा ह्रस्वा गवेधुका ॥ ११७ ॥ धामार्जति धामार्गवः । घो-षति शब्दायते घोषकः । स धामार्गवः पीतपुष्पो महाजाली, जालं वितानः । आह च– धामार्गवः कोशफलो राजकोशातकी फला । कर्कोटकी पीतपुष्पा महाजाली तथोच्यते ॥ ज्यौत्स्नी रात्रौ भासनात् । पटति विस्तीर्यते पटोली । जाली सविताना । ऐरावतो नागरङ्गो नादेयी भूमिजम्बुकेत्युक्त्वापि भ्रान्त्या-त्रोक्ता ॥ ११८ ॥ लाङ्गलवद् भेदनाल्लाङ्गली । अग्निशिखा स्प्रष्टुमशक्यत्वात्, अग्निमुखीत्येके । आह च– कलिकारी तु फलिनी विशल्या गर्भपातनी । लाङ्गल्यग्निमुखी सौरी दीप्तानन्तेन्द्रपुष्प्यपि ॥ द्व्यर्थे– अग्निमुखी भल्लातकी लाङ्गली च । काकस्येवाङ्गं नासारूपं फलमस्याः काकाङ्गी, काकजङ्घेत्येके ।

स्याल्लाङ्गलिक्यग्निशिखा काकाङ्गी काकनासिका ।
गोधापदी तु सुवहा मुसली तालमूलिका ॥ ११९ ॥
अजशृङ्गी विषाणी स्याद् गोजिह्वादार्विके समे ।
ताम्बूलवल्ली ताम्बूली नागवल्ल्यप्यथ द्विजा ॥ १२० ॥
हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ।
एला-ल-वालुकमैलेयं सुगन्धि हरिवालुकम् ॥ १२१ ॥
वालुकं चाथ पालङ्क्यां मुकुन्दः कुन्दकुन्दुरू ।
वालं ह्रीवेरबर्हिष्ठोदीच्यं केशाम्बुनाम च ॥ १२२ ॥
कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु ।
शैलेयं तालपर्णी तु दैत्या गन्धकुटी मुरा ॥ १२३ ॥
गन्धिनी गजभक्ष्या तु सुवहा सुरभी रसा ।
महेरणा कुन्दुरुकी सल्लकी ह्रादिनीति च ॥ १२४ ॥

आह च– काकनासा ध्वाङ्क्षनासा काकतुण्डफला च सा । गोधाया इव पदान्यस्या गोधापदी, कुम्भपद्यादिः (सू०) । हंसपदी च । मुष्णा(स्य)ति खण्डयति दोषान्मुसली । द्व्यर्थे तालपत्री मुसली मिश्रेया च ॥ ११९ ॥ अजस्येव शृङ्गाण्यस्या अजशृङ्गी, कर्कटशृङ्गीत्यर्थः । विषाणी शृङ्गीत्वात् । आह च– शृङ्गी कर्कटशृङ्गी च कुरङ्गी कर्कटाह्वया । कुलीरशृङ्गी वक्रा च महाप्येषा नताङ्ग्यपि ॥ गोजिह्वाभपत्त्रा । दारयति रोगान् दार्वी, ओषधिविशेषः । नागवल्ली फणिलता पातालानीतत्वात् । द्विर्जायते द्विजा ॥ १२० ॥ हरति हरेणुः । रेणुका भस्मयोगात् । कुन्त्या दुर्वाससा दत्ता कौन्ती । भस्मना धूल्या गन्धयति भस्मगन्धिनी । आह च– रेणुका राजपुत्री च नान्दिनी कपिला द्विजा । भस्मगर्भा पाण्डुफला भस्मगन्धा हरेणुका ॥ गन्धद्रव्यं चैतत् । एला-ल-वद्दलति– एला-ल-वालुकम् । हरि पिङ्गं वालुकं हरिवालुकम् । त्र्यर्थे सुरभिः सल्लकी सुरा– एलावालुका च ॥ १२१ ॥ पाल्यते पालङ्क्या । मुखात्कुन्द इव मुकुन्दः, मुञ्चति रसं वा । कुन्याति कुन्दुरुः । आह च– कुन्दुरुः स्यात्कुन्दुरुकः कुन्दश्चासौ विड[द]ङ्ग्यपि । मुकुन्दस्तीक्ष्णगन्धश्च पालिन्दो(लङ्क्यो)भीषणो बली ॥ वलते वालम् । जिह्रेति च ह्रीवेरम् । बर्हते वर्धते बर्हिष्ठम् । उदीचीभवमुदीच्यम् । केशपर्यायं वालत्वात् । अम्बुनाम तृड्घ्नत्वात् । आह च– वालकं वारि तोयं च ह्रीवेरं जलमम्बु च । केशं वज्रमुदीच्यं च पिङ्गमावपनं कचम् ॥ १२२ ॥ कालमनुसरति शीतोष्णाभ्यां कालानुसार्यम् । वृद्धं कालस्थायि । अश्मनः पुष्पं, अश्मानं पुष्णाति वा, तदूर्ध्वजत्वात् । शीतत्वेन शिवं शीतशिवम् । द्व्यर्थे शीतशिवं सैन्धवं मिश्रेया चेत्याहुः । तानि तु शैलेयं, शिलायां भवं शैलेयम् । आह च– शैलेयं पलितं वृद्धं जीर्णं कालानुसार्यकम् । स्थविरं च शिलादद्रुं शिलापुष्पं शिलाभवम् ॥ दैत्या सुराख्यदैत्यनामत्वात् । (मुरा) मुर संवेष्टने । आह च– मुरा गन्धवती दैत्या गन्धाढ्या गन्धमालिनी । सुरभिः श्रुतगन्धा च कुटी गन्धकुटी स्मृता ॥ १२३ ॥ गजैर्भक्ष्यते गजभक्ष्या । सुष्ठु वहति स्रवति सुवहा, सुस्रवेति वैद्याः । महदीरणमस्या महेरणा । सल्कृत्य लक्यते स्वाद्यते गजैः सल्लकी [शल्लकी] । ह्रादोऽस्त्यस्या ह्रादिनी । आह च– सल्लकी शल्लकी ह्रादा सुरभिः सुस्रवा रसा । अश्वमूत्री कुन्दुरुकी गजभक्ष्या महेरणा ॥ १२४ ॥ अग्नेर्ज्वालेव रक्ता, मद्यपावनीत्वाद्वा । सुभिक्षा सुलभा । धातुरक्ता धातकी, धातुपुष्पीत्वात् । आह च– धातकी ताम्रपुष्पी च कुञ्जरा मद्यपावनी । पर्वतीया सुभिक्षा च वह्निपुष्पा च शब्दिता ॥ पृथ्वीका बहुफला पत्त्रैलात्वाद्वा । एवं बहुला । चन्द्रस्य कर्पूरस्य बाला पुत्रीव चमत्कारात् । एलयति मुखदौर्गन्ध्यमस्यित्येला । निष्क्रान्ता कुटः कोशान्निष्कुटिः । आह च– पत्त्रैला बृहदेला च त्रिदिवा त्रिदिवोद्भवा । स्थूलैला त्वक्सुगन्धा च पृथ्वीका चन्द्रकन्यका ॥ त्रिपुटे(टी)तीन्दुः । त्र्यर्थे

अग्निज्वालासुभिक्षे तु धातुकी धातुपुष्पिका ।
पृथ्वीका चन्द्रवालैला निष्कुटिर्बहुलाथ सा ॥ १२५ ॥
सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः ।
व्याधिः कुष्ठं पारिभ(भा)व्यं वाप्यं पाकलमुत्पलम् ॥ १२६ ॥
शंखिनी चोरपुष्पी स्यात्केशिन्यथ वितुन्नकः ।
झटामलाज्झटा ताली शिवा तामलकीति च ॥ १२७ ॥
प्रपौण्डरीकं पुण्डर्यमथ तुन्नः कुवेरकः ।
तुणिः कच्छः कान्तलको नन्दिवृक्षोथ राक्षसी ॥ १२८ ॥
चण्डा धनहरी क्षेमदुष्पु(ष्प)त्रगणहासकाः ।
व्यालायुधं व्याघ्रनखं करजं चक्रकारकम् ॥ १२९ ॥
सु(शु)षिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ।
धमन्यञ्जनकेशी च हनुर्हट्टविलासिनी ॥ १३० ॥

पृथ्वीका हिङ्गुपत्रिकोपकुञ्चिका सूक्ष्मैला चेत्याहुः । द्व्यर्थे तु त्रिपुटा त्रिवृत्सूक्ष्मैला चेति लक्ष्याच्चाम्रेल विनिश्चयः ॥ १२५ ॥ सा– एला सूक्ष्मा, उपकुञ्चयत्युपकुञ्चिका । तुत्था चाल्पत्वात् । कुराति शब्दायते कोरङ्गी । त्रिपुटा त्र्यश्रिः । त्रुट्यति त्रुटिः, सूक्ष्मत्वाद्वा । आह च– सूक्ष्मैला द्रामि[वि]डो तुत्था कोरङ्गी बहुला त्रुटिः । एला कपोतवर्णा च चन्द्रबाला च निष्कुटिः ॥ द्व्यर्थे त्रिपुटा त्रिवृत्सूक्ष्मैला च । व्याधिपर्यायं कुष्ठत्वात् । कौ तिष्ठति कुष्ठम्, अम्बाम्बगोभूमीति (सू०) षत्वं, कुष्णाति रोगान्वा । पारिषु तोयाशयेषु भवति पारिभव्यं, भव्यगेयेति (सू०) साधुः । वाप्यां भवं वाप्यम्, व्याप्यामित्येके । पाकलं व्याधित्वात्, पाकं लाति वा । उत्पलं दाहहृत्त्वादुत्पलपुष्पत्वाद्वा । आह च– कुष्ठो रोगो गदो व्याधिरुत्पलं पाकलं रुजा । वाप्यं वानीरजं रामं कौवीरं पारिभव्यकम् ॥१२६॥ शंखिनी शौक्ल्यात् । चोरपुष्पी धनहरीत्वात्, रात्रौ विकाशाद्वा । केशाः सन्त्यस्याः केशिनी । चन्द्रनन्दनोऽव– चण्डा धनहरी चौरी चोरपुष्पा च तस्करी । तथा निशाचरी च स्यात्केशिनी ग्रन्थिकेत्यपि ॥ वितुद्यते वितुन्नकः । झटः संघातोस्या झटा । आमला– आमलकीत्वात् । अज्झटाश्चर्यकारिसंघाता, अद् आश्चर्येद्भुतवत् । ताडयति मलांस्ताडी(ली) । आमलकीत्वाच्छिवा । ताम्यति तामलकी । आह च– तामलक्युत्तमा ताली तमलं(कं) तु पुलाकिनी । वितुन्नकस्त्वज्झटा च झटा चामलकीति च ॥ १२७ ॥ प्रकर्षेण पुण्डरीकस्येदं दाहहृत्त्वात्प्रपौण्डरीकम् । अस्यैकदेशानुकाराल्लोके पुण्डर्यम् । आह च– प्रपौण्डरीकं चक्षुष्यं पौण्डर्यं पुण्डरीयकम् । स्थलपद्ममिति गौडाः । तुद्यते तुन्नः । कुवेरः कुत्सितदेहः । अत एव तुणिस्थाने कुणिं पेठुः । कच्छ्य(च्य)ते कच्छः । आह च– तुणिस्तुन्नक आपीतस्तुणिकः कच्छकस्तथा । कुवेरकः कान्तलको नन्दिवृक्षोथ नन्दकः ॥ अश्वत्थाकारोयम् ॥ १२८ ॥ रक्ष्यतेस्या राक्षसी । क्षियति वसत्यस्मिन्गन्धः क्षेमकः । दुष्पुत्रश्चोरकत्वात् । गणं हासयति गणहासकः कोहनत्वात् । आह च– चोरकः शङ्कितश्चण्डा दुष्पुत्रः क्षेमको रिपुः । गणहासः कोहनकः कितवः फलको(चो)रकः ॥ गन्धद्रव्यं चैतत् । व्यालायुधं नखत्वात् । चक्रमेलं धूपद्रव्यैः करोति चक्रकारकम् ॥ १२९ ॥ नखीयं, विद्रुमलताभा । कपोताङ्घ्रिर्नलिकात्वात् । नटति वायुना नर्तकीत्वान्नटी । धमनी शौषिर्यात् । अञ्जनाभकेशा (अञ्जनकेशी) । आह च– नालिका विद्रुमलता कपोतचरणा नली । शुषिरा धमनी शून्या निर्मथ्या नर्तकी नटी ॥ हन्ति हनुस्तीक्ष्णाग्रत्वात् । हट्टे विलसति हट्टविलासिनी वेश्येव वा ॥ १३० ॥ शुक्त्याकृतिः । अत एव शंखः । खुरति विलिखति खुरः, प्राणिशफत्वाद्वा । कोलदलं बदरीपत्राख्ययेन्दुनोक्तम् । न खनति नखम् । आह च– नखः कररुहः शिल्पी करजोथ खुरः शफः । शुक्तिः शंखः ख[च]लः कोशी[ली] हनु-

शुक्तिः शंखः खुरः कोलदलं नखमथाढकी ।
काक्षी मृत्स्ना तुवरिका मृतालकसुराष्ट्रजे ॥ १३१ ॥
कुटन्नटं दाशपुरं वानेयं परिपेलवम् ।
प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च ॥ १३२ ॥
ग्रन्थिपर्णं शुकबर्हं पुष्पं स्थौणेयकुक्कुरे ।
मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ॥ १३३ ॥
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ।
तपस्विनी जटा मांसी जटिला लोमशामिषी ॥ १३४ ॥
त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ।
कर्चूरको द्राविडकः काल्य(ल्प)को वेधमुख्यकः ॥ १३५ ॥

नागहनुः सहः ॥ आढकीसंज्ञा धानाख्या तुवरीत्वात्, तुवरो हि कषायो रसः । कषति काक्षी । प्रशस्ता मृद् मृत्स्ना, सस्नौप्रशंसायाम् (सू०) । म्रियतेनेन हेम मृतालकम् । सुराष्ट्रदेशे जातम् । आह च— सौराष्ट्री च मृतासङ्गः काक्षी कामी सुराष्ट्रजा । आजिता तुवरी स्तुत्या मृत्स्ना मृत्या(त्सा) मृतालकम् ॥ १३१ ॥ कुटन्ती नटति, कुटन्नटापि । दशपुरे भवं दाशपुरं, दाशान्पिपर्ति वा, कैवर्तीमुस्तत्वात् । वने जातं वानेयं, नद्यादिभ्योढक् (सू०) । प्लवते लघुत्वात्प्लवः । गाः पिपर्ति गोपुरम् । अत एव गोनर्दम् । आह च— परिपेलवं प्लवं वन्यं गोपुरं स्यात्कुटन्नटम् । सितपुष्पं दाशपुरं गोनर्दं जीर्णबुध्नकम् ॥ १३२ ॥ ग्रन्थिप्रधानानि पर्णान्यस्य ग्रन्थिपर्णं, ग्रन्थीन्वा पिपर्ति ग्रन्थिमत्त्वात् । शुकस्येव बर्हाणि पर्णान्यस्य शुकबर्हं, शुकं बर्हमिति पदैकदेशत्वाद्वा द्वे संज्ञे । पुष्यति पुष्पं विकचाख्यम् । स्थूणाया इदं रूपेण स्थौणेयम् । कुक्कुरं श्वाकृति । आह च— स्थौणेयकं बर्हिचूडं शुकपुच्छं शुकच्छदम् । विकचं शुकबर्हं च हारितं शीर्णलोमकम् ॥ मरुन्माले मारुतस्रगाख्ये द्वे संज्ञे एते, अयं तु तुशब्दादेकां मन्यते, मरुत्सहिता माला वा । पिशुना गन्धसूचनात् । स्पृशति गन्धैः स्पृक्का । देवी देवपुत्रीत्वात् ॥ १३३ ॥ वधूराशावधूत्वात् । कोटिभिर्वर्षति मधु कोटिवर्षा । लङ्कासूप्यते लङ्कोपी, समुद्रान्तत्वात् । इन्दुराद्याः— स्पृक्का माला पङ्कमुष्टिर्नीला देवी लतागुरुः । देवपुत्री च लङ्कोपी शीता पङ्कजमुष्टिका ॥ स्रग्मारुता कोटिवर्षा निर्माल्याशावधूः स्मृता । धन्वन्तरिश्च— स्पृक्का स्रग्ब्राह्मणी देवी लता लङ्कोपिकेत्यपि । पङ्कमुष्टिर्देवपुत्री निर्माल्या पिशुना वधूः । ऽन्यर्थे समुद्रान्ता कर्पासी यवासकः स्पृक्का च । जटाः सन्त्यस्या जटा । अत एव तपस्विनी । समांसत्वान्मांसी । अत एवामिषी । गन्धमांसी चेयम्, यदाह— मांसी कृष्णजटा हिंस्रा नलदा जटिलामिषी । जटा च पिशिता मेषी क्रव्यादा च तपस्विनी ॥ द्वितीया गन्धमांस्यन्या भूतकेशी जटा स्मृता । पिशाची पूतना केशी भूतकेशी च लोमशा ॥१३४॥ त्वग्वृक्षशकलत्वात् । पत्राकृति पत्रम् । उत्कटं चमत्कारात् । भृङ्गं कार्ष्ण्यतैक्ष्ण्याभ्याम् । चोचमग्निचोदकम् । वरमङ्गं त्वग्रूपमस्य वराङ्गकम् । आह च— त्वचं वराङ्गं भृङ्गं त्वक् चोचं शकलमुत्कटम् । कृन्तति त्वग्दोषं कर्चूरः, हरिद्राभः । द्रावयति द्राविडः । कल्यकारी काल्यः । आह च— कर्चूरको गन्धमूलो द्राविडः काल्य एव च । वेधमुख्यो दुर्लभश्च कस्य चित्संमता शटी ॥ १३५ ॥ ओषं धयत्योषधी फलपाकान्ता जातिः । सैवौषधं रोगहृत् । सर्वमिति क्षौद्रघृततैलाद्यमप्यौषधं, ओषधेरजातौ (सू०) इत्यण् । तद्विशेषाच्छाकादीनाह । शक्यतेनेन भोक्तुं श्यति देहं वा शाकम् । पत्रं निम्बादेः, पुष्पं कोविदारादेः । आदिशब्दात्फलं वार्ताक्यादेः, मूलं मूलकविशादेः, कन्दः सूरणादेः, अङ्कुरो वंशादेः । आह च— मूलपत्रकरीराग्रफलकाण्डविरूढकाः । त्वक्पुष्पं कवकं चेति शाकं दशविधं स्मृतम् ॥ विरूढकं तालास्थिमज्जेति गौडः, वयं तु क्षेत्रोध्दृ(द्ध)तस्य फलमूलादेः सेकान्नवोद्भिन्नानङ्कुरान्विरूढान्मन्यामहे । कवकं छत्रिका । शाकविशेषानाह । ताडयति

ओषध्यो जातिमात्रे स्युरजातौ सर्वमौषधम् ।
शाकाख्यं पत्त्रपुष्पादि तण्डुलीयोऽल्पमारिषः ॥ १३६ ॥

विशल्याग्निशिखानन्ता फलिनी शक्रपुष्प्यपि ।
स्यादृक्षगन्धा छगलाण्ड्या(न्त्र्या)वेगी वृद्धदारकः ॥ १३७ ॥

जुङ्गो ब्राह्मी तु मत्स्याक्षी वयस्था सोमवल्लरी ।
पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ॥ १३८ ॥

हयपुच्छी तु काम्बोजी माषपर्णी महासहा ।
तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्यपि ॥ १३९ ॥

बर्बरा कबरी तुङ्गी खरपुष्पाजगन्धिका ।
एलापर्णी तु सुवहा रास्ना युक्तरसा च सा ॥ १४० ॥

चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ।
सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि ॥ १४१ ॥

दोग्रांस्तण्डुलीयकः, लघुतण्डुलाभबीजो वा । अल्पं मृष(ष्य)त्यल्पमारिषः । आह च– तण्डुलीयक उद्दिष्टः ख[च]टाला (?) तण्डुलेरकः । भण्डीरस्तण्डुलीबीजो मेघनादो घनस्वनः ॥१३६॥ लाङ्गलिकीयं पूर्वोक्तापि शाकत्वादिहोपात्ता । ऋक्षवद्गन्धयति ऋक्षगन्धा, ऋष्यगन्धा वृक्षगन्धेति च पाठभेदः । छगलस्येवाण्डान्यस्थीन्यस्याश्छगलाण्डी।आवेगी वृक्षत्वात्, उद्वेजको वा । वृद्धं वृद्धत्वं दारयति वृद्धदारकः, वृद्धं दारकीकुरुते वा । जुङ्गति वृङ्क्ते दोषाञ्जुङ्गः, जुगि वर्जने । आह च– वृद्धदारक आवेगी जुङ्गको जीर्णबालकः । अन्तःकोटक(र)पुष्पा स्यादजाङ्गी छगलाण्ड्यपि ॥ त्र्यर्थे वृक्षगन्धा वृद्धदारकः पिण्डालुकं विदारी च ॥ १३७ ॥ ब्राह्मी पावनीत्वात् । मत्स्याक्षी मत्स्यपुष्पा । वयस्था वयसः स्थैर्यकृत् । त्र्यर्थे सोमवल्ली वाकुची गुडूची ब्राह्मी च । हिमावती हिमजातत्वात् । आह च– क्षीरिणी काञ्चनक्षीरी पटुपर्णी च कर्शिनी । तिक्तदुग्धा हैमवती हेमदुग्धा हिमावती ॥ स्वर्णक्षीरी स्वर्णवती सुवर्णक्षीरिकापि च । त्र्यर्थे हैमवती हिमावती हरीतकी श्वेतवचा च ॥ १३८ ॥ हयपुच्छाकृतिः । कम्बोजदेशे भवा काम्बोजी । महासहेति मुद्गपर्ण्याः सहाया भिन्नेयम् । आह च– माषपर्णी तु काम्बोजी कृष्णवृन्ता महासहा । आर्द्रमाषा सिंहवृन्ता माष[मांस]माषाश्वपुच्छिका ॥ तुण्डिकेरी– ओष्ठोपमफलत्वात् । बिम्बमिव बिम्बिका । आह च– बिम्बी रक्तफला तुण्डी तुण्डिकेरफला च सा । ओष्ठोपमफला गोह्ला (?) पीलुपर्णी च तुण्डिका ॥ द्व्यर्थे तुण्डिकेरी बिम्बी कर्पासी च ॥ १३९ ॥ शाकोयम्, बर्बरा कुटिलह्रस्वकेशाभा, अत एव कबरी । आह च– अजगन्धा खरपुष्पा वस्त्रगन्धासगन्धिका । कबरी बर्बरागन्धा तुङ्गी पीतमयूरकः ॥ रस्यते रास्ना । आह च– रास्ना युक्तरसा रस्या श्रेयसी रसनी रसा । सुगन्धमूला विरसा सैव युक्ताफला मता ॥ त्र्यर्थे सुवहा रास्ना शेफालिका नाकुली च ॥ १४० ॥ चाङ्गं दन्तपटुत्वमीरयति चाङ्गेरी । चुक्क्यते व्यथतेऽस्याश्चुक्रिका । अम्बे तिष्ठत्यम्बष्ठा । अम्लेव लुनात्यम्ललोणिका, अपभ्रष्टोयम् । आह च– क्षुद्राम्लीका तु चाङ्गेरी लोणिका चाम्ललोणिका । त्र्यर्थे– अम्बष्ठा पाठा मोचिका चाङ्गेरी च, तथा चुक्रिकाम्लिका चाङ्गेरी भण्डाकी च । आह च– अम्लोऽम्लवेतसो भीमो रसाम्लोऽम्लितवेतसः । रक्तस्रवो वेतसाम्लः शतवेधी च वेधकः ॥ त्र्यर्थे चुक्रको वृक्षाम्लोऽम्लवेतसश्चुक्रश्च, तथा सहस्रवेधी– अम्लवेतसो हिङ्गुलता कस्तूरी च ॥ १४१ ॥ नमस्कारी अञ्जलिरूपपत्त्रत्वात् । गण्डेषु ग्रन्थिषु कृष्णा गण्डकाली । समान्यङ्गान्यस्याः समाङ्गा । खदिरा कृष्णसूक्ष्मपत्त्रत्वात् । आह च– रक्तपाठी शमीपत्त्रा समङ्गाञ्जलिकारिका । नमस्कारी गण्डकाली, रास्ना खदिरकेत्यपि ॥ जीवन्त्यनया जीवनी ॥

नमस्कारी गण्डकाली समा(म)ङ्गा खदिरेत्यपि ।
जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ॥ १४२ ॥
कूर्चशीर्षो मधुरकः शृङ्गह्रस्वाङ्गजीवकाः ।
किराततिक्तो भूनिम्बोनार्यतिक्तोथ सप्तला ॥ १४३ ॥
विमला शा[सा]तला भूरिफेना चर्मकसेत्यपि ।
वायसोली स्वादुरसा का(व)यस्थाथ मकूलकः ॥ १४४ ॥
निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ।
अजमोदा तूग्रगन्धा ब्रह्मदर्भा यमा[वा]निका ॥ १४५ ॥
मूले पुष्करकाश्मीरपद्मपत्त्राणि पौष्करे ।
अव्यथातिचरा पद्मा चारटी पद्मचारिणी ॥ १४६ ॥
काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि ।
प्रपुन्नाडस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः ॥ १४७ ॥

आह च– जीवन्ती जीवनीया च जीवा जीवनवर्धनी । मङ्गल्यनामधेया च शाकश्रेष्ठा यशस्करी ॥१४२॥ कूर्चः शीर्षेस्य कूर्चशीर्षः । शृङ्गः शृङ्गाभः । जीवयति जीवकः, जीवतीति वा दीर्घायुष्ट्वात् । आह च– जीवकः शृङ्गकः सर्जो दीर्घायुः कूर्चशीर्षकः । ह्रस्वाङ्गो मधुरः स्वादुः प्राणदश्चिरजीव्यपि ॥ किरातदेशे भवास्तिक्तः किराततिक्तः । अनार्यः किरातः । आह च– किराततिक्तको हैमकाण्डतिक्तः किरातकः । भूनिम्बोनार्यतिक्तश्च कैरातो रामसेनकः ॥ १४३ ॥ सपति समवैति सप्तला । शा[सा]तं सुखं लाति शा[सा]तला । भूरयः फेनाभा बिन्दवोस्या भूरिफेना । चर्म कसति वर्धते चर्मकसा, चर्मकषेत्येके । आह च– शातला सप्तला सारा विन्दुला विमलामला । बहुफेना चर्मकसा फेना दीप्ता सनालिका ॥ वायसवद्वलीयते वायसोली काकोल्याख्या । काये तिष्ठति कायस्था, कि ज्ञाने । आह च– काकोली मधुरा शुक्ला क्षीरा(री) ध्वाङ्क्षोडि(लि)का मता । कायस्था स्वादुमांसी च वायसोली च कारि(लि) का॥ त्र्यर्थे स्वादुरसा पृथ्वीका शतावरी काकोडी(ली) च ॥ १४४ ॥ मङ्कते चित्रत्वान्मकूलकः । नियतः कुम्भो निकुम्भः । दन्ताभा दाम्यन्त्यनया दोषा वा दन्ती । आह च– दन्ती शीघ्रा निकुम्भा स्यादुपचित्रा मकूलकः । तथोदुम्बरपर्णी च विशल्या च घुणप्रिया ॥ द्व्यर्थे प्रत्यक्श्रेणी द्रवन्ती दन्ती च । अजवन्मोदो गन्धोस्या अजमोदा । ब्रह्मदर्भाभा । यच्छत्यग्निमान्द्यं यमानी, पूर्वोक्तापीह शाकत्वात् पुनरुक्ता, यवानीं मत्वा वा ग्रन्थकृद् भ्रान्तः । आह च– यवानी दीप्यको दीप्यो यवसाह्वयनामकः । यमानिकोग्रगन्धा च दीपनीया च दीपनी ॥ पूर्वोक्ता हि खराश्वैवाजमोदा ब्रह्मकुशा च । तथा चेन्द्राद्याः– अजमोदा ब्रह्मकुशा खराश्वा लोचमर्कटः । वल्लीमोदा वस्तमोदा सैव हस्तिमयूरकः ॥ १४५ ॥ पुष्करमूले त्रीणि नामानि । पद्मपत्त्रमिति ग्रन्थकृद् भ्रान्तः, पद्मवर्णेति लिपिभ्रान्त्या पद्मपर्णमिति बुद्धवान्, यदाह– मूलं पुष्करमूलं च पौष्करं पुष्कराह्वयम् । काश्मीरं पुष्करजटा धीरं तत्पद्मवर्णकम् ॥ अत्यर्थं चरति– अतिचरा । पद्माभा । चरति चारटी । आह च– पद्मचारिण्यतिचरा पद्मा पद्मावतीति च । चारटी गन्धमूला च लक्ष्मीः श्रेष्ठा सुपुष्करा ॥ त्र्यर्थे– अव्यथा हरीतकी महाश्रमणी पद्मचारिणी च ॥ १४६ ॥ काम्पिलदेशे भवः काम्पिल्यः । चन्द्रोह्लादनात्क्षैण्याद्वा । (रोचनी) रेचनीति सभ्यः पाठः, यदाह– काम्पिल्यकोथ रक्ताङ्गो रेचनी रेचकस्तथा । रञ्जनो लोहिताङ्गश्च कर्कशो रक्तचूर्णकः ॥ आहेन्दुः– कर्कशाख्यः करंजः[भः] स्यात्स काम्पिल्यः पटोलकः । प्रपुनाति प्रपुणति वा प्रपुन्नाडः । एडवन्मेषाक्षवद् गज्यते शब्द्यत एडगजः ॥ चक्राणि दद्रुमण्डलानि मृद्नाति चक्रमर्दकः ॥ १४७ ॥ पद्मवदटति पद्माटः । उरणव-

पद्माट उरणाक्षश्च पलाण्डुस्तु सुकन्दकः ।
लतार्कदुर्द्रुमौ तत्र हरितेऽथ महौषधम् ॥ १४८ ॥
लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः ।
पुनर्नवा तु शोथघ्नी वितुन्नं सुनिषण्णकम् ॥ १४९ ॥
स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि ।
पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता ॥ १५० ॥
वार्षिकं त्रायमाणा स्यात्त्रायन्ती बलभद्रिका ।
विष्वक्सेनप्रिया घृ(गृ)ष्टिर्वाराही बदरेत्यपि ॥ १५१ ॥
मार्कवो भृङ्गराजः स्यात्काकमाची तु वायसी ।
शतपुष्पा सितच्छत्रातिच्छत्रा मधुरा मिसिः ॥ १५२ ॥

न्मेषवदक्षीण्यस्योरणाक्षः । इन्द्वायाः– चक्रमर्दः स्मृतश्चक्री प्रपुन्नाडश्च नामतः । एकरेतो दद्रुहरो मेषाक्षेऽडगजश्च सः ॥ पिपर्ति धातून्पलाण्डुः । तत्र हरिते तत्र नीले पलाण्डौ लतार्कौ लवतर्काख्यः । दुष्टो द्रुमोऽपवित्रत्वात् । धन्वन्तरिस्त्वभेदेनाह– पलाण्डुर्भ(र्य)वनेष्टश्च मुकुन्दो मुखदूषकः । हरिणोऽन्य पलाण्डुस्तु लतार्को दुर्द्रुमश्च सः ॥ १४८ ॥ सुश्रुतस्त्वाह– लशुनो दीर्घपत्त्रश्च पिच्छगन्धो महौषधम् । फरणश्च पलाण्डुश्च लवतर्कोऽपराजितः ॥ गृञ्जनं यवनेष्टश्च पलाण्डोर्दश जातयः । महौषधं सर्वरोगाजित्त्वात् । लशति छिनत्ति रोगान्– लशुनम् । गृञ्जति कुत्सितं शब्द्यते गृञ्जनः । न रिष्यत्यरिष्टः । रसोनः पञ्चरसत्वात् । आह च– रसोनो लशुनोऽरिष्टो म्लेच्छकन्दो महौषधम् । महाकन्दो रसाख्योऽन्यो गृञ्जनो दीर्घपत्त्रकः । महौषधगृञ्जनादीनामाकृतिभेदेऽपि रसाद्यैक्यादभेदं मन्यते । पुनर्नवेव (छिन्नापि) विशाखत्वात् । आह च– पुनर्नवो विशाखश्च कठिल्लः स शिलाटकः । वृश्चीवः क्षुद्रवर्षाभूर्दीर्घपत्त्रः कठिल्लकः ॥ वितुद्यते वितुन्नकं नाम शाकम् । सुष्ठु निषीदन्त्यस्मिन्गुणाः सुनिषण्णकम् । आह च– शितिवा[सा]रः सूतपुत्रस्तुल्या(?) च सुनिषण्णकः। शाकभेदोऽयम्, यदाह– पाठा शुषा शटी शाकं वास्तुकं सुनिषण्णकम्। विबन्धघ्नमवस्रंसि वर्चोभेदि तु वास्तुकम् ॥ १४९ ॥ शीतलवातक इत्येका संज्ञा, यद्धन्वन्तरिः शणपर्णी शीतलवातक इत्याह । द्व्यर्थेऽपराजिता शीतलवातको गिरिकर्णिका च। कटैत्यावृणोति कटभी । पण्या स्तुत्या । ज्योतिष्मती– अग्न्याभत्वात् । लता दूरप्रसरात् । आह च– ज्योतिष्मती तु कटभी स्यात्सुवर्णलतेति च । ज्योतिष्का चाग्निभासा च लवणोत्का च दुर्दिना ॥ द्व्यर्थे लता प्रियङ्गुर्ज्योतिष्मती सारिवा च । द्व्यर्थे पारावतपदी काकजङ्घा ज्योतिष्मती च ॥ १५० ॥ वर्षासु भवं वार्षिकम् । आह च– त्रायमाणा कृतत्राणा त्रायन्ती त्रायमाणिका । बलभद्रा बलदेवा वार्षिकं गिरिसानुजम् ॥ वाराही वराहकान्ता, (अत एव विष्णुवल्लभा) । अत एव घृ[गृ]ष्टिर्घं[वं]र्षणात्। द्व्यर्थे बदरा सुवर्चला अश्वगन्धा वाराही च ॥ १५१ ॥ मर्वति संपृच्यते मार्कवः । भृङ्गवद्रजते रञ्जयति कृष्णीकरोति च भृङ्गराजः, भृङ्गरजोऽपि । आह च– भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च । अङ्गारकस्त्वेकरजो भृङ्गारः केशरञ्जनः ॥ काकवन्मचति(ते) वर्णेन संपृच्यते काकमाची । अत एव वायसी, काचमाच्यपि । आह च– काचमाची ध्वाङ्क्षमाची काकसाह्वा च वायसी । शतपुष्पा बहुपुष्पा । सितच्छत्राभा ॥ १५२ ॥ अवाञ्च्यधोमुखानि पुष्पाण्यस्या अवाक्पुष्पी ॥ कारोरियं कारवी

अवाक्पुष्पी कारवी च सरणा तु प्रसारिणी ।
तस्यां कटंभरा राजबला भद्रबलेति च ॥ १५३ ॥

जनी जतूका जन(रजे)नी जतुकृच्चक्रवर्तिनी ।
संस्पर्शाथ शटी गन्धमूली षड्ग्रन्थिकेत्यपि ॥ १५४ ॥

कर्चूरोपि पलाशोथ कारवेल्लः कटिल्लकः ।
सुषवी चाथ कुलकं पटोलस्तिक्तकः पटुः ॥ १५५ ॥

कूष्मांडकस्तु कर्कारुरे(री)र्वारुः कर्कटी स्त्रियौ ।
इक्ष्वाकुः कटुतुम्बी स्यात्तुम्ब्यलाबूरुभे समे ॥ १५६ ॥

चित्रा गवाक्षी गोतुम्बा विशाला त्विन्द्रवारुणी ।
अर्शोघ्नः सू(शू)रणः कन्दो गण्डीरस्तु समष्ठिला ॥ १५७ ॥

कर्मण्या । आह च– शतपुष्पा मिसिर्घोषाषाढका माधवी शफा । अतिच्छत्रा त्ववाक्पुष्पी शताह्वा कारवी स्मृता ॥ सराति वातसंकोचान्निवर्ततेऽङ्गमनया सरणा, सरणी तु युक्तः पाठः । कटं बिभर्ति कटंभरा । राजरूपा मुख्या बला बलकृत् । आह च– प्रसारणी तु प्रसरा सरणी सारणी च सा । चारुपर्णी राजबला भद्रपर्णी प्रसारिका ॥ १५३ ॥ जायतेस्या जन्तुर्जनी । जतु करोति जतूका । संगतः स्पर्शोस्याः संस्पर्शा । आह च– जतुकारा तु जतुकृज्जतुकारी जनी स्मृता । जननी चैव संकर्षा जतूका चक्रवर्तिनी ॥ शटति शटी, षड्ग्रन्थिकैकदेशः षटीति मूर्धन्यादिमाहुः ॥ १५४ ॥ पलाशाः सन्त्यस्य पलाशः । आह च– शटी षटी पलाशश्च ज्ञेया पृथुपलाशिका । सुगन्धमूला गन्धाली षड्ग्रन्था सुव्रता वधूः ॥ कस्य चित्संमता षटीति कर्चूरस्य षटीत्वं षट्याः कर्चूरत्वं चेतीह कर्चूरोपादानम् ॥ द्व्यर्थे चाह षटी गन्धपलाशः कर्चूरश्चेति । कारेण वेल्लति कारवेल्लः । कटिं लाति कटिल्लः, कटत्यावृणोति वा । सुष्ठु सूयते सुषवी । कोलति संस्त्यायते कुलकं, कुत्सितं लक्यत आस्वाद्यते वा । पटति सरलत्वात्पटोलः । तिक्तो रसेन । पटुर्देहपटुत्वकृत्, लवणानुसर इत्येके । आह च– पटोलः कुलकस्तिक्तः पटुकः कर्कशश्छदी । राजीफलः पाण्डुफलो राजिमानमृताफला ॥ १५५ ॥ कोरूष्मणानिति, कुत्सितोष्माण्डेषु बीजेष्वस्य वा पित्तकारित्वात्कूष्माण्डः, कुष्यते करोति तृप्तिं वा । कर्कश्चासाविधार्ति– अरुर्वस्तिशोधनः सरणत्वात्कर्कारुः । आ– ईर्यते– एर्वारुः कटुत्त्रिर्भटी, उर्वारुकमिव बन्धनादिति श्रुतेः–उर्वारुकं स्वादुचिर्भटीमाहुः । ह्रस्वः कर्कः कर्कटी, ग्रामटीवल्लौकिकष्टप्रत्ययः । इष्यत इक्ष्वाकुः, क्षत्रियघनत्वाद्वा । कटुका तुम्बी, तुबि अर्दने । आह च–कटुकालाबुनी तुम्बी ल(तु)म्बा पिण्डफला तथा । इक्ष्वाकुः क्षत्रियधनस्तिक्तबीजो महाफलः ॥ न लम्बतेलाबूः, काक्वा नञ्, न लाति वान्तर्जलम् । समे इति स्त्रीत्वेनापि । अत्रेन्द्वायाः– अलाबूस्तुम्बकः प्रोक्तो जलालाबूरलाम्बुनी । भक्षलाम्बुमहातुम्बीति– ॥१५६॥ गोतुम्बा, अपभ्रंशोयं गवाक्षीत्वात् । आह च– ऐन्द्रीन्द्रवारुणी द्राक्षा इन्द्रेर्वारुवृषादनी । गवादनी क्षुद्रफला वृषभाक्षी गवाक्ष्यपि ॥ द्व्यर्थे चित्रा विशाला द्रवन्ती चेति विशालायाश्चित्रात्वाद् भ्रान्तो ग्रन्थकृत् । गवाक्षीविशेषो वा विशालेति न दोषः । विशाला महाफलत्वात् । इन्द्रवदक्षैर्वृणोतीन्द्रवारुणी । आह च– अन्येन्द्रवारुणी प्रोक्ता विशाला तु महाफला । आत्मरक्षा चित्रफला तुवसी त्रपुषी च सा ॥ सूर्यते प्रेर्यते सूरणः । कन्यतेन्विष्यते कन्दो मूलविशेषः । गण्डीन् ग्रन्थीनीरयति गण्डीरः, पुंसि । सम्यगस्थीनि लाति समष्ठिला सान्द्रत्वात्, समष्ठिला नाम शाकं, **यन्माला**–गण्डीरो ना समष्ठिला ॥ १५७ ॥ कलम्बमस्याः कलम्बी । अपगतोदका जांगलत्वात्, अपोदकामत्स्यकालीति **धन्वन्तरिः** ।

कलम्ब्यपोदकास्त्री तु मूलकं हिलमोचिका।
वास्तुकं शाकभेदाः स्युर्दूर्वा तु शतपर्विका ॥ १५८ ॥

सहस्रवीर्याभार्गव्यौ रुहानन्ताथ सा सिता।
गोलोमी शतवीर्या च गण्डाली शकुलाक्षकः ॥ १५९ ॥

कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम्।
स्याद् भद्रमुस्तको गुन्द्रा चूडाला चक्रलोच्चटा ॥ १६० ॥

वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः।
शतपर्वा यवफलो वेणुमस्करतेजनाः ॥ १६१ ॥

वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः।
ग्रन्थिर्ना पर्वपरुषी गुन्द्रस्तेजनकः शरः ॥ १६२ ॥

नडस्तु धमनः पोटगलोथो काशमस्त्रियाम्।
इक्षुगन्धा पोटगलः पुंभूमनि तु बल्वजाः ॥ १६३ ॥

संशितं मूलं मूलकः,अवदंशत्वेप्यस्य शाकत्वं, यो त्युभयोर्भवति लभते सोन्यतरतो व्यपदेशमिति । हिला-द्वीर्यान्मोचयति हिलमोचिका। वसन्त्यस्मिन्गुणा वास्तुकं क्षारपत्राख्यम्।कलम्ब्याद्याः पञ्चैते शाकप्रकाराः, शाकाख्यं पुष्पमूला(पत्रपुष्पा)दीत्यत आरभ्य वा(पृ०७८) यन्मालाः—मण्डूकपर्णी पालङ्क्या चिल्लिका चाप्यपोदका । चाङ्गेरी हिलमोचा च कलम्बी शाकजातयः ॥ दूरं वाति दूर्व्यते वा पशुभिर्दूर्वा ॥१५८॥ भृगोरियं भार्गवी । सहस्रवीर्या बहुपर्वा महाप्रभावा वा। रोहति मूले रुहा । अनन्ता दूरप्रसरणात्, नीलदूर्वेयं, यदाह—नीलदूर्वा स्मृता शष्पं शाद्वलं हरिता तथा। शतपर्वा शतवीर्या शतवल्लयसिता लता ॥ सहस्रवीर्या-नन्ता च दुर्मरा भार्गवी रुहा । गोरिव लोमान्यस्या गोलोमी । आह च— गोलोमी श्वेतदूर्वा च श्वेतगर्भा सिता लता । नीलश्वेतयोः पर्यायविपर्यासोन्वेष्यः । श्वेतदूर्वाविशेषोयम् । गण्डैर्ग्रन्थिभिरल्यते गण्डाली । मत्स्याक्षितुल्यग्रन्थिः (शकुलाक्षकः)। आह च— गण्डदूर्वा तु गण्डाली तीव्रा मत्स्याक्षिकापि च । वह्नि-नाडी कलापश्च वारणी शकुलाक्षकः ॥ १५९ ॥ कुरुदेशं विन्दति कुरुविन्दः । मेघपर्यायोम्बुधरत्वात् । मुस्यति खण्डयति रोगान् मुस्ता, लक्ष्ये त्रिलिङ्गा । गुर्वेद्रान्ति रोगा अस्या गुन्द्रा। **धन्वन्तरि**र्भेदेनाह—मुस्तमम्बुधरो मेघो घनो राजकशेरुकः । भद्रमुस्तो वराहोब्दो गाङ्गेयः कुरुविन्दकः ॥ उच्चटत्युत्फलत्यु-च्चटा, चक्राङ्केयम् ॥ १६० ॥ वन्यते वंशः । त्वचि सरति त्वक्सारः, सृस्थिरे (सू०) इति घञ् । (त्वचिसारः) तत्पुरुषेकृतिबहुलम् (सू०) इति सप्तम्या अलुक् । कर्म इयर्ति कर्मारः । तृणानां ध्वजो मुख्यः । यवाभं फलमस्य यवफलः । वेणन्ति व(वि)यन्ति वानेन वेणुः । मा क्रियतेनेन मस्करः, मस्कर मस्करिणौवेणुपरिव्राजकयोः(सू०)। तेजयति तेजनः । द्व्यर्थे तेजनः शरो वेणुश्च ॥१६१॥ कीति चकति कीचकः,कीचेति कायति वा। ग्रन्यते ग्रन्थिः। पर्वति पर्व। पिपर्ति परुः। गुन्द्रो दर्भविशेषे रूढः, यदाहुः—दर्भाणां स्थाने शरैः प्रस्तरितव्यम् । तेजयति निशिनोति तेजनकः । शृणाति पारुष्याच्छरः । काशास्त्विषी-का च॥१६२॥ नडयत्यर्दयति नडः, नल गन्धे । धमनोन्तःसुषिरत्वात्, धमिः सौत्रः, यथा धान्तो धान्तः काञ्चनस्येव राशिः । पोटेन संश्लेषेण गलति पोटगलः ।•आह च— नलो नटो नडश्चैव स च पोटगलः स्मृतः । धमनोनन्तकश्चेति नडस्तु शर उच्यते ॥ काशते काशः । कोकिलाक्षपर्याय इक्षुगन्धेत्येके । द्व्यर्थे पोटगलः काशो नडश्च । वलन्ते वल्वजास्तृणविशेषाः॥ १६३ ॥ रस्यते रसालः । इष्यत इक्षुः ।

रसाल इक्षुस्तद्भेदाः पुण्ड्रकान्तारकादयः ।
स्याद्वीरणं वीरतरं मूलेस्योशीरमस्त्रियाम् ॥ १६४ ॥
अभयं नलदं सेव्यममृणालं जलाशयम् ।
लामज्जकं लघुलयमवदाहेष्टकापथे ॥ १६५ ॥
नलादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि ।
अस्त्री कुशं कुथो दर्भः पवित्रमथ कत्तृणम् ॥ १६६ ॥
पौरसौगन्धिकध्यामदेवजग्धकरौहिषम् ।
छत्रातिच्छत्रपालघ्नौ मालातृणकभूस्तृणौ ॥ १६७ ॥
शष्पं बालतृणं घासो यवसं तृणमर्जुनम् ।
तृणानां संहतिस्तृण्या नड्या तु नडसंहतिः ॥ १६८ ॥

पुण्ड्रदेशजत्वात्(पुण्ड्रः), पौण्ड्रोपि । कान्तमुखमियर्ति कान्तारः, कान्ता अरका भागा अस्य वा । आदिशब्दात्कोशकाराद्याः । आह च– इक्षुः कर्कटको वंशः कान्तारो वेणुनिः सृतः । इक्षुरन्यः पौण्ड्रकश्च रसालः सुकुमारकः ॥ अन्यः करङ्कशालिः स्यादिक्षुयोनीक्षुबालिका । तथान्य इक्षुगन्धा स्यादिक्षुलः कोकिलाक्षकः ॥ वीरयते वीरणं वीरतरं च तृणभेदः । अस्य वीरणस्य मूलं उश्यते काम्यत इत्युशीरम् ॥ १६४ ॥ अभयं रोगहृत्त्वात् । आह च– उशीरममृणालं स्यादभयं समगन्धिकम् । रणप्रियं वीरतरं वीरं वीरणमूलिका ॥ नलं द्यति नलदं अपारुष्यात्, नलति वा । अत एवामृणालमहिंस्रम् । जल आशेते जलाशयं, शीतवीर्यत्वाद्वा । लाति दोषान्–ला, ला मज्जासारोस्य लामज्जकम् । लघुगुणेन लीयते लघुलयम् । अवली[दी]यते दाहोनेनावदाहम् । इष्टं कापथमस्याधोवालकृत्त्वादिष्टकापथम् । आह च– लामज्जकं सुनार्द[वासं] स्यादमृणालं लयं लघु । इष्टकापथकं शीघ्रं दीर्घमूलं जलाशयम् ॥ द्व्यर्थेऽमृणालं लामज्जकमुशीरं च, तथा सेव्यं लामज्जकमुशीरं चेति । अवदाहमवदत्तमाहुस्तच्चोशीरं नलदं, यदिन्दुः– अवदत्तं रणप्रियम् । ग्रन्थकृत्तु सेव्यामृणालयोर्नलदोशीरैकार्थत्वाद् भ्रान्तः ॥ १६५ ॥ (नलादयः) तृणजातीया इत्यर्थः । तृण्यतेद्यते पशुभिस्तृणम् । गर्मुच्छ्यामाकौ तृणधान्यविशेषौ । गीर्यते गर्मुत् । श्यामं वर्णमकति श्यामाकः । प्रमुखशब्दान्नीवाराद्याः । तृणगर्मुती एकार्थौ इत्येके । कौ शेते कुशः । कु(कौ)थति कुथः । दृणाति पारुष्याद्दर्भः, दृभ्यते वा । पूयतेनेन पवित्रं, सग्रन्थि तु पवित्रकमिति **स्मृतिः** । कुत्सितं तृणं कत्तृणं, तृणेचजाताविति (सू०) कोः कत् ॥ १६६ ॥ पुरे भवं पौरम् । सुगन्धप्रयोजनं सुरभिः (सौगन्धिकम्) । ध्यायते पशुभिर्ध्यामं धूसरवर्णं वा । देवैर्जग्धमिव जर्जरत्वात् । यत्र तत्र रोहति रौहिषं, रुहेर्वृद्धिश्च (उ०) इति टिषच् । आह च– कत्तृणं शकलिर्भूरिभूतिकं रौहिषं ततम् । ध्यामकं भूमकं पौरं मुद्गलं देवजग्धकम् ॥ त्र्यर्थे सौगन्धिकं नीलपद्मं कत्तृणं गन्धपाषाणश्च । छत्त्राकारस्तृणविशेषश्छत्त्रा । अतिक्रान्तश्छत्त्रामतिच्छत्त्रः, छत्त्रातिच्छत्त्रमित्येके । पारुष्यात्पालं हन्ति पालघ्नः । मालारूपाणि तृणान्यस्य मालातृणकः । भुवस्तृणं भूस्तृणः, पारस्करादित्वात् (सू०) सुट्, भूरव्ययं वा । आह च– भूस्तृणो रौहिणो भूतिर्भूमिकोथ कुटुम्बकः । मालातृणश्च पालघ्नश्छत्त्रातिच्छत्त्रकस्तथा ॥ १६७ ॥ शस्यते शष्पं, शसु हिंसायाम् । बालं नवं तृणम् । घस्यतेद्यते घासः । यूयते यवसं तृणजातिः । अर्ज्यतेर्जुनं, सर्वं च तृणमर्जुनमिति **भागुरिः** । (तृण्या) पाशादित्वाद्यत् (पाशादिभ्योयः) । (नड्या) प्राग्वद्यत् ॥ १६८ ॥ तृणराजाख्यस्तृणद्रुमसध्ये मुख्यत्वात् । तलति

तृणराजाह्वयस्तालो नालिकेरस्तु लाङ्गली ।
घोण्टा तु पूगः क्रमुको गुवाकः खपुरोस्य तु ॥ १६९ ॥
फलमुद्वेगमेते च हिन्तालसहितास्त्रयः ।
खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ॥ १७० ॥

इति वनौषधिवर्गः । ४ ।

सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।
शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः ॥ १ ॥
वराहः सूकरो घृष्टिः कोलः पोत्री किरः(रिः) किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥ २ ॥
कपिप्लवंगप्लवगशाखामृगवलीमुखाः ।
मर्कटो वानरः कीशो वनौका अथ भल्लुके ॥ ३ ॥

प्रातितिष्ठति बहुमूलत्वात्तालः । भूमिपिशाचो देश्याम् । नालिकान्नलयुक्तान्पुष्पादीनीरयति नालिकेरः । हालाकारपत्रशाखत्वाल्लाङ्गली । तत्फलं चोचम् । घुणति (घोणते) भ्रमति– अनया घोण्टा । पवते पूगः । क्रामति क्रमुकः । गुवत्यनेन संसक्तत्वाद्गुवाकः । खानि पृणाति खपुरः कारपत्रशाखः ॥१६९॥ अस्य पूगस्य फलमुद्गतो वेगोस्योद्वेगं संसक्तत्वात् । पूगादयो हि फलवृत्तयः क्लीबे, फलेलुक् (सू०), घोण्टा तु, हरीतक्यादिभ्यश्च (सू०) इति लुपा, लुपियुक्तवद्व्यक्तिवचने (सू०) इति वृक्षे फले च स्त्रियामेव । एते तालनालिकेरपूगास्त्रयो हिन्तालेन चतुर्थेन सहिताः खर्जूराद्याश्चत्वारस्तृणप्रधाना वृक्षाः । ताली जात्यन्तरम् । एवं खर्जूरी भूमिखर्जूरः । हिनोति वर्धते हिन्तालः । खर्जूरः, खर्ज व्यथने । केत्यते ज्ञायते गन्धेन केतकी । तालयति ताली ॥ १७० ॥ इति वनौषधिवर्गः । ४ ।

हिनस्ति सिंहः । मृगाणां द्वीप्यादिशशकान्तानामिन्द्रः । पञ्चास्यो विस्तृतास्यः, पचि विस्तारवचने, कर्मणि घञर्थेकविधानम् (वा०), मुखपादैर्योर्ध्वृत्वाद्वा । हर्यक्षः कपिलाक्षः । अत एव हरिः, हरत्याकर्षति वा । कण्ठीरवो देश्याम् । शृणाति शार्दूलः । द्वौ वर्णावीयते द्वीपोस्त्यस्य वा तन्निवासित्वाद् द्वीपी । व्याजिघ्रन् हन्ति व्याघ्रः । चित्रकायः पञ्चशिखश्च । तरं क्षिणोति मार्गं रुणद्धि तरक्षुः– आरण्यः श्वा, तरक्ष इत्येके । वृकोपि ॥ १ ॥ वरमाहन्ति वराहः । सूयतेत्यर्थं सूकरः । घर्षति घृष्टिः । पीनत्वात्कोलः, कुल संस्त्याने । पोत्रं मुखाग्रमस्यास्तीति पोत्री । किरति क्ष्मां किरः, इगुपधेति (सू०) कः । केटति किटिः, किट गतौ । क्रुड घनत्वेस्मात्क्रोडः, क्रोडः कुद्दालो मुस्तादो दंष्ट्रास्त्रो मुखलाङ्गल इति दुर्गः ॥ २ ॥ कम्पते चलति कपिः । प्लवैर्गच्छति प्लवगः प्लवंगोपि, गमेःसुपि (वा०), खच्चडित् (वा०)इति प्लवंगः, अन्यत्रापिदृश्यते (वा०) इति डे प्लवगः, गमश्च (सू०) इति खचि प्लवंगमोपि । शाखा-संचारी मृगः (शाखामृगः) । वलयः(ल्यः) मुखेस्य वलीमुखः । म्रियते मर्कटः कुम्भकर्णनिगीर्णत्वात् । वने रमते वनरस्तस्यायं वानरः, पक्षे नरो वा । चिकेत्ति जानाति कीशः, कीशब्दमीष्टे वा । वने– ओकोस्य वनौकाः । हरिर्नानार्थे । कृष्णमुखो गोलाङ्गूलः । कापेयं चापलादिकम् ॥ ३ ॥ भल्लति(ते)

ऋक्षाच्छभल्लभालूका गण्डके खड्गखड्गिनौ ।
लुलायो(पो) महिषो वाहद्विषत्कासरसैरिभाः ॥ ४ ॥

स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः ।
सृ(शृ)गालो वञ्चकः क्रोष्टुफेरुफेरवजम्बुकाः ॥ ५ ॥

ओतुर्विडालो मार्जारो वृषदंशक आखुभुक् ।
त्रयो गौधेरगौधारगौधेया गोधिकात्मजे ॥ ६ ॥

श्वावित्तु शल्यस्तल्लोम्नि शललो शललं शलम् ।
वातप्रमीर्वातमृगः कोक ईहामृगो वृकः ॥ ७ ॥

मृगे कुरङ्गवातायुहरिणाजिनयोनयः ।
ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु ॥ ८ ॥

कदली कन्दली चीनश्चमूरुप्रियकावपि ।
समूरुश्चेति हरिणा अमी अजिनयोनयः ॥ ९ ॥

हिनस्ति भल्लुकः, लक्ष्ये तु (भल्लूकः), दधाति कुहरभाजामत्र भल्लूकयूनामिति (उ० राम०) । ऋक्षति (ऋक्ष्णोति) ऋक्षः । अच्छ आभिमुख्येन भल्लति(ते) अच्छभल्लः, अच्छेत्याभिमुख्यार्थेऽव्ययम् । भालयति-(ते) भालूकः । भल्लकोपि । गण्डति संहन्यते गण्डकः । खडति भिनत्ति खड्गः । खड्गं शृङ्गमस्यास्तीति खड्गी । वाध्रीणसोपि । लुलति पङ्के लुलायः । महति मह्यां शेते वा महिषः । महोपि । वाहं हयसमूहं द्वेष्टि वाहद्विषत्, द्विषोमित्रे (सू०) इति शतृप्रत्ययः । वाहद्विषन्नित्येके । घर्मार्तः कं जलमासरति कासारः, ईषत्सरति वा महाकायत्वात् । सीरिभिर्दन्तैर्भाति सीरिभः कुटुम्बी तस्यायं सैरिभः । रजस्वलोपि ॥ ४ ॥ शिनोति शिवा, शकुनावेदिनी वा, शृगालेपि स्त्रीलिङ्गः, यच्छाश्वतः– शिवः कीलः शिवा क्रोष्टा भवेदामलकी शिवा । गां मिनोति मीनाति वा गोमायुः । मृगान् धूर्वति मृगधूर्तः । असृगालाति सृगालः, सरति सृजति वा । क्रोशति क्रोष्टा । फे– इत्यव्यक्तं रौति फेरुः फेरवश्च । जमति जम्बुकः सर्वभक्षत्वात् । फेरण्डोपि ॥५॥ अवत्याखुभ्य ओतुः । विशन्– आलात्याखून् विडालः, विलालो वा, बिलान्यलाति पर्याप्नोति वा, विलति भिनत्ति– आखून्वा, विड् आलमस्याशुचित्वाद्वा, विड आक्रोश इत्यस्माद्वा । आखुभ्यो गृहं मार्ष्टि मार्जारः । वृषानाखून्दशति वृषदंशः । जलेशयादन्या बिलेशया गोधेयम्, अहेर्गोधायां जातो जात्यन्तरमित्येके । (गौधेर इ०) गोधायाढ्रक् (सू०), आरगुदीचाम् (सू०), शुभ्रादित्वाड्ढक् (सू०) ॥ ६ ॥ श्वानं विध्यतीति श्वावित्, नहिवृतिवृषिव्यधीति (सू०) दीर्घः । शलति शल्यानि किरति वा शल्यको बिलेशयः । शलको[लो]पि । तस्य लोम्नि शलाकाख्ये, यन्माला-श्वाविच्छलाका शलली, शल गतौ । वातं प्रमिमीते (वातप्रमीः), वाताभिमुखधावनात् । कोकते गृह्णाति कवते याति वा कोकः । ईहा मृगस्येवास्य ईहामृगः, ईहां मृगयते वा । ईहां वर्कते– ईहावृक एवैकदेशेन वृक इत्युक्तः । आरण्यः श्वेत्येके । कुक वृक आदाने ॥ ७ ॥ मृग्यते व्याधैर्मृगः । कौ रङ्गति कुरङ्गः । वातमयते वातायुः, वानं शुष्कमयते वानायुरित्येके । ह्रियते गीतेन हरिणः । अजिनस्य योनिः । (ऐणेयं , विकारेवयवे वा, एण्याढञ् (सू०) । (ऐणं) विकारादौ, प्राणिरजतादिभ्योऽञ् (सू०) । ऐणेयमैणं च वाच्यलिङ्गौ ॥ ८ ॥ के दलति कंदली, कन्दे लीयते कन्दली, इन्नन्तौ । चिनोतीति चीनः । चमति चमूरुः । प्रीयते प्रियकः । समूर्य(र्व्य)ते समूरुश्चित्रवर्णः । एते चर्मण्युपयुक्ताः ॥ ९ ॥ अमी

कृष्णसाररुरुन्यङ्कुरङ्कुशंवररौहिषाः ।
गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः ॥ १० ॥
गन्धर्वः शरभो रामः सृमरो गवयः शशः ।
इत्यादयो मृगेन्द्राद्या गवाद्याः पशुजातयः ॥ ११ ॥
उन्दुरुर्मूषिकोप्याखुर्गिरिका बालमूषिका ।
[छुछुन्दरी गन्धमुखी दीर्घतुण्डी दिवान्धिका ॥ १२ ॥]
सरटः कृकलासः स्यान्मुसली गृहगोधिका ।
लूता स्त्री तन्त्र[न्तु]वायोर्णनाभमर्कटकाः समाः ॥ १३ ॥
नीला[ल]ङ्गुस्तु क्रि[कृ]मिः कर्णजलौकाः शतपद्युभे ।
वृश्चिकः शूककीटः स्यादालिद्रुणौ तु वृश्चिके ॥ १४ ॥
पारावतः कलरवः कपोतोथ शशादनः ।
पत्त्री श्येन उलूके तु वायसारातिपेचकौ ॥ १५ ॥

मृगविशेषाः । कृष्णेन सारः शबलः कृष्णसारः । रौति रुरुः । न्यञ्चति न्यङ्कुः, न्यङ्क्वादित्वात् (सू०) कुत्वम् । रमते रम्यते वा रङ्कुः । शं वृणोति शंवरः । रोहिषाख्ये तृणे भवो रौहिषः । पृषतो बिन्दुचित्रः, मत्वर्थीयो– अच् । एत्येणः । इयर्ति ऋश्यः, ऋषी गताविश्यस्मान्मूर्धन्यः षः स्यात् । रोहितो रक्तत्वात् । चमति चमरः ॥ १० ॥ गन्धयत्यर्दयति गन्धर्वः । शृणाति शरभः । रमन्तेस्मिन् रामः । सरति सृमरः । गुवति गवते वा गवयः । शशति प्लुत्या गच्छति शशः । आदिशब्दान्महजा[या]दयः (?) । मृगेन्द्राद्याः उक्ताः । गवाद्याश्च वक्ष्यमाणाः पाश्यन्ते पाशैः पशवः, तिर्यञ्चोपि । श्वापदा हिंस्रपशवः ॥ ११ ॥ उनत्त्युन्दुरुः, अदन्तोपि । मूषति मूषिकः । आखनत्याखुः । पुंध्वजोपि । खनको गुहाशयो गर्तादश्च । वृषो नानार्थे । गिरति गिरिका, खर्वाखुर्बालमूषिकेति दुर्गः । [गन्धज्ञापि स्त्रियाम्] ॥ १२ ॥ सरति सरटः । कृकं शिरोग्रीवं लासयति कृकलासः, कृकिलास इत्यपि(प)पाठः । प्रतिसूर्यः शयानकश्च । जाहको गात्रसंकोची हलाहलोञ्जलिकेति वाच्यम् । मुस्यति भिनत्ति मुसली, मुस खण्डने, मुशलीति **गौडः** । गृहगोलिकेति सभ्यः पाठः, यस्या घरगोलीति प्रसिद्धिः । लूयते लूता । तन्त्रं तन्तून्वयति तन्त्रवायः [तन्तुवायः] । ऊर्णा नाभावस्योर्णनाभः । मर्कट इव रोहणावरोहणान्मर्कटकः । जालिको जालकारश्च ॥ १३ ॥ नीलति नीला[ल]ङ्गुः । क्रामति क्रि[कृ]मिः, क्रमितमिशतिस्तम्भामतइच (उ०) । चु(पु)लकोपि । शतं पदानामस्याः शतपदी, कुम्भपदीषु च (सू०) इति साधुः । उभे द्वे स्त्रियाम् । वृश्चति वृश्चिकः । शूकः कण्टकस्तत्प्रधानः कीटः (शूककीटः), भ्रमरभेदोयम् । अलिमनर्थोत्रास्त्याली, **ज्यौतिषे**ऽली । द्रुणति द्रुणः, द्रुण हिंसायां, कः, द्रोण इत्येके, विषकीटोयम् ॥१४॥ पा(प)रापतस्यायं पारावतः, जपादित्वात् (ग०) वत्वम् । रक्तकश्च । केन पवते कपोतः, कस्य वायोः पोत **इत्यागमः**, आरण्योयं, आद्यस्तु गृहकपोतः, अयं त्वभेदं मन्यते । पत्त्रीति सामान्यं विशेषे वर्तते, **यच्छाश्वतः**– श्येनाख्यो विहगः पत्त्री पत्त्रिणौ शरपक्षिणौ, **माला**– श्येनः पत्त्रिशशादनौ । श्यायते श्येनः । उलति नेत्राभ्यां दहत्युलूकः, ऊर्ध्वालोकनादिति **निरुक्तम्** । पचति पीयते वा पेचकः । घूको निशाटश्च ॥ १५ ॥ व्याजिघ्रन्नटति व्याघ्राटः । भरद्वाजापत्यं भरद्वाजोऽस्त्यस्य वा भरद्वाजश्चाटके-

व्याघ्राटस्तु भरद्वाजः खञ्जरीटस्तु खञ्जनः ।
लोहपृष्ठस्तु कङ्कः स्यादथ चाषः किकीदिविः(वः) ॥ १६ ॥
कलिङ्गभृङ्गधूम्याटा अथ स्याच्छतपत्रकः ।
दार्वाघाटोथ सा(शा)रङ्गः स्तोककश्चातकः समाः ॥ १७ ॥
कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥ १८ ॥
चटकः कलविङ्कः स्यात्तस्य स्त्री चटका तयोः ।
पुमपत्ये चाटकैरः स्त्र्यपत्ये चटकैव सा ॥ १९ ॥
कर्करेटुः करेटुः स्यात्कृकणक्रकरौ समौ ।
वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥ २० ॥
काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ।
ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥ २१ ॥
द्रोणकाकस्तु काकोलो दात्यूहः कालकण्ठकः ।
आतापि(यि)चिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ समौ ॥ २२ ॥

राख्यः । खञ्जतीति खञ्जनः । लोहवर्णं पृष्ठमस्य । कङ्कते कङ्कः । चषति चाषः । किकीति दीव्यति वाशते किकीदिविः, द्वे नामनी इत्येके, किकिदीविरित्यन्ये ॥ १६ ॥ के लिङ्गं चुडास्य कलिङ्गः । भृङ्गवत्कृष्णपक्षी (भृङ्गः) । धूमवानिवाटति धूम्याटः, धूम्र आटश्च पदैकदेशत्वात् । शतं बहवः पत्राणि पक्षा अस्य शतपत्रः । दार्वाहन्ति दार्वाघाटः, दारावाहनोऽणन्त्यस्यचटःसंज्ञायाम् (वा०) । सरति सारङ्गः, सह- आरङ्गति वा यूथका(चा)रित्वात् । स्तोकं कायति वाशते याचते वा स्तोककः । चतते(ति) याचते चातकः । जलरङ्कोपि ॥ १७ ॥ कृकेण शिरोग्रीवेण वक्ति कृकवाकुः । कुगुच्चारणेन कुटति कुक्कुटः । शिखी कालज्ञश्च ॥ १८ ॥ चटति भिनत्ति- आहारं चटकः । कं शिरो लुनाति वलयति कलविङ्कः । (चटका) आजाद्यतष्टाप् (सू०), क्षिपकादित्वाभावः (क्षिपकादीनांच) । (तयोः) चटकस्य चटकायाश्चापत्यं पुमान्- चाटकैरः, चटकायाएरक् (सू०), चटकाच्चेत्युपसंख्यानं (चटकस्येति वाच्यम्) । स्त्री च तदपत्यं च तत्र, स्त्रियामपत्येलुग्वक्तव्यः (वा०), लुक्तद्धितलुकि (सू०) इति टापो लुक्यपि स्त्रीत्वात्पुनष्टाप् ॥ १९ ॥ कर्केति रेटते । केति च रेटते वाशते (करेटुः) । कृ इति कणति कृकं नयाति वा कृकणः । क्रेति करोति वाशते क्रकरः । परभृतः काकीपुष्टत्वात् । कोकते चित्तं गृह्णाति कोकिलः । अपिकायति पिकः । कलकण्ठस्ताम्राक्षश्च ॥ २० ॥ काशब्दं कायति ककते वा लौल्यात्काकः । केति रटति करटः । नास्ति रिष्टं हिंसास्यामृतभुक्त्वादरिष्टः । बलिभिः पुष्टो वैश्वदेवभागाहर(गार्ह)त्वाद् बलिपुष्टः । सकृत्प्रजायते सकृत्प्रजः, एकाण्डप्रसवात् । ध्वाङ्क्षति ध्वाङ्क्षः । आत्मनः स्वनाम्नो घोषोस्यात्मघोषः, काकेति वाशनात् । परान् पिकान् बिभर्ति परभृत् । वय एव वायसः, प्रज्ञादित्वादण् (सू०), वयते वा । एकदृष्टिश्चिरजीवी मौकुलिर्द्रिकश्च ॥ २१ ॥ (द्रोणकाकः) वृद्धकाकोद्रिकाको वा, यदाहुः- द्रोणकाको दग्धकाको वृद्धकाको वनाश्रयः, द्रुण हिंसायां, द्रोणोपि । द्वितीयं तृतीयं वा रूपं वहति दित्यवाट्, तस्यापत्यं दात्यूहः, देविकाशिंशपेत्यात्वम् (सू०) । कालः कण्ठोस्य कालाः कण्टका रोमोद्भेदा वास्य कालकण्ठः कालकण्टकः । जलरक्षो(ङ्को)पि । सिंहावलोकितेन समावित्येव । आतपत्यातापी । चिल्लति चिल्लः, चिल्ल शैथिल्ये । दक्षते दक्षाय्यः, श्रुदक्षिस्पृहिगृहिभ्यआय्यः (उ०), ततोपत्येऽण् (तस्येदम्) । गृध्याति मांसं गृध्रः । कीशब्दमीरयति कीरः । शुको नीलत्वात्, शवतीत्येके । प्रियदर्शनोपि ॥ २२ ॥ कुञ्चति क्रुङ् । (क्रौञ्चः) प्रज्ञादित्वादण् (सू०),

क्रुङ् क्रौ(क्रु)ञ्चोऽथ बकः कह्वः पुष्कराह्वस्तु सारसः।
कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः॥ २३ ॥
कादम्बः कलहंसः स्यादुत्क्रोशकुररौ समौ ।
हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ॥ २४ ॥
राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ।
मलिनैर्मल्लिकाक्षा(ख्या)स्ते धार्तराष्ट्राः सितेतरैः ॥ २५ ॥
शरारिराटिराटि(डि)श्च बलाका बिसकण्ठिका ।
हंसस्य योषिद्वरटा सारसस्य तु लक्ष्मणा ॥ २६ ॥
जतुकाजिनपत्त्रा स्यात्परोष्णी तैलपायिका ।
वर्वणा मक्षिका नीला सरघा मधुमक्षिका ॥ २७ ॥
पतङ्गिका पुत्तिका स्याद्दंशस्तु वनमक्षिका ।
दंशी तज्जातिरल्पा स्याद्गन्धोली वरटा द्वयोः ॥ २८ ॥
भृङ्गारी चीरुका चीरी झिल्लिका च स्त्रियामिमाः ।
समौ पतङ्गशलभौ खद्योतो ज्योतिरिङ्गणः ॥ २९ ॥

स्त्रियामजादित्वात्क्रौञ्चा । वक्ति वकः, न्यङ्क्वादिः (सू०)। वकोटोऽपि । केन के जले वा ह्वयते कह्वः । सरसि भवः सारसो लक्ष्मणाख्यः । विलीनाङ्गो दीर्घजङ्घश्च । कोकते वाशते कोकः । चकते चक्रः । चक्रेति वाक्- आख्यास्य चक्रवाकः । रथाङ्गं चक्रमाह्वयो नाम चास्य रथाङ्गाह्वयो रथाङ्गनामा च॥२३॥ कदम्बस्यायं संघचारित्वात्कादम्बः । कलो मधुरवाग्हंसः (कलहंसः)। उच्चैः क्रोशत्युत्क्रोशः । कुरति कुररः, कुर शब्दे, कुरेति शब्दं राति वा । हन्ति गच्छति हंसः । श्वेता गरुतः पक्षा अस्य श्वेतगरुत् । चक्राकाराङ्गो वृत्तत्वात्, चक्राङ्क इत्येके । मानसाख्ये देवसरस्योकोऽस्य मानसौकाः ॥ २४ ॥ चञ्चुसहितैश्चरणैरिति लक्षणे तृतीया। मलिनैश्चञ्चुचरणैस्ते सिता मल्लिकाक्षाः, [मल्लिकाकाराक्षाः] शुक्लापाङ्गत्वात् । कृष्णैश्चञ्चुचरणैर्धृतराष्ट्रे- अमात्ये भवा धार्तराष्ट्राः, राजहंसेभ्यो न्यूनत्वात् ॥ २५ ॥ शृणन्त्येनां शरारिः । अतत्याटिः । अटत्याटिः । एताः स्त्रियाम्, बलाहकान् कायति बलेनाकाति याति वा बलाका । बिसमिव कण्ठोऽस्याः, बिसकण्ठिकेत्येके । शारिका गोराटी पीतपादेति च वाच्यम् । व्रियते वरटा, स्त्रीविषयत्वाज्जातेर्ङीष् नास्ति, वरलापि । योषिदित्येव, लक्ष्मणीत्येके, अत एव लक्ष्मणाख्योऽसौ ॥ २६ ॥ जत्विव कृष्णपिङ्गलत्वाज्जतुका । अजिनं पत्त्राणि पक्षा अस्या अजिनपत्त्रा चर्मचटकत्वात् । परमुष्णत्वमस्याः शीतापहतत्वात्, परं विरुद्धं वा तेजसोऽन्धकारात् (परोष्णी) । तैलं पिबतीति तैलपायिका, नित्यमास्यविकासात् । चतुःसंज्ञे(ज्ञी)त्येके, तैलाट्या- अजिनपक्षत्वात् । मुखविष्टा वल्गुलिका निशाटनी च । वृणोति वर्वणा । मक्षन्ति रुष्यन्त्यस्यै मक्षिका । सरन्ती घातयति सरघा ॥ २७ ॥ पतति- अपतङ्गति वा पतङ्गिका । पुत्कुत्सितं तनोति पुत्तिका, मधुमक्षिकाभेदोऽयं, यात्त्रिभिः- माक्षिकं तैलवर्णं स्याद् घृतवर्णं तु पौत्तिकम्। भ्रामरं तु भवेच्छुक्लं क्षौद्रं तु कपिलं भवेत्॥ दशति दंशः । (दंशी) दंशजातीया, जातेरिति (सू०) ङीष् । गन्धयतेऽर्दयति गन्धोली, गन्धालीत्येके । वृणोति वरटा तैलाटाख्या ॥ २८ ॥ आकृत्या भृङ्गमियर्ति भृङ्गारी । चीति रौति चीरुका । चीति रिणाति चीरी । झिल्ली वाद्यभेदस्तत्तुल्यशब्दा झिल्लिका चक्राख्या, केऽणः (सू०) इति ह्रस्वः, झिल्लिकार्ति(र्त्तां)कृतीनामिति तु लक्ष्यम् । शलति शर्मं लभते वाग्नौ शलभः । खे द्योतते खद्योतः । ज्योतिषेङ्गति चलति ज्योतिरिङ्गणः । इन्द्रगोपको ज्योतिर्माली कीटमाणिक्यं च [-माणिश्च] ॥ २९ ॥ मधु व्रतयति भुङ्क्ते

मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ।
द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥ ३० ॥
मयूरो बर्हिणो बर्हीं नीलकण्ठो भुजङ्गभुक् ।
शिखावलः शिखी केकी मेघनादानुलास्यपि ॥ ३१ ॥
केका वाणी मयूरस्य समौ चन्द्रकमेचकौ ।
शिखा चूडा शिखण्डस्तु पिच्छबर्हे नपुंसके ॥ ३२ ॥
खगे विहंगविहगविहंगमविहायसः ।
शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ॥ ३३ ॥
पतत्रि(त्रि)पत्त्रिपतगपतत्पत्त्ररथाण्डजाः ।
नगौकोवाजिविकिरविविष्किरपतत्त्रयः ॥ ३४ ॥
नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसंगमाः ।
तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ॥ ३५ ॥

मधुव्रतः । अलल्यली, अलिश्च । द्वौ रेफौ नाम्न्यस्य द्विरेफः । भृज्जति बिभर्ति वा भृङ्गः । षट् पदानि चरणा अस्य षट्पदः । भ्रमति भ्रमरः । चञ्चरीकभसले(ने)न्दिन्दिररोलम्बा देश्याम् ॥ ३० ॥ मीनात्यहीन् मयूरः । बर्हमस्यास्ति (बर्हिणः), फलबर्हाभ्यामिनन् (वा०) । शिखास्त्यस्य शिखावलः, दन्तशिखात्संज्ञायां (सू०) वलच् । शिखी, व्रीह्यादित्वात् (सू०) । मेघनादमनुलसति नृत्यति– अवश्यं मेघनाद्दानुलासी । चन्द्रकी शुक्लापाङ्गश्च ॥ ३१ ॥ के मूर्ध्नि कायति केका । चन्द्रप्रतिकृतिश्चन्द्रकः । मेचको मिश्रवर्णत्वात्, यत्कात्यः– बर्हिकण्ठसमं वर्णं मेचकं ब्रुवते बुधाः । मयूरस्येत्येव, अन्यत्रोपचारात् । शिखाभिर्डयते शिखण्डः । पिच्छ[य]ति पिच्छम् । बर्हति नृत्येनोर्ध्वीभवति बर्हम् । प्रचलाकोपि । कलापो नानार्थे ॥ ३२ ॥ खे गच्छति खगः, अन्यत्रापिदृश्यते (वा०) इति डः । विहायसा गच्छति, गमेःसुपिवाच्यः (वा०) खच्वक्तव्यः, विहायसोविहइति (वा०) डे, खच्डिद्वा (वा०) । विजिहीते विहायाः, यच्छाश्वतः– विदुर्विहायसं व्योम पाक्षिणश्च विहायसः । शक्नोतीति, शकेरुनोन्तोन्त्युनयः (उ०) । पक्षाः सन्त्यस्य पक्षी । द्विर्जायत इति द्विजः ॥ ३३ ॥ पतत्राणि विद्यन्ते येषु ते पतत्रिणः । पतन्त्यनेनेति पतः पक्षः, पुंसिसंज्ञायांघः (सू०), पतैर्गच्छति पतगः । पतति पतन् । पत्त्राणि पक्षा रथोस्य पत्त्ररथः । नगे– ओकोस्य नगौकाः । वाजो वेगोस्यास्तीति वाजी । विकिरति भक्ष्यं विकिरः– विष्किरः, विष्किरःशकुनिर्विकिरोवा (सू०) । वाति वयति वा विः, वेञोडित् (उ०) । पतत्त्राणि सन्त्यस्य पतति वा पतत्त्री, पतेरत्रिन् (उ०), पतेरत्रिरिति भ्रान्त्या पतत्रिं ग्रन्थकृदिदन्तं मन्यते ॥ ३४ ॥ पतितुमिच्छन् पित्सन्, सनिमिमेति (सू०) इस्–इडभ्यासलोपौ । नभसा गच्छति नभसंगमः, गमेःसुप्युपसंख्यानात्खच् (वा०), वाचंयमपुरंदरौच (सू०) इति चकारादमागमः, अत्यविचमितमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसजिति (उ०) नभः(भस)शब्दोस्तीत्येके । पतङ्गो नानार्थे । एते पक्षिविशेषाः । हरिणं वर्णमिता हारीतः । मज्जति मद्गुर्जलकाकः, न्युङ्क्वादिः (सू०) । करण्डे भवं कारण्डं पञ्जरबन्धं वाति कारण्डवः । प्लवते प्लवः ॥ ३५ ॥

तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरकः ।
कोयष्टिष्टिट्टिभः कोकः क्रकरो(वर्तको) वर्त(र्ति)कादयः ॥ ३६ ॥
गरुत्पक्षच्छदाः पत्त्रं पतत्त्रं च तनूरुहम् ।
स्त्री पक्षतिः पक्षमूलं चञ्चुस्त्रोटिरुभे स्त्रियौ ॥ ३७ ॥
प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः ।
पेशीकोशो द्विहीनेऽण्डं कुलायो नीडमस्त्रियाम् ॥ ३८ ॥
पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।
स्त्रीपुंसौ मिथुनं द्वन्द्वं युग्मं तु युगलं युगम् ॥ ३९ ॥
समूहनिवहव्यूहसंदोहविसरव्रजाः ।
स्तोमौघनिकरव्रातवारसंघातसंचयाः ॥ ४० ॥
समुदायः समुदयः समवायश्चयो गणः ।
स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ॥ ४१ ॥
वृन्दभेदाः समैर्वर्गः संघसार्थौ तु जन्तुभिः ।
सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकम् ॥ ४२ ॥

तित्तिशब्दं राति तित्तिरिः । कुक्कुशब्दं करोति (भाषते) कुक्कुभः । लाति [लावयति] लूयते वा लावः । जीवेन सहचरेण जीवति जीवंजीवः, बाहुलकात्खच् । चकते(ति) ज्योत्स्नया तृप्यति चकोरः । कोको यजति कोयष्टिः शिखरी । टिट्टिशब्दं भाषते टिट्टिभः । कुकति [कोकते] कोकः । क्रेति करोति क्रकरः । वर्तत इति (वर्तकः), वर्तकाशकुनौप्राचां (वा०) इति साधुः, पक्षे वर्तिका । आदिशब्दात्कपिञ्जलादयः ॥ ३६ ॥ गिरति खं गरुत् । (पक्षः) पक्ष परिग्रहे । छाद्यतेऽनेनाङ्गं छदः, छादेर्घे (सू०) इति ह्रस्वः । पतत्यनेन पत्त्रम् । पतन्तं त्रायते पतत्त्रम् । मूले, पक्षात्तिः (सू०) । चञ्चति चलति चञ्चुः । त्रोटयति त्रोटिः । तुण्डं च ॥ ३७ ॥ प्रकृष्टमूर्ध्वं संहतं वा डयनं, स्वादयओदितः (ग० सू०), (ओदितश्च) इति निष्ठानत्वम् । एता इति हि डीनाद्युपलक्षणार्थे । पेशीनां मांसखण्डानां कोशः । अमति निःसरत्यस्मादण्डम् । तिस्रः संज्ञा इति गौडाः । कौ लीयते कुल्यते कुलमेति वा कुलायः । निलीयतेऽस्मिन् नीडः ॥ ३८ ॥ पुनाति पोतः । पान्त्येनं पिबति स्तनौ वा पाकः । ऋभ्यते(अर्यते) वृद्धिं प्राप्यतेऽर्भकः । डयति(ते) डिम्भः । प्रथते वर्धते पृथु कायति वा पृथुकः । श्यति शवति वा शावकः । शिनोति स्नेहेन शेते वाऽस्यर्थं शिशुः । स्त्री च पुमांश्च स्त्रीपुंसौ, अचतुरविचतुरेति (सू०) साधुः । मेथते संगच्छते मिथुनम्, मिथृमेथृ संगमने । द्वन्द्वमिति, द्वन्द्वंरहस्यमर्यादेति (सू०) साधुः, यत्कालिदासः– द्वन्द्वानि भावं क्रियया विवव्रुः । युज्यते धर्मिवृत्त्या युगम् । धर्मवृत्तौ तु युग्मं लाति युगलं, मत्वर्थीयो वा लच् (सिध्मादिभ्यश्च) ॥ ३९ ॥ समूह्यते ढौक्यते समूहः । निवहति निवहः । व्यूहते व्यूहः । संदुह्यते प्रपूर्यते संदोहः । विसियते विसरः । व्रज्यते व्रजः, गोचरसंचरवहव्रजेति (सू०) साधुः । स्तूयते स्तोमः । ओह्यते– ओघः, न्यङ्क्वादिः (सू०) । निकीर्यते निकरः । व्रियते वारः । संहन्यते संघातः, होहन्तेरिति (सू०) घः । संचीयते संचयः ॥ ४० ॥ समुदयनं समुदायः, अयतेर्घञ् । समुदयः, इणोऽच् । समवेयते समवायः । चीयते चयः । गण्यते गणः । वृणोति वृन्दम् । निकुरति निकुरम्बम् । कदम्बप्रतिकृतिः केसरसंचयात्मकत्वात् (कदम्बकम्), कुत्सितमम्बते वा ॥ ४१ ॥

पशूनां समजोऽन्येषां समाजोऽथ सधर्मिणाम् ।
स्यान्निकायः पुञ्जराशी तूत्करः कूटमस्त्रियाम् ॥ ४३ ॥
कापोतशौकमायूरतैत्तिरादीनि तद्गणे ।
गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥ ४४ ॥

इति सिंहादिवर्गः । ५ ।

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥ १ ॥
स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥
विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ ३ ॥

समूहविशेषा वक्ष्यन्त इति शेषः । सजातीयैः प्राणिभिरप्राणिभिश्च समूहो वर्गः, वृज्यते विजातीयेभ्य इति । प्राणिभिः समूहः (संघः), संहन्यते संघः, संघोद्घौगणप्रशंसयोः (सू०) इति साधुः, यथा गोसंघः, मेघसंघादुपचारात् । सरति सार्थोऽध्वगवृन्दम् । जन्तुभिरित्येव, कुल संस्त्याने बन्धुषु च, (यथा) विप्रकुलम् । वृन्दमित्येव, यथा मृगयूथः, यु मिश्रणे ॥ ४२ ॥ संवीयते समजः, समुदोरजःपशुष्विति (सू०) अप् । पशुभ्योऽन्येषां वृन्दं (समाजः), यथा श्रोत्रियसमाजः । (सधर्मिणां) समूह इत्येव, यथा श्रमणनिकायः, निचीयते निकायः, निवासचितिशरीरोपसमाधानेष्वादेश्च कः (सू०) घञ् कत्वं च । धान्यादेरुच्छ्रितं वृन्दं, पुञ्ज्यते पुञ्जः पूर्यते वा । रश्यते राशिः, रशिः सौत्रो दीप्त्यर्थः । उत्कीर्यत उत्करः । कुट्यते कूटः ॥ ४३ ॥ कपोतादिसमूह एतानि वर्तन्ते, अनुदात्तादेरञ् (सू०) । आदिशब्दात्काकादि । छायन्ते छेकाः पञ्जरादौ स्थाप्यन्ते । गृह्यन्ते गृह्यकाः, पदास्वैरीति (सू०) क्यप्, स्वार्थे कन् ॥ ४४ ॥
इति सिंहादिवर्गः । ५ ।

मनोरपत्यं मनुष्यो मानुषश्च, मनोर्जातावञ्यतौ षुक्च (सू०) । म्रियते मर्त्यः, स्वार्थे यत् । मानवः, तस्येदमर्थेऽण्, अपत्यार्थे अञ्यद्भ्यां बाधितत्वात् । नृणाति नरः, नॄ नये । पाति पुमान् । पञ्चभिर्भूतैर्जातः पञ्चजनः । पुरि पुरि शयनात्पूरणाद्वा पुरुषः । (पूरुषः) अन्येषामपीति (सू०) वा दीर्घः । नयति ना, नयतेर्डिच्च (उ०) इति ऋः ॥ १ ॥ स्त्यायतेऽस्यां गर्भः स्त्री । यौति पुंसा [योषति] योषित्, हसृरुहियुषिभ्य इतिः (उ०) । युष्य(योष)त्यन्यं यौति वा योषा । नारीति, नृनरयोर्वृद्धिश्च (ग० सू०) इति शार्ङ्गरवादिपाठान्ङीन् । सीमन्तः केशवेशोऽस्त्यस्याः सीमन्तिनी । उह्यतेऽसौ भर्त्रा, बध्यतेऽनया भर्ता वा वधूः । प्रतीपं वक्रं पश्यति, अपाङ्गनिरीक्षणात् । वामा विपरीतलक्षणया शृङ्गारवेदनाद्वा । वनति भजति वनिता । मह्यते महिला । तथाशब्दान्महेलापि, यल्लक्ष्यम्— अजयद् द्विषतः प्राप्तनयः परमहेलया । स्वप्नेऽपि मनसि स्पृष्टो न यः परमहेलया ॥ २ ॥ प्रशस्तान्यङ्गान्यस्या अङ्गना, अङ्गात्कल्याणे (ग० सू०) इति पामादित्वान्नः (लोमादिपामादीति) । बिभेति तच्छीला भीरुः, भियःक्रुक्लुकनौ (सू०) । कामयते कामिनी । वामे बाधके लोचने अस्या वामलोचना । प्रकृष्टो मदः कामवेगोऽस्याः प्रमदा । मानः प्रणयकोपोऽस्या मानिनी । काम्यते कान्ता । लडति ला-(ल)ल्यते वा ललना, लड विलासे, लल ईप्सायां वा । नितम्बिनी गुरुनितम्बा ॥ ३ ॥ विशेषा

सुन्दरी रमणी रामा कोपना सैव भामिनी ।
वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥
कृताभिषेका महिषी भोगिन्योऽन्या नृपस्त्रियः ।
पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५ ॥
भार्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी ॥
पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥
कृतसापत्न(त्नि)काध्यूढाऽधिविन्नाथ स्वयंवरा ॥
पतिंवरा च वर्या च कुलस्त्री कुलपालिका ॥ ७ ॥
कन्या कुमारी गौरी तु नग्निकानागतार्तवा ।
स्यान्मध्यमा दृष्टरजास्तरुणी युवतिः समे ॥ ८ ॥
समाः स्नुषा जनी वध्वश्चिरण्टी तु सुवासिनी ।
इच्छावती कामुका स्याद् वृषस्यन्ती तु कामुकी ॥ ९ ॥

इत्येव । सुष्ठु- आद्रियते सुन्दरी । रमन्तेऽस्यां रमणी । रमते रामा, ज्वलादित्वाण्णः (सू०) । कुप्यति तच्छीला कोपना, क्रुधमण्डार्थेभ्यश्च (सू०) इति युच् । भामिनी, भाम क्रोधे । उत्तमा स्त्रीपर्याया । आरुह्यतेऽस्मिन्नारोहो नितम्बः, स वरोऽस्या वरारोहा । मत्ता क्षीबेव काशते भाति मत्तकाशिनी, कर्तर्युपमाने (सू०) णिनिः । वरो वर्णोऽस्या वरवर्णिनी ॥ ४ ॥ नृपस्त्रीत्येव । श्रीमहादेवीत्वे कृताभिषेका, यथा वासवदत्ता, मह्यते पूज्यते महिषी । पद्मावत्याद्याः, भोगोऽस्त्यासां भोगिन्यः । पत्युर्नो यज्ञसंयोगे (सू०) इति पत्नी । पाणिर्गृहीतोऽस्याः, बहुव्रीहेश्चान्तोदात्तात् (सू०) इत्यत्र पाणिगृहीतीत्यादिना (वा०) विशेष इति ङीष् । द्वितीया धर्मसहाया । सह धर्मोऽस्त्यस्याः सहधर्मिणी, यज्ञादौ सहाधिकारात् ॥ ५ ॥ भरणीया भार्या, संज्ञायां भृञः- ऋहलोर्ण्यत् (सू०) । जायतेऽस्यां पतिर्जाया, यन्मनुः- जायायास्तद्धि जायात्वं यदस्यां जायते पुनः । दारयन्ति दाराः, दारजारौकर्तरिणिलुक्च (वा०) । अथशब्दात्पुंभूम्नोर्न पूर्वभाक्त्वम् । सहचरी च । कुटुम्बं पुत्रभृत्याद्यस्त्यस्याः कुटुम्बिनी । पुरं धत्ते पुरंध्री । पतिसेवैव व्रतं यस्याः सा पतिव्रता, यत्स्मृतिः- नास्ति स्त्रीणां पृथग्यज्ञो न व्रतमिति ॥ ६ ॥ कृतं सापत्नकं सपत्नीभावोऽस्याः (कृतसापत्नका) । अध्युपर्यूह्यते द्वितीया(अन्या)स्या अध्यूढा । अधिविन्दत्यस्यामधिविन्ना । स्वयं वृणीते स्वयंवरा, संज्ञायांभृतॄवृजीति (सू०) खच् । पतिं वृणीते पतिंवरा, खच् । व्रियतेऽनया वर्या, अवद्यपण्येति (सू०) साधुः, वरमर्हति वा । कुलस्य संपादयित्री स्त्री(कुलस्त्री) ॥ ७ ॥ कनति कन्या, कनी दीप्तौ, अघ्न्यादिः (उ०), कन्यायाःकनीनच (सू०) इति लिङ्गाद् ङीप्- नास्ति । कुमारयति क्रीडति कुमारी कुत्सितो मारोऽस्या वा, अनूढत्वात् । अष्टवर्षा भवेद् गौरी दशमे नग्निका भवेदिति स्मार्तो विशेषो नादृतः । गो(गु)रते गौरी । नजते नग्ना, ओणजी ओलजी व्रीडे । ऋतौ भवमार्तवं रजः । (मध्यमा) अजाद्यतष्टाप् (सू०) । (तरुणी) वयसिप्रथमे (सू०) इति ङीप् स्यात् , नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानात् (वा०) वा ङीप् । (युवतिः) यूनस्तिः (सू०) ॥ ८ ॥ स्नौति स्नुषा । जायतेऽस्यां जनी । वधूटी च ग्रामटिकावत् । चिरिणोति चिरिण्टी, चरति चरण्टीत्येके, वयस्यचरमे (वा०) इति ङीप् । सुष्ठु वसति सुवासिनी, स्ववासिनीति द्रवि[मि]डाः । (कामुका) लषपतपदेत्युकञ् (सू०) । वृषमिच्छति, सुप आत्मनःक्यच् (सू०), अश्वक्षीरवृषलवणानामात्मप्रीतौक्यचि (सू०) इत्यात्राश्ववृषयोर्मैथुनेच्छायामिति (वा०) असुक् । जानपदकुण्डेति (सू०) मैथुनेच्छायां ङीषि कामुकी ॥ ९ ॥ यद्रुद्रटः- हित्वा लज्जाभये श्लिष्टा मदनेन

कान्तार्थिनी तु या याति संकेतं साभिसारिका ।
पुंश्चली चर्षणी बन्धक्यसती कुलटेत्वरी ॥ १० ॥
स्वैरिणी पांशुला च स्यादशिश्वी शिशुना विना ।
अवीरा निष्पतिसुता विश्वस्ताविधवे समे ॥ ११ ॥
आलिः सखी वयस्या च पतिवत्नी सभर्तृका ।
वृद्धा पलिक्नी प्राज्ञी तु प्रज्ञा प्राज्ञा तु धीमती ॥ १२ ॥
शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च ।
आभीरी तु महाशूद्री जातिपुंयोगयोः समा ॥ १३ ॥
अर्याणी स्वयमर्या स्यात्क्षत्त्रिया क्षत्त्रियाण्यपि ।
उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः ॥ १४ ॥
आचार्यानी तु पुंयोगे स्यादर्यी क्षत्त्रियी तथा ।
उपाध्यायान्युपाध्यायी पोटा स्त्रीपुंसलक्षणा ॥ १५ ॥

मदेन च । अभिसारयते कान्तं सा भवेदभिसारिका ॥ ण्वुलन्तोयं (अभिसारिका) । वासकसज्जा विरहोत्कण्ठिता खण्डिता विप्रलब्धा कलहान्तरिता तथा प्रोषितभर्तृका स्वाधीनदयितेत्यन्या सप्तान्वर्थत्वान्न दर्शिताः । पुमांसं चलयति पुंश्चली । कर्षति चेतश्चर्षणी, कृषेरादेश्चचः (उ०) । बध्नाति बन्धकी । कुलान्यटति कुलटा शकन्ध्वादिः (वा०), कुत्सितं लटतीत्येके । एति तच्छीला– इत्वरी चपला, इण्नशूजिसर्तिभ्यः करप् (सू०) ॥ १० ॥ स्वेनेर्ते तच्छीला स्वैरिणी, स्वादीरेरिणोः (वा०) इति वृद्धिः । पांशुर्मालिन्यहेतुरस्त्यस्याः पांशुला । (अशिश्वी), सख्यशिश्वीतिभाषायां (सू०) इति साधुः । न विद्येते वीरौ पतिपुत्रावस्या अवीरा । विश्वसिति स्म विश्वस्ता । विगतो धवो भर्तास्या विधवा ॥ ११ ॥ अल(आलय)त्यालिः, यच्छाश्वतः– आलिः सखी सेतुरालिरालिरावलिरिष्यते । समानं ख्याति सखी । वयसा तुल्या वयस्या, नौवयोधर्मेति (सू०) यत् । सध्रीची च । (पतिवत्नी) अन्तर्वत्पतिवतोर्नुक् (सू०), ङीप् च । (पलिक्नी) असितपलितयोर्न (वा०), छन्दसिक्नमेके (वा०), भाषायामपीष्यत इति ङीप् च । प्रजानातीति प्रज्ञा, इगुपधेतिकः (सू०) । (प्राज्ञी) प्रज्ञादिभ्यश्चेति (सू०) स्वार्थेण् । प्रज्ञास्त्यस्याः (प्राज्ञा), प्रज्ञाश्रद्धार्चावृत्तिभ्योणः (सू०) ॥१२॥ (शूद्री) पुंयोगादाख्यायां (सू०) इति ङीष् । शूद्रजातीया स्त्री शूद्रा, शूद्राचामहत्पूर्वाजातिः (वा०) इति– अजादित्वाट्टाप् । आभीरजातीया महाशूद्रस्य स्त्री च, जातिलक्षणे पुंयोगे च ङीप् । वैश्यभेद एवाभीरो गवाद्युपजीवी । अन्यत्र महती चासौ शूद्रा च महाशूद्रा ॥ १३ ॥ स्वयं पुंयोगं विना । अर्यक्षत्रियाभ्यांवास्वार्थे (वा०) इति ङीषानुकौ, पक्षे टाप्, योपधत्वाज्जातिलक्षणो ङीप्– नास्ति । स्वयमित्येव । उपेत्याधीयतेस्याः, अपादाने स्त्रियामुपसंख्यानंतदन्ताच्चवाङीष् (वा०) इति घञ् वा च ङीष् । स्वयं मन्त्रव्याख्याकृदाचार्या । स्वतो जातावित्यर्थः, योपधत्वाज्जातेर्ङीष्–नास्ति ॥ १४ ॥ (आचार्यानी) इन्द्रवरुणेति (सू०) ङीषानुकौ आचार्यादणत्वंचेति वक्तव्यम् (वा०) । पुंयोग इत्येव, (उपाध्यायानी) उपाध्यायमातुलाभ्यांवेति (मातुलोपाध्याययोरानुग्वा) पक्षे ङीषानुकौ । पुट् संश्लेषणे, उभयव्यञ्जना पोटा नपुंसकाख्या ॥ १५ ॥

वीरपत्नी वीरभार्या वीरमाता तु वीरसूः ।
जातापत्या प्रजाता च प्रसूता च प्रसूतिका ॥ १६ ॥
स्त्री नग्निका कोटवी स्याद् दूतीसंचारिके समे ।
कात्यायन्यर्धवृद्धा या का(क)षायवसनाधवा ॥ १७ ॥
सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका ।
असिक्नी स्यादवृद्धा या प्रैष्यान्तःपुरचारिणी ॥ १८ ॥
वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनैः ।
सत्कृता वारमुख्या स्यात्कुट्टनी शम्भली समे ॥ १९ ॥
विप्रश्निका त्वीक्षणिका दैवज्ञाथ रजस्वला ।
स्त्रीधर्मिण्यपि चात्रेयी मलिनी पुष्पवत्यपि ॥ २० ॥
ऋतुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्तवम् ।
श्रद्धालुर्दोहदवती निष्कला विगतार्तवा ॥ २१ ॥

(वीरपत्नी) नित्यंसपत्न्यादिषु (सू०) इति नान्तत्वाद्– ऋन्नेभ्योङीप् (सू०)। वीरं सूतवती वीरसूः सत्सूद्विषेति (सू०) क्विप् । वीरप्रसूर्जगति भार्गवरेणुकैव (बा० रा०) वीरस्य प्रसूर्मातेत्यर्थः । जीवत्तोका तु जीवसूः । वोटा तु कटहारिणी । जनयितुं प्रवृत्ता सा प्रजाता । (प्रसूतिका) सूतकापुत्रिका-वृन्दारकाणांवा (वा०) इति पक्षे– इत्वम्, आख्याग्रहणात्पुंयोगेपि ङीष् नास्ति ॥ १६ ॥ विवस्त्रा योषिन्मुक्तकेशीत्यागमः । कोटेन लज्जावशात्कुटिलत्वेन वेति याति कोटवी । दूयन्तेस्या मौखर्याद् दूती । संचारयति (संदेशं) प्रापयति संचारिका । कतस्यापत्यमिव कात्यायनी, ऋषिपत्न्याकारत्वात् । विलक्षणेयं, कषायेण रक्तं वस्त्रं शुद्धत्वादस्याः काषायवसना, अथवा– अपुंस्का रण्डेत्यर्थः ॥ १७ ॥ शिल्पं प्रसाधनादि तेन या परवेश्मान्युपजीवति, स्ववशा स्वायत्ता, एकायत्ता न भवतीत्यर्थः । सह–एरं प्रेरणं धरते सैरन्ध्री, चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी । प्रसाधनोपचारज्ञा सैरन्ध्री स्ववशेति चेति **कात्यः** । असितपलितयोः क्नम् ङीप् च । प्रादेषैष्ययोर्वृद्धिः (प्रादूहोढोढ्येषैष्येषु) । द्वे वाक्ये इत्येके तत्र, **यन्मुनिः**– असिक्नी स्यादवृद्धा या प्रैष्यान्तःपुरयोषिता ॥ १८ ॥ वारे राजदेवादिसेवाक्रमे स्त्री वारस्त्री । गणः पेटकोस्त्यस्याः, गणयतीश्वरानीश्वरौ वा गणिका । वेशे वेश्यावाटे भवा वेश्या । पण्यस्त्री पणस्त्री च । वारे सेवाक्रमे मुख्या (वारमुख्या) । कुट्टयति कुट्टनी । शं श्रेयो भालयति शंभं श्रेयोयुक्तं लाति वा शंभली । चुन्दी देश्याम् ॥ १९ ॥ विप्रश्नो दैवप्रच्छनं शुभाशुभेक्षणं वास्त्यस्याः (विप्रश्निका)। दैवं शुभाशुभं कर्म जानाति दैवज्ञा, अन्तःपुरस्यापुंस्प्रवेश्यत्वात् । रजोस्त्यस्या रजस्वला, रजःकृष्या-सुतीति (सू०) वलच् । स्त्रीधर्मो रजोस्त्यस्याः स्त्रीधर्मिणी । अत्रेरपत्यमात्रेयी । (मलिनी) मलिना-द्रजसिङीप् (वा०), मलादिनन्ताद्वा ङीप् ॥ २० ॥ ऋतु रजोस्त्यस्या ऋतुमती । उदकात्संज्ञायां यति उदक्या, उदकमर्हतीति । पुष्पितेति **माला** । पुष्पवत्यवीरिति **प्राच्याः** पेठुः, अव्यते रक्ष्यतेन्येभ्योऽवीः, अवितृस्तृतन्त्रिभ्यईः (उ०) । अविरात्रेयीत्येके, यत्**कात्यः**– अविं स्त्रीधर्मिणीं विद्यादिति । पुष्पं पुन फलहेतुत्वाद्रजः । ऋतुरेवार्तवम्, ऋतुः स्त्रीरजोत्र, ऋतौ गर्भग्रहणकाले भवं वा, ऋतुः प्राप्तोस्य वा । (स्पृहिगृहिपतिदयि)निद्रातन्द्राश्रद्धाभ्यआलुच् (सू०) । दोहदं गर्भिण्यभिलाषोस्त्यस्या दोहदवती । निष्क्रान्ता कलाभ्योऽशुद्धिभ्यो निष्कला जीर्णर्तुः ॥ २१ ॥ आपन्नं गृहीतं सत्त्वं गर्भोनयापन्नसत्त्वा । गुरु-

आपन्नसत्त्वा स्याद् गुर्विण्यन्तर्वत्नी च गर्भिणी ।
गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥ २२ ॥
पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषूः पतिः ।
स तु द्विजोग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥ २३ ॥
कानीनः कन्यकाजातः सुतोथ सुभगासुतः ।
सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥ २४ ॥
पैतृष्वसेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः ।
सुतो मातृष्वसुश्चैवं वैमात्रेयो विमातृजः ॥ २५ ॥
अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः ।
कौलटेयः कौलटेरो भिक्षुकी तु सती यदि ॥ २६ ॥
तदा कौलटिनेयोस्याः कौलटेयोपि चात्मजः ।
आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ॥ २७ ॥

गर्भोस्या गुर्विणी, व्रीह्यादित्वादिनिः (सू०) । गुर्वीति च **भागुरिः** । अन्तर्विद्यतेस्याः (अन्तर्वत्नी), अन्तर्वत्पतिवतोर्नुक् (सू०) । गणिकानां समूहो गाणिक्यं, गणिकायायञितिवक्तव्यं (वा०) इति यञ् । गर्भिणीनां समूहो गार्भिणं, इनण्यनपत्ये (सू०) इति प्रकृतिभावः (नस्तद्धित इति टिलोपे प्राप्ते) । युवतीनां समूहो यौवतं, युवत्या अपुंवदिति गणपाठात् (भिक्षादिषु), भस्याढेतद्धिते (वा०) इति पुंवद्भावो नास्ति ॥ २२ ॥ पुनर्भवति पुनर्भूः । दिधेष्टि वाच्या भवति दिधिषूः । द्वौ वारौ द्विरूढा संस्कृता, यदाहुः– अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः (याज्ञ०) । **मनुस्त्वन्यथाह**– ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेनुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता ॥ तस्याः पुनर्भ्वाः पतिः, किं च– पुनर्भूपतिरुक्तश्च पुनर्भूर्दिधिषूस्तथेत्येषोप्यूदन्तः, दिधिषूमिच्छत्यात्मन इति क्यच् (सुपआत्मनःक्यच्), क्विप् (अन्येभ्योपिदृश्यते) । अग्रेनन्यभार्यत्वात्प्रधानं दिधिषूर्यस्य सोग्रेदिधिषूः, समासान्तविधिरनित्यः ॥ २३ ॥ (कानीनः) कन्यायाःकनीनचेत्यण् (सू०) । (सौभागिनेयः) कल्याण्यादीनामिनङ् (सू०) इति ढगिनङौ । एवं दौर्भागिनेय इत्याद्युन्नेयं, हृद्भगसिन्ध्वन्तेपूर्वपदस्यच (सू०) इत्युभयपदवृद्धिः, उत्तरत्र-अनुशतिकादीनांचेति (सू०) । सुत इत्येव, परस्त्री कल्याण्यादिः ॥ २४ ॥ (पैतृष्वस्रीयः) पितृष्वसुश्छण् (सू०) । (पैतृष्वसेयः) ढकिलोपः (सू०) इति ज्ञापकाड्– ढक्– अन्त्यलोपश्च । सुत इत्येव, मातृष्वसुश्च (सू०) इति छणि मातृष्वस्रीयः, ढकिलोपः (सू०) इति ढकि मातृष्वसेयः । विरुद्धाया मातुरपत्यं वैमात्रेयोऽसोदर्यो भ्राता, शुभ्रादित्वात् (सू०) ढक्, स्त्रीभ्योढक् (सू०) इत्यत्र स्त्रीप्रत्ययग्रहणात् । सांमातुरस्तुभयमातृकः ॥ २५ ॥ बन्धक्या अपत्यं, कल्याणादीनामिनङ् (सू०) इति ढगिनङादेशः । बन्धून्– लाति बन्धुला । कुलटाया अपत्यं, स्त्रीभ्योढक् (सू०) । (कौलटेरः) क्षुद्राभ्योवा (सू०) इति ढ्रक् ॥ २६ ॥ सा हि भिक्षार्थिनी कुलान्यटति, कुलटायावा (सू०) इति ढगिनङौ, पक्षे ढगेव क्षुद्रात्वाभावात्, अङ्गशीलहीना हि क्षुद्रा । तनोति कुलं तनयः । सूयते सूनुः । सुवति सुनः । पुन्नरकात्त्रायते पुत्रः, पुनाति वा, पुवोह्रस्वश्च (उ०) इति क्त्रः । दारकदायादौ च ॥ २७ ॥ आत्मजादयः स्त्रियां वृत्ता दुहितृवाचकाः । गौरादौ पुत्री । दोग्धि पितरौ दुहिता । (तयोः

आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे ।
स्वजाते त्वौरसोरस्यौ तातस्तु जनकः पिता ॥ २८ ॥
जनयित्री प्रसूर्माता जननी भगिनी स्वसा ।
ननन्दा तु स्वसा पत्युर्नप्त्री पौत्री सुतात्मजा ॥ २९ ॥
भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् ।
प्रजावती भ्रातृजाया मातुलानी तु मातुली ॥ ३० ॥
पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः ।
पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः ॥ ३१ ॥
श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ ।
स्वस्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः ॥ ३२ ॥
पितामहः पितृपिता तत्पिता प्रपितामहः ।
मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥ ३३ ॥
समानोदर्यसोदर्यसगर्भ्यसहजाः समाः ।
सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥ ३४ ॥

समे) पुत्रे दुहितरि च सामान्येन वर्तेते । अपतनमपत्, अपति साध्वपत्यम् । स्तूयते तोकम् ॥ संततिः संतानः, नन्दनोद्वहप्रजाः, [तन्तुश्च] । उरसा निर्मिते यच्चेति– अण्यतौ (उरसोयच्च, उरसोण्च) । तनोति कुलं तातः, स्वार्थेऽण् । जनयति जनकः । पाति पिता । वप्ता च ॥२८॥ या जनित्री त्रिलोक्या इति त्वन्तर्भावितण्यर्थत्वात् । प्रसूयते प्रसूः । मात्यस्यां गर्भो माता । भगं कल्याणमस्त्यस्या भगिनी । सुष्ठ्वस्यते स्वसा, सावसेर्ऋन् (उ०), नषट्स्वस्रादिभ्यः (सू०) इति ङीप् नास्ति । न नन्दति भ्रातृजायां ननन्दा, नञिचनन्देः (उ०) इति ऋन् । न पतत्यनया कुलं नप्त्री । पुत्रस्यापत्यं पौत्री सुतस्यात्मजा ॥ २९ ॥ यतते स्पर्धया याता, यतेर्वृद्धिश्च (उ०) इति ऋन् । (भ्रातृजाया) ऋतोविद्यायोनिसंबन्धेभ्यः (सू०) इति षष्ठ्या अलुग्नास्ति, सप्तमीसमासात्, यथा– द्रक्ष्यसि भ्रातृजायाम् (मेघ०) । (मातुलानी) इन्द्रवरुणेति (सू०) ङीषानुकौ । उपाध्यायमातुलाभ्यां वा (मातुलोपाध्याययोरानुग्वा) इति पक्षे ङीष् ॥३०॥ पत्युर्माता पत्न्याः श्वश्रूः, पत्न्या माता पत्युः श्वश्रूः, श्वशुरस्योकाराकारलोपश्च (वा०) इत्यूङ् । तयोः पतिपत्न्योः पितान्योन्यं श्वशुरः, शु पूजितं कृत्वाश्नुते । (पितृव्यः) पितृव्यमातुलमातामहपितामहाः (सू०) इति साधुः । (मातुलः) प्राग्वत् ॥ ३१॥ श्यायते श्यालः, स्यम वितर्केऽस्माद्वा (स्यालः), पत्युः श्याला इत्यर्थः । स्वामिनः पत्युः- भ्राता कनिष्ठः पत्न्याः, दीव्यति देवा, दिवेर्ऋः(उ०)। अर्त्तिकमिभ्रमिचामिदेविवासिभ्यश्चिदित्यरः (उ०) देवरः । स्वसुरपत्यं स्वस्रीयः, स्वसुश्छः (सू०)। जायां मिमीते जामाता ॥३२॥ प्रगतः पितामहात् (प्रपितामहः) । मातुः पिता मातामहः, [तत्पिता प्रमातामहः] । समानः पिण्ड एषां, यत्स्मृतिः–सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । सप्तमादूर्ध्वं सगोत्राः । समानो नाभिर्मूलमेषां सनाभयः, ज्योतिर्जनपदेति (सू०) समानस्य सत्वम् ॥ ३३ ॥ समान उदरे शयितः समानोदर्यः, समानोदरेशयितः (सू०) इति यत् । सोदरशब्दात्– सोदराद्यः (सू०), विभाषोदर इति (सू०) समानस्य सत्वं वा । समाने गर्भे भवः सगर्भ्यः, सगर्भसयूथसनुताद्यन् (सू०), छान्दसोपि लोकेभिधानात् । सह जायते सहजो भ्राता । समानं गोत्रमेषां सगोत्राः, ज्योतिर्जनपदेति (सू०) सत्वम् । ज्ञायते ज्ञातिः । बध्नाति बन्धुः । (बान्धवः) स्वार्थेऽण् । एकः स्वो ज्ञातिर्धनः, अन्य आत्मीयार्थः ॥ ३४ ॥ ज्ञाते-

ज्ञातेयं बन्धुता तेषां क्रमाद् भावसमूहयोः ।
धवः प्रियः पतिर्भर्ता जारस्तूपपतिः समौ ॥ ३५ ॥
अमृते जारजः कुण्डो मृते भर्तरि गोलकः ।
भ्रात्रीयो भ्रातृजो भ्रातृभगिन्यौ भ्रातरावुभौ ॥ ३६ ॥
मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।
श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहिता च ॥ ३७ ॥
दंपती जंपती जायापती भार्यापती च तौ ।
गर्भाशयो जरायुः स्यादुल्वं च कललोऽस्त्रियाम् ॥ ३८ ॥
सूतिमासो वैजननो गर्भो भ्रूण इमौ समौ ।
तृतीयाप्रकृतिः शण्ढः क्लीबः पण्डो नपुंसकम् ॥ ३९ ॥
शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे ।
स्यात्स्थाविरं तु वृद्धत्वं वृद्धसंघेपि वार्धकम् ॥ ४० ॥

भावो ज्ञातेयं, कपिज्ञात्योर्ढक् (सू०) । बन्धूनां समूहो बन्धुता, ग्रामजनबन्धु(सहाये)भ्यस्तल् (सू०), तलि स्त्रीलिङ्गवचनम् । धुनोति धवः । प्रीणाति प्रियः, इगुपधेति (सू०) कः । पाति पतिः, पातेर्डतिः (उ०) । सेक्ता वरयिता वरश्च । जारयति जारः, दारजारौकर्तरिणिलुक् च (वा०) । उपजातः पतिरुपपतिः ॥ ३५ ॥ भर्तरीत्येव । कुण्डयते कुलमनेन कुण्डः, कुडि दाहे । जारज इत्येव । गुड्यते लज्जाकरत्वाद् गोप्यते गोलकः, परनार्यां प्रजायेते द्वौ सुतौ कुण्डगोलकौ । पत्यौ जीवति कुण्डस्तु मृते भर्तरि गोलक इति **स्मृतिः** । भ्रातुरपत्यं भ्रात्रीयः, भ्रातुर्व्यच्च (सू०) इति वा छः । भ्रातृव्यो नानार्थे । भ्राता च भगिनी चेति (भ्रातरौ), भ्रातृपुत्रौ स्वसृदुहितृभ्याम् (सू०) इत्येकशेषः । [एवं पुत्रौ] ॥ ३६ ॥ माता च पिता च मातापितरौ, आनङृतोद्वन्द्वे (सू०) । (पितरौ) पितामात्रा (सू०) इत्येकशेषो वा । मातरपितरावुदीचां (सू०) इति– अन्यः साधुः । प्रसूर्माता जनयिता चेति द्वौ त्रिसंज्ञौ । (श्वशुरौ) श्वशुरःश्वश्वा (सू०) इत्येकशेषो वा । [पुत्रश्च दुहिता च प्रागुक्तम्] ॥३७॥ राजदन्तादौ (सू०) जायापत्योर्जायाशब्दस्य दंभावो जंभावो वा निपात्यते, दं भार्येति **निघण्टुः** । गर्भ आशेतेत्र गर्भाशयः । जरामेति जरायुः । उलति वृणोत्युल्वः । कलयति के ललति वा कललः शुक्रशोणितसमवायः, प्रसिध्यास्य पर्यायो नोक्तः, अस्त्रीत्वविधानार्थं तु विधिः । उल्वपर्यायः कलल इत्येके, यन्मुनिः– तदुल्वं कललं च तत् ॥ ३८ ॥ दशमे मासि सूतव इति **श्रुतेः**, नवमे दशमे मासि प्रबलैः सूतिमारुतैः ॥ निःसार्यते बाण इव यन्त्रच्छिद्रेण सत्वर इति **स्मृतेश्च** नवमो दशमो वा मासो, विजनने भवो वैजननः । गीर्यते गर्भः । भ्रियते भ्रूणः कुक्षिस्थः । स्त्रीपुंसाभ्यामन्या तृतीया प्रकृतिः, लिङ्गान्तरत्वात् । शाम्यति शण्ढः, [षण्ढोपि] । क्लीबते क्लीबः । पण्डते पण्डः, पिण्डोपि । न स्त्रीपुंसौ नपुंसकं, नभ्राण्नपादिति (सू०) साधुः, स नपुंसको भवेदिति भाष्यात्पुंस्यपि ॥ ३९ ॥ शिशोर्भावः शैशवं, प्राणभृज्जातीत्यञ् (सू०) । यूनो भावो यौवनं, हायनान्तयुवादिभ्योण् (सू०) । (वार्धकं) गोत्रोक्षोष्ट्र्यल (सू०) वृद्धाच्चेतिवक्तव्यात् (वा०) वुञ्, मनोज्ञादित्वात् (द्वन्द्वमनोज्ञादिभ्यश्च) भावकर्मणोरप्याहुः, यथा– वार्धके मुनिवृत्तीनाम् (रघु०) ॥४०॥ पलति शोभतेनेन पलितं, पल गतौ ।

पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा ।
स्यादुत्तानशया डिम्भा स्तनपा च स्तनंधयी ॥ ४१ ॥

बालस्तु स्यान्माणवको वयस्थस्तरुणो युवा ।
प्रवयाः स्थाविरो वृद्धो जीनो जीर्णो जरन्नपि ॥ ४२ ॥

वर्षीयान्दशमी ज्यायान्पूर्वजस्त्वग्रियोग्रजः ।
जघन्यजे स्युः कनिष्ठयवीयो वरजानुजाः ॥ ४३ ॥

अमांसो दुर्बलश्छातो बलवान्मांसलोंसलः ।
तुन्दिलस्तुन्दिभ(क)स्तुन्दी बृहत्कुक्षिः पिच(चि)ण्डिलः ॥४४॥

अवटीटोवनाटश्चावभ्रटो नतनासिके ।
केशवः केशिकः केशी वलिनो वलिभः समौ ॥ ४५ ॥

आदिशब्दाद्रोमादौ च । विस्रंसतेनया कचाङ्गं विस्रसा । जीर्यन्त्यनया जरा, षिद्भिदादिभ्योऽङ् (सू०) । उत्ताना शेते–उत्तानशया, अधिकरणेशेतेः (सू०) इत्यत्र–उत्तानादिषुकर्तृषु (वा०) इत्यच् । डिम्भेति प्राक् पक्षिक्रमेणोक्तं इह मानुषक्रमात् । स्तनं पिबति स्तनपा, (सुपिस्थ इत्यत्र) सुपीति योगविभागात्कः । स्तनं धयति स्तनंधयी, नासिकास्तनयोर्ध्माधेटोः (सू०) इति खश्, धेटष्टित्वाद्ङीप् । स्त्रीलिङ्गेन निर्देशः स्त्रीप्रत्ययप्रदर्शनार्थः ॥ ४१ ॥ बलति(ते) प्राणिति बालः, ज्वलादित्वाण्णः (सू०), वाडृ आप्लाव्ये स्माद्वा । अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः । नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः ॥ स्वार्थे कन् (माणवकः) । वयसि प्रत्यग्रे तिष्ठति वयस्थः । तरति तरुणः । यौति मिश्रीभवति स्त्रिया युवा । प्रगतं वयोस्य प्रवयाः । तिष्ठति स्थविरः । वर्धते स्म वृद्धः, एवमादौ गड्डरिकाप्रवाहेण भूते क्तः, वर्तमाने युक्तः शीलितादिवत् । जिनाति स्म जीनः, ग्रहिज्यावयीति (सू०) संप्रसारणं, संप्रसारणस्येति (सू०) दीर्घः, ल्वादित्वात् (सू०) निष्ठा नत्वम् । जीर्यति स्म जीर्णः, श्र्युकः–क्किति (सू०) इत्यनिट् ।(जरन्) जीर्यतेरतृन् (सू०) ॥ ४२ ॥ अतिशयेन वृद्धो वर्षीयान्, ईयसुनि प्रियस्थिरेति (सू०) वर्षादेशः । दशमोवस्थाविशेषोस्यास्ति दशमी, वयसिपूरणात् (सू०) इतीनिः, यन्मुनिः– इष्टो वयोदशांपेनः सप्तमी दशमीति च । अतिशयेन वृद्धो ज्यायान्, ज्यच (सू०), वृद्धस्य– च (सू०) इति ज्यादेशः, ज्यादादीयसः (सू०) इत्यात्वम् । अग्रे जातोग्रियः, अग्राद्यत् (सू०), घच्छौच (सू०) इति घः । अग्र्याग्रीयौ च । अग्रिमपाठे, अग्रादिपश्चाड्डिमच् (वा०) । जघन्यजः पश्चाज्जातः । अत्यर्थं युवा कनिष्ठो यवीयांश्च, युवाल्पयोः कनन्यतरस्यां (सू०), स्थूलदूरेति (सू०) यणादिलोपः पूर्वस्य गुणः । एवं कनीयान् यविष्ठश्च । अवरे जायतेवरजः ॥ ४३ ॥ छ्यति स्म छातः, छो छेदने । मांसमस्यास्ति मांसलः, सिध्मादित्वात् (सू०) लच् । अंसावस्य स्तः (अंसलः), वत्सांसाभ्यांकामबले (सू०) इति लच् । तुन्दं पिचण्डश्चास्यास्ति, तुन्दादिभ्यइलच्च (सू०) इति चादिनिठनौ । उदरिलोपि । तुन्दिरस्यास्ति तुन्दिभः, तुन्दिवलिवटेर्भः (सू०) ॥ ४४ ॥ नतेनासिकायाःसंज्ञायांटीटञ्नाटज्भ्रटचः (सू०) । नतनासिकश्चिपिटघोणः । नतायां नासिकायां नासानमनेप्येते वर्तन्ते । प्रशस्ताः केशाः सन्त्यस्य केशवः, केशाद्वोन्यतरस्याम् (सू०) । वलिस्त्वक्संकोचोस्यास्ति, पामादित्वान्नः (लोमादिपामादीति) । (वलिभः) तुन्दिवलिवटेर्भः (सू०) ॥ ४५ ॥ पूयतेपसार्यते पोगण्डः । खर्वति खर्वः ।

विकलाङ्गस्तु पोगण्डः खर्वो ह्रस्वश्च वामनः ।
खरणाः स्यात्खरणसो विग्रस्तु गतनासिकः ॥ ४६ ॥
खुरणाः स्यात्खुरणसः प्रज्ञुः प्रगतजानुकः ।
ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात्संज्ञुः संहतजानुकः ॥ ४७ ॥
स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिः ।
पृश्निरल्पतनौ श्रोणः पङ्गौ मुण्डस्तु मुण्डिते ॥ ४८ ॥
वलिरः केकरे खोडे खञ्जस्त्रिषु जरावराः ।
जडुलः कालकः पिप्लुस्तिलकस्तिलकालकः ॥ ४९ ॥
अनामयं स्यादारोग्यं चिकित्सा रुक्प्रतिक्रिया ।
भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥ ५० ॥
स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः ।
पुमान्यक्ष्मा क्षयः शोषः प्रतिश्यायस्तु पीनसः ॥ ५१ ॥

ह्रसति ह्रस्वः । वामोस्यातीति वामनः । निखर्वः खट्टरः[नः] खर्व इति **नाममाला** । खरा तीक्ष्णा खरस्येव वा नासास्य खरणाः, खुरखराभ्यांवानस्वक्तव्यः (वा०), पक्षे– अञ्नासिकायाःसंज्ञायांनसंचास्थूलात् (सू०), पूर्वपदात्संज्ञायामगः (सू०) इति णत्वम् । नःक्षुद्रः क्षुद्रनासिकः । (विग्रः) वेर्ग्रो-वक्तव्यः (वा०) ॥ ४६ ॥ खुराकारा नासिकास्य खुरणाः—विकटघोणः । प्रगते विरले वातादिदोषात्तथो-र्ध्वे संहते च जानुनी अस्य, प्रसंभ्यांजानुनोर्ज्ञुः (सू०), ऊर्ध्वाद्विभाषा (सू०) ॥ ४७ ॥ एडपशुरिव – एडः । बद्धौ कर्णावस्य बधिरः । कुत्सित उब्जः कुब्जः, पृषोदरादिः (सू०) । गडुरस्यास्ति गडुलः, सिध्मादित्वात् (सू०) लच् । कुण शब्दे, कुपाणिः कुणिरिति **नैरुक्ताः** । कलंबकस्त्ववाक्कर्णः खलति-स्त्विन्द्रलुप्तकः । स्पृश्यते पृच्छति वा पृश्निः । (श्रोणः) श्रोणृ संघाते, कुटिलजङ्घापादः । मुण्ड्यते मुण्डः ॥ ४८ ॥ वलते चेष्टते वलिरं नेत्रं तद्योगाद्वलिरः । के मूर्ध्नि करोत्यक्षिणी चलत्तारकत्वात्केकरः, एनमुपाध्यायः काच[व]र इत्याख्यत् । (खोडः) खुड प्रतिघाते । (खञ्जः) खजि वैकल्ये । खण्डो दुश्चर्मा द्विनम्रोपि । जराशब्दादुत्तरा उत्तानशयादयः खञ्जान्तास्त्रिलिङ्गाः । जडति जडुलः, जडुलो जडत्वाद्वा । काल एव कालकः । अपिप्लवते पिप्लुः । तिलप्रतिकृतिस्तिलकः । तिल इव कालकस्तिल-कालकः, देहे कृष्णं लक्ष्म ॥ ४९ ॥ आमयस्यभावोनामयं, अव्ययंविभक्तिसमीपेति (सू०) अर्थाभावेव्ययीभावः । कितेर्व्याधिप्रतीकारे सन् । भिषज्यत्यनेन भेषजं, भिषज कण्ड्वादिः, अनन्तावसथेतिहभेषजा-दिति (सू०) निर्देशाद् गुणः, भेषं रोगं जयतीति **दुर्गः** । (औषधं) ओषधेरजाताविति (सू०) स्वार्थेण् । (भैषज्यं) अनन्तावसथेतिहभेषजाञ्ञ्यः (सू०) स्वार्थे । अविद्यमानो गदोस्मिन्नगदः । जयति रोगाञ्जायुः, कृवापाजीत्युण् (उ०) ॥ ५० ॥ रुज्यतेनया रुक्, क्विप् । (रुजा) भिदाद्यङ् (षिद् भिद दिभ्योङ्) । व्याधीयतेऽपथ्यैर्व्याधिः । गदति व्यथां गदः । आमीनात्यामयः, अम रोगेऽस्माद्वा । आमोपि । यक्ष्यते पूज्यते रोगराजत्वाद्यक्ष्मा । राजयक्ष्मापि । क्षीयतेनेन क्षयः । शुष्यत्यनेन शोषः । प्रतिश्यायते स्रवति प्रतिश्यायः, श्याद्व्यधेति (सू०) णः । पीनं स्यत्यन्तं नयति पीनसः ॥ ५१ ॥ क्षवणं क्षुत्, क्विप्, क्तः, अप् । काशतेनेन काशः । क्षौत्यनेन क्षवथुः । शवति विसर्पति

स्त्री क्षुत्क्षुतं क्षवः पुंसि कास(स)स्तु क्षवथुः पुमान् ।
शोफस्तु श्वयथुः शोथः पादस्फोटो विपादिका ॥ ५२ ॥
किलाससिध्मे कच्छ्वां तु पामा पामा विचर्चिका ।
कण्डूः खर्जूश्च कण्डूया विस्फोटः पिटकस्त्रिषु ॥ ५३ ॥
व्रणो स्त्रियामीर्ममरुः क्लीबे नाडीव्रणः पुमान् ।
कोठो मण्डलकं कुष्ठश्वित्रे दुर्नामकार्शसी ॥ ५४ ॥
आनाहस्तु विबन्धः स्याद् ग्रहणी रुक्प्रवाहिका ।
प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥ ५५ ॥
व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगंदराः ।
अश्मरी मूत्रकृच्छ्रं स्यात्पूर्वे शुक्रावधेस्त्रिषु ॥ ५६ ॥
रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सके ।
वान्तो निरामयः कल्य उल्लाघो निर्गतो गदात् ॥ ५७ ॥

शोफः शोथश्च । शूयतेनेन श्वयथुः । विपद्यतेनया विपादिका, पादशतस्य (सू०) इत्यत्रान्यत्रापीति वक्तव्याद् वुन्– लोपो वा ॥ ५२ ॥ समे इति शेषः । किलमस्यति किलासम् । सिध्यति सिध्मं मल-श्वित्राख्यम् । कषति कच्छूः । पिबत्यङ्गं पामा । (पामा) ह्वाबुभाभ्यामन्यतरस्यां (सू०) । विचर्चयति विचर्चिका, अङ्गुल्यादिसंधिषु सूक्ष्माः पिटकाः, खर्जूविशेष इत्येके । कण्डूयति कण्डूः, भावेक्विप् (संपदादिभ्यः क्विप्) । (कण्डूया) अप्रत्ययात् (सू०) । खर्जति खर्जूः, कर्ज खर्ज व्यथने । वि-स्फोटयति विस्फोटः । पटति संश्लिष्यति पेटति वा पिटका ॥ ५३ ॥ व्रणयति व्रणः । ईरयत्यङ्गमीर्मम् । इयर्त्तेरुः, उस् । नाड्या व्रणं, समासे पुंस्त्वम् । नालिश्च । कूयते शब्दते कोठः । (मण्डलकं) मण्डलाकृति कुष्ठम् । समे इति शेषः । कुष्णात्यङ्गं कुष्ठं, कुत्सितं तिष्ठति वा, अम्बाम्बगोभूमीति (सू०) षत्वम् । श्वेतते श्वित्रं श्वेतकुष्ठम् । पापरोगत्वाद् दुर्नामकम् । इयर्त्यर्शः । गुदजं गुदकीलकं च ॥ ५४ ॥ आनहनं विण्मूत्रनिरोधः । गृह्णाति ग्रहणी, जाठरोग्निर्गृह्यतेनया वा तच्छैथिल्यात् । रुग्रोगः । मलप्रवहणं प्रवाहिका, रोगाख्यायांण्वुल् (सू०) । प्रच्छर्दनं प्रच्छर्दिका, रोगाख्यायांण्वुल् (सू०) । वमनं वमिः । छर्दिश्छर्दी च ॥ ५५ ॥ विद्रात्यनया विद्रधिः, विद्रो धीयतेस्यां वा । मेहति मूत्रयतेनेन मेहः । प्रमेहोपि, दीपप्रदीपवत् । भगं दारयति भगंदरः स्फिक्संधौ पिटकं, पूःसर्वयोर्दारिसहोः (सू०) इत्यत्र भगेच दारेर्वक्तव्यात् (वा०) खच् । श्लीपदं पादवल्मीकं केशघ्नं त्विन्द्रलुप्तकम् । व्याधिभेद इत्येव । अश्मानं शुक्रं रात्यश्मरी । शुक्रात्पूर्वे मूर्च्छितान्ता वाच्यलिङ्गा ॥ ५६ ॥ अगदः क्रियतेनेनागदंकारः, कारेस-त्यागदस्य (सू०) इति मुम् । भिषज्यति भिषक् । विद्यामर्धते वेद वा वैद्यः । आद्यौ सामान्येनौषधा-द्यावपीत्येके । वमति वान्तः, वार्त्त इति तु युक्तं, यद्वक्ष्यति– वार्त्तं फल्गुन्यरोगे च त्रिषु, वृत्तिरस्यास्ति, प्रज्ञाश्रद्धार्चावृत्तिभ्योणः (सू०) । कलासु साधुः कल्यः । उल्लाघ्यते स्मोल्लाघः, क्तः, अनुपसर्गात्फुल्लेति (सू०) साधुः ॥ ५७ ॥ ग्लायति स्म ग्लानः, संयोगादेरातोधातोः (सू०) इति निष्ठा नत्वम् ।

ग्लानग्लास्नू आमयावी विकृतौ व्याधितोऽपटुः ।
आतुरोऽभ्यमितोऽभ्यान्तः समौ पामनकच्छुरौ ॥ ५८ ॥
दद्रुणो दद्रुरोगी स्यादर्शोरोगयुतोऽर्शसः ।
वातकी वातरोगी स्यात्सातिसारोऽतिसारकी ॥ ५९ ॥
स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्षिण चाप्यमी ।
उन्मत्त उन्मादवति श्लेष्मलः श्लेष्मणः कफी ॥ ६० ॥
न्युब्जो भुग्ने रुजा वृद्धनाभौ तुण्डि(न्दि)लतुण्डि(न्दि)भौ ।
किलासी सिध्मलोऽन्धोऽदृग्मूर्च्छालो मूर्तमूर्च्छितौ ॥ ६१ ॥
शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च ।
मायुः पित्तं कफः श्लेष्मा स्त्रियां तु त्वगसृग्धरा ॥ ६२ ॥

ग्लायति तच्छीलो ग्लास्नुः, ग्लाजिस्थश्चग्स्नुः (सू०)। आमयोऽस्यास्त्यामयावी, सर्वत्रा–आमयस्योपसंख्यानाद्दीर्घश्च (वा०)। व्याधिः संजातोऽस्य व्याधितः। अपटुर्मन्दः। आतोरत्यातुरः, आतरति रोगं वा। अभितोऽम्यते स्माभ्यान्तः (अभ्यमितश्च), रुष्यमत्वरेति (सू०) वेट्। संवातमृत्युर्मरकं[को] मारिर्मारी च देवतेति **श्रीहर्षः**। पामास्यास्ति पामनः, पामर इत्येके, द्वावपीति **श्रीभोजः**। [कच्छूरस्यास्ति] कच्छुरः, कच्छ्वाहस्वत्वंच (वा०) इति रः ॥ ५८ ॥ (दद्रुणः) पामादित्वाच्छाकीपलालीदद्र्वांह्रस्वश्च (ग०) इति नः। दीर्यन्तेनया दद्रुः। अर्शांसि सन्त्यस्यार्शसः, अर्शआदिभ्योच् (सू०)। वातो विद्यतेऽस्य वातकी, वातातिसाराभ्यांकुक्च (सू०) इतीनिः। एकदेशे विकृतत्वादतीसारक्यपि ॥ ५९ ॥ क्लिन्नस्यचुल्चिल्पिल्लश्चास्यचक्षुषीति वक्तव्यात् (वा०) साधवः। चक्षुःक्लेदेपि, तेन चक्षुर्गतः क्लेदश्चुल्लो नाम रोगः, तद्योगाच्चुल्लं चक्षुः, चुल्लचक्षुष्ट्वाच्चुल्लः पुमान्। उन्मादो वातभूतादिदोषाच्चित्तविभ्रमः। श्लेष्मास्यास्ति, सिध्मादित्वाल्लच् (सू०)। (श्लेष्मणः) पामादित्वान्नः (लोमादिपामादीति ॥६०॥ न्युब्जनं न्युब्जः, घञ्, भुजन्युब्जौपाण्युपतापयोः (सू०) इति साधुः। भुग्नः कुब्जः, न्युब्जेन पाणिगतेन भुग्नत्वेन योगाद् न्युब्जः पुमान्, **यच्छाश्वतः**– विद्याद्धोगतं न्युब्जं न्युब्जः कुब्ज उदाहृतः। तुण्डिरुन्नतनाभिः, तुन्दिस्तु जठरं, इलच् (तुन्दादिभ्यइलच्)। (तुण्डिभः) तुन्दिवलीति (सू०) भश्च, एकदेशविकृतत्वात्। (सिध्मलः) सिध्मादित्वाल्लच् (सू०)। अन्धोऽदृक्, अन्ध दृष्टयुपसंहारे। नास्ति दृगस्यादृक्। मूर्च्छास्त्यस्येति (मूर्च्छालः), प्राणिस्थादातोलच् (सू०), क्षुद्रजन्तूपतापाच्चेष्यते (ग०)। मूर्च्छति मूर्तः, राल्लोपः (सू०) इति छलोपः, नध्याख्येति (सू०) नत्वाभावः। मूर्च्छा संजातास्य मूर्च्छितः, चुरादिमूर्च्छेः क्तो वा ॥ ६१ ॥ शोकति स्रवति शुक्रम्। तेजयति तेजः असुन्। रीयते रेतः, रीङ् स्रवणे। बीज्यते वेति वा बीजं, बीजिर्लौकिकः। वीरेऽक्लीबे साधु वीर्यम्। इन्द्रस्यात्मनो लिङ्गमितीन्द्रियं, इन्द्रियमिन्द्रलिङ्गमिति (सू०) साधुः। मिनोति मलान् स्रंसकत्वात् स्नायुः। पतति स्रंसते पित्तम्। कात्फलति कफः। श्लिष्यति श्लेष्मा। (त्वक्) त्वच संवरणे असृजो धरा (असृग्धरा) ॥ ६२ ॥ (पिशितं) पिश अवयवे। तरो बलमस्त्यस्य तरसं, तरन्त्यनेन

पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।
उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम् ॥ ६३ ॥
रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम् ।
बुक्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा ॥ ६४ ॥
पश्चाद्ग्रीवासिरा मन्या नाडी तु धमनिः सिरा ।
तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम् ॥ ६५ ॥
अन्त्रं पुरीतद् गुल्मस्तु प्लीहा पुंस्यथ वस्नसा ।
स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे ॥ ६६ ॥
सृणिका स्यन्दिनी लाला दूषिका नेत्रयोर्मलम् ।
मूत्रं प्रस्राव उच्चारावस्करौ शमलं शकृत् ॥ ६७ ॥
पुरीषं गूथं वर्चस्कमस्त्री विष्ठाविषौ समौ ।
स्यात्कर्परः कपालोऽस्त्री कीकसं कुल्यमस्थि च ॥ ६८ ॥

कार्श्यं वा । मन्यते मांसं, मांसभक्षयितामुत्रेति **नैरुक्ताः** [मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वे निरुक्तं मुनिरब्रवीदिति नैरुक्ताः]। पाल्यतेनेन देहः पललं, यच्छाश्वतः– फललं तिलमिश्रे स्यात्पलल पिशितेपि च । क्रवते (क्रूयते) क्रव्यं, क्रुङ् गतौ । आमिष्यत आमिषम् । जाङ्गलं च, पलं नानार्थे । उत्तप्यते शोष्यते– उत्तप्तम् । वलं लुनाति वल्लूरं, वल्लिः सौत्रो वा ॥ ६३ ॥ रुणद्धि स्रोतांसि रुधिरम् । अस्यते न सृज्यते वासृक् । लोहितं रक्तं च वर्णतः । अस्यतेस्रम् । शोणति शोणितं, शोणृ वर्णे । वुक्कयते स्वादुत्वान्मृग्यते वुक्का, नान्तः पुंस्ययं, स्त्रीत्येके, वृक्केति **वैद्याः** । अग्रं मुख्यम् । ह्रियते हृत्– जीवाधारं पद्मं, दान्तं प्रकृत्यन्तरम् । मेद्यति स्निह्यति मेदः, असन्तत्वात्क्लीबे । उप्यते वपा । वस्ते मांसं वसा, शुद्धमांसस्य यः स्नेहः सा वसेति **वैद्याः** ॥ ६४ ॥ पश्चाद्भागे ग्रीवायाः कृकाटिकायां सिरा, मन्यते मन्या, संज्ञायांसमजनिषदेति (सू०) क्यप् । नडस्येयं नाडी सौषीर्यात् । धमति धमनिः, धमिः सौत्रः । सिनोति कायं सिरा, षिञ् बन्धने । तिलति तिलकम् । क्लाम्यति क्लोम, उदर्यो जलाधारः । हृदयस्य दक्षिणे यकृत्क्लोम वामे प्लीहा पुप्फुसश्चेति **वैद्याः** । मस्तकमज्जा, मस्तकमिष्यतीति मस्तिष्कं, इष गतौ । गुर्द्यते गोर्दं, गुर्द परिवेष्टने । केटति किट्टम्, किट गतौ । मलते धारयति कायं मलः ॥ ६५ ॥ अमत्यनेनान्नमन्त्रम् । पूर्यते पुरीतत्, तान्तोयम् । गुड्यते रक्ष्यते मा वाधिष्टेति गुल्मः । प्लेहते प्लीहा, नान्तः । वस्ते छादयति कायं वस्नसा । स्नसा स्न[न]हारुश्च । स्नायत्यङ्गं स्नायुः, ष्णै वेष्टने । महास्नायुश्च कण्डरा, स्नायुसंघात इति **वैद्याः** । दक्षिणपार्श्वे कृष्णमांसांशः कालखण्डम्, कालखञ्जमित्येके । यमं करोति यकृत् ॥ ६६ ॥ सरति सृणिका । स्यन्दते स्यन्दिनी । ललति लाति वा लाला । दूषयत्यक्षि दूषिका, दूषीकापि । (प्रस्रावः) प्रेद्रुस्तुस्रुवइति (सू०) घञ् । उच्चार्यते प्रेर्यते– उच्चारः । अवाधः कीर्यत इति, वर्चस्केवस्करइति (सू०) साधुः । शाम्यति शमलम् । शक्नोत्यनेन शकृत् ॥ ६७ ॥ पिपर्त्यन्त्रं पुरीषम् । गूयत उत्सृज्यते गूथम् । वर्च एव वर्चस्कम् । वितिष्ठतेनया विष्ठा । वेवेष्टि विट्, विशतीति **सभ्याः** । कल्पते कर्परः, कृपे रो लो नास्ति बाहुलकात् । कं पालयति कपालं मूर्धास्थि, घटादिखण्डोऽप्युपचारात् । कीति कसति कीकसम् । कुले शरीरे साधु कुल्यं, कोलति संस्त्यायते वा । अस्यतेऽस्थि ॥ ६८ ॥ कं कालयति कङ्कानलति वा कंकालः, देहरम्भकोऽस्थिपञ्जरः । करङ्कोऽपि । कशारुकेति

स्याच्छरीरास्थि कङ्कालः पृष्ठास्थ्नि तु कशेरुका ।
शिरोस्थनि करोटिः स्त्री पार्श्वास्थनि तु पर्शुका ॥ ६९ ॥
अङ्गं प्रतीकोवयवोपघनोथ कलेवरम् ।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ ७० ॥
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ।
पादाग्रे प्रपदं पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् ॥ ७१ ॥
तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णिरधस्तयोः ।
जङ्घा तु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियाम् ॥ ७२ ॥
सक्थि क्लीबे पुमानूरुस्तत्संधिः पुंसि वङ्क्षणः ।
गुदं त्वपानं पायुर्ना वस्तिर्नाभेरधो द्वयोः ॥ ७३ ॥
कटो ना श्रोणिफलकं कटिः श्रोणिः ककुद्मती ।
पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः ॥ ७४ ॥
कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे ।
स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः ॥ ७५ ॥

मुनिः, कश्यत इति । पृष्ठग्रन्थौ गडुः पुमान् । के रटति करोटिः करोटी च । पूर्यते पर्शुः, पर्शुरेव पर्शुका ॥ ६९ ॥ अङ्गत्यङ्गम् । प्रत्येति प्रतीकः । अवयौत्यवयवः । अपहन्यतेपघनः, अपघनोङ्ग मिति (सू०) साधुः । कल्यते कलेवरम् । गाते गच्छति गात्रम् । उप्यते वपुः । संहन्यते संघात्यन्तस्मिन्नङ्गानि संहननम् । शीर्यते शरीरम् । वृष्यते सिच्यते वर्षति मलान्वा वर्ष्म । विगृह्यते विग्रहः, ग्रहवृद– इति (सू०) अप् ॥ ७० ॥ चीयते कायः, निवासाचितिशरीरोपसमाधानेष्वादेश्चकः (सू०) । दिह्यते देहः । मूर्च्छति वर्धते मूर्तिः । तन्यते तनुः । प्रारम्भः पदस्य प्रपदं, पदशब्दः पादपर्यायोस्ति । पद्यतेनेन पादः । पदिति लक्ष्यलक्षणयार्नास्ति, यस्तु गौः पदा न स्प्रष्टव्या, पद्भ्यामेव यथातथेत्यादौ स पद्दन्नोमासिति (सू०) पदादेशः, अतः पदोङ्घ्रिरिति पाठ्यम्, क्रमे तु पदम् । अंहत्यनेनाङ्घ्रिः । चरत्यनेन चरणः ॥ ७१ ॥ पादग्रन्थी पार्श्वनिःसृते, घोटते घुटिका, घुट परिवर्तने । गुञ्ज्यते गुल्फः । गुल्फाधः पश्चाद्भागः पार्ष्णिः, पुमानिति प्रायिकं, पृष्यते स्नेह्यते विपादिका चिकित्सार्थं पार्ष्णिः । जङ्घन्यते कुटिलं गच्छति जङ्घा । प्रसरति प्रसृता । जायते जानु । ऊर्वोः पर्व ग्रन्थिः । अस्थि विद्यतेत्राष्ठीवत्, आसन्दीवदष्ठीवदिति (सू०) साधुः ॥ ७२ ॥ सजति सक्थि । ऊर्वत्यूरुः । वस्त्यध ऊरुसंधिः, वङ्क्षते वङ्क्षणः । गवते गूयते वानेन गुदम्, गुद परिवेष्टने वा । अपानित्यनेनापानम् । पाति मलोत्सर्गात्पायुः, पिबति वा स्नेहम् । वसत्यस्मिन्मूत्रं वस्तिर्मूत्रपुटकम् ॥ ७३ ॥ कट्यत आव्रियते कटः, शवे श्रोणौ कालिञ्जे च गजगण्डे भृशे कट इति **शाश्वतः** । कटीरोपि । श्रोण्यते संहन्यते श्रोणिः, तस्याः फलकमिव– ककुत्पार्श्वनिःसृतांशोस्त्यस्याः ककुद्मती । कट्याः पश्चाद्भागः, निताम्यति सुरतसंमर्दान्नितम्बः । स्त्रीकट्याः पुरो भागः, हन्यते जघनम् ॥ ७४ ॥ कुत्सितं कुं दृणाति कुकुन्दरं, द्वयहीने क्लीबे । स्फायते स्फिक् । प्रथत उद्भिद्यते प्रोथः । प्रोहोपि । (उपस्थः) वक्ष्यमाणौ भगशिश्नौ ॥ ७५ ॥ भज्यते भगं,

भगं योनिर्द्वयोः शिश्नो मेढ्रं मेहनशेफसी ।
मुष्कोऽण्डकोशो वृषणः पृष्ठवंशाधरे त्रिकम् ॥ ७६ ॥
पिच(चि)ण्डकुक्षी जठरोदरं तुन्दं स्तनौ कुचौ ।
चु(चू)चुकं तु कुचाग्रं स्यान्न ना क्रोडं भुजान्तरम् ॥ ७७ ॥
उरो वत्सं च वक्षश्च पृष्ठं तु चरमं तनोः ।
स्कन्धो भुजशिरोंऽसोऽस्त्री संधी तस्यैव जत्रुणी ॥ ७८ ॥
बाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः ।
मध्यमं चावलग्नं च मध्योऽस्त्री द्वौ परौ द्वयोः ॥ ७९ ॥
भुजबाहू प्रवेष्टो दोः स्यात्कफो(पो)णिस्तु कूर्परः ।
अस्योपरि प्रगण्डः स्यात्प्रकोष्ठस्तस्य चाप्यधः ॥ ८० ॥
मणिबन्धादाकनिष्ठं करस्य करभो बहिः ।
पञ्चशाखः शयः पाणिस्तर्जनी स्यात्प्रदेशिनी ॥ ८१ ॥
अङ्गुल्यः करशाखाः स्युः पुंस्यङ्गुष्ठः प्रदेशिनी ।
मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ॥ ८२ ॥

(खनोघचेत्यत्र) खलो भगःपदमितिवक्तव्याद्घः (ज्ञा०)। यौति योनि। स्त्रीचिह्नं स्मरगृहं च। शिनोति घर्षति भगं शिश्नः, शेफ[प] श्च। मेहत्यनेन मेढ्रम्। मुष्णाति गोपायति शुक्रं मुष्कः। अण्डयोः कोशोऽण्डकोशः। वर्षति शुक्रं वृषणः। पेलश्च। पृष्ठास्थ्नोध ऊर्वोः संधौ त्रिसंघट्टस्त्रिकम् ॥ ७६ ॥ प्रचत्यन्नं पिचण्डः, अपिचमत्याहारं वा। कुष्यते कुक्षिः। जमत्याहारं जठरम्। उदीर्यति(दियर्ति) उदरम्। तुदति तुन्दं, तुन्दिश्च। स्तन्येते बालैः स्तनौ। कूयेते कुच्येते वा कुचौ। वक्षोरुहौ उरोसजौ च। चुचिवत्यव्यक्तं कायति पीयमानं चुचुकम्। (क्रोडं) कुड घनत्वे, ना पुंलिङ्गं न भवति। वक्षोमध्याद्भिन्नास्थि क्रोडा ॥ ७७ ॥ उरस्यति सहते– उरः, उरस् कण्ड्वादिः। वस्यते छाद्यते वत्सम्। (वक्षः) वक्ष संघाते, असुन्। पञ्च (क्रोडादयः) एकार्था इत्येके। पृष्यते सिच्यते पृष्ठं देहस्य पश्चाद्भागः, पश्चान्मात्रे तूपचारात्। स्कन्धते भारेण स्कन्धः। अस्यते भारेणांसः। अंसकक्षयोः सन्धिरुद्भिन्नास्थि, जायते जत्रु ॥ ७८ ॥ कष्यते कक्षौ, यन्तावपि कक्ष्यौ। (पार्श्वं) पर्शूणसवक्तव्यः (वा०), पार्श्वे इति द्विवचनं न्याय्यम्। मध्ये भवं मध्यमं, मध्यान्मः (सू०)। अवलगत्यवलग्नमतिकृशत्वात्। विलग्नं च। मन्यते मध्यम्। परौ भुजो बाहुश्च ॥ ७९ ॥ भुज्यतेनया भुजा, भुजन्युब्जाविति (सू०) साधुः। वहति वाहते प्रयतते वा बाहुः, वाहृ प्रयत्ने। प्रवेष्टते प्रवेष्टः। द्यति ददाति वा दोः, सान्तः। कं फणति कफोणिः। कुरति कूर्परः, बाहूपबाहुसंधेररत्निसंज्ञस्य पश्चाद्भागः, तथा च– कफोणिः कूर्परोऽरत्नेः पृष्ठमिति **नाममाला**। अस्य कूर्परस्योर्ध्वं, प्रगण्यते प्रगण्ड्यते वा प्रगण्डो बाहुः। कूर्परस्याधः, प्रकुष्यते प्रकोष्ठ उपबाहुः, यत्**कात्यः**– प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः ॥ ८० ॥ मणेर्बन्धोत्र मणिबन्धो भुजपाण्योः संधिः। तस्मादारभ्याकनिष्ठायाः करभः, करे भातीति आङभिविधौ (सू०)। शेतेस्मिन्सर्वं शयः, शम इत्येके, **नाममाला** तूभयं पपाठ– पाणिः शमः शयो हस्त इति। पणन्तेनेन पाणिः। हस्तकरौ नानार्थे। मणिबन्धः पाणिमूले। तर्जयत्यनया तर्जनी। प्रदिशत्यवश्यं प्रदेशिनी ॥ ८१ ॥ अङ्गुं पाणिपादं लात्यङ्गुली। अङ्गौ तिष्ठत्यङ्गुष्ठः, सुपिस्थइति (सू०) कः, अम्बाम्बगोभूमीति (सू०) षत्वम्। अनामिका नामग्रहणायोग्या, ब्रह्मणोनया शिरश्छेदनादत एवास्यां पवित्रं क्रियते। कनिष्ठात्यल्पा। ता अङ्गुष्ठाद्याः पञ्चाङ्गुल्यः ॥ ८२ ॥ नास्ति खमस्य नखः, नभ्राण्नपादिति

पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।
प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥ ८३ ॥
अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः ।
पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ॥ ८४ ॥
द्वौ संहतौ सिंहतलप्रतलौ वामदक्षिणौ ।
पाणिर्निकुब्जः प्रसृतिस्तौ युतावञ्जलिः पुमान् ॥ ८५ ॥
प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्या तु बद्धया ।
स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥ ८६ ॥
व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् ।
ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु ॥ ८७ ॥
कण्ठो गलोथ ग्रीवायां शिरोधिः कन्धरेत्यपि ।
कम्बुग्रीवा त्रिरेखा सावटुर्घाटा कृकाटिका ॥ ८८ ॥
वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।
क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ॥ ८९ ॥

(सू०) साधुः, न खनति याति वा । नखं राति नखरः, न खन्यते वा, डडरेकवक्का (खनेर्डडरेकेकव-कावाच्याः) । पुनर्नवः कररुह इत्येके पेठुः । त्रिभुवनचरणत्वाभावः । कामाङ्कुशोपि । तर्जन्या युते तते प्रसारितेऽङ्गुष्ठे मध्यं, प्रादिश्यते प्रादेशः । मध्यमया युतेऽङ्गुष्ठे तते तालः, तल प्रतिष्ठायाम् । अनामिकया युते ततेऽङ्गुष्ठे, गोकर्णाकृतिर्गोकर्णः ॥ ८३ ॥ सह कनिष्ठया ततेऽङ्गुष्ठे वितस्तिः, वितस्यतीति । दिष्टिश्च । द्वादशाङ्गुल इति सिद्धस्यानुवादः । चप्यतेनेन चपेटः, चपेटापि । प्रसृतं तलमस्य प्रतलः । प्रसृतो हस्तोस्य प्रहस्तः ॥ ८४ ॥ द्वौ प्रसृततलौ संहतौ सिंहतलाख्यौ, सिंहो हि मिलिताभ्यां चपेटाभ्यां हन्ति, संहतलो वा- इत्येके संहतं संघट्टं लातीति । संकुचितो हस्तस्तालादिना, प्रस्रियत इति प्रसृतः. प्रसृतिश्च । निकुञ्ज इत्यपपाठः । प्रकुब्जस्त्वर्धप्रसृतिः । तौ युतौ प्रसृतौ पार्श्वश्लिष्टौ लौकिकोञ्जलिः, अङ्क्ते(अज्यते)नेनेति, अम्यते जलमनेनेति **नैरुक्ताः** । नाट्ये तु- पताकाभ्यां तु हस्ताभ्यां संश्लेषादञ्जलिः स्मृतः ॥ ८५ ॥ बाहौ(प्रकोष्ठे) प्रसारितपाणौ हस्तश्चतुर्विंशत्यङ्गुलं मानम् । स हस्तः, रत्नेः पुंस्त्वार्थो वा । रमन्तेस्मिन्मल्ला रत्निः, सह रत्न्या मुष्ट्या वर्तत इत्येके । नास्ति रत्निर्मुष्टिरस्यारत्निः, निष्क्रान्ता कनिष्ठास्मिन्निष्कनिष्ठो मुष्टिस्तेनोपलक्षितः स हस्तोऽरत्न्याख्यः ॥ ८६ ॥ व्यामीयते रज्ज्वाद्यनेन व्यमति वा व्यामः, स्वे स्वे पार्श्वे प्रसारितयोर्बाह्वोर्मध्यम् । ऊर्ध्वं विस्तृतौ दोःपाणिश्च नुः पुंसो यत्र तन्मानमध्ये पौरुषं नाम मानम्, पुरुषोर्ध्वमानं तत्पौरुषमित्येके, पुरुषहस्तिभ्यामण्च (सू०) । द्वादशाङ्गुलं तु पौरुषं छायामानम् ॥ ८७ ॥ कणति कण्ठते वा कण्ठः । गिलति गलो ग्रीवाग्रभागः । गृणाति गिरति वा ग्रीवा । शिरो धीयतेस्यां शिरोधिः । कं धारयति कंधरा, संज्ञायां- भृतॄवृजीति (सू०) खच् । शंखाकृतिर्ग्रीवा कम्बुग्रीवाख्या, असौ त्रिवलया चेति । न वटत्यवति वावटुः । घटयति घाटा । कृकं शिरोग्रीवमटति कृकाटिका ग्रीवापश्चाद्भागः ॥ ८८ ॥ उच्यतेनेन वक्त्रम् । अस्यतेस्मिन्नास्यम्, कृत्यल्युटोबहुलं (सू०) इति ण्यत्, मुखं मुखान्तरालं च द्वयमास्यमिति **शाश्वतः** । उद्यतेनेन वदनम् । तुण्ड्यतेनेन तुण्डं, तुडि तोडने । अनिति श्वसित्यनेनाननम् । लप्यतेनेन लपनम् । खन्यतेनेन मुखं, डित्खनेर्मुट्सचोदात्तः (उ०), मुदितानि खान्यत्रेत्येके । जिघ्रत्यनेन घ्राणम् । घोणति भ्रमति गन्धार्थं घोणा । "नासते नासिका, कुल्या गन्धवहा घोणा घ्राणं नासा च नासिकेति **मुनिः** कुल्यामप्याह । सिङ्घा[घि]णी च ॥ ८९ ॥" उच्यते तीक्ष्णाहारेणौष्ठ इत्युभयार्थोपि- अधरसान्निध्यादुत्तरौ-

ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ।
अधस्ताच्चिबुकं गण्डौ कपोलौ तत्परो हनुः ॥ ९० ॥
रदना दशना दन्ता रदास्तालु तु काकुदम् ।
रसज्ञा रसना जिह्वा प्रान्तावोष्ठस्य सृक्किणी ॥ ९१ ॥
ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियाम् ।
कूर्चमस्त्री भ्रुवोर्मध्यं तारकाक्ष्णः कनीनिका ॥ ९२ ॥
लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।
दृग्दृष्टी चास्रु नेत्राम्बु रोदनं चास्रमश्रु च ॥ ९३ ॥
अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने ।
कर्णशब्दग्रहौ पुंसि श्रुतिः स्त्री श्रवणं श्रवः ॥ ९४ ॥
उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।
चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ॥ ९५ ॥
तद्वृन्दे कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः ।
ते ललाटे भ्रमरकाः काकपक्षः शिखण्डकः ॥ ९६ ॥

ष्ठेत्र वर्तते । अधो भवोऽधरः । ओष्ठाभ्यां सहितावधरौ वा, अधरोऽप्योष्ठमात्रे वर्तते । ओष्ठाभः, चीयते चिबुकं हन्वग्रसंधिः । गण्डति संहन्यते गण्डः । कम्पते कपोलः । तदधो गल्लः । तत्परस्तस्मात्कृ गे कपोलाधः, हन्त्याहारं हनुः, पुंस्यपि ॥९०॥ रद्यते विलिख्यतेमीभी रदनाः । दश्यते दम्यते चाभीभिर्दशना दन्ताश्च । रदन्ति लिखन्ति रदाः । तलत्याहारोऽस्मिंस्तालु । ईषत्कवते काकुं ददाति वा काकुदम् । रस्य-तेनया रसना । लेढि जिह्वा । लोला च । घण्टिकान्तर्गलशुण्डिका । ओष्ठस्येति जातावेकवचनम् । सृजति लालां सृक्कि, सृक्कणी इत्यपि कचित्कनन्तत्वात् ॥ ९१ ॥ ललत्यलालंकारः, ललश्चटुलस्तिलकोऽत्यस्य वा ललाटम् । अल्यते भूष्यतेलिकं, अलीकं च । गुध्यते पट्टादिना वेष्ट्यते गोधिः । भालं च । भ्रमति भ्रूः, नेत्रोर्ध्वे रोमराजिः । कूर्ममिति भागुरिः, तत्र, लक्ष्यादर्शनात्, एवं कूर्चम् । तारयति तमसस्तारका, तारकाज्योतिषीतीत्वाभावः (वा०) । अक्ष्ण इति खेचरीव्यवच्छेदः । (कनीनिका) कनी दीप्तौ ॥९२॥ लोच्यतेनेन लोचनं विलोचनं च । नीयतेनेन दृश्यं नयनं नेत्रं च । ईक्ष्यतेनेनेक्षणम् । चष्टे वक्ति चक्षुः । अक्ष्णोत्यक्षि, द्वन्द्व च्चक्षुः क्लीबे । दृश्यतेनया दृक्, द्वन्द्वात्स्त्रियाम् । अस्यतेस्रु, अस्रं च । अश्नुत आकण्ठ-मश्रु । बाष्पो नानार्थे ॥ ९३ ॥ बाह्याविति शेषः । अपकृष्टावङ्गादपाङ्गौ । कटे क्षिपति कटाक्षः, अपा-ङ्गेन दर्शनं यत्र, नेत्रविभागाख्यम् । कीर्यते शब्दोऽस्मिन्कर्णः । शब्दस्य ग्रहोनेन शब्दग्रहः । श्रूयतेनया श्रुतिः । शृणोति श्रवः, असन्तः क्लीबे । श्रोत्रं च ॥ ९४ ॥ शीर्यते जरसा शिरः । एवं कुमारशीर्षयो-र्णिनिः (सू०) इति लिङ्गाच्छीर्षं प्रकृत्यन्तरम् । मूर्च्छति मूर्धा, पुमान् । मस्यति परिणमते मस्तकम् । कं वराङ्गं च नानार्थे । चीयते चिकुरः, चिहुरः प्राकृते कस्य हादेशात्, संस्कृतेपीति दुर्गः— कुन्तला मूर्धजाः स्रस्ताश्चिकुराश्चिहुराः कचा इति । कुन्ताकारं लाति कुणति वा कुन्तलः । वल्यते वालः, ज्वला-दित्वण्णो वा (ज्वलितिकसन्तेभ्योणः) । कचति कचः । के शेते केशः । शिरसिजश्च ॥ ९५ ॥ केशानां समूहे, अचित्तहस्तिधेनोष्ठक् (सू०), केशाश्वाभ्यांयञ्छावन्यतरस्याम् (सू०) । अल्यन्ते भूष्यन्तेलकाः । चूर्णकाख्याः केशाः (चूर्णकुन्तलाः), चर्चराख्याः । कुरलाश्च भ्राम्यन्ति भ्रमरप्रतिकृतयो वा (भ्रमरकाः) । काकस्येव पक्षः । शिखत्र डयते शिरसि खण्डयते वा शिखण्डकः । क्षत्रियाणां चूडा काकपक्ष इति गौडः ॥ ९६ ॥ कुणन्तो,कं वृणोति वा कवरी, जानपदकुण्डगोणेति (सू०) ङीष् । केशरचना ।

कवरी केशवेषो(शो)थ धम्मिल्लः संयताः कचाः ।
शिखा चूडा केशपाशी व्रतिनस्तु सटा जटा ॥ ९७ ॥
वेणिः प्रवेणी शीर्षण्यशिरस्यौ विशदे कचे ।
पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥ ९८ ॥
तनूरुहं रोम लोम तद्वृद्धौ स्म(श्म)श्रु पुंमुखे ।
आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ॥ ९९ ॥
दशैते त्रिष्वलंकर्तालंकरिष्णुश्च मण्डितः ।
प्रसाधितोलंकृतश्च भूषितश्च परिष्कृतः ॥ १०० ॥
विभ्राड् भ्राजिष्णुरोचिष्णू भूषा तु स्यादलंक्रिया ।
अलंकारस्त्वाभरणं परिष्कारो विभूषणम् ॥ १०१ ॥
मण्डनं चाथ मुकुटं किरीटं पुंनपुंसकम् ।
चूडामणिः शिरोरत्नं तरलो हारमध्यगः ॥ १०२ ॥
वालपाश्या पारितथ्या पत्त्रपाश्या ललाटिका ।
कर्णिका तालपत्त्रं स्यात्कुण्डलं कर्णवेष्टनम् ॥ १०३ ॥

संयता बद्धाः । ऊर्ध्वं मिलति धम्मिल्लो जूटाख्यः, धमिः सौत्रो वा । धम्मेल्ल इति सभ्याः । शेते मूर्ध्नि शीय(शय्य)ते वा शिखा, शीङोह्रस्वश्च (उ०) । चोद्यते चूडा । प्रशस्ताः केशाः केशपाशी । शिखेत्येव, (सटा) षट अवयवे । (जटा) जट संघाते ॥ ९७ ॥ (वेणिः) वेञ् गतौ । शिरसि भवः शीर्षण्यः, शरीरावयवाच्च (सू०) इति यत्, ये चतद्धिते (सू०) इत्यत्र वाकेशेष्विति (वा०) शिरसः शीर्षन् वक्तव्यः । विशदेन्योन्यासंपृक्ते–अविकृते स्नानादिनिर्मले वा, शद्लृ शातने । कचादित्यर्थनिर्देशः, केशपाशः, केशपक्षः, केशहस्तः, प्रशंसावचनैश्च (सू०) इति समासः ॥ ९८ ॥ शिरसोन्यत्र रोहति रोम । रलयोरैक्याल्लोम, लूयते वा । पुरुषमुखे रोमवृद्धिः, समश्नुते स्मश्रु । दाढिकापि । व्यञ्जनं नानार्थे । आकल्प्यत आकल्पः । वेवेष्टयङ्गं वेषः, विशति चेतसीत्येके तालव्यं शमाहुः, कर्मवेशाद्यत् (सू०) इत्यत्र तथा विचारात् । नेत्रयोः पथ्यं (नेपथ्यं) वस्त्रादिशोभा । प्रत्यङ्गं कर्म प्रतिकर्म । प्रसाध्यतेनेनाङ्गं प्रसाधनम् । पञ्चैकार्था इत्येके तच्चासत्, वेषो हि वस्त्रालंकारमाल्यप्रसाधनैरङ्गशोभा, प्रसाधनं तु समालम्भनं तिलकपत्त्रभङ्गादिना ॥ ९९ ॥ एते वक्ष्यमाणा रोचिष्ण्वन्ताः । (अलंकरिष्णुः) अलंकृञ्निराकृञिति (सू०) इष्णुच् । परिष्क्रियते स्म, संपर्युपेभ्यइति (सू०) सुट् ॥ १०० ॥ भ्राजते तच्छीलो भ्राजिष्णुः, भुवश्च (सू०) इति चाद् (भ्राजतेः) इष्णुच् । (अलंक्रिया) अलंकारसाध्या शोभा । करणे घञ्ल्युटौ ॥ १०१ ॥ मौलिर्नानार्थे । मुखे कुट्यते मुकुटं, मङ्क्यतेनेन वा (मकुटं) । कीर्यते किरीटम् । कोटीरं च । मणिरिति शेषः, तरतीव तरलः । नायको नानार्थे ॥ १०२ ॥ वालपाशे साधुर्वालपाश्या, वालबन्धनार्थं मुक्तावलयः, उत्फुल्लतिकादि, वालेषु पाशसमूहो वा । परितस्तथा भवा पारितथ्या, पार्यां तथ्या वा, सीमन्तादिः । पत्त्रपाशानां समूहः पत्त्रपाश्या । ललाटस्यालंकारो ललाटिका, कर्णललाटात्कनलंकारे (सू०) । कर्णालंकारस्तालपत्त्रवत्सौवर्णादि । कुण्डं लाति वृत्तत्वात्कुण्डलम् । कर्णौ वेष्ट्यतेनेन कर्णवेष्टनम् । भिन्नरूपास्त्रयः कर्णालंकारा इत्येके ॥ १०३ ॥ ग्रीवाया अलंकारो ग्रैवेयकं,

ग्रैवेयकं कण्ठभूषा लम्बनं स्याल्ललन्तिका ।
स्वर्णैः प्रालम्बिकाथोरःसूत्रिका मौक्तिकैः कृता ॥ १०४ ॥
हारो मुक्तावली देवच्छन्दोऽसौ शतयष्टिकः ।
हारभेदा यष्टिभेदाद् गुच्छ(त्स)गुच्छा(त्सा)र्धगोस्तनाः ॥ १०५ ॥
अर्धहारो माणवक एकावल्येकयष्टिका ।
सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥ १०६ ॥
आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम् ।
केयूरमङ्गदं तुल्ये अङ्गुलीयकमूर्मिका ॥ १०७ ॥
साक्षराङ्गुलिमुद्रा सा कङ्कणं करभूषणम् ।
स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना स्त्रियाम् ॥ १०८ ॥
क्लीबे सारसनं चाथ पुंस्कट्यां शृङ्खलं त्रिषु ।
पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ॥ १०९ ॥
हंसकः पादकटकः किंकणी क्षुद्रघण्टिका ।
त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु ॥ ११० ॥
वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् ।
कौशेयं कृमिकोशोत्थं राङ्कवं मृगरोमजम् ॥ १११ ॥

कुलकुक्षिग्रीवाभ्यश्च इति (सू०) ढकञ् । लडत्यलंकारान्ते ललन्तिका । सिंहावलोकितेन कृतेत्येव । स्वर्णमयी कण्ठभूषा प्रालम्बिकेत्येव ॥ १०४ ॥ ह्रियतेऽनेन चित्तं हारः । देवानां छन्दोऽभिप्रायोऽत्र । यष्टिर्लता सरः सरिरित्येकार्थाः, यदाहुः– चतुःषष्टिलतो हारोऽथाष्टहीना यथोत्तरम् । रश्मिः कलापो माणवकोऽर्धहारोऽर्धगुच्छकः । कलापच्छन्दो मन्दरश्च गुच्छः सप्ततियष्टिकः । अन्ये व्याख्यन्– द्वात्रिंशल्लतो गुच्छो, गुह्याच्छादनात् । चत्वारिंशल्लतो गोस्तनो लम्बमानात्, गोपुच्छोऽपि ॥ १०५ ॥ चतुःपञ्चाशल्लतोऽर्धहारो देवच्छन्दार्धत्वात् । विंशतिलतो माणवकोऽल्पत्वात् । एका– आवलते (अत्र) । सैव– एकावली ॥ १०६ ॥ हस्तसूत्राख्यः, आ–उप्यत आवापकः । परिह्रियते परिहारे भवो वा पारिहार्यः । कटति कटकः । वलते वलयः । के बाहुशीर्षे यौति केयूरम् । अङ्गं दयतेऽङ्गदम् । अङ्गुल्यां भवमङ्गुलीयकं, जिह्वामूलाङ्गुलेश्छः (सू०), स्वार्थे कन् । ऊर्मिप्रतिकृतिरूर्मिका ॥ १०७ ॥ अङ्गुल्या मोदयते मुद्रयति वाङ्गुलिमुद्रा, सा– ऊर्मिका । आहुश्च– कङ्कणं स्यात्प्रातिसरः, कं शुभं कणति कङ्कते सरति वा । मीयते प्राक्षिप्यते मेखला । कञ्च्यते बध्यते काञ्ची । सपति समवैति सप्तकी । रशन्ति तां (रशना), रश कान्तौ सौत्रः । शिञ्जिनी च । कलापो नानार्थे ॥ १०८ ॥ सारं सनोति सारसनं स्त्रीकट्यां वस्त्रग्रन्थनम् । उच्चयो नीवी च । पुंस्कट्यां या काञ्ची सा शृङ्खला, शृङ्गैः खलतीति । पादेऽङ्गदमिव पादाङ्गदम् । तुलाकृतेर्जङ्घायाः कोटिरिव तुलाकोटिः । मञ्जु मधुरमीरयति मञ्जीरः । नुवति नूपुरः,णू स्तवने ॥ १०९ ॥ हंसवत्कायति हंसकः । अवान्तरभेदस्त्वेषां भरतोक्तो नादृतः । किञ्चित्क्वणति किंकणी, किंकिणीत्येके । क्षुद्राल्पा घण्टिका घुघुरकाख्या । प्रहणकवाक्यमिदम् (त्वक्फलकृमिरोमाणीति) । त्वगादयो वस्त्रस्य योनिरुपादानकारणं, आविष्टलिङ्गत्वम् । वाल्कक्षौमफालकार्पासबादरकौशेयराङ्कवानाहतनिष्प्रवाणितन्त्रकाणि वाच्यलिङ्गानि ॥ ११० ॥ वल्कस्य त्वचो विकारो वाल्कम् । क्षुमाया विकारः क्षौमम् । आदिशब्दाद् भ(आ)ङ्गादि । फलस्य विकारः फालम् । कोशस्येदं कौशेयं नेत्रपट्टादि, कोशाड्ढञ् (सू०) । रङ्कुर्मृगविशेषः, कच्छादिभ्यश्च (सू०) इत्यण् ॥ १११ ॥

अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरे ।
तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ॥ ११२ ॥
पत्त्रोर्णं धौतकौशेयं बहुमूल्यं महाधनम् ।
क्षौमं दुकूलं स्याद् द्वे तु निवीतं प्रावृतं त्रिषु ॥ ११३ ॥
स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयो द्वयोः ।
दैर्घ्यमायाम आनाहः परिणाहो विशालता ॥ ११४ ॥
पटच्चरं जीर्णवस्त्रं समौ नक्तककर्पटौ ।
वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् ॥ ११५ ॥
सुचेलकः पटोऽस्त्री ना वराशिः(सिः) स्थूलशाटकः ।
निचोलः प्रच्छदपटः समौ रल्लककम्बलौ ॥ ११६ ॥
अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुके ।
द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ॥ ११७ ॥
संव्यानमुत्तरीयं च चोलः कूर्पासकोऽस्त्रियाम् ।
नीशारस्तु प्रावरणे हिमानिलनिवारणे ॥ ११८ ॥

छेदः क्षालनं भोगश्चाहननं तद्रहितमनाहतम् । प्रोयतेऽस्यां प्रवाणी तन्तुवायशलाका सा निर्गताऽस्य (निष्प्रवाणि), निष्प्रवाणिश्च (सू०) इति साधुः । तन्त्रादचिरापहृते (सू०) इति कनि तन्त्रकः । उद्गम्यतेऽभिलष्यते– उद्गमनीयम् । युगमविवक्षितं, यल्लक्ष्यम्– गृहीतपत्युद्गमनीयवस्त्रेति (कु० सं०) ॥ ११२ ॥ लकुचवटादिपत्त्रेषु कृमिलालोर्णाकृतं पत्त्रोर्णम्, पृषोदरादित्वात् (समासः) । क्षुमाया विकारः क्षौमम् । दुह्यते क्षुमाया आकृष्यते दुकूलम् । निवीयत आच्छाद्यते निवीतम्, व्येञ् संवरणे, निवृतमिति **मुनिः** ॥ ११३ ॥ दश्यन्ते दशाः, पुंसीत्येके । वस्यते याभिस्ता वस्तयः, अच्छिन्नदशस्य वस्त्रस्याच्छादनाम्नानात्, वर्तय इत्येके । आनह्यतेऽनेनानाहः, सर्वत्रेदम् । (परिणाहो विशालता) विस्ताराख्या ॥ ११४ ॥ पट इवाचरति पटति, सर्वप्रातिपदिकेभ्यः क्विब्वा (वा०) इत्येके, ततः शत्रन्ताद् भूतपूर्वेचरट् (सू०) । नक्तं भवो नक्तकः, नजते वा, ओणजी व्रीडे, द्रवद्रव्यं येन पूयते तत्र रूढोऽयं तत्तुल्येऽपि वस्त्रे वर्तते । कल्पते कर्पटः । वस्यतेऽनेनाङ्गं वासः, असन्तं क्लीबे । चिल्यते चेलम्, चैलमित्यसत्, चिल वसने । अंशूंस्तन्तून्कायत्यंशुकम् । प्रोतः सिचयश्चीरं च ॥११५॥ पटति विस्तीर्यते पटम्, अस्त्रीति चिन्त्यं द्वयोर्दर्शनात् । वृणोत्यङ्गं वराशिः, ना पुंलिङ्गः । चत्वार एकार्था इत्येके । निचोल्यतेऽनेन निचोलः येन तूलशय्यादि प्रच्छाद्यते, चुलिः सौत्रश्चुडेर्लत्वं वा । रमतेऽस्मिन् रल्लकः । काम्यते कम्बलः, कम्बलः कमनीयो भवतीति निर्वचनात् ॥११६॥ अन्तरे भवमन्तरीयं, गहादित्वाच्छः (सू०) । उपसंवीयतेऽनेनाङ्गमुपसंव्यानम् । प्रान्रियतेऽनेनाङ्गं प्रावारः, वृणोतेराच्छादने (सू०) घञ् । उत्तर ऊर्ध्वाङ्ग आसज्यत उत्तरासङ्गः । (बृहतिका) बृहत्याआच्छादने (सू०) कन् ॥ ११७ ॥ संवीयतेऽनेन संव्यानम् । उत्तर ऊर्ध्वे भवमुत्तरीयम् । चोल्यते छाद्यतेऽनेन चोलः, आप्रपदीनं कञ्चुकम् । कूर्परेऽस्यते कूर्पासः स्त्रीणां कञ्चुलिकाख्यः । निशीर्यते शीतादनेन नीशारः, शॄवायुवर्णनिवृतेष्विति (वा०) घञ्, यल्लक्ष्यम्– गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः ॥११८॥ ऊर्वोरधोच्छादकमंशुकमधोरुकम् । चण्डं भगमतति चण्डातकं, यस्य चलनकोपभ्रंशः । पादाग्रं प्रपदं,

अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुकम् ।
स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥ ११९ ॥
अस्त्री वितानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि ।
प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा ॥ १२० ॥
परिकर्माङ्गसंस्कारः स्यान्मार्ष्टिर्मार्जना मृजा ।
उद्वर्तनोत्सादने द्वे क्लीबे आप्लाव आप्लवः ॥ १२१ ॥
स्नानं चर्चा तु चार्चिक्यं स्थासकोथ प्रबोधनम् ।
अनुबोधः पत्त्रलेखा पत्त्राङ्गुलिरिमे स्त्रियौ ॥ १२२ ॥
तमालपत्त्रतिलकचित्रकाणि विशेषकम् ।
द्वितीयं च तुरीयं च न स्त्रियामथ कुङ्कुमम् ॥ १२३ ॥
काश्मीरजन्माग्निशिखं वरं वाह्लीकपीतनम् ।
रक्तसंकोचपिशुनं वी(धी)रलोहितचन्दनम् ॥ १२४ ॥
लाक्षा राक्षा जतु क्लीबे यावोलक्तो द्रुमामयः ।
लवङ्गं देवकुसुमं श्रीसंज्ञमथ जायकम् ॥ १२५ ॥

आ प्रपदादाप्रपदं, आप्रपदंप्राप्नोति (सू०) इति खः ॥ ११९ ॥ वितन्यते वितानः । उपरि लोच्यत उल्लोचः, उल्लोच्यतेपनीयतेनेनातपादि वा, चन्द्रकाख्यः । कन्दर्कोपि । दूष्यतेनेनान्यदर्शनं दूष्यम् । आद्यशब्दात्पटकुटी । पटकुडयं गुणशालि[लय]नी स्थूला[लं] च । प्रतिसिनोति प्रतिबध्नाति प्रतिसीरा । जवन्त्यस्यां जवनिका । तिरस्करोति छादयति तिरस्करिणी काण्डपटाख्या । क्वचित्– पर्यङ्किका परिकरः पर्यङ्कश्चावसक्थिका । अञ्चलं त्वंशुकान्ते नीवी सारसनमुच्चयः ॥ १२० ॥ मलपरिमार्जनार्थं क्रिया परिकर्म स्नानोद्वर्तनादि । मार्जनं मार्ष्टिः शुद्धिमात्रम्, वसेस्तिः (उ०) इति बाहुलकात्तिः, व्रश्चभ्रस्जेति (सू०) षः, मृजेर्वृद्धिः (सू०) । मृजति षिद्भिदादित्वादङ् (सू०) । उत्साद्यते मलोनेनोत्सादनम् । छद अपवारणे, उच्छादनमिति तु सभ्याः । (आप्लवः, आप्लवः) विभाषाङिरुप्लुवोरिति (सू०) वा घञ् । मज्जनं च ॥ १२१ ॥ चर्च्यतेनयाङ्गं चर्चा । चर्चिकायां चर्चने साधु चार्चिक्यं चन्दनादिना पुण्ड्रादि । तिष्ठत्यङ्गे स्थासकः । चर्चिक्यं त्वपभ्रष्टम् । अनुबोधः, यथा कस्तूरिकादेर्मद्यादिना । पत्त्राकृतिर्लेखा (पत्त्रलेखा) । (पत्त्राङ्गुलिः) द्राविडकादि(षु) लिङ्गादिभेदेन कपोले पत्त्रभङ्गः ॥ १२२ ॥ तमालपत्त्राकृति कस्तूर्या ललाटे तमालपत्त्रम् । तिलकाकृति तिलकम् । चित्रकं नानावर्णम् । विशिनष्टि विशेषकम् । इत्थं तिलकभेदा एते, पर्यायत्वं त्वदूरविप्रकर्षात् । अत्र द्वितीयचतुर्थौ तिलकविशेषकौ पुंनपुंसकयोः । पुण्ड्रं च । कुं कौति कुङ्कुमम् ॥ १२३ ॥ अग्नेरिव शिखा केसरोस्याग्निशिखम् । व्रियते वरं, ग्रहवृदृ– इत्यप् (सू०) । वह्लीकदेशजं (वाह्लीकं), यद्रघोरुत्तरदिग्विजये– दुधुवुर्वाजिनः स्कन्धाल्लग्नकुङ्कुमकेसरान् । पीतयत्यङ्गं पीतनम् । रञ्जनाद्रक्तम्, अत एवासृक्संज्ञम् । संकोचस्य पिशुनं सूचकम् ॥ वीरं स्थिररागम् । लोहितं चन्दनमिव । वर्ण्यं च । घुसृणं देश्यम् ॥ १२४ ॥ लक्ष्यते लाक्षा । रक्षति देहं राक्षा, रातिलात्योर्वा । जायते जतु । यौति यावकः । न लज्जते स्म– अलक्तकः, अलति वा । द्रुमस्यामय इव निर्यासः । धन्वन्तरिस्तु– लाक्षा पलंकषा राक्षा दीप्तिश्च क्रिमिजं जतु । कृतघ्नानक्रमाता च द्रुमव्याधिरलक्तकः ॥ लूयते लवङ्गम् । देवद्युतिमत्कुसुमं देवानां वा । (श्रीसंज्ञं) श्रीपर्यायम् । (जायकं जायकाख्यपर्वतभवम् ॥ १२५ ॥ (कालीयकं) कालवर्णसारम् । वंशाभं वंशकम्, वंशिकेत्येके ।

कालीयकं च कालानुसार्यं चाथ समार्थकम् ।
वंशकागुरुराजार्हलोहकृमिजजोङ्गकम् ॥ १२६ ॥
कालागुर्वगुरु स्यात्तु मङ्गल्या मल्लिगन्धि यत् ।
यक्षधूपः सर्जरसो रालसर्वरसावपि ॥ १२७ ॥
बहुरूपोप्यथ वृकधूपकृत्रिमधूपकौ ।
तुरुष्कः पिण्डकः सिह्लो यावनोप्यथ पायसः ॥ १२८ ॥
श्रीवासो वृकधूपोपि श्रीवेष्ट(पिष्ट)सरलद्रवौ ।
मृगनाभिर्मृगमदः कस्तूरी चाथ कोलकम् ॥ १२९ ॥
कक्कोलकं कोशफलमथ कर्पूरमस्त्रियाम् ।
घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका ॥ १३० ॥
गन्धसारो मलयजो भद्रश्रीश्चन्दनोस्त्रियाम्
तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् ॥ १३१ ॥
तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं चाथ जातीकोशजातीफले समे ॥ १३२ ॥
कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षकर्दमः ।
गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम् ॥ १३३ ॥

न गुरु-अगुरु । कालागुरु काकतुण्डाख्यम् । रोहति लोहम् । कृमिभिर्जन्यते कृमिजम् । जोङ्गकं गिरिजम् । आहुश्च- अगुरु प्रवरं लोहं कृमिजग्धमनार्यजमिति (शाश्वतः) ॥१२६॥ मल्लिकापुष्पगन्ध्यगुरु मङ्गल्याख्यम् । यक्षान्धूपयति यक्षधूपः । सर्जवृक्षस्य रसः सर्जरसः । राति प्रीतिं रालः, रालापि ॥ १२७ ॥ बहुरूपो नानाकृतिगन्धः । वृकान्धूपयति वृकधूपः । तुरुष्को यवनदेशजः । पिण्डको द्रव्यान्तरैः सह पिण्डितः स्वरूपान्न च्यवते । सिह्लाख्यो वृक्षः, षिल उञ्छे, सुगन्धिप्रस्तावात्पुनरिहोक्तः। पयसो द्रुमक्षीरस्य विकारः स्रुतिः पायसः ॥ १२८ ॥ श्रिया वासो वेष्टश्च निर्यासः, वेष्टते वेष्टः । सरलस्य देवदारुभेदस्य द्रवो निर्यासः । विकसति सौगन्ध्यमस्याः कस्तूरी, के स्तूयते वा । कोलमिव कोलकम् ॥ १२९ ॥ ककन्ते कक्, (कक्कं) कोलति संस्त्यायति कक्कोलकम् । कोशे फलान्यस्य कोशफलम् । कल्पते कर्पूरः । घनस्येव सारोस्य शैत्यात् सिताभ्रत्वाच्च । चन्द्रपर्यायो ह्लादकत्वात् । हिमा शीतला चासौ वालुका च हिमवालुका ॥ १३० ॥ भद्रा श्रीरस्य । चन्द्यते ह्लाद्यतेनेन चन्दनम् । तैलपर्णगोशीर्षौ गिरी आकरावस्य । हरेरिन्द्रस्य चन्दनं, हरि कपिलं वा, तच्चातिशीतलं पीतमाहुः । श्रीखण्डं च ॥ १३१ ॥ तिलस्येव पर्णान्यस्याः तिलपर्णी नदी- आकरोस्या इत्येके । पत्रेष्वङ्गति पत्राङ्गम् । पतङ्गं च पत्राङ्गापभ्रंशोयम् । (कुचन्दनं) कौ चन्दनम् । जातीलतायाः कोशं जातीसस्याख्यम् ॥ १३२ ॥ एतैः पिण्डीकृतैर्यक्षप्रियः पङ्कः । सकुङ्कुमैरित्यागमः, **धन्वन्तरिस्तु**- कुङ्कुमागुरुकस्तूरीकर्पूरं चन्दनं तथा । महासुगन्धमित्युक्तं नामतो यक्षकर्दमः ॥ द्वौ द्वौ भिन्नार्थावित्येके । वर्तिर्हि नटादौ प्रसिद्धा ॥ १३३ ॥ चूर्णं पटवा-

चूर्णानि वासयोगाः स्युर्भावितं वासितं त्रिषु ।
संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम् ॥ १३४ ॥
माल्यं मालास्रजौ मूर्ध्नि केशमध्ये तु गर्भकः ।
प्रभ्रष्टकं शिखालम्बि पुरोन्यस्तं ललामकम् ॥ १३५ ॥
प्रालम्बमृजुलम्बि स्यात्कण्ठाद्वैकक्षकं तु तत् ।
यत्तिर्यक् क्षिप्तमुरसि शिखास्वापीडशेखरौ ॥ १३६ ॥
रचना स्यात्परिस्यन्द आभोगः परिपूर्णता ।
उपधानं तूपबर्हः शय्यायां शयनीयवत् ॥ १३७ ॥
शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समा ।
गेन्दुकः कन्दुको दीपः प्रदीपः पीठमासनम् ॥ १३८ ॥
समुद्गकः संपुटकः प्रतिग्राहः पतद्ग्रहः ।
प्रसाधनी कङ्कतिका पिष्टातः पटवासकः ॥ १३९ ॥
दर्पणे मु(म)कुरादर्शौ व्यञ्जनं तालवृन्तकम् ॥ १४० ॥

इति नृवर्गः । ६

सादिक्षोदः । वास्यते सुगन्धीक्रियते यैर्युज्यमानैर्मिश्रैस्ते वासयोगाः । भाव्यते मल्यते भावितं, भुवोऽवकल्कने णिच् (धा० सू०) । वास्यते छाद्यते स्म, वस स्नेहच्छेदापहरणेषु । गन्धद्रव्यैर्भावितं पुष्पाद्यैर्वासितमित्येके । संस्कारस्तिलादीनां गुणाधानम् । आद्यशब्दाद्धूपादिभिः । मालैव माल्यं, चातुर्वर्ण्यादित्वात्ष्यञ् (चतुर्वर्णादीनांस्वार्थउपसंख्यानम्) । माल्यते धार्यते माला । सृज्यते स्रक्, ऋत्विग्दधृगिति (सू०) साधुः । माल्यमित्येव, गर्भस्थत्वाद्गर्भकः । माल्यमित्येव, मध्यात्प्रभ्रष्टकम् । ललत्यग्रे ललामकं मुण्डमालाख्यम् ॥ १३५ ॥ कण्ठाद्वक्षस्यवलम्बमानं माल्यं प्रालम्बम् । विकक्षायां भवं वैकक्षकं, यज्ञोपवीतन्यायेन माल्यम् । माल्यमित्येव, आपीड्यत आपीडः । शेते शिरसि शेखरः । उत्तंसोपि ॥ १३६ ॥ शिल्पादिना रचना, अन्यापि । आभुज्यतेनेनाभोगः । उपधीयतेऽस्मिन् शिर उपधानम् । उपबृह्यतेनेनोपबर्हते वा– उपबर्हः शिरोनिवेशनम् । शेरतेत्र शय्या, संज्ञायांसमजेतिक्यप् (सू०) । (शयनीयं) कृत्यल्युटोबहुलम् (सू०) इत्यधिकरणेऽनीयर् । तूलिकापि ॥ १३७ ॥ मञ्च्यते धार्यतेनेन मञ्चः । पर्यङ्क्यते पल्यङ्कः, परेश्चघाङ्कयोरिति (सू०) वा लत्वम् । खटत्येनां श्रान्तः खट्वा । गाते गाः, गच्छन्निन्दुको गुडको गेन्दुकः, गिन्दुक इत्येके, (गे) गगने– इन्दुरिवेति वा । कन्द्यतेऽर्थ्यते क्रीडार्थिभिः कन्दुकः, कं शिरो दुनोति वा नमनोन्नमनेक्षणात् । वीटा भारते । च्युतादानक्रीडायां गुलिका गिरिकश्च तौ । (प्रदीपः) प्रः स्वार्थे मेरुसुमेरुवत् । [कज्जलध्वजः, दशेन्धनो गृहमणिः स्नेहाशश्च]। पीयत उपवेशनेन अस्यते पीठम् ॥ १३८ ॥ समुद्यते समुद्गच्छति वा समुद्गकः । संपुट्यते श्लेष्यते संपुटकः, भूषणाद्यावपनम् । प्रतिगृह्णात्याविलकादि प्रतिग्राहः, विभाषाग्रहः (सू०) इति णः । पतद् गृह्णाति पतद्ग्रहः । कर्षण्याख्या, प्रसाध्यन्तेनया केशाः । कङ्कते कङ्कती, कङ्कान्दन्तांस्तनोति वा । पिष्टेन कुङ्कुमचूर्णादिनाताति पिष्टातः । पटो वास्यतेनेन पटवासः ॥ १३९ ॥ दृप्यन्त्यनेन सुवेषा दर्पणः । मङ्क्यते मण्ड्यतेनेन मु(म)कुरः । आदृश्यते रूपमस्मिन्नादर्शः । आत्मदर्शोपि । व्यजति वातोनेन विक्षिप्यते वा व्यजनम् , तालस्येव वृन्तमस्य तालवृन्तम् । तालस्यवृन्तैरुभ्यत इत्येके [तालवृन्तामास्त्यस्येत्येके] ॥ १४० ॥ इति नृवर्गः । ६

संततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोन्ववायः सन्तानो वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥
विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतम् ।
राजबीजी राजवंश्यो बीज्यस्तु कुलसंभवः ॥ २ ॥
महाकुलकुलीनार्यसभ्यसज्जनसाधवः ।
ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये ॥ ३ ॥
आश्रमोस्त्री द्विजात्यग्रजन्मभूदेववाडवाः ।
विप्रश्च ब्राह्मणासौ षट्कर्मा यागादिभिर्युतः ॥ ४ ॥
विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः ।
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः ॥ ५ ॥
धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ।
दूरदर्शी दीर्घदर्शी श्रोत्रियश्छान्दसः समौ ॥ ६ ॥

संतन्यतेनया संततिः । गूयते जन्यते कुल्यते वानेन । अन्वीयतेन्वयः । वश्य[न्य]ते जन्यते वंशः । अन्ववैत्यन्ववायः । व्रियन्ते वर्ण्यन्ते वा वर्णाः ॥ १ ॥ चत्वार एव वर्णाः, स्वार्थे ष्यञ् (चतुर्वर्णादीनां स्वार्थउपसंख्यानम्) । राजबीजमस्यास्ति राजबीजी । राजवंशे साधुर्भवो वा राजवंश्यः । बीजे साधुर्भवो वा यथा, सूर्यबीज्यो रामः, यत्प्रकरणे– अन्येभ्योपिदृश्यते (वा०) ॥ २ ॥ कुलस्यापत्यं कुलीनः । आरात्पापकेभ्यः कर्मभ्यो यात आर्यः, अरणीयो गम्यो वा । सभायां साधुः सभ्यः । संश्चासौ जनश्च सज्जनयते वा सज्जनः । साध्नोति परकार्यं साधुः । आमुष्यायणोमुष्यपुत्रश्च । ब्रह्म वेदा ब्रह्म तपो ब्रह्म ज्ञान च शाश्वतं, तच्चरत्यर्जयत्यवश्यं ब्रह्मचारी वर्णी । गृही गृहमेधी गृहाश्रमी ज्येष्ठाश्रमी । प्रतिष्ठन्तेस्मिन्प्रस्थः, वनप्रस्थे भवो वानप्रस्थो वैखानसाख्यः । भिक्षते तच्छीलो भिक्षुर्यतिः, सनाशंसभिक्षउः (सू०) । अस्मिंश्चतुष्के, आश्राम्यन्ति तपस्यन्त्यस्मिन्नाश्रमं प्रत्येकं वर्तते ॥ ३ ॥ मातुर्यदग्रे जननं द्वितीयं मौञ्जीबन्धनादिति द्विजातिः । अग्रे– आदौ– अग्रान्मुखाद्वा जन्मास्य, यच्छ्रुतिः– ब्राह्मणोस्य मुखमासीत् । वाडव इवातृप्तः । विशेषेण प्राति पूरयति विप्रः, विपाति विपर्ति पापं वा विप्रः, विप क्षेपे । ब्रह्मणोपत्यं ब्राह्मणः । जातिमात्रोपजीवी स्याद्विप्रस्तु ब्राह्मणब्रुवः । षट् कर्माणि ब्राह्मणस्य– अध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति ॥ ४ ॥ वेत्ति विद्वान्, विदेःशतुर्वसुः (सू०) । विपश्यंश्चिन्तयते विपश्चित् । दोषाञ्जानाति ज्ञात्वा जह्यादिति दोषज्ञः । सन् विद्यमान उत्तम इत्यर्थः, अन्ये ह्यसत्कल्पाः । शोभनं ध्यायति सुधीः, अन्येभ्योपिदृश्यते (सू०) इति क्विप् संप्रसारणं च । ओकः स्थानं वेत्ति कोविदः, कुङ् शब्देस्माद्वा । धियमीरयति धीरः । मनस ईष्टे, मनीषास्त्यस्य वा मनीषी । जानातीति ज्ञः, इगुपधेति (सू०) कः । प्रज्ञ एव प्राज्ञः, प्रज्ञादिभ्यश्च (सू०) इत्यण्, प्रज्ञास्त्यस्य वा, प्रज्ञाश्रद्धेति (सू०) णः । सम्यक् ख्यानं ज्ञानमस्त्यस्य संख्यावान्, संख्या विचारणा वा । पण्डते जानाति पण्डितः, पडि गतौ, सर्वे गत्यर्था ज्ञानार्था इति, पण्डा धीः संजातास्य वा । कवते वर्णयति कविः, कवितापि ॥ ५ ॥ सुवति सूरिः । कृतमस्यास्तीति कृती कृतकृत्यः । कर्षति विविङ्क्ते कृष्टिः । लब्धं वर्णनं प्रसिद्धिर्येन स लब्धवर्णः । विचष्टे विचक्षणः । (दूरदर्शी) अप्रत्यक्षमूहत इत्यर्थः । (श्रोत्रियः) श्रोत्रियंश्छन्दोधीते (सू०), श्रोत्राभ्यां कृतकर्मेति । छन्दोधीते छान्दसः । मीमांसको जैमिनीये वेदान्ती ब्रह्मवादिनि । वैशेषिके स्यादौलूक्यः सौगतः शून्यवादिनि ॥ नैय्यायिकस्त्वाक्षपादः स्यात्स्याद्वादिक आर्हतः । चार्वाकलौकायतिकौ सत्कार्ये साङ्ख्यकापिलौ ॥ ६ ॥ उपेत्याधीयतेस्मादुपाध्यायः, इङ–

उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद् गुरुः ।
मन्त्रव्याख्याकृदाचार्य आदेष्टा त्वध्वरे व्रती ॥ ७ ॥
यष्टा च यजमानश्च स सोमवति दीक्षितः ।
इज्याशीलो यायजूको यज्वा तु विधिनेष्टवान् ॥ ८ ॥
स गीष्प(र्प)तीष्ट्या स्थपतिः सोमपीथी तु सोमपाः ।
सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः ॥ ९ ॥
अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः ।
लब्धानुज्ञः समावृत्तः सुत्वा त्वभिषवे कृते ॥ १० ॥
छात्रान्तेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः ।
एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ॥ ११ ॥
सतीर्थ्यास्त्वेकगुरवश्चितवानग्निमग्निचित् ।
पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम् ॥ १२ ॥

श्चेति (सू०) घञ् । गृणात्युपदिशति गुरुः, यन्मनुः– निषेकादीनि कर्माणि यः करोति यथाविधि । संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥ निषेको गर्भाधानविधिः । आदिशब्दात्पुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौडोपनयनादीनि । आचरणीयः सेव्य आचार्यः, आचारं ग्राहयतीति नैरुक्ताः, मन्त्र(व्याख्या)कृद्वेदाध्यापनाद्विशिष्टाख्याकृदुपनयनेन द्विजत्वापादनात्, यदाह– उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ स्वाम्येनादिशत्यादेष्टा, आदिष्टीति पाठे– आदिष्टमनेनेति, इष्टादिभ्यश्च (सू०) इतीनिः, क्तस्येन्विषयस्यकर्मण्युपसंख्यानात् (वा०) सप्तमी । व्रती सनियमः ॥ ७ ॥ यजते यजमानः, पूङ्यजोःशानन् (सू०) । स व्रती सोमवत्यध्वरे दीक्षिताख्यः, दीक्षा संजातास्येति । सोमयागोऽग्निष्टोमादिक्रतुः, यद् गौतमः– अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सोमसंस्था । यजनमिज्या, व्रजयजोर्भावेक्यप् (सू०) । अत्यर्थं यजति तच्छीलो यायजूकः, यजजपदशांयङः (सू०) इत्यूकः । (यज्वा) सुयजोर्ङ्वनिप् (सू०) ॥ ८ ॥ स यज्वा बृहस्पतिसवनहेतुना, स्थापयतीति स्थपतिः । पानं पीथः, पातॄतुदिवचीतिथक् (उ०), घुमास्थेतीत्वम् (सू०), सोमपीती तु प्राच्याः पेठुः । सर्वदायं, दीक्षितस्तु तत्कालम् । सर्वं विन्दत्यसमासे सर्ववेदाः, असुन् ॥ ९ ॥ अनूक्तवान्, उपेयिवाननाश्वाननूचानश्च (सू०) इति कानचि साधुः । प्रोच्यते प्रवचनं वेदः । अधीतमनेनाधीती, इष्टादिभ्यश्च (सू०) इतीनिः, क्तस्येन्विषयस्यकर्मण्युपसंख्यानात्सप्तमी (वा०) । अधीत्य गुर्वाज्ञया गुरुगृहाद्यः समावर्तते स समावृत्तः– स्नातकाख्यः, गुरुगेहादनावृत्तस्नातको हि न कथ्यते ॥ सुनोति सुत्वा सुयजोर्ङ्वनिप् (सू०) । अभिषवः सोमकुट्टनस्नानम् ॥ १० ॥ छत्त्रमेव शीलमस्य छात्त्रः, छत्त्रादिभ्योणः (सू०), छत्त्रेण गुरुसेवा लक्ष्यते । गुरोरन्ते वसत्यन्तेवासी– शयवासवासिष्वकालात् (सू०) सप्तम्या अलुक् । शासनीयः शिष्यः । शिक्षायां भवाः शैक्षाः । प्रथमकल्प आचारम्भः प्रयोजनमेषां तमधीयते वा प्राथमकल्पिकाः । तुल्यवेदास्तुल्यव्रतास्तुल्याचाराश्चान्योन्यं, समानं ब्रह्म चरन्ति सब्रह्मचारिणः, ब्रह्म वेदा ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतमिति, एकस्मिन्वेदे व्रतमाचरन्ति वा, व्रते (सू०) इति णिनिः, चरणेब्रह्मचारिणि (सू०) इति समानस्य सः ॥ ११ ॥ (सतीर्थ्याः) समानतीर्थेवासी (सू०) इति यत्, तीर्थेये (सू०) इति सत्वम् । तरन्त्यनेनाविद्यां तीर्थं गुरुः । अग्निचिदाहिताग्निः, अग्नौचेरिति (सू०) क्विप् । इत्येवं ह किलेति सुखपारंपर्यं स्यितमितिह, ततः स्वार्थे पक्षे– अनन्तावसथेतिहभेषजाञ्ञ्यः (सू०) ॥ १२ ॥ उपज्ञायत इत्युपज्ञा, इदं प्रथमतया ज्ञानं, चन्द्रस्योपज्ञा

उपज्ञा ज्ञानमाद्यं स्याज्ज्ञात्वारम्भ उपक्रमः ।
यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥ १३ ॥
पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥ १४ ॥
समज्या परिषद् गोष्ठी सभासमितिसंसदः ।
आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः ॥ १५ ॥
प्राग्वंशः प्राग्घविर्गेहात्सदस्या विधिदर्शिनः ।
सभासदः सभास्तारा सभ्याः सामाजिकाश्च ते ॥ १६ ॥
अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ।
आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥ १७ ॥
वेदिः परिष्कृता भूमिः समे स्थण्डिलचत्वरे ।
चषालो यूपकटकः कुम्बा सुगहना वृतिः ॥ १८ ॥

चन्द्रोपज्ञसंज्ञकं व्याकरणम् । उपज्ञाय– आरम्भणमुपक्रमः, यत्कात्यः– यस्मात्प्रवृत्त आरम्भः स उपक्रमः, नन्दस्योपक्रमः– नन्दोपक्रमाणि मानानि, उपज्ञोपक्रमंतदाद्याचिख्यासायाम् (सू०) इति नपुंसकत्वम् । इज्यते यज्ञः, यजयाचेति (सू०) नङ् । सूयते सोमोऽस्मिन्सवः । अध्वानं रात्यध्वरः, न ध्वरति वा, ध्वृ हूर्छने । सप्ततन्तुः सप्तभिश्छन्दोभिस्तन्यत इति । मखति धर्मं मखः । क्रियते क्रतुः ॥ १३ ॥ स्वाध्यायो ब्रह्मयज्ञः, होमो देवयज्ञः, अतिथिपूजनं नृयज्ञः, तर्पणं श्राद्धाख्यं पितृयज्ञः, बलिर्भूतयज्ञः, यन्मनुः– अध्याप(य)नं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥ १४ ॥ समजन्ति मिलन्त्यस्यां समज्या, संज्ञायांसमजनिषदेति (सू०) क्यप् । परिषीदन्त्यस्यां परिषद्, पर्षच्च । गावो नानोक्तय स्तिष्ठन्त्यस्यां गोष्ठी । सह भान्त्यस्यां सभा । संयन्त्यस्यां समितिः । संसीदन्त्यस्यां संसद् । आतिष्ठन्त्यस्यामास्थानी । सीदन्त्यस्मिन् सदः, असुन्, सान्तः क्लीबे ॥ १५ ॥ वंशः कुलं स्थूणा वा । प्राग्वंशोत्र प्राग्वंशः पत्नीशालाख्योऽग्निशालायाः प्राग्यो भागः । सदसि साधवः, ऊनाधिकजागरूका ऋत्विग्भेदाः सदस्याः । सभायां सीदन्ति सभासदः । सभां स्तृण्वन्ति सभास्ताराः । समाजं समवयन्ति सामाजिकाः, समवायान्समवैतीति (सू०) ठक् । पार्षद्याः पारिषद्याः सभाशूराश्च ॥ १६ ॥ ऋत्विज इत्येव । अध्वरं याति न ध्वरति वाध्वर्युर्नामर्त्विग्विशेषः, स यजुर्विद्कठः स्यात् । उद्गायत्युद्गाता छन्दोगः स्यात् । जुहोति होता बह्वृचः स्यात् । अग्नीनिन्द्धमीद्, तस्य (अग्नीधः) शरणमाग्नीध्रः, अग्नीधःशरणेरञ्भंच (वा०) इति रञ् । आद्यशब्दात्पोतृनेशास्तृब्राह्मणाच्छंस्यच्छावाग्ग्रावस्तुद्ब्रह्ममैत्रावरुणप्रतिप्रस्थातृप्रतिहर्तृनेष्ट्रुन्नेतृसुब्रह्मण्याः । इत्थं सदस्याः सप्तदशर्त्विजः । एतिस्तुशास्वृदृजुषइति (सू०) वृञो ग्रहणाद् वृङोपि, व्रियन्त इति वार्याः, ऋहलोर्ण्यत् (सू०) । वृताः कुर्वन्ति ये यज्ञमृत्विजस्त इति **कात्यः** । ऋतौ यजतीति ऋत्विक्, ऋत्विग्दधृगिति (सू०) साधुः ॥ १७ ॥ विदन्त्येनां वेदिः, परिष्कृता चातुरस्रेण भूषिता यागार्थम् । अपरिष्कृतां त्वाह, तिष्ठन्त्यस्मिन्स्थण्डिलम् । चत्यते चत्वरम्, यागार्थमसंस्कृता भूमिः । तक्ष्णा घटितो यूपाग्रे कटकाकृतिः, चष्यत उत्कीर्यते चषालः । (कुम्बा) कुबि छादने, भिदिपूजिकाथिकुम्बीलुङ् (सू०) । व्रियतेनया वृतिः, यज्ञवाटे परिणका ॥ १८ ॥

यूपाग्रं तर्म निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ।
दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥ १९ ॥
अग्नित्रयमिदं त्रेता प्रणीतः संस्कृतोऽनलः ।
समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः ॥ २० ॥
योगार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ।
तस्मिन्नानाय्योऽथाग्नायी स्वाहा च हुतभुक्प्रिया ॥ २१ ॥
ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने ।
गायत्रीप्रमुखं छन्दो हव्यपाके चरुः पुमान् ॥ २२ ॥
आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ।
धवित्रं व्यजनं तद्यद्रचितं मृगचर्मणा ॥ २३ ॥
पृषदाज्यं सदध्याज्ये परमान्नं तु पायसम् ।
हव्यकव्ये दैवपित्र्ये अन्ने पात्रं स्रुवादिकम् ॥ २४ ॥
ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः ।
उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ २५ ॥

तरन्त्यनेन यूपं तर्म । निर्मन्थनीयं दारु यतोऽग्निर्जायते, इयर्त्यग्निर्यतः सोऽरणिः । दक्षिणोऽग्निर्दक्षिणाग्निः । गृहपतिना संयुक्तो गार्हपत्यः, गृहपतिनासंयुक्तेञ्यः (सू०) । आहोतव्य आहवनीयः ॥ १९ ॥ त्रीनिता त्रेता, पृषोदरादित्वादेत्वम् (सू०) । प्रणयनं मन्त्रादिना संस्कारैः प्रादुष्करणम् । अग्नौपरिचाय्योपचाय्यसमूह्याः (सू०) इति निपात्यन्ते, समूह्यते ढौक्यत इत्यग्निः समूह्यः परिचीयते परिचाय्य उपचीयत उपचाय्य इत्यग्निनामधेयानि प्रयोगविषयाणि ॥ २० ॥ आनाय्योऽनित्यइति (सू०) साधुः, आनीयत आनाय्यः, प्रणीयते दक्षिणाग्नित्वेन संस्क्रियते । (अग्नायी) वृषाकप्यग्निकुसीदेति (सू०) ङीप्प्रसङ्गे– ऐत्वम् । सुष्ठु– आहूयते स्वाह, स्वाहास्त्यस्या वा ॥ २१ ॥ समिधामाधानी सामिधेनी, समिधामाधानेषेण्यण् (वा०) । धीयतेनया धाय्या, पाय्यसान्नाय्यनिकाय्येति (सू०) साधुः । गायन्तं त्रायते गायत्री । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतिकृतिविकृतिसंकृत्यतिकृत्युत्कृत्याख्यं षडक्षरादारभ्य षड्विंशत्यक्षरं यावत्, छन्दति (चन्दते) छन्दः । अक्षरानियमात्मकं लघुगुरुनियमात्मकं च वृत्तं तनुमध्यादि । हव्यस्य पाको हव्यपाकः । पक्वं होतव्यं, चरुः चर्यते भक्ष्यते[रध्यते] इति । स्थाल्यपि चरुः, हव्यकव्यपाकोऽत्रेति ॥ २२ ॥ पक्वे तप्ते च क्षीरे दधियोजनादामिक्षा, पक्वे पयसि दध्यानयति सा वैश्वदेव्यामिक्षेति श्रुतिः, आमीयते प्रक्षिप्यते दध्यत्रेति । धूयतेऽग्निर्येनेति धवित्रं, अर्तिलूधूसूखनसहचर इत्रः (सू०) ॥ २३ ॥ पृषद्भिर्दधिबिन्दुभिः सहितमाज्यं पृषदाज्यम् । पयसि संस्कृतं पायसम् । अग्निमुखेन देवेभ्योऽन्नं हव्यं, ब्राह्मणमुखेन पितृभ्योऽन्नं कव्यं, कूयते शब्द्यते पितृभिः कव्यम् । उभयमुभयत्रेति तु श्रुतिज्ञाः । पिबन्त्यस्मात्पात्रम् । आदिग्रहणात्स्रुग्ग्रहादि ॥ २४ ॥ ध्रुवति ध्रुवा । [उपभ्रियतेनया] उपभृत् । हूयतेनया जुहूः । एते च स्रुचो विशेषाः स्त्रीलिङ्गाः । स्रवत्यस्मात्स्रुवस्तु स्रुग्विशेषः पुंलिङ्गः । उपामन्त्र्य क्रियते हन्यते स्म (उपाकृतः), यज्ञ इति शेषः ॥ २५ ॥ परंपरामकति परंपराकम् । शसनमिति तु युक्तः पाठः, शसु

परंपराकं शमनं प्रोक्षणं तत्र को वधः ।
वाच्यलिङ्गाः प्रमीतोपसंपन्नप्रोक्षिता हते ॥ २६ ॥
सान्नाय्यं हविरग्नौ तु हुतं त्रिषु वषट्कृतम् ।
दीक्षान्तोवभृथो यज्ञस्तत्कर्मार्हं तु यज्ञियम् ॥ २७ ॥
त्रिष्वथ क्रतुकर्मेष्टं पूर्तं खातादिकर्मणि ।
अमृतं विघसो यज्ञशेषभोजनशेषयोः ॥ २८ ॥
त्यागो विहापितं दानमुत्सर्जनविसर्जने ।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनं ॥ २९ ॥
प्रादेशनं निर्वपणमपवर्जनमंहतिः ।
मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदे(दे)हिकम् ॥ ३० ॥
पितृदानं निवापः स्याच्छ्राद्धं तत्कर्म शास्त्रतः ।
अन्वाहार्यं मासिकेंऽशोष्टमोह्नः कुतपोस्त्रियाम् ॥ ३१ ॥
पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा ।
सनिस्त्वध्येषणा याच्ञाभिषस्तिर्याचनार्थना ॥ ३२ ॥

हिंसायाम् । प्रोक्षणं लक्षणया वधः, प्रोक्ष्य हि यज्ञे पशुर्हन्यते । यज्ञ इति शेषः । (प्रमीतः) मीञ् हिंसायाम् ॥ २६ ॥ संनीयते (सान्नाय्यं), पाय्यसान्नाय्येति (सू०) साधुः । हूयते हविः । वषण्मन्त्रलिङ्गेन कृतं हुतं वषट्कृतम् । अत्राभ्रियते पूर्यतेनेनावभृथः । यज्ञकर्मार्हति यज्ञियं, यज्ञर्त्विग्भ्यांघखञौ (सू०), यज्ञर्त्विग्भ्यांतत्कर्मार्हतीत्युपसंख्यानात् (वा०) घः ॥ २७ ॥ इज्यते स्मेष्टं यागादि, यदाह— एकाग्निकर्म हवनं त्रेतायां यच्च हूयते । अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते । पिपर्ति स्म पूर्तं, नध्याख्यापॄमूर्च्छिमदामिति (सू०) निष्ठानत्वाभावः । खातं वाप्यादि, आह च— वापीकूपतडागानि देवतायतनानि च । अन्नप्रदानमारामः पूर्तमार्याः प्रचक्षते ॥ न म्रियते न नश्यत्यमृतम् । विशिष्टमदनं विघसः, उपसर्गेऽदः (सू०) इत्यप्, घञपोश्च (सू०) इति घस्लादेशः, यन्मुनिः— विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः । विघसो भुक्तशेषं स्याद्यज्ञशिष्टमथामृतम् ॥ २८ ॥ स्वत उपसर्गवशाच्चैते दानार्थाः । स्पर्शनं तूपचाराद्दानं, पुच्छादौ गवादि स्पृष्ट्वा हि दीयते । ओहाक् त्यागे । श्रण दाने ॥ २९ ॥ अंहतेर्हतिः । उत्सर्गाद्यपि । तदहे प्रेतदिने मृतमुद्दिश्य दानं पिण्डोदकादि, ऊर्ध्वदेहाद्भवमौर्ध्वदैहिकं, ऊर्ध्वदमाच्चदेहाच्चेति (ग०) ठञ्, अनुशातिकादित्वात् (सू०) उभयपदवृद्धिमाहुः ॥ ३० ॥ पितृभ्यो दानं, न्युप्यते निवापः । श्रद्धास्त्यत्र श्राद्धं पितृकर्म, प्रज्ञाश्रद्धार्चेति (सू०) णः । अन्वाह्रियतेन्वाहार्यममावास्याश्राद्धम् । कुं तपति सूर्योत्रेति कुतपो मध्याह्नात्प्रवृत्तः श्राद्धकालः, यत्स्मृतिः— दिवसस्याष्टमे भागे मन्दीभवति भास्करे । स कालः कुतपो यत्र पितृभ्यो दत्तमक्षयम् ॥ ३१ ॥ श्राद्धे द्विजशुश्रूषा (पर्येषणा), इषेरनिच्छार्थस्य (वा०) युच्, परेर्वा (सू०) । गवेष मार्गणे । गुर्वादेः क्वचिदर्थे प्रार्थनया नियोजनं सनिः, षणु दाने । याचनं याच्ञा, यजयाचेति (सू०) नङ् । (याचना) ण्यासश्रन्थइति (सू०) बाहुलकाद्युच् । अभिशसनमभिशस्तिः, षस स्वप्ने ॥ ३२ ॥ आगन्तवन्ताः षट्

षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि ।
क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि ॥ ३३ ॥
स्युरावेशिक आगन्तुरतिथिर्ना गृहागते ।
पूजा नमस्यापचितिः सपर्याचार्हणाः समाः ॥ ३४ ॥
वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम् ।
व्रज्याटाट्या पर्यटनं चर्या त्वीर्यापथे स्थितिः ॥ ३५ ॥
उपस्पर्शस्त्वाचमनमथ मौनमभाषणम् ।
आनुपूर्व्यं स्त्रियां वावृत्परिपाटी अनुक्रमः ॥ ३६ ॥
पर्यायश्चातिपातस्तु स्यात्पर्यय उपात्ययः ।
नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम् ॥ ३७ ॥
औपवस्त्रं तूपवासो विवेकः पृथगात्मता ।
स्याद् ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिरथाञ्जलिः ॥ ३८ ॥

त्रिलिङ्गाः । वारिणीत्येव, पादार्घाभ्यांच (सू०) इति यत् । अतिथय इदमातिथ्यं, अतिथेर्ञ्यः (सू०) । अतिथौ साधु– आतिथेयं, पथ्यतिथीति (सू०) ढञ् । कात्यस्त्वाह– आवेशिकं विप्रश्चिद्भिरातिथ्यमभिधीयते, आतिथ्योतिथिरागन्तुरिति च **माला**, **शाश्वतोत** एवोभयमाह– आतिथ्यं स्यादतिथ्यर्थ आतिथ्यमतिथिं विदुः ॥ ३३ ॥ अवेशे– अप्रतिवेशे भव आवेशिकः, नैकग्रामीणमतिथिं विप्रं सांगतिकं तथेति स्मृतेः । नास्ति तिथिरस्यातिथिः, अतति सततं गच्छति वा, यत्स्मृतिः– अध्वनीनोतिथिर्ज्ञेयः, किं च– तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना । अतिथिः स हि विज्ञेयः शेषः प्राघूर्णिकः स्मृतः । प्राघूर्णिकः प्राघुणकोप्यभ्युत्थानं तु गौरवम् ॥ (नमस्या) नमोवरिवश्चित्रङःक्यजिति (सू०) नमः पूजायां क्यच्, अप्रत्ययात् (सू०) । अपचायनमपचितिः, अपचितश्च (सू०) इत्यत्र चायतेः क्तिनि (तित्वं) चिभावोऽनिट्त्वं च वक्तव्यात् (वा०)। सपरे साधुः सपर्या, सह पर्यायक्रमेण वर्तते वा ॥ ३४ ॥ वरिवसः परिचर्यायां क्यच् (नमोवरिवश्चित्रङःक्यच्) । शुश्रूषा गुरुसेवा लक्षणया । परिचरणं (परिचर्या), परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम् (वा०), परिचर्या तु पर्येष्टिरिति **भागुरिः** । परिव्रज्या तपस्याथ रुद्राङ्कुशो विशाखिका । व्रजनं व्रज्या, व्रजयजोर्भावे क्यप् (सू०) । कुटिलमटनमटाट्या, सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनामुपसंख्यानाद्यङ्ग्यन्तात् (वा०), अट्यापि, यन्**मनुः**– तौर्यत्रिकं वृथाट्या च कामजो दशमो गुणः, स्त्रीत्वं च निवरा कन्येतिवत् । एवं गदमदचरेति (सू०) चर्या । ईर्यापथे ध्यानमौनादिके संबोधमार्गाख्ये भिक्षुव्रते स्थितिरनुष्ठानम्, चर्या त्वीर्या विदुर्बुधा इति **मुनिः** ॥ ३५ ॥ उपस्पृश्यन्तेऽद्भिः खान्यत्रोपस्पर्शः । आचम्यतेम्भोऽत्राचमनम् । मुनेर्भावः कर्म वा मौनं, इगन्ताच्चलघुपूर्वात् (सू०) इत्यण् । प्राचेतसस्त्वादिकविः स्यान्मैत्रावरुणश्च सः । वाल्मीकिश्चाथ गाधेयो विश्वामित्रश्च कौशिकः ॥ व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः ॥ पूर्वानुक्रमेणानुपूर्वं तस्य भावश्चानुपूर्व्यं, ष्यञ्, षित्वाद्वा स्त्रीत्वम् । आवर्तनमावृत् । उणादौ, परिपाटनं परिपाटिः, इञ्, आवृत्परिपाट्योर्द्वन्द्वात्स्त्रीत्वम् । ॥ ३६ ॥ पर्ययणं पर्यायः, परावनुपात्ययइणः (सू०) इति घञ् । विपर्ययः क्रमोल्लङ्घनमतिक्रमश्च । व[व्र]त्यते वर्ज्यतेऽन्नादि यत्रेति (व्रतम्) । तद्व्रतमुपवासकृच्छ्रचान्द्रायणादिकं पुण्यपर्यायम् (पुण्यकम्), संज्ञायांकन् (सू०) ॥ ३७ ॥ उपवस्ता प्राप्तोस्यौपवस्त्रं, उपवस्त्रादिभ्यः (सू०) इत्यण्, उपवस्तस्येदमौपवस्तमित्येके, वसु स्तम्भे, क्तः, उपवस्तुरिदमित्यन्नाद्यपि, यत्स्मृतिः– माषान्मधु मसूरांश्च वर्जयेदौपवस्त्रके । प्रकृतिपुरुषयोः पृथग्ज्ञानं विवेकः, भावानां पृथक्स्वरूपत्वमित्येके, विचिर् पृथग्भावे । ब्रह्मणस्तपःस्वाध्यायादेर्वर्चस्तेजो ब्रह्मवर्चसं, ब्रह्महस्तिभ्यां वर्चसः (सू०) इत्यच् ॥ ३८ ॥ ब्रह्मणे दायाञ्जलिः, यन्**मनुः**– संहत्य हस्तावध्येयं

पाठे ब्रह्माञ्जलिः पाठे विप्रुषो ब्रह्मबिन्दवः ।
ध्यानयोगासने ब्रह्मासनं कल्पे विधिक्रमौ ॥ ३९ ॥
मुख्यः स्यात्प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः ।
संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः ॥ ४० ॥
समे तु पादग्रहणमभिवादनमित्युभे ।
भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ॥ ४१ ॥
तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः ।
तपःक्लेशसहो दान्तो वर्णिनो ब्रह्मचारिणः ॥ ४२ ॥
ऋषयः सत्यवचसः स्नातकस्त्वाप्लुतो व्रती ।
ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ॥ ४३ ॥
यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ ।
स्थाण्डिलश्चाथ विरजस्तमसः स्युर्द्वयातिगाः ॥ ४४ ॥

स हि ब्रह्माञ्जलिः स्मृतः । वेदपाठे— आस्यनिर्गता जलकणा ब्रह्मबिन्दवः । (ब्रह्मासनं) ध्यानयोगयोरास्यतेऽनेन । ध्यानमेकाग्र(तया)चिन्तनं, यदाह— तत्र प्रत्ययैकतानता ध्यानम् । योगश्चित्तवृत्तिनिरोधः । कल्पते विधीयते प्रक्रम्यते वानेन विनियोगशास्त्रेणेति ॥ ३९ ॥ (मुख्यः) आद्यो विधिरित्यर्थः । (अनुकल्पः) मुख्याभावे प्रतिनिधिसंज्ञः । उपाक्रियतेऽनेनेत्युपाकर्म वेदपाठारम्भे विशिष्टो विधिः, रोहिण्यां छन्दांस्युपाकुर्यादिति हि श्रुतिः ॥ ४० ॥ वामेन वामः स्प्रष्टव्यो दक्षिणेन तु दक्षिण इति पादोपसंग्रहणम् । अभिवाद्यते— आशिषं कार्यतेऽनेनेत्यभिवादनम्, अत एवाभिवाद्योपसंग्राह्यः । भिक्षते भिक्षुः, सनाशंसभिक्ष उः (सू०) । परिवर्ज्य सर्वं संन्यस्य व्रजति परिव्राट्, परौ व्रजेः षश्च पदान्ते (उ०) इति क्विप् (क्विप्) षत्वं च । कर्मन्देन पाराशर्येण प्रोक्तं भिक्षुतन्त्रमधीते, कर्मन्दकृशाश्वादिनिः (सू०), पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः (सू०) इति णिनिः । मा कृ(कुरु)त कर्माणि मुक्ति[शान्ति]र्वः श्रेयसीति मस्करी, मस्करमस्करिणौ वेणुपरिव्राजकयोः (सू०) इति साधुः ॥ ४१ ॥ तपोऽस्यास्तीति, तपःसहस्राभ्यां विनीनी (सू०), अण् च (सू०) । अन्येषामपि दृश्यते (सू०) इति दीर्घात्पारिकाङ्क्षी । पारिरक्षि(क्ष)कः सांन्यासिकश्च । वाचं यच्छति मौनेनास्ते वाचंयमः; वाचि यमो व्रते (सू०) इति खच् । मन्यते मुनिः । भिक्षुपर्यायावेतावित्येके । दाम्यति दान्तस्तपःक्लेशानुद्विग्नः, वा दान्तशान्तेति (सू०) साधुः । वर्णोऽस्यास्तीति वर्णी, वर्णाद्ब्रह्मचारिणि (सू०) इतीनिः । ब्रह्म चरति तच्छीलो वा ब्रह्मचारी ॥४२॥ दर्शनादार्षेरविसंवादिवाक् (सत्यवचाः) । (स्नातकः)स्नातवेदसमाप्तौ (ग०) इति यावादित्वात् (सू०) कन् । यो व्रतवांस्तीर्थेष्वाप्लवते स्नातीत्याप्लुतः स स्नातकः, यत्स्मृतिः— गुरवे तु धनं दत्त्वा स्नायाद्वा तदनुज्ञया । वेदव्रतानि वा पारं नीत्वा ह्युभयमेव च । यतं यमनमस्यास्तीति यती । यच्छत्युपरमति यतः ॥ ४३ ॥ आद्यस्य(स्थण्डिलशायिनः), व्रते (सू०) इति णिनिः । परस्य (स्थाण्डिलस्य), स्थण्डिलाच्छयितरि व्रते (सू०) इत्यण् । विगते रजस्तमसी येभ्यः, सात्त्विका इत्यर्थः । द्वयमतिगच्छन्त्यतिक्रामन्ति द्वयातिगाः ॥ ४४ ॥ पूयतेऽनेन पवित्रः । प्रयतते प्रयच्छत्युपरमति वा

पवित्रः प्रयतः पूतः पाषण्डाः सर्वलिङ्गिनः ।
पालाशो दण्ड आषाढो व्रते राम्भस्तु वैणवः ॥ ४५ ॥
अस्त्री कमण्डलुः कुण्डी व्रतिनामासनं बृषी ।
अजिनं चर्म कृत्तिः स्त्री भैक्षं भिक्षाकदम्बकम् ॥ ४६ ॥
स्वाध्यायः स्याज्जपः सुत्याभिषवः सवनं च सा ।
सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् ॥ ४७ ॥
दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक् ॥ ४८ ॥
शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ।
नियमस्तु स यत्कर्मानित्यमागन्तुसाधनम् ॥ ४९ ॥
उपवीतं यज्ञसूत्रं प्रोध्दृते दक्षिणे करे ।
प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम् ॥ ५० ॥

प्रयतः । शुचिः पुण्यः पावनश्च । पाष(प)मणान्ति पाषण्डा वेदबाह्यव्रताः सर्वलिङ्गिनः क्षपणकाद्याः । सर्वाणि लिङ्गानि सन्त्येषां, भग्नव्रता इत्येके, आहुश्च– नानाव्रतधरा नानावेषाः पाषण्डिनो मताः । आषाढासु जात आषाढः, विशाखाषाढादण्मन्थदण्डयोः (सू०), यदाह– आषाढो व्रतिनां दण्डः । व्रत इत्येव, रम्भो वेणुपर्यायः ॥ ४५ ॥ कं जलमण्डे मध्ये लाति कमण्डलुः । कुण्डात् जानपदकुण्डेत्यमत्रे (सू०) ङीष् । व्रतवन्तोऽस्यां सीदन्ति बृषी । अज्यते क्षिप्यतेऽजिनम् । चरितं चर्म । कृत्यते कृत्तिः । (भैक्षं) भिक्षादिभ्योऽण् (सू०) ॥ ४६ ॥ स्वस्य वेदस्याध्ययनं स्वाध्यायः, इङश्चेति (सू०) घञ् । जपनं जपः, व्यधजपोरनुपसर्गे (सू०) इत्यप् । सोमं सुन्वन्त्यद्भिः परिवासयन्त्यस्यां सुत्या, संज्ञायांसमजेति (सू०) क्यप् । अभिषवणमभिषवः, उपसर्गात्सुनोतीति (सू०) षत्वम् । अघं मृष्यते शोध्यतेनेनाघमर्षणं, अब्दैवत्यो मन्त्रस्तद्रूपो वा, करणाधिकरणयोश्च (सू०) इति ल्युट्, त्रिरात्रोपवासादिस्तूपचारात् ॥ ४७ ॥ अमावास्या(यां) दर्शः, दृश्यते चन्द्रोऽत्रेति, यागस्तूपचारात् । पूर्णिमायां पौर्णमासः, पूर्णो माश्चन्द्रस्तत्र भवः ॥ ४८ ॥ शरीरमात्रेणैव यत्क्रियते तत्, यम्यतेनेन चित्तं यमः, यमःसमुपनिविषुचेत्यप् (सू०), आह च– अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । आगन्तु बाह्यं मृज्जलादि साधनं यत्रेति, अत एव कृत्रिमं कर्म नियमः, यदाह– शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ ४९ ॥ शैव ऊर्ध्वस्रोतासिकः सिद्धान्ती शुद्धमार्गिकः [शुद्धान्ती सिद्धमार्गिकः] । पाश्चार्थिकः पाशुपतो लाकुलोथ महाव्रती ॥ कापाली सोमसिद्धान्ती तान्त्रिकः स्याद्विशेषदृक् । यामलोद्भयमार्गी स्यात्त्रिकभेदी षडार्धिकः ॥ पूर्वाम्नायी महामार्गो भैरवी दाक्षिणागमः । शाक्तो वामस्रोतसिकः कौल आन्त्रथिको मतः । एकायनः शाश्व [सात्व] तश्च वैष्णवः पाञ्चरात्रिकः । रक्ताम्बरो भदन्तश्च शाक्यः श्रमणवन्दकौ । भिक्षुः श्वेतः श्वेतपटः क्षपणार्दिगम्बरः(दिगीश्वरः) । नग्नाटः श्रावकोऽर्हीको निर्ग्रन्थो जीवजीवको ॥ [क्षौरं तु भद्राकरणं मुण्डनं वपनं त्रिषु । कक्षापटी च कौपीनं शाटी च स्त्रीति लक्ष्यतः ॥] उपवीयते प्रावियते स्मोपवीतम् [यज्ञोपवीतं च] । अन्यस्मिन्वामे करे प्रोध्दृते प्राचीनावीतं, प्रागेव प्राचीनं, विभाषाञ्चेरदिक्स्त्रियाम् (सू०) इति खः, आवीयते स्मावीतम् । यज्ञसूत्रमित्येव, नियतं वीयते स्म निवीतं, यन्मनुः– प्रोध्दृते दक्षिणे पाणावुपवीत्युच्यते द्विजः । सव्ये प्राचीनमावीती निवीती कण्ठसज्जने ॥ ५० ॥ देवेभ्य-

अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम् ।
मध्येऽङ्गुष्ठाङ्गुल्योः पित्र्यं मूले त्वङ्गुष्ठस्य ब्राह्मम् ॥ ५१ ॥
स्याद् ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत्कृच्छ्रं सान्तपनादिकम् ॥ ५२ ॥
संन्यासवत्यनशने पुमान्प्रायोथ वीरहा ।
नष्टाग्निः कुहनालोभान्मिथ्येर्यापथकल्पना ॥ ५३ ॥
व्रात्यः संस्कारहीनः स्यादस्वाध्यायो निराकृतिः ।
धर्मध्वजी लिङ्गवृत्तिरवकीर्णी क्षतव्रतः ॥ ५४ ॥
सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।
अंशुमानभिनिर्मुक्ताभ्युदितौ तौ यथाक्रमम् ॥ ५५ ॥
परिवेत्तानुजोनूढे ज्येष्ठे दारपरिग्रहात् ।
परिवित्तिस्तु तज्ज्यायान् विवाहोपयमौ समौ ॥ ५६ ॥

स्तीर्यते दीयते तीर्थम् । स्वल्पा कनिष्ठाङ्गुलिः, द्विरक्षमञ्जलिमध्येन प्रजापतिभ्यो जलदानास्नानात् । कः प्रजापतिर्देवतास्य कायं, कस्येत् (सू०) इत्यण्- इत्वं च । अङ्गुलिस्तर्जन्यत्र, पितरो देवतास्य पित्र्यं तीर्थं, वाय्वृतुपित्रुषसोयत् (सू०) । ब्रह्मा देवतास्य ब्राह्मं तीर्थं, ब्राह्मोजातौ (सू०) इति साधुः, यद्याज्ञवल्क्यः- कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ करमध्य सौम्यं त्वाहुः ॥ ५१ ॥ ब्रह्मणो ज्ञानस्य भवनं ब्रह्मभूयं, ब्रह्मणः (कात्स्न्यं) मोक्ष इत्यर्थः, भुवो भावे (सू०) इति क्यप् । सह युनक्ति सयुक्, तस्य भावः सायुज्यम् । तद्वदिति देवत्वं देवसायुज्यं च । आदिशब्दान्मूर्द्धभूयादि । कृन्तति पापं कृच्छ्रं नाम तपः । सन्तपने भवं सांतपनं, यत्स्मृतिः- त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् । त्र्यहं परं न नाश्नीयात्कृच्छ्रं सांतपनं स्मृतम् ॥ आदिशब्दात्पराकादि ॥ ५२ ॥ संन्यसनं सर्वत्यागः, (तद्युक्तः) मरणाध्यवसायः (प्रायः) । पुमानिति प्रायस्य सान्तत्वं माविज्ञायीति, प्रायोपवेशनमतिर्नृपतिर्बभूव (रघु०) । नष्टाग्निः, वीरयते वीरोऽग्निस्तमुपेक्षया हन्ति (वीरहा) । ईर्यापथाख्यस्य भिक्षुव्रतस्य दम्भेन परविस्मापनार्थं मिथ्याकल्पना कुहना, कुह विस्मापने स्मादिच् । अर्थलिप्सया मिथ्यादर्शनं वा कुहनिकाख्यम् । शाश्वतस्त्वाह -ईर्ष्यालुर्दम्भचर्या च कुहनः कुहना क्रमात् ॥ ५३ ॥ व्रते साधुः कालो व्रत्यः, तत्र भवो व्रात्यः प्रायश्चित्तार्हः, संस्कारोलोपनयनम्, यत्स्मृतिः- सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः, व्रतेऽसाधुरित्येके, पृथग्व्यपदेशेनेत्यर्थः । निराक्रियते वेदहीनत्वान्निराकृतिः, आकृतेर्जातेर्वा निष्क्रान्तः, यत्स्मृतिः- अनधीत्य तु यो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ धर्मो ध्वजश्चिह्नमिवास्य यस्य धर्मध्वजी । लिङ्गाज्जटादेर्वृत्तिर्जीविकास्य, निक्षिप्य इत्यस्य जटा इति यावत् । अनन्तरे कीर्णं रेतोऽस्यावकीर्णी, यत्स्मृतिः- ब्रह्मचार्यवकीर्णी स्यात्कामतस्तु स्त्रियं व्रजेत् ॥ ५४ ॥ अभिभूय निर्मुक्तोस्तमितोर्कोस्याभिनिर्मुक्तः । अभिभूयोदितोर्कोस्याभ्युदितः ॥ ५५ ॥ ज्येष्ठे भ्रातर्यकृतविवाहे कनिष्ठो विवाहाद्धेतोः, परिवर्ज्य विन्दति परिवेत्ता, यत्स्मृतिः- येऽग्रजेष्वकलत्रेषु कुर्वते दारसंग्रहम् । ज्ञेयास्ते परिवेत्तारः परिवित्तिस्तु पूर्वजः ॥ उपलक्षणं चैतद्यतोऽग्निहोत्रव्रतादावपि परिवेदनव्यवहारोस्ति । तस्य ज्यायानग्रजः, परिवर्ज्य विन्दति स परिवित्तिः ॥ ५६ ॥ विवहनं विवाहः । उपयमनमुपयमः, यमःसमुपनिविषु च (सू०) इति पक्षे- अप् ।

तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ।
व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ॥ ५७ ॥
त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः ।
सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धा वरस्य ये ॥ ५८ ॥

इति ब्रह्मवर्गः । ७ ।

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।
राज्ञि राट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ॥ १ ॥
राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ।
चक्रवर्ती सार्वभौमो नृपोन्यो मण्डलेश्वरः ॥ २ ॥
येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः ।
शास्ति यश्चाज्ञया राज्ञः स सम्राडथ राजकम् ॥ ३ ॥

व्यवयनं व्यवायः । मिथुनस्य स्त्रीपुंसयोरिदं मैथुनम् । निधूयन्तेऽङ्गान्यस्मिन्निधुवनम् । रमणं रतम् । रतिः संवेशनं रहः सुरतं संमोहनं संप्रयोगोपि ॥ ५७ ॥ त्रिसंख्याको वर्गः, धर्मकामार्थैरित्येव । चतुर्णां भद्राणां समाहारश्चतुर्भद्रं, पात्रादिः (पात्राद्यन्तस्य न) । तैर्धर्मकामार्थैः, यत्कात्यः– आहुश्चत्वारि भद्राणि बलं धर्मं सुखं धनम् । जनीं वधूमर्हन्ति (वहन्ति), संज्ञायांजन्याः (सू०) इति साधुः । जामातुर्वयस्याः, जनीवोढारोपि, यल्लक्ष्यम्– यातेति जन्यानवदत्कुमारी (रघु०) ॥ ५८ ॥ इति ब्रह्मवर्गः । ७ ।

मूर्धन्यभिषिच्यते स्म, मूर्धावसिक्तोपि । राज्ञोपत्यं राजन्यः, राजश्वशुराद्यत् (सू०) इत्यत्र राज्ञोपत्ये जातिग्रहणम् । हिरण्यगर्भबाहुभ्यां जातो बाहुजः, बाहू राजन्यः कृत इति श्रुतेः । क्षत्त्रस्यापत्यं जातिः क्षत्त्रियः, क्षत्त्राद्घः (सू०) । क्षत्त्रं च क्षतत्राणात् । राजते राट्, व्रश्चभ्रस्जसृजमृजेति (सू०) षत्वं, झलांजशोन्ते (सू०) डत्वं, वावसाने (सू०) चर्त्वम् । पृथिव्या राजा पार्थिवः, सर्वभूमिपृथिवीभ्यामणञौ (सू०) । महीं क्षियत्यधिवसति महीक्षित् । [नराधिपश्च] ॥ १ ॥ अध्युपरीष्टे तच्छीलोधीश्वरः । अप्रतिरथोपि । नृपचक्रं राजके वर्तते स्वाम्येन, चक्रं राष्ट्रं वर्तयति वा चक्रवर्ती । सर्वस्या भूमेरीश्वरः सार्वभौमः, अनुशतिकादित्वात् (सू०) उभयपदवृद्धिः । अत्राहुः– रामो दाशरथी रावणारिकाकुत्स्थराघवाः । सौमित्रिर्लक्ष्मणो लङ्कापतिपौलस्त्यरावणाः ॥ दशास्योपीन्द्रजिन्मेघनादो मन्दोदरीसुतः । आञ्जनेयस्तु हनुमान्हनूमान्मारुतात्मजः । किष्किन्धाधिपसुग्रीवौ द्वौ जटायुजटायुषौ ॥ अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः । राधेयोऽङ्गाधिपः कर्णो भीमसेनो हिडिम्बजित् ॥ मारुतिः कीचकारातिर्बकवैरी वृकोदरः । धनंजयोर्जुनः पार्थो विजयः शक्रनन्दनः ॥ गान्डीवी फाल्गुनः सव्य-साची मध्यमपाण्डवः । जिष्णुः किरीटी बीभत्सुः श्वेतवाजी कपिध्वजः ॥ पृथा कुन्ती च कृष्णा तु पाञ्चाली याज्ञसेन्यपि । द्रौपदी विक्रमादित्यः साहसाङ्कः शकान्तकः ॥ शूद्रकस्त्वग्निमित्रो वा हालः स्याच्छालिवाहनः [सातवाहनः] । वैरोचनो बलिः कार्तवीर्यार्जुनः सहस्रदोः ॥ अन्यो भूम्येकदेशे यो नृपः (स मण्डलेश्वरः) ॥ २ ॥ इज्यते स्मेष्टम् । मण्डलस्य द्वादशराजकस्य, समुदितं लक्षणं चैतत् । सम्यग्राजति सम्राट्, मोराजिसमःक्वौ (सू०) इति मस्य मः ॥ ३ ॥ राज्ञां समूहो राजकम्, राज-

राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् ।
मन्त्री धीसचिवोमात्योन्ये कर्मसचिवास्ततः ॥ ४ ॥
महामात्राः प्रधानानि पुरोधास्तु पुरोहितः ।
द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ॥ ५ ॥
प्रति(ती)हारो द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः ।
रक्षिवर्गस्त्वनीकस्थोथाध्यक्षाधिकृतौ समौ ॥ ६ ॥
स्थायुकोधिकृतो ग्रामे गोपो ग्रामेषु भूरिषु ।
भौरिकः कनकाध्यक्षो रूप्याध्यक्षस्तु नैष्किकः ॥ ७ ॥
अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः ।
सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥ ८ ॥
श(ष)ण्ढो वर्षवरस्तुल्यौ सेवकार्थ्यनुजीविनः ।
विषयानन्तरो राजा शत्रुर्मित्रमतः परम् ॥ ९ ॥

न्यानां समूहो राजन्यकम्, गोत्रोक्षोष्ट्रेति (सू०) वुञ् । मन्त्रः कर्तव्यावधारणमस्त्यस्य मन्त्री । धिया सचति समवैति धीसचिवः । अमा सह समीपे वा भवोमात्यः । सामवायिकोपि । ततो मन्त्रिणोन्येमात्याः कर्मसहाया नियोग्याख्याः ॥ ४ ॥ अमात्या इत्येव । महती मात्रा परिच्छद एषां महामात्राः । प्रदधाति प्रधानमाविष्टलिङ्गकम् । पुरो धीयते हिनोति वा पुरोहितः । सौवस्तिकोपि । द्रष्टा निर्णेता । व्यवहार ऋणादानादिन्यायः, यत्स्मृतिः- वि नानार्थेव संदेहे हरणं हार उच्यते । नानासंदेहहरणाद् व्यवहारः प्रकीर्तितः ॥ पृच्छतीति प्राट्, क्विब्वचिप्रच्छिश्रीति (उ०) क्विपि दीर्घोऽसंप्रसारणं च । प्राट् चासौ विविधं वक्ति (विवाकश्च) प्राड्विवाकः । अक्षाण्यायमुखानि रूप्याणि वा पश्यति (अक्षदर्शकः), आक्षदर्शकोपि । धर्माधिकरणिकोक्षपटलिकश्च ॥ ५ ॥ प्रतिह्रियन्ते वार्यन्तेनेन प्रतिहारः । द्वारि तिष्ठति द्वाःस्थः । द्वारि स्थितं दर्शयत्यावेदयति (द्वाःस्थितदर्शकः), द्वे संज्ञे इत्येके, द्वाःस्थित एव हि दर्शयति, द्वाःस्थोपस्थितदर्शका इत्येके पेठुः । दण्डी दौवारिको वेत्री, उत्सारकश्च । अङ्गरक्षकवृन्दं, अनीके तिष्ठत्यनीकस्थः । राजशिक्षाविचक्षणो वेति शाश्वतः । अधिकृतोक्षेष्वायमुखेष्वध्यक्षः, अध्यक्ष्णोति वा, अक्षू व्याप्तौ, अधिकान्यक्षाणीन्द्रियाण्यस्य वा । अधिक्रियते- उपरि नियुज्यते स्माधिकृतः ॥ ६ ॥ तिष्ठति तच्छीलः स्थायुकः, लषपतपदस्थाभूवृषेत्युकञ् (सू०) । अधिकृत इत्येव, गां भुवं पाति गोपायति वा गोपः । भूरिणि हेम्नि नियुक्तो भौरिकः । हैरिक इति पाठे हिरण्ये नियुक्तः । रूपमाहतमस्य रूप्यं दीनारादि- रूपादाहतप्रशंसयोर्यप् (सू०), निष्के दीनारादौ नियुक्तो नैष्किकः ॥ ७ ॥ वंशस्यान्तरन्तर्वंशं कुल, स्त्रियस्ताः सन्त्यस्यान्तर्वंशिकः, अन्तःपूर्वपदाट्ठञ् (सू०) इत्येके । जनः कुब्जवामनादिसमूहः । सुविदन्तं विवाहं जानन्तं लान्ति सुविदल्ला ऊढाः स्त्रियः, तत्र भवाः सौविदल्लाः । कञ्चुकं विनीतवेशार्थमस्त्यस्य(कञ्चुकी) । कुलस्त्रीर्व्यवस्थायां स्थापयन्ति स्थापत्याः, यद्वा तिष्ठन्त्यस्मिन्वेशाः स्थः, घञर्थेकः (वा०), स्थश्चासौ पतिः स्थपतिः, तत्र भवा इति, दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः (सू०) । सुविदस्योद्वहत इमे सौविदाः ॥ ८ ॥ शाम्यति शण्ढः, अत एवान्तःपुरपालकः । वर्षं रेतःसेकं वृणोत्याच्छादयति वर्षवरः, वृष शक्तिप्रतिबन्धे वा । अर्थयते तच्छीलोर्थी, अर्थाच्चासंनिहिते (वा०) इतीनिः । विजिगीषुविषयादव्यवहितः (शत्रुः) । अतः शत्रोः परभूमिस्थं विजिगीषोर्मित्रम् ॥ ९ ॥ ऊर्ध्वमासीन

उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः ।
रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ॥ १० ॥
द्विड्विपक्षाहितामित्रदस्युशात्रवशात्रवः ।
अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ ११ ॥
वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत् ।
सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्तनम् ॥ १२ ॥
यथार्हवर्णः प्रणिधिरव(प)सर्पश्चरः स्पशः ।
चारश्च गूढपुरुषश्चाप्तः प्रत्ययितस्त्रिषु ॥ १३ ॥
सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि ।
स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि ॥ १४ ॥
तान्त्रिको ज्ञातसिद्धान्तः सत्री गृहपतिः समौ ।
लिपि(पि)कराक्षरचणाक्षरचुञ्चुश्च लेखके ॥ १५ ॥

इवोदासीनः शत्रुमित्रभूमिभ्यो बाह्योत एव तटस्थः । ने(जे)तुः पश्चात्स्थितो राजा, पार्ष्णिमिव पार्ष्णिं गृह्णात्यवष्टभ्नाति (पार्ष्णिग्राहः) । पञ्चस्वेतेषु द्वादशराजकमण्डलं परिसमाप्तं. यदाहुः— अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् । तथारिमित्रमित्रं च विजिगीषोः पुरः स्मृताः ॥ पार्ष्णिग्राहस्ततः पश्चात्ततस्त्वाक्रन्द(क)न्द आसारश्च तयोः पृथक् । मध्यमोथाप्युदासीन इति द्वादशराजकम् ॥ रपयति रिपः, रपृ गतौ । समानं पत्न्यकार्याभिनिवेशात्सपत्नः । इयर्त्यरिः । द्वेष्टि द्विषन्, द्विषोऽमित्र (सू०) इति शतृ । द्वेष्टि तच्छीलो द्वेषणः, क्रुधमण्डार्थेभ्यश्च (सू०) इति युच् । दुष्टं हृदयमस्य दुर्हृत्, सुहृद्दुर्हृदौ मित्रामित्रयोः (सू०) इति साधुः ॥ १० ॥ विरुद्धः पक्षो विपक्षः । अमत्योऽमित्रः । शातयति शत्रुः । (शात्रवः) प्रज्ञादिभ्यश्च (सू०) इति पक्षेऽण् । अभिहन्त्यतेऽभिघाती । प्रियते परः, पृङ् व्यायामे । इयर्त्यरातिः । प्रतीपमर्थयते प्रत्यर्थी । परिपन्थयति परिपन्थी, छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि (सू०) इति साधुः । प्रत्यवस्थाता प्रत्यनीकः परिपन्थकोऽपि । [भ्रातृव्यासहनद्वेषिजिघांसुप्रत्यनीकिनः] ॥ ११ ॥ वयसा तुल्यो वयस्यः, नौवयोधर्मेति (सू०) यत् । समानं वयोऽस्य सवयाः । मेद्यति स्निह्यति मित्रम् । समानं ख्याति सखा, समाने ख्यः स चोदात्तः (उ०) इतीण् (स) डिच्च खलोपश्च । सख्युर्भावः सख्यं, सख्युर्यः (सू०) । सप्त पदानि क्रमाः सुप्तिङन्तानि वा व्याप्नोति (साप्तपदीन), साप्तपदीनं सख्यं (सू०) इति साधुः । तद्योगात्सखापि साप्तपदीनः । सौहृदं सौहार्दं सौहृदीयमजर्यं च । इच्छानुवर्तनमित्यर्थः, अनुरुध कामे ॥ १२ ॥ देशकालोचितो वर्ण आकारो जातिवर्णनं वास्य यथार्हवर्णः । प्रकर्षेण गुप्तो धीयते परेषु प्रणिधिः । अवच्छन्नं सर्पत्यवसर्पः । चरति चरश्चारश्च, ज्वलादित्वाण्णो वा (ज्वलितिकसन्तेभ्यो णः) । स्पशति बाधते परान्स्पशः । आप्यते स्माप्तः, अविसंवादिवाक् । प्रत्यय आश्वासोऽस्य प्रत्ययितः ॥ १३ ॥ संवत्सरः कालोपलक्षणं, तद्वेद सांवत्सरः, तदधीते तद्वेद (सू०) इत्यण् । ज्योतींषि ग्रहादीनाधिकृत्य कृतो ग्रन्थो ज्योतिषः, ज्योतिषं वेद ज्यौतिषिकः, क्रतूक्थादिसूत्रान्ताट्ठक् (सू०) । दैवं पूर्वकृतं कर्म जानाति दैवज्ञः । मुहूर्तं वेद मौहूर्तिकः, क्रतूक्थादित्वात् (सू०) ठग्वा । कालादिज्ञानमस्यास्तीति ज्ञानी । कृतान्तं वेद कार्तान्तिकः ॥ १४ ॥ तन्त्र्यते तन्यतेऽनेनं वा तन्त्रं पारमेश्वरवैद्यकज्योतिषादि, तद्वेद तान्त्रिकः । सिद्धो निवारितविप्रतिपत्तिरन्तो निष्ठात्र सिद्धान्तः । सदोऽस्यास्मिन्सत्त्रं गृहं सदादानं च । लिपिं करोति, दिवाविभेति (सू०) टः । अक्षरैर्वित्ताक्षरचणः, तेन वित्तश्चुञ्चुप्चणपौ (सू०) ॥ १५ ॥

लिखिताक्षरविन्यासे लिपिर्लिविरुभे स्त्रियौ ।
स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणी ॥ १६ ॥
अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ॥ १७ ॥
स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ॥ १८ ॥
सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः ।
षड् गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः ॥ १९ ॥
क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् ।
स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम् ॥ २० ॥
भेदो दण्डः साम दानमित्युपायचतुष्टयम् ।
साहसं तु दमो दण्डः साम सान्त्वमथो समौ ॥ २१ ॥
भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणम् ॥ २२ ॥

अक्षरविन्यासे त्रयं वर्तते । लिख्यते स्म लिखिता (–तम्) । लिप्यतेनया पत्त्रं लिपिः । (लिविः) जपादित्वात् (ग०) पक्षे वत्वम् । संदिश्यते संदेशो मुखस्वरूपम् । दूयतेनेन यथोक्तवादित्वात्पर इति दूतः । (दूत्यं) दूतवणिग्भ्यां चेति वक्तव्यात् (वा०) यः ॥ १६ ॥ अध्वानं गच्छत्यध्वनीनः, अध्वनोयत्खौ (सू०)। पन्थानं गच्छति पथिकः, पथःष्कन् (सू०) । पन्थानं नित्यं गच्छति पान्थः, पन्थोणनित्यं (सू०) इति णः पन्थादेशश्च । अदूरविप्रकर्षस्त्वनयोः पर्यायत्वम् । दै(दे)शिकोपि । पाथेयं शम्बलम् ॥ १७ ॥ स्वं विद्यतेस्य स्वामी, स्वामिन्नैश्वर्ये (सू०) इति साधुः । अमा सह समीपे वा भवोऽमात्यः, अमेहक्वतसित्रेभ्यस्त्यब्विधिर्योऽव्ययात्स्मृतः (का०) इत्यप् (अव्ययात्त्यप्) । कूयते मृग्यत इति कोशः, कुष्णातः कोष इत्येके । राजतं राष्ट्रम् । दुःखेन गम्यतेऽस्मिन्दुर्गं, सुदुरोरधिकरणे चेति (वा०) डः । वलन्त्यनेनेति बलम् । अङ्गान्यारम्भकाणि । प्रक्रियतेऽनया प्रकृतिः । एकमुख्यः सजातीयसमूहः श्रेणिः । प्रकृतयो राज्याङ्गानीत्येव, यत्कात्यः– अमात्याद्याश्च पौराश्च सद्भिः प्रकृतयः स्मृताः ॥ १८ ॥ संधानं संधिः, एकत्वमित्यर्थः । विरुद्धं ग्रहणं स्वस्थानात्परमण्डले दाहविलोपादिर्विग्रहः । यानं यातव्यं प्रति यात्रा । आसनं विग्रहादिनिवृत्तिः । द्वौ प्रकारौ द्वैधं, द्वित्र्योश्चधमुञ् (सू०), एकेन संधायान्यत्र यात्रेत्यर्थः, यद्वा– बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः ॥ अशक्त्या बलवदाश्रयणमाश्रयः । गुणा राज्योपकारकाः । शक्यते जतुमाभिः शक्तयः । कोशदण्डर्द्धिः प्रभुशक्तिः । उद्यम्य सहनमुत्साहशक्तिः । मन्त्रः पञ्चाङ्गो मन्त्रशक्तिः ॥ १९ ॥ प्रागवस्थानतः शक्तिसिद्ध्योरपचयः क्षयः, साम्यं स्थानं, उपचयो वृद्धिः । नीतेरन्यत्र धर्मादित्रिवर्गः [एतत्त्रयं नीतिवादिनां राज्ञां त्रिवर्ग इत्युच्यते] । प्रतपन्त्यनेन प्रतापः । प्रभवन्त्यनेन प्रभावः । तेज उत्कटत्वं, यद्भरतः– अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेप्यसहनं तत्तेजः समुदाहृतम् ॥ २० ॥ उपैत्यनेनोपायः । मायोपेक्षेन्द्रजालान्यत्रैवान्तर्भूतानि । सहसि बले भवं साहसम् । स्यति वैरं सामयति वा साम प्रियवचनादि, साम सान्त्वने । सान्त्व सामप्रयोगे ॥ २१ ॥ संहतयोर्भेदनं भेदः । उपांशु जपनमुपजापः । उपधीयते समीपे ढौक्यते परीक्षार्थमुपधा, धर्मकामार्थभयोपन्यासेनाशयान्वेषणं, यत्कौटिल्यः– उपधाभिः शौचाशौचपरिज्ञानममात्यानाम् ॥ २२ ॥ पञ्च(शब्दाः)निःशलाकान्ता वक्ष्यमाणा वाच्यलिङ्गाः । न षडक्षीणि यत्राषड-

पञ्च त्रिष्वषडक्षीणो यस्तृतीयाद्यगोचरः ।
विविक्तविजनच्छन्ननिःशलाकास्तथा रहः ॥ २३ ॥
रहश्चोपांशु चालिङ्गे रहस्यं तद्भवे त्रिषु ।
समौ विश्र(स्र)म्भविश्वासौ भ्रेषो भ्रंशो यथोचितात् ॥ २४ ॥
अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम् ।
युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ॥ २५ ॥
न्याय्यं च त्रिषु षट् संप्रधारणा तु समर्थनम् ।
अववादस्तु निर्देशो निदेशः शासनं च सः ॥ २६ ॥
शिष्टिश्चाज्ञा च संस्था तु मर्यादा धारणा स्थितिः ।
आगोपराधो मन्तुश्च समे तूद्दानबन्धने ॥ २७ ॥
द्विपाद्यो द्विगुणो दण्डो भागधेयः करो बलिः ।
घट्टादिदेयं शुल्कोऽस्त्री प्राभृतं तु प्रदेशनम् ॥ २८ ॥
उपायनमुपग्राह्यमुपहारस्तथोपदा ।
यौतकादि तु यद्देयं सुदायो हरणं च तत् ॥ २९ ॥

क्षीणो मन्त्रः, अषडक्षाशितंग्वलंकर्मेति (सू०) स्वार्थे खः, यदाहुः– षट्कर्णो भिद्यते मन्त्रः ' विवि-च्यते पृथक् क्रियते स्म विविक्तम् । विगतो जनो(यतः) विजनम् । छाद्यते स्म छन्नम् । निर्गता शलाका व्यथकोत्र निःशलाकम् । रहयति रह इत्येको रहःशब्दः सान्तः क्लीबे ॥ २३ ॥ अन्योऽव्ययम् । अव्यये आलिङ्गे द्वे (रहश्चोपांशु च) । अनुरहसं च । रहसि भवं रहस्यं, दिगादित्वाद्यत् (सू०) । विश्रम्भणं विश्रम्भ आश्वासः । यथोचिताद्रूपाद्भङ्गो(भ्रंशो)धःपातो भ्रेषः, भ्रेषृ चलने ॥ २४ ॥ नियतमीयते न्यायः, परिन्योर्नीणोः (सू०) इति घञ् । कल्पनं कल्पः सामर्थ्यम् । दिश्यमानस्योचितस्य रूपं देश-रूपं, प्रशस्तं देशनं वा । सम्यगञ्जसा सत्यमत्र समञ्जसम् । उपाय एवौपयिकं, विनयादित्वात्– उपायो ह्रस्वत्वंच (ग०) इति ठक् । अभिनीयते स्माभिनीतम् ॥ २५ ॥ तद्वन्न्याय्यं, न्यायादनपेतं, धर्मपथ्य-र्थेति (सू०) यत् । उचितं सांप्रतं च । संप्रधार्यते अर्थः स्वरूपमापद्यते ययेति संप्रधारणा युक्तायुक्तपरीक्षा । अवनम्य वदनमववादो मुखस्वरूपम् । निःशेषेण देशनं निर्देशः । नियतं देशनं निदेशः ॥२६॥ शासनं नियोजनं शिष्टिः । आज्ञापनमाज्ञा । संतिष्ठतेनया संस्था । मर्येति समीपार्थ(सीमार्थ)मव्ययं, तत्र दीयते मर्यादा । आ– अगति कुटिलं गच्छति– आगः, असन्तः क्लीबे । मन्यते हृदि मन्तुः । उद्दीयतेस्मिन्नु-द्दानं, दोऽवखण्डने, देङ् रक्षणे वा ॥ २७ ॥ द्वौ पादौ प्रमाणमस्य द्विपाद्यः, पणपादमाषशताद्यत् (सू०), प्राण्यङ्गत्वाभावात् पद्यत्यतदर्थे (सू०) इति पद्भावाभावः । भागोंश एव भागधेयः, नामरूपभागेभ्यो-धेयः (वा०) । कीर्यते प्रत्येकं करः । वलन्तेनेन बलिः, राजग्राह्यः षड्भागादिर्भोगः । प्रत्येकं स्थावर-जङ्गमादिदेयः करः । नियोज्योपजीव्यो बलिरित्यवान्तरभेदोर्थशास्त्रोक्तो नाश्रितः । घट्टन्तेनेन घट्टयति वा घट्टो नदीतरस्थानम् । आदिशब्दाद् गुल्मप्रतोल्यादौ प्रावेश्यनैष्क्रा(ष्क)म्यद्रव्येभ्यो राजग्राह्यो भागः शुल्कः, शवति शलति वा सुखेन यात्यनेनेति । प्रकर्षेणाराधनार्थमाभ्रियते ढौक्यते स्म प्राभृतम् । प्रदि-श्यते प्रदीयते प्रदेशनम् ॥ २८ ॥ उप समीपेऽयतेनेनोपायनम् । उपगृह्यत उपग्राह्यम् । उपह्रियत उप-हारः । उपदीयत उपदा । कौशलिकं ढौकनं च । उपदोत्कोच इत्येके, उपप्रदानमुत्कोच उपदा लञ्चय समाः । युतयोर्वधूवरयोरिदं यौतकम् । आदिशब्दाद् बन्धुदत्तादि । सुष्ठु दीयते सुदायः, स दाय इत्येके, यच्छाश्वतः– यौतकादि धनं दायो दायो दानं च कथ्यते । ह्रियते हरणम् ॥२९॥ स चासौ कालश्च

तत्कालस्तु तदात्वं स्यादुत्तरः काल आयतिः ।
सांदृष्टिकं फलं सद्य उदर्कः फलमुत्तरम् ॥ ३० ॥
अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजम् ।
महीभुजामहिभयं स्वपक्षप्रभवं भयम् ॥ ३१ ॥
प्रक्रिया त्वधिकारः स्याच्चामरं तु प्रकीर्णकम् ।
नृपासनं तु यद्भद्रासनं सिंहासनं तु तत् ॥ ३२ ॥
हैमं छत्त्रं त्वातपत्रं राज्ञस्तु नृपलक्ष्म तत् ।
भद्रकुम्भः पूर्णकुम्भो भृङ्गारः कनकालुका ॥ ३३ ॥
निवेशः शिबिरं षण्ढे सज्जनं तूपरक्षणम् ।
हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् ॥ ३४ ॥
दन्ती दन्तावलो हस्ती द्विरदोनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३५ ॥
इभः स्तम्बेरमः पद्मी यूथनाथस्तु यूथपः ।
मदोत्कटो मदकलः कलभः करिशावकः ॥ ३६ ॥

तत्कालः । तदेत्यस्य भावस्तदात्वम् । एष्यत्यायतिरागामी कालः । संदृष्टं प्रत्यक्षं प्रयोजनमस्य सांदृष्टिकम् । समानेहनि सद्यस्तात्कालिकं फलं, सद्यःपरुत्परारीति (सू०) साधुः । उदृच्यतेभिलाषात्तूयत उदर्कः ॥ ३० ॥ भयमित्युत्तरेण योज्यम् । आदिशब्दात्पिशाचाशन्यादि । स्वराष्ट्राच्चौराटविकादिभयम्, परराष्ट्राद्दाहविलोपादिभयं च । स्वपक्षाद्राजपुत्रादेरहेरिव गृहस्थिताद्भयम् ॥ ३१ ॥ प्रारम्भात्करणं प्रक्रिया । अधिक्रियते प्रस्तूयतेधिकारः, व्यवस्थास्थापनमित्यर्थः । चमर्या इदं चामरम् । प्रकीर्यते विक्षिप्यते प्रकीर्णम् । भद्रस्यासनं, भद्रं हाय्यादिमयं वासनं भद्रासनम् । हेम्न इदं हैमं सिंहोपलक्षितमासनम् ॥ ३२ ॥ छाद्यतेनेन च्छत्त्रम् । आतपात्त्रायत आतपत्रम् । तच्छत्त्रम्, यल्लक्ष्यं— नृपतिककुदं दत्त्वा यूने सितातपवारणम् (रघु०) । भद्रार्थं भद्रो वा कुम्भः । भृज्यते भ्रियते वा भृङ्गारः । सौवर्ण आलुः (कनकालुका) ॥ ३३ ॥ निविश्यते संनिवेशेन स्थाप्यते निवेशः सैन्यावासः । शेरतेस्मिञ्शिबिरम् । स्कन्धावारोपि । सच्छोभनं जन्यतेनेन सज्जनं सज्ज्यतेनेन वा । उपरक्ष्यतेनेनोपरक्षणं सैन्यस्य प्रगुणीकरणं गुल्मको वा । चतुरङ्गा हि सा(सेना), पदातीनां समूहः पादातं, भिक्षादित्वात् (सू०) अण् ॥३४॥ दन्तौ स्तोस्य दन्ती दन्तावलः, दन्तशिखात्संज्ञायां (सू०) इति वलच्, वले (सू०) इति दीर्घः । हस्ती, हस्ताज्जातौ (सू०) इतीनिः । द्वौ रदावस्य द्विरदः । न एकेन पिबत्यनेकपः । द्वाभ्यां पिबति द्विपः । मतङ्गादृषेर्जातो मतङ्गजः । गजति माद्यति गजः । नगे भवो नागः, न– अगो वा । कुञ्जौ कुम्भाधोगतौ दंष्ट्रे वा स्तोस्य कुञ्जरः, (रप्रकरणे) खमुखकुञ्जेभ्योरोवक्तव्यः (वा०), कुञ्जेषु रमते, डः । वारयत्यरीन्वारणः ॥ ३५ ॥ एतीभः । स्तम्बे तृणे रमते स्तम्बेरमः, स्तम्बकर्णयोरमिजपोः (सू०) इत्यच् । पद्मानि यौवने रक्तबिन्दवोस्य सन्ति पद्मी ? सामजः सिन्धुरः कुम्भी च । इतोश्वेभ्यः प्रागगजवर्गः । मदेन दानाम्बुना कलो मनोज्ञः । कलो भाति कलभते वा कलभः ॥ ३६ ॥ प्रभिद्यते स्म प्रभिन्नः । गर्जो

प्रभिन्नो गर्जितो मत्तः समावुद्वान्तनिर्मदौ ।
हास्तिकं गजता वृन्दे करिणी धेनुका वशा ॥ ३७ ॥
गण्डः कटो मदो दानं वमथुः करशीकरः ।
कुम्भौ तु पिण्डौ शिरसस्तयोर्मध्ये विदुः पुमान् ॥ ३८ ॥
अवग्रहो ललाटं स्यादीषिका त्वक्षिकूटकम् ।
अपाङ्गदेशो निर्याणं कर्णमूलं तु चूलिका ॥ ३९ ॥
अधः कुम्भस्य वाहित्थं प्रतिमानमधोस्य यत् ।
आसनं स्कन्धदेशः स्यात्पद्मकं बिन्दुजालकम् ॥ ४० ॥
पक्षभागः पार्श्वभागो दन्तभागस्तु योग्रतः ।
द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे क्रमात् ॥ ४१ ॥
तोत्त्रं वैणुकमालानं बन्धस्तम्भेथ शृङ्खले(ला) ।
अन्दुको निगडोस्त्री स्यादङ्कुशोस्त्री सृणिः स्त्रियाम् ॥ ४२ ॥
दूष्या कक्ष्या वरत्रा स्यात्कल्पना सज्जना समे ।
प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ॥ ४३ ॥

संजातास्य गर्जितः । उद्वमति स्मोद्वान्तः, टुवम (उद्गिरणे)। राजवाह्यस्त्वौपवाह्यः सन्नाह्यः समरोचितः । हस्तिनां समूहो हास्तिकं, अचित्तहस्तिधेनोष्ठक् (सू०)। गजानां समूहो गजता, गजाच्चेति वक्तव्या-त्तल (गजसहायाभ्यां चेति वक्तव्यम्)। धयन्त्येनां धेनुका । वष्टि कामयते वशा ॥ ३७ ॥ (गण्डति) गडि वदनैकदेशे । कटति वर्षति मदं कटः । माद्यत्यनेन मदः, मदोनुपसर्गे (सू०) इत्यप् । द्यति खण्डयत्यनेनेति दानम्, दत्तिर्वा । वम्यते वमथुः, ट्वितोथुच् (सू०)। कुम्भाकृती मांससंघातौ । वेत्ति संज्ञां यस्मादङ्कुशस्थानात्स विदुः, यत्पालकाप्यः— तत्र रक्षावितानं द्वे विदू द्वौ श्रवणे गतौ । प्राक्च पश्चाच्च तिर्यक्च षड्भेदाङ्कुशवारणा ॥ ३८ ॥ अवगृह्यतेङ्कुशेनावग्रहः । ईषा लाङ्गलकीलेव— ईषि-का । निर्यात्यनेनाश्रु निर्याणम् । चोल्यते पार्श्वगमनायाङ्कुशेनास्यां चूलिका ॥ ३९ ॥ वाह्यतेनेनाङ्कुश-चोदनया वाहित्थम्, मदवाहिनि स्थाने तिष्ठति वा, वाह्यस्यापभ्रंशोयम् । अस्य वाहित्थस्याधः प्रति-मानं, प्रतिमीयतेनेनेति, डुमिञ् प्रक्षेपणे, मीनातिमिनोतिदीङां ल्यपि च (सू०) इत्यात्वम् । आस्यतेस्मिन्ना-सनम् । पद्मप्रतिकृति रक्तत्वात्पद्मकं, तारुण्ये हि हस्तिनां देहे रक्तबिन्दवः स्युः ॥ ४० ॥ हस्तिनां योग्रतो भागः (दन्तभागः)। हस्तिनः पूर्वः पादजङ्घादिभागो गात्रम्, पश्चाद्भागोऽवरम् ॥ ४१ ॥ तुद्यतेनेन वेणुमयेन प्रेषणेनेति तोत्त्रम् । आलायते बध्यतेत्रालानं, ला— आदाने । शृणाति बन्धनेन शृङ्खलम् । अन्दति बध्नाति— अन्दूः, अदि बन्धने, स्वार्थे कन्, इकोह्रस्वोङ्यो गालवस्य (सू०)। निगल्यते बध्यतेनेन निगडः । अङ्क्यते गम्यतेनेनाङ्कुशः । सरत्यनया सृणिः ॥ ४२ ॥ दूष्यते दूयते वानया दूष्या । कक्षायां मध्यदेशे भवा कक्ष्या । व्रियतेनया वरत्रा मध्यबन्धनी चर्मरज्जुः । (कल्पना) हस्तिनः सज्जीकरणं, मकरलगैरिकादिना शृङ्गारेणेत्येके । प्रवहन्त्येनां प्रवेणी । आस्तीर्यते हस्तिपृष्ठ आस्त-रणम् । वर्णो वर्णकम्बलो भीमवत् । परिस्तोम्यते प्रस्तीर्यते परिस्तोमः, वर्णपरिस्तोम इत्येके । कुथ्यते कुथा ॥ ४३ ॥ वेति स्म याति भुङ्क्ते च वीतं, विशेषेणेतं नष्टं वा । (हस्त्यश्वं) सेनाङ्गत्वात्समाहारः ।

वीतं त्वसारं हस्त्यश्वं वारी तु गजबन्धनी ।
घोटके वी(पी)तितुरगतुरंगाश्वतुरंगमाः ॥ ४४ ॥
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ।
आजानेयाः कुलीनाः स्युर्विनीताः साधुवाहिनः ॥ ४५ ॥
वा(व)नायुजाः पारसीकाः काम्बोजा बाह्लिका हयाः ।
ययुरश्वोऽश्वमेधीयो जवनस्तु जवाधिकः ॥ ४६ ॥
पृष्ठ्यः स्थौरी सितः कर्को रथ्यो वोढा रथस्य यः ।
बालः किशोरो वाम्यश्वा वडवा वाडवं गणे ॥ ४७ ॥
त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते ।
कश्यं तु मध्यमश्वानां हेषा ह्रेषा च निस्वनः ॥ ४८ ॥
निगालस्तु गलोद्देशे वृन्दे त्वश्वीयमाश्ववत् ।
आस्कन्दितं धोरितकं रेचितं वल्गितं प्लुतम् ॥ ४९ ॥

वार्यतेनया वारी गजदानभूः । घोटते भूमौ परिवर्तते घोटकः । वेति याति वीतिः । तुरं त्वरितं गच्छति तुरगः, डः । (तुरङ्गः) खच्चडिद्वाच्यः (वा०)। (तुरंगमः) गमश्चेति (सू०) खच् । अश्नुतेध्वानमश्वः ॥ ४४ ॥ वजति तच्छीलो वाजी, वाजाः पक्षा अभूतस्येति वा । वाह्यते वाहः । अर्वति यात्यर्वा । गन्ध्यतेऽर्द्यते गन्धर्वः । हयति याति हयः । सिन्धौ भवः सैन्धवः, विशेषेऽपि सामान्यवृत्तिः । सपति समवैति सप्तिः । इतो रथप्रकरणात्प्रागश्वपरिकरः । आजेन क्षेपेणानेयाः (आजानेयाः), आयत्ता इत्यर्थः । विनीयन्ते विनीताः सुशिक्षाः ॥ ४५ ॥ वनायुजादिषु देशेषु— एते जाता हयविशेषाः । एवं तुक्खारादयोऽपि । लक्ष्ये वाह्लीकोऽश्वः । याति— अत्यर्थं ययुः । अश्वमेधाय हितोऽश्वमेधीयः, अश्वमेधाच्छ-च (सू०) । जवते तच्छीलो जवनः, जुचङ्क्रम्येति (सू०) युच् । मृगादिरपि । प्रजोरिनिः (सू०) इति प्रजवीति च ॥ ४६ ॥ यत्पृष्ठे जलादिकमुह्यतेसौ पृष्ठ्यः, साधो यत् (तत्रसाधुः) । स्थूराणां पश्चाज्जङ्घादिभागानामिदं स्थौरं बलमस्त्यस्य स्थौरी । कर्कः शुक्लोऽश्वः, क्रियन्ते वर्णान्तराण्यस्येति । रथं वहति रथ्यः, तद्वहतिरथयुगेति यत् (सू०) । कीयते बोध्यते कश्यते वा किशोरः । वाम्यते गर्भे वामी, यल्लक्ष्यम्– अश्वोष्ट्रवामीशतानि(वाहि)तार्थम् (रघु०) । वडं बलं हयं वा वति वडवा, स्त्रीविषयत्वाद् ङीष् नास्ति । अश्वा त्वजादिः । प्रसूतिनार्थे । वडवानां समूहो वाडवं, खण्डिकादिभ्यश्च (सू०) इत्यञ् ॥ ४७ ॥ (आश्वानं) अश्वस्यैकाहगम इति (सू०) खञ् । कशामर्हति कश्यम् । हेषृ ह्रेषृ अव्यक्ते शब्दे, गुरोश्चहलइति (सू०) अः ॥ ४८ ॥ निगलन्त्यनेन निगालः, गलो जत्रुसन्धिः, उन्न्योर्ग्रः इति (सू०) घञ् । गलस्योद्देशः प्रदेशः देवमणेरावर्तस्य स्थानम् । अश्वानां समूहः (आश्वीय, आश्व), कशाश्वाभ्यांयञ्छावन्तरस्याम् (सू०), पक्षे तु– अनुदात्तादेरञ् (सू०) । अश्वानां धाराख्या इमाः पञ्च गतयः, धार्यते गतौ स्थाप्यतेऽनया धारा, भिदादित्वात्साधुः (षिद्भिदादिभ्योऽङ्) । आस्कन्दनमास्कन्दितं, उत्तेरिताख्योतिवेगः । धोरणं धोरितं, धोरॄ गतिचातुर्ये । रेचितमुत्तेजिताख्यम् । क्रमस्त्वन्यथा, यदाहुः– धोरितं वल्गितं धारा प्लुतमुत्तेजितं क्रमात् । उत्तेरितं चेति पञ्च शिक्षयेत्तुरगं गतम् ॥ धोरितं गतिमात्रं यद्योजनं वल्गितं पुरः । अग्रकायसमुल्लासात् कुञ्चितास्यं नतत्रिकम् ॥ पूर्वापरोन्नमनतः क्रमादारोपणं प्लुतम् ॥ उत्तेजितं मध्यवेगं योजनं श्लथवल्गया । उत्तेरितेति-वेगान्धो न शृणोति न पश्यति ॥ ४९ ॥ घोणते श्वासेन वलते घोणा । प्रवते चलति प्रोथः, वृत्तो

गतयोमूः पञ्च धारा घोणा तु प्रोथमस्त्रियाम् ।
कविका तु खलीनोऽस्त्री शफं क्लीबे खुरः पुमान् ॥ ५० ॥
पुच्छोऽस्त्री लूमलाङ्गूले वालहस्तश्च वालधिः ।
त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ॥ ५१ ॥
याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः ।
असौ पुष्य(ष्प)रथश्चक्रयानं न समराय यत् ॥ ५२ ॥
कर्णीरथः प्रवहणं डयनं च समं त्रयम् ।
क्लीबेऽनः शकटोऽस्त्री स्याद्गन्त्री कम्बलिवाह्यकम् ॥ ५३ ॥
शिबिका याप्ययानं स्याद्दोला प्रेङ्खादिका स्त्रियाम् ।
उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ॥ ५४ ॥
पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली ।
रथे काम्बलवास्त्राद्याः कम्बलादिभिरावृते ॥ ५५ ॥
त्रिषु द्वैपादयो रथ्या रथकट्या रथव्रजे ।
धूः स्त्री क्लीबे यानमुखं स्याद्रथाङ्गमपस्करः ॥ ५६ ॥
चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान् ।
पिण्डिका नाभिरक्षाग्रकीलके तु द्वयोरणिः ॥ ५७ ॥

नासान्तःप्रदेशः । कवते दन्तचर्वणाच्छब्दायत इति कविका । खलति चलति खलीनं, खे तालुनि लीनं वा । शप्यते भुवा घृष्यते शफम् । खुरति विलिखति क्ष्मां खुरः ॥ ५० ॥ पूयते दंशादीनुत्सारयति पुच्छं, पूतौ छादयति वा । लूयते लूमम् । लङ्गति चलति लाङ्गूलम् । वालो हस्त इव दंशवारणाद् वालहस्तः, प्रशस्ता वाला ऽस्य । वाला धीयन्तेऽस्मिन्वालधिः । उपावर्तते स्मोपावृत्तोऽश्वः । लुठति स्म लुठितः ॥ ५१ ॥ यात्यनेन यानं साम्परायिकाख्यम् । शताङ्गो बह्वङ्कः । स्यन्दते याति स्यन्दनः । रमन्तेऽस्मिन् रथः । इतो भटादेः प्राग्रथप्रकरणम् । पुष्ये यात्रोत्सवादौ मङ्गल्यो रथः पुष्यरथः । चक्रयुक्तं यानं (चक्रयानम्) ॥ ५२ ॥ कर्णिषु स्कन्धेषु रथः कर्णीरथः, दीर्घो लक्ष्यात्, पुंस्कन्धोह्यमानो रथः । प्रवहन्त्यनेन प्रवहणम् । डयन्ते विहायसा यान्त्यनेन (डयनम्) विमानाख्यम् । अनिति चीत्करोत्यनः, असुन् । शक्नोति भारं वोढुं शकटम् । गच्छति तच्छीला गन्त्री शकटिका । कम्बलिभिर्दान्तैर्वोढव्यं (कम्बलिवाह्यकम्) ॥५३॥ (शिबिका) शिवा श्रेयस्करी, संज्ञायांकन् (सू०) । याप्यस्याशक्तस्य यानं, युग्याख्यं यानमिति गौडः । दोल्यते दोला काष्ठमयी रज्जुप्रालम्बश्च । प्रेङ्ख्यते प्रेङ्खा हिन्दोलाख्या । आदिशब्दाच्छया[य]नकादि याप्ययानानुवृत्तेः । द्वीपिनश्चर्मणावृतो रथः, द्वैपवैयाघ्रादञ् (सू०) ॥ ५४ ॥ पाण्डुकम्बलेन प्रावृतो रथः, पाण्डुकम्बलादिनिः (सू०) । (काम्बलवास्त्राद्याः) परिवृतोरथः (सू०) इत्यण् । आदिशब्दाद् दुकूलाद्याः ॥ ५५ ॥ वाच्यलिङ्गत्वाद् द्वैपी गन्त्री, द्वैपो रथः, द्वैपमनः । शकटाद्यपि रथत्वेन मन्यन्ते । रथानां समूहे, खलगोरथात् (सू०), इनित्रकट्यचश्च (सू०) इति यत्कट्यच्च । धूर्वति हिनस्ति वोढारं धूः, यस्या अग्रे वोढारो बध्यन्ते । यानमुखं रथादेरग्रम् । रथारम्भकं चक्रादन्यत्, अपकरोति(कीर्यते) अपस्करः, अपस्करोरथाङ्गमिति (सू०) साधुः ॥ ५६ ॥ रथस्य यच्चक्रं तद्रूढ्या रथाङ्गम् । तस्य चक्रस्यान्ते नेमिः, नयतीति । प्रान्ते धीयत इति प्रधिः । पिण्ड्यतेऽरा यस्यां सा पिण्डिका । नभ्यते हिंस्यतेऽक्षेण नाभिः । अक्षस्य नाभिक्षेप्यकाष्ठस्यान्ते बन्धार्थं कीलकः, अणति शब्दायतेऽणिः, लक्ष्ये त्वाणी ॥ ५७ ॥ त्रायते गुप्त्यर्थं रथो येन स

रथगुप्तिर्वरूथो ना कूवरस्तु युगंधरः।
अनुकर्षो दार्वधःस्थं प्रासङ्गो ना युगाद्युगः(न्तरम्) ॥ ५८ ॥
सर्वं स्याद्वाहनं यानं युग्यं पत्त्रं च धोरणम्।
परंपरावाहनं यत्तद्वैनीतकमस्त्रियाम् ॥ ५९ ॥
आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ॥
नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः । ६० ॥
सव्येष्ठृ(ष्ठ)दक्षिणस्थौ च संज्ञा रथकुटुम्बिनः ।
रथिनः स्यन्दनारोहा अश्वारोहास्तु सादिनः ॥ ६१ ॥
भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः ।
सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ॥ ६२ ॥
बलिनो ये सहस्रेण साहस्रास्ते सहस्रिणः ।
परिधिस्थः परिचरः सेनानीर्वाहिनीपतिः ॥ ६३ ॥
कञ्चुको वारबाणोऽस्त्री यत्तु मध्ये सकञ्चुकाः ।
बध्नन्ति तत्सारसनमधिकाङ्गोऽथ शीर्षकम् ॥ ६४ ॥

वरूथो लोहादिमयी वृतिः । कूयते शब्दायते कूवरः । युगं वोढृस्कन्धकाष्ठं धारयति युगंधरः, संज्ञायां भृतॄवृजीति (सू०) खच् । अनुकृष्यतेऽनुकर्षः । प्रसज्यते वोढृस्कन्धे प्रासङ्गः । युगेनातति युगाद्रथादिस्तस्य युगो ना पुमान्, अन्यस्तु क्लीबे युगं कालो युग्मं वा । युगाद्युगान्तरं वत्सदमनार्थमिति गौडः, यत्कात्यः[मुनिः]– युगं द्वितीयं प्रासङ्गः ॥ ५८ ॥ सर्वं हस्त्यश्वरथादि दोलान्तम् । योक्तव्यं युग्यं, युग्यंचपत्त्रे (सू०) इति साधुः । पतन्त्यनेन पत्त्रं, दाम्नीशसेति (सू०) ष्ट्रन् । धोर्यतेऽत्र धोरणम् । वोढृभिः परम्परया वाह्यते, प्राबन्धिकमभ्यासास्थितम् । विनीता(तका)नामिदं (वैनीतकं) याप्ययानादि ॥ ५९ ॥ आधोर्यते हस्ती यैराधोरणाः । हस्तिनः पान्ति हस्तिपकाः । हस्तिनमारोहन्ति हस्त्यारोहाः । निषीदन्त्यवश्यं निषादिनः । द्वौ द्वौ भिन्नार्थावित्येके, आद्यौ द्वौ पालकौ परौ द्वौ योद्धारौ ॥ नियच्छति नियन्त्रयति नियन्ता । प्राजयति (प्राजति) प्राजिता, वानुवृत्तेर्वीभावो नास्ति (इ०) । सुवति सूतः, षू प्रेरणे । क्षदति क्षत्ता । सरथस्यापत्यं सारयति वाहान्वा सारथिः ॥ ६० ॥ सव्ये तिष्ठति सव्येष्ठः(ष्ठा), सव्येस्थश्छन्दसीति (उ०) ऋन् (ऋः)— डिच्च, स्थास्थिन्स्थृणामितिवक्तव्यात् (वा०) षत्वम् । रथस्य कुटुम्बी वाहकः । (रथिनः) रथे योद्धारः । (अश्वारोहाः) अश्वनारोहाः । सीदन्त्यवश्यं सादी ॥ ६१ ॥ भटन्ति काङ्क्षन्ति युद्धं भटाः । युध्यते योधः, पचाद्यच् (नन्दिग्रहीति) । (सैनिकाः) रक्षतीति (सू०) ठक्, प्राहरिकाद्याः । सेनां समवयन्ति श्लिष्यन्ति (सैन्याः), सेनायावा (सू०) इति ण्यः, पक्षे ठक् ॥ ६२ ॥ बलं सैन्यं, सहस्रं योद्धारः सन्त्यस्य, तपःसहस्राभ्यांविनीनी (सू०), अण्च (सू०) । परिधौ सेनान्ते तिष्ठति परिधिस्थः । परितः समन्ताच्चरति रक्षितुं परिचरः । सेना नयति नियुङ्क्ते सेनानीः ॥ ६३ ॥ कञ्च्यते बध्यते कञ्चुकः । वारमाच्छादकं वानमस्य वारवाणः, पूर्वपदात्संज्ञायाम् (सू०) इति णत्वम् । वाणवारस्य व्यत्ययेन मयूरव्यंसकादित्वादिति श्रीभोजः । सारं सनोति ददाति सारसनम् । अधिकमङ्गादधिकाङ्गः । सारसनाधिपाङ्ग इत्येके पेठुः, यन्मुनिः– अधिपाङ्गं सारसनम्, दुर्गस्तु– तस्य सारसनं द्वेकं धिपाङ्गं च निबन्धनम् ॥ ६४ ॥ शीर्षप्रतिकृतिः

शीर्षण्यं च शिरस्त्रेथ तनुत्रं वर्म दंशनम् ।
उरश्छदः कङ्कटको जगरः कवचोस्त्रियाम् ॥ ६५ ॥
आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ।
संनद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥ ६६ ॥
त्रिष्वामुक्तादयो वर्मभृतां कावचिकं गणे ।
पदातिपत्तिपदगपादातिकपदाजयः ॥ ६७ ॥
पद्गश्च पदिकश्चाथ पादातं पत्तिसंहतिः ।
शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः ॥ ६८ ॥
कृतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत् ।
अपराद्धपृषत्कोसौ लक्ष्याद्यश्च्युतसायकः ॥ ६९ ॥
धन्वी धनुष्मान्धानुष्को निषङ्ग्यस्त्री धनुर्धरः ।
स्यात्काण्डवांस्तु काण्डीरः शाक्तीकः शक्तिहेतिकः ॥ ७० ॥
याष्टीकपारश्वधिकौ यष्टिपर्श्वधहेतिकौ ।
नैस्त्रिंशिकोसिहेतिः स्यात्समौ प्रासिककौन्तिकौ ॥ ७१ ॥

शीर्षकम् । शिरसि भवं शीर्षण्यं, शरीरावयवाद्यत् (सू०), शीर्षश्छन्दसि (सू०), येचतद्धिते (सू०) । शिरस्त्रायते शिरस्त्रम् । वृणोत्यङ्गं वर्म । दंश्यते बध्यते दंशनम् । कङ्कटस्य च्छादयति कङ्कते वा (कङ्कटकः) । जागर्तेरचि ह्रस्वाज्जगरः, यन्माला– उरश्छदोथ जगरः । कवते कवचः, कं वञ्चयति वा ॥ ६५ ॥ आमुच्यते बध्यते स्मामुक्तः । अपिनह्यते स्मापिनद्धः । (पिनद्धः) वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः (का०) इति पक्षेऽल्लोपः । संनह्यते स्म संनद्धः । वर्म संजातमस्य वर्मितः । सज्जायते सज्जति वा सज्जः । व्यूढो धृतः कङ्कटोनेन व्यूढकङ्कटः ॥ ६६ ॥ नवेत्यर्थः । (कावचिकं) ठञ्कवचिनश्च (सू) इति ठञ् । पादाभ्यामतति गच्छति पदातिः । पादाभ्यामजति पदाजिः, पादस्यपदाज्यातिगोपहतेषु (सू०) इति पदः । हलन्तपक्षे पद्गः, यल्लक्ष्यं– पद्गा भरद्वाजमुनिं सशिष्यम् (भट्टि०) । पादाभ्यामतति पदातिकः, औणादिक इकः, विनयादित्वात्स्वार्थेठग्वा (सू०) । पतति (पद्यते) पत्तिः ॥ ६७ ॥ पादाभ्यां चरति पदिकः, पर्पादिभ्यष्ठन् (सू०), इकेचरतौपद्भावः क्तव्यात् (वा) । पदातीनां समूहः पादातं, भिक्षादिभ्योण् (सू०) । काण्डानि पृष्ठेस्य काण्डपृष्ठः । आयुधेन जीवति, आयुधाच्छचेति (सू०) ठन्–छौ ॥ ६८ ॥ कृतौ सिद्धौ हस्तावस्य कृतहस्तः । कृताः पुङ्खानेनेति कृतपुङ्खः । अपराद्धा अलब्धलक्ष्या बाणा अस्यापराद्धपृषत्कः ॥ ६९ ॥ धन्व– अस्यास्ति धन्वी, व्रीह्यादित्वादिनिः (सू०) । धनुः प्रहरणमस्य धानुष्कः, तदस्य– प्रहरणमिति (सू०) ठक्, इसुसुक्तान्तात्कः (सू०) । निषङ्गस्तूणोस्यास्ति निषङ्गी । अस्त्राणि सन्त्यस्यास्त्री । (काण्डीरः) काण्डाण्डादीरन्नीरचौ (सू०) । शक्तिः प्रहरणमस्य शाक्तीकः, शक्तियष्ट्योरीकक् (सू०) ॥ ७० ॥ पर्श्वधः परशौ न दृष्टः, अतो यष्टिस्वधितिहेतिकाविति **काश्मीराः** पठन्ति, यन्मुनिः– परश्वधः कुठारश्च स्वधितिः, तदस्य– प्रहरणमिति (सू०) परश्वधाट्ठञ् च । निस्त्रिंशासिः प्रहरणमस्य नैस्त्रिंशिकः । (प्रासिककौन्तिकौ) प्रासः कुन्तश्च प्रहरणमस्य ॥ ७१ ॥ चर्मफरोस्यास्ति चर्मी । फलति विशीर्यते घातैः फलकः, रलयोरैक्या-

चर्मी फलकपाणिः स्यात्पताकी वैजयन्तिकः ।
अनुप्लवः सहायश्चानुचरोभिच(स)रः समाः ॥ ७२॥
पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः ।
पुरोगमः पुरोगामी मन्दगामी तु मन्थरः ॥ ७३ ॥
जङ्घालोतिजवस्तुल्यौ जङ्घाकरिकजाङ्घिकौ ।
तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ॥ ७४ ॥
जय्यो यः शक्यते जेतुं जेयो जेतव्यमात्रके ।
जैत्रस्तु जेता यो गच्छत्यलं विद्विषतः प्रति ॥ ७५ ॥
सोभ्यमित्र्योभ्यमित्रीयोप्यभ्यमित्रीण इत्यपि ।
ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः ॥ ७६ ॥
स्यादुरस्वानुरसिलो रथिको रथिरो रथी ।
कामंगाम्यनुकामीनो ह्यत्यन्तीनस्तथा भृशम् ॥ ७७ ॥
शूरो वीरश्च विक्रान्तो जेता जिष्णुश्च जित्वरे ।
सांयुगीनो रणे साधुः शस्त्राजीवादयस्त्रिषु ॥ ७८ ॥

रफरकोपि । वैजयन्त्या चरति वैजयन्तिकः, चरतीति (सू०) ठक् ॥ अनु पश्चात्प्लवतेऽनुप्लवः । सहअयते सहायः ॥ ७२ ॥ पुरो गच्छति पुरोगमः । (पुरोगः) गमश्च (सू०) इति डः । अग्रे सरत्यग्रेसरः, पुरोग्रतोग्रेषुसर्तेः (सू०) इति टः । प्रातिष्ठते प्रष्ठः, प्रष्ठोग्रगामिनीति (सू०) साधुः । मथ्नाति पादौ मन्थरः ॥ ७३ ॥ जङ्घे स्तोस्य जङ्घालः । जङ्घे एव करो राजदेयोंशोस्य जङ्घाकरिकः । जङ्घाभ्यां जीवाति जाङ्घिकः । तरोस्यास्तीति तरस्वी, अस्मायामेधेति (सू०) विनिः । त्वरते स्म त्वरितः । प्रजवते प्रजवी, प्रजोरिनिः (सू०)। जवते तच्छीलो जवनः, जुचङ्क्रम्येति (सू०) युच् । जवते जवः, पचाद्यच् (नंदिग्रहीति) ॥७४॥ क्षय्यजय्यौशक्यार्थे (सू०) इति साधुः । (जेयः) शक्यादन्यत्रेत्यर्थः । जेतैव जैत्रः, तृन्नन्तत्वात्– प्रज्ञादित्वात् (सू०) अण् , जेतुरयं वा, फलतस्तुल्यार्थत्वम् ॥ ७५ ॥ आभिमुख्येनामित्रानलं गामी, अध्वनोयत्खौ (सू०), अभ्यमित्राच्छचेति (सू०) छः, चकाराद्यत्खौ च । अभ्यमित्रश्च । ऊर्ज ऊर्जा वास्त्यस्येति, ज्योत्स्नातमिस्रेति (सू०) साधुः । ऊर्जोऽसन्तं मन्यते, घञन्तोत्रेति तु युक्तं, अन्यथोर्जस्वीति निपातनं व्यर्थं स्यात्, अस्मायामेधेति (सू०) विनिना सिद्धत्वात् ॥ ७६ ॥ उरसा बलं लक्ष्यते, तदस्यास्ति, पिच्छादित्वादिलच् (लोमादिपामादीति) । रथोस्यास्ति रथिकः, अतइनिठनौ (सू०) । (रथिरः) मेधारथाभ्यामिरन्निरचौ (वा०), रथिन इत्यपपाठः । अनुकामं यथेच्छं गामी– अनुकामीनः, अवारपारात्यन्तानुकामंगामीति (सू०) खः । अत्यन्तं भृशं कृत्वा गामी– अत्यन्तीनः, खः ॥ ७७ ॥ विक्रमते स्मोत्सहते विक्रान्तः । जयनशीलः (जेता), तृन् । (जिष्णुः) ग्लाजिस्थश्चग्स्नुः (सू०) । (जित्वरः) इण्नशजिसर्तिभ्यः क्वरप् (सू०) । संयुगे साधुः सांयुगीनः, प्रतिजनादिभ्यः खञ् (सू०) । (त्रिषु) वाच्यलिङ्गत्वात् ॥ ७८ ॥ वाहाः सन्त्यस्यां

ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः ।
वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम् ॥ ७९ ॥
व्यूहस्तु बलविन्यासो भेदा दण्डादयो युधि ।
प्रत्यासारो व्यूहपार्ष्णिः सैन्यपृष्ठे प्रतिग्रहः ॥ ८० ॥
एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ।
पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥ ८१ ॥
सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ।
अनीकिनी दशानीकिन्योऽक्षौहिण्यथ संपदि ॥ ८२ ॥
संपत्तिः श्रीश्च लक्ष्मीश्च विपत्त्यां विपदापदौ ।
आयुधं तु प्रहरणं शस्त्रमस्त्रमथास्त्रियौ ॥ ८३ ॥
धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् ।
इष्वासोऽप्यथ कर्णस्य कालपृष्ठं शरासनम् ॥ ८४ ॥

वाहिनी । सिनोति सेना, सह- इनेन वर्तते वा । प्रियते पृतना, पृङ् व्यायामे । चमत्यरींश्चमूः । वरूथो रथगुप्तिरस्त्यस्या वरूथिनी । वलति प्राणिति बलम् । सेनैव सैन्यम्, चतुर्वर्णादित्वात् (सू०) ष्यञ् । करोति च क्रत चक्रम् । अनित्यनीकम्, न नीयते वा, सैन्यैकदेशोयम् ॥७९॥ व्यूह्यते रच्यते व्यूहः । व्यूहस्येति शेषः, यदाहुः- दण्डो मण्डलभोगौ चाप्युत्सन्नश्चाचलो दृढः । व्यूहास्तेषां विशेषाः स्युश्चक्रव्यूहादयोपि च ॥ प्रत्यासरति भग्नान् प्रत्यासारः, सृस्थिरइति (सू०) घञ् । पार्ष्णिः पश्चाद्भागः । (प्रतिग्रहः) प्रतिगृह्यतेवष्टभ्यतेनेन सैन्यम् ॥ ८० ॥ पताति(पद्यते)पत्तिः सेनांशः, यद् भारतं- एको गजो रथश्चैको नराः पञ्च पदातयः । त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्याभिधीयते ॥ पत्तिस्त्रिगुणा सेनामुखं- गजत्रयं ३, रथत्रयं ३, अश्वनवकं ९, पदातयः पञ्चदश १५ ॥ ८१ ॥ तत्त्रिगुणं गुडति गुल्मः- गजाः ९, रथाः ९, अश्वाः २७, पदातयः ४५ । स त्रिगुणो गण्यते गणः- गजाः २७, रथाः २७, अश्वाः ८१, पदातयः १३५ । स त्रिगुणो वाह्यते वाहिनी- गजाः ८१, रथाः ८१, अश्वाः २४३, पदातयः ४०५ । सा त्रिगुणा पृतना- गजाः २४३, रथाः २४३, अश्वाः ७२९, पदातयः १२१५ । सा त्रिगुणा चमूः- गजाः ७२९, रथाः ७२९, अश्वाः २१८७, पदायतः ३६४५ । सा त्रिगुणानीकिनी- गजाः २१८७, रथाः २१८७, अश्वाः ६५६१, पदातयः १०९३५ । अक्षाणां रथकाष्ठानामूहोस्त्यस्यां, अक्षादूहिन्यामिति (वा०) वृद्धिः ॥ ८२ ॥ (संपद्) संपदादिभ्यः क्विप् (वा०) । श्रयन्ति तां श्रीः, क्विब्वचिप्रच्छिश्रीति (उ०) क्विप्- दीर्घश्च । विपत्तिर्दारिद्र्यम् । आयुध्यन्तेनेनायुधं, घञर्थेकविधानं (वा०), स्थास्नापाव्यधिहनियुध्यर्थम् । शस्यतेनेन शस्त्रं, दाम्नीशसेति (सू०) ष्ट्रन् । अस्यतेस्त्रम् । हेतिर्नानार्थे ॥ ८३ ॥ धन्यतेर्ध्यंते धनुः, अर्धर्चादिः (सू०) । चपस्य वेणोर्विकारश्चापम् । धन्वति (धन्व), कनिन् (उ०) । शरा अस्यन्तेनेन शरासनम् । कुद्(द्रि) अनृतभाषणे, अस्मादण्डन्, कुर्देर्वा रेफलोपे कोदण्डम् । कर्मणे प्रभवति कार्मुकम्, कर्मणउकञ् (सू०) । इषवोस्यन्तेनेन- इष्वासः । आसोपि ॥ ८४ ॥ गाण्डिः पर्वा-

कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसके ।
कोटिरस्याटनी गोधे तले ज्याघातवारणे ॥ ८५ ॥
लस्तकस्तु धनुर्मध्यं मौर्वी ज्या शिञ्जिनी गुणः ।
स्यात्प्रत्यालीढमालीढमित्यादि स्थानपञ्चकम् ॥ ८६ ॥
लक्षं लक्ष्यं शरव्यं च शराभ्यास उपासनम् ।
पृषत्कबाणविशिखा अजिह्मगखगाशुगाः ॥ ८७ ॥
कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः ।
प्रक्ष्वेडनास्तु नाराचाः पक्षो वाजस्त्रिषूत्तरे ॥ ८८ ॥
निरस्तः प्रहिते बाणे विषाक्ते दिग्धलिप्तकौ ।
तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः ॥ ८९ ॥
तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः ।
कौक्षेयको मण्डलाग्रः करवा(पा)लः कृपाणवत् ॥ ९० ॥

स्यास्ति गाण्डीवं, गाण्ड्यजगात्संज्ञायामिति (सू०) वः, गाण्डिरिदन्त ईदन्तश्चात्र प्रश्लिष्य निर्दिष्टः । पुंनपुंसके इति प्रथमाद्विवचनमजहल्लिङ्गम् । अस्य धनुषः प्रान्ते कोटिः, कुटतीति । अटत्यटनी, अर्त्यटनी इत्येके । गोधा च गोधा च गोधे द्वे, सव्यसाचित्वात्, गुध परिवेष्टने । तलं चर्मादिमयो ज्याघाताधारः ॥ ८५ ॥ (लस्तकः) लस श्लेषणे । मूर्वाख्यतृणस्य विकारो मौर्वी । जिनाति ज्या । जीवापि । शिङ्क्ते शब्दायते शिञ्जिनी । गुण्यतेऽभ्यस्यते गुणः । जङ्घयोश्चारि(वि)निवृत्तौ स्थितिः स्थानकमिति तु विशेषः । आलेढि भुवमालीढम् । आदिशब्दात्समपादं वैशाखं मण्डलं च धनुर्वेदप्रसिद्धम् । भरतस्त्वन्यथाह– वैष्णवं समपादं च वैशाखं मण्डलं तथा । प्रत्यालीढमथालीढं स्थानान्येतानि षड् नृणाम् ॥ ८६ ॥ लक्ष्यत इति (लक्षं), घञ् ण्यच्च । शृणाति शरुर्हिंस्रस्तस्मै हितं शरव्यं, उगवादिभ्योयत् (सू०), शरैर्वीयते छाद्यते वा । (उपासनं) असु क्षेपणे । पर्षति सिञ्चति– असृजा पृषत्कः, पृथक्पटकमस्येति धनुर्वेदः– पुङ्खः शरस्तथा शल्यं पक्षस्नायुजतूनि षट् । वणति वण्यतेऽनेन वा बाणः । विशीर्यते विशिखः, शिञ् निशाने, विविधशिखो वा । अजिह्मग ऋजुगामी ॥ ८७ ॥ कल्यते क्षिप्यते कलम्बः । मार्गयति लक्ष्य मार्गणः । शृणाति शरः । रोप्यते निखन्यते रोपः । इष्यति– इषुः, इष गतौ । प्रदरो नानार्थे । प्रक्ष्वेडते प्रक्ष्वेडनः, क्ष्विदे रूपं, क्ष्वेडिर्वोन्नेयः । नरमश्नाति, नराच एव नाराचः, स्वार्थेऽण्, सर्वलोहोयम् । (पक्षः) पक्ष परिग्रहे । वजति गच्छत्यनेन वाजः, न्यङ्क्वादेः (सू०) अकुत्वम् ॥ ८८ ॥ लिप्तान्ता वाच्यलिङ्गाः । निरस्यते स्म प्रहीयते स्म, क्षिप्त इत्यर्थः । विषेणाक्ते म्रक्षिते, दिह्यते स्म लिप्यते स्म । तूण्यते पूर्यते शरैस्तूणः, तूणीति लिङ्गरूपभेदार्थम् । उपासज्यन्ते निषज्यन्ते च बाणा यत्रेत्युपासङ्गनिषङ्गौ । इषवो धीयन्तेऽत्रेषुधिः । कलापो नानार्थे ॥ ८९ ॥ खड(ण्ड)ति भिनत्ति खड्गः । निष्क्रान्तस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः । चन्द्रवद् हासः प्रभास्य चन्द्रहासः । अस्यतेऽसिः । ऋषेर्गत्यर्थाद् ऋष्टिः, ऋत्यकः (सू०) इति प्रकृतिः, हिंसार्थाद्रिषेस्तु रिष्टिः । कुक्षौ भवः कौक्षेयकः, कुलकुक्षीति (सू०) ढकञ् । मण्डलाकृत्यग्रमस्य मण्डलाग्रः । करे वलनमस्य करवालः । कल्पते कृपाणः, वतिः पूरणार्थः ॥ ९० ॥ (त्सरुः) त्सर छद्मगतौ । सीयते मणिबन्धे प्रक्षिप्यते मेखला, यथा प्रहरतो

त्सरुः खड्गादिमुष्टौ स्यान्मेखला तन्निबन्धनम् ।
फलकोऽस्त्री फलं चर्म संग्राहो मुष्टिरस्य यः ॥ ९१ ॥
द्रुघणो मुद्गरघनौ स्यादीली करवा(पा)लिका ।
भिन्दिपालः सृगस्तुल्यौ परिघः परिघातनः ॥ ९२ ॥
द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः ।
स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका ॥ ९३ ॥
वा पुंसि शल्यं शङ्कुर्ना स(श)र्वला तोमरोऽस्त्रियाम् ।
प्रासस्तु कुन्तः कोणस्तु स्त्रियः पाल्यश्रिकोटयः ॥ ९४ ॥
सर्वाभिसारः सर्वौघः सर्वसंनहनार्थकः ।
लोहाभिसा(हा)रोऽस्त्रभृतां राज्ञां नीराजनो विधिः ॥ ९५ ॥
यत्सेनयाभिगमनमरौ तदभिषेणनम् ।
यात्रा व्रज्याभिनिर्याणं प्रस्थानं गमनं गमः ॥ ९६ ॥

हस्तान्न निर्याति । फलति विशीर्यते प्रहारैः (फलं,फलकं) फलं, **मुनिना** खड्गाद्यग्रे दृष्टं, अयं तु लोकात् फलकं मन्यते, **यच्छाश्वतः**— लाभे शस्ये शराद्यग्रे व्युष्टौ च फलके फलम् । चर्ममयत्वाच्चर्म । संगृह्यतेऽनेनेति संग्राहः, समिमुष्टाविति (सू०) घञ्, अस्य चर्मणो मुष्टिग्रहणस्थानम् ॥९१॥ द्रुं वृक्षाङ्गं हन्ति द्रुघणः, द्रुघनो वा, अयोघनोऽन्यः । मुदं गिरति ग्रसते मुद्गरः । हन्यतेऽनेन घनः, मूर्तौघनइति (सू०) साधुः, **यच्छाश्वतः**— वाद्ये मुस्तेऽम्बुदे सान्द्रे घनः स्याल्लोहमुद्गरे । ईड्यत ईली, एकधारोऽसिस्तुरुष्कायुधम् । करवालात्, अल्पे (सू०) कन्, तरवालिकेत्येके । भिन्दतः पालयति भिन्दिपालः, भिण्डिपालो वा हस्तक्षेप्यो लगुडः । सृज्यते सरति वा सृगः । परितो हन्ति परिघः, परौघ इति (सू०) ङ घत्वम्, लोहबद्धो लगुडः ॥ ९२ ॥ कुठान्वृक्षानियर्ति कुठारः । स्वं धियति बिभर्ति स्वधितिः । पराञ्शृणाति परशुः परश्वधश्च, पर्श्वधोऽपि, यदाह— यार्ष्टीकपारश्वधिकौ यष्टिपर्श्वधहेतिकौ । शस्यतेऽनयी शस्त्री । असेः पुत्री-वाल्पत्वात् । छुरति छिनत्ति छुरिका, क्षुरिकापि ॥ ९३ ॥ शलति विशत्यन्तः शल्यः । शङ्कतेऽस्माच्छङ्कुरायुधविशेषः, **यच्छाश्वतः**— संख्याकीलकयोः शङ्कुः शङ्कुः प्रहरणान्तरे । अन्यत्रोपचाराच्छल्यम् । सर्वान्–लाति सर्वला । स्तोम्यते प्रश्लाध्यते तोमरः, तुःसौत्रो वा । प्रास्यते प्रासो हस्तक्षेप्यः शल्यः । कुणति कुन्तः । कोणो गृहादेर्विदिक्– अस्त्र्याख्या, कुण शब्दोपकरणयोः । पाति पालिः । अश्नुतेऽश्रिः । कुटति कोटिः ॥ ९४ ॥ सर्वेण सैन्येनाभिसरणं सर्वाभिसारः । सर्वेषामोघो वहनं सर्वौघः । सर्वे संनह्यन्तेऽत्र सर्वसंनहनम् । शस्त्रभृतां राज्ञां यः शान्तिको विधिः प्रस्थानात्प्राक् स लोहाभिसारः, लोहं शस्त्रमभिसार्यते प्रस्थानेऽत्रेति । नीरस्य शान्त्युदकस्याजनं क्षेपोऽत्र नीराजनं, मन्त्रोक्त्या वाहनायुधादेर्निःशेषेण राजनं वात्र । नीराजनादनन्तरं कर्म लोहाभिसार इति **मुनिः**— विधिर्लोहाभिसारस्तु राज्ञां नीराजनोत्तरः, **दुर्गोऽपि**— लोहाभिसारस्तु विधिः परो नीराजनान्नृपैः । दशम्यां दर्शितैः कार्य इति । अत एव नीराजनाद्विधिरित्येके पठन्ति ॥ ९५ ॥ (अभिषेणनं) सत्यापपाशेति (सू०) णिच्, उपसर्गात्सुनोतीति (सू०) षत्वम् । यान्त्यस्यां यात्रा । व्रजनं व्रज्या, व्रजयजोर्भावे क्यप् (सू०) । (प्रस्थानं) प्रपूर्वस्तिष्ठतिर्गत्यर्थः । गमेः– ग्रहवृद (सू०) इत्यपि गमः ॥ ९६ ॥ सैन्यस्य सर्वतो व्याप्तिरासारः, आसि

स्याद्‌ासारः प्रसरणं प्रचक्रं चलितार्थकम् ।
अहितान्प्रत्यभीतस्य रणे यानमभिक्रमः ॥ ९७ ॥
वैतालिका बोधकराश्चाक्रिका घाण्टिकाः समाः ।
स्युर्मागधास्तु मगधा वन्दिनः स्तुतिपाठकाः ॥ ९८ ॥
संशप्तकास्तु समयात्संग्रामादनिवर्तिनः ॥ ९९ ॥
रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रजः ।
चूर्णे क्षोदः समुत्पिञ्जपिञ्जलौ भृशमाकुले ॥ १०० ॥
पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम् ।
सा वीराशंसनं युद्धभूमिर्यातिभयप्रदा ॥ १०१ ॥
अहंपूर्वमहंपूर्वमित्यहंपूर्विका स्त्रियाम् ।
आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि ॥ १०२ ॥
अहमहमिका तु सा स्यात्परस्परं यो भवत्यहंकारः ।
द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च ॥ १०३ ॥
शक्तिः पराक्रमः प्राणो विक्रमस्त्वतिशक्तिता ।
वीरपानं तु यत्पानं वृत्ते भाविनि वा रणे ॥ १०४ ॥

यते येनेत्यासारोऽनागच्छद्रूम् । प्रसारस्तु सैन्याद्बहिस्तृणजलाद्यर्थं प्रसरणमिति कौटिल्यः, यल्लक्ष्य- निरुद्धैरीयत सारप्रसारा गा इव व्रजन् (शिशु०) । प्रस्थितं चक्रं सैन्यं प्रचक्रम् । आभिमुख्येनाभिभूया- रीन्वा यानमभिक्रमः ॥ ९७ ॥ वितालः शब्दः प्रयोजनमेषां वैतालिका राज्ञोवसरपाठका मङ्गला- [मङ्खा]ख्याः, प्रातर्बोधका इत्येके । (चाक्रिकाः) चक्रं राष्ट्रं घण्टाघातेन देवताग्रे ये शंसन्ति ते, श्रावकाख्याः । (मागधाः) वंशोदीरणेन ये याचन्ते, अहुश्च- वैतालिकाश्च कथ्यन्ते कविभिः सौखशा- यिकाः । राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः । मागधाः स्तुतिर्वंशाज्ञा इति, मगधेति याच्ञार्थः कण्ड्वादिः, यच्छ्रीभोजः– कमर्थिनः कुमुभ्यन्तु कं माघ्यन्तु मागधाः । कामिषुध्यन्तु यज्वा[युध्वा]नो रामेरण्यं तुरण्यति ॥ वन्दन्ते स्तुवन्ति तच्छीलाः (वन्दिनः) । चत्वार एकार्था इत्येके ॥ ९८ ॥ संश- पन्ति पलायमानं, सशपथं वा युध्यन्ते दृढनिश्चयाः संशप्तकाः ॥ ९९ ॥ रीयते रेणुः, रीङ् गतौ । धूय- ते धूलिः । पंशयति वस्त्रादि पांशुः, पशि नाशने । रज्यते वस्त्राद्यनेन रजः क्लीबे, रञ्जनरजकरजःसूपसं- ख्यानं (वा०) इति नलोपः । (क्षोदः) क्षुदिर् संपेषणे, धूलिनामेयं, यच्छाश्वतः– चूर्णानि वास- योगाः स्युश्चूर्णो धूलिः सशर्करा । पिजि हिंसायां, आह च– समुत्पिञ्जोतिसंकुलः ॥ १०० ॥ पतति धूयते पताका । विजयते विजयन्तः, औणादिको झच् (तृभूवहीति), तस्येयं वैजयन्ती । केत्यते संज्ञायतेऽ- नेन केतनम् । ध्वजति धूयते ध्वजः, पताकादण्डो ध्वज इत्येके । केतुर्नानार्थे । वीरा आशंस्यन्तेऽत्र (वीराशंसनम्) ॥ १०१ ॥ अहं पूर्वमस्यां क्रियायामिति सर्वे यत्र ब्रुवते साहंपूर्विका. स्वार्थे कन्– म- त्वर्थीयो वा ठन् (अतइतिठनौ) । अहो पुरुषोऽहमित्यस्य भावः (आहोपुरुषिका), मनोज्ञादित्वाद्- वुञ् (द्वन्द्वमनोज्ञादिभ्यश्च) ॥ १०२ ॥ अहं शक्तोऽहं शक्त इत्यस्यामहमहमिका, ठन् (व्रीह्यादिभ्यश्च), अहंशब्दो निपातः । द्रवत्यनेनारिं द्रविणम् । तरत्यनेनापदं तरः । सहतेऽनेनारिं सहः, असन्तौ द्वौ । शूरस्य भावः शौर्यम् । तिष्ठत्यनेन स्थाम । शुष्यत्यनेनारिः शुष्मम्, शुष्मेत्येके ॥ १०३ ॥ शकनं शक्तिः प्राणनं प्राणः । विक्रमन्तेऽनेन विक्रमः । वीराणां मद्यपानं वीरपानम् ॥ १०४ ॥ जायते जन्यं, भव्यगे- येति (सू०) साधुः । प्रघ्नन्ति प्रधनम्, धनिर्मारणार्थोऽत्र निधनवत् । म्रियन्तेऽस्मिन् मृधम् । आस्क-

युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ।
मृधमास्कन्दनं संख्यं समीकं सांपरायि(संपराय)कम् ॥ १०५ ॥
अस्त्रियां समरानीकरणाः कलहविग्रहौ ।
संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः ॥ १०६ ॥
अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः ।
समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः ॥ १०७ ॥
नियुद्धं बाहुयुद्धेथ तुमुलं रणसंकुले ।
क्ष्वेडा तु सिंहनादः स्यात्करिणां घटना घटा ॥ १०८ ॥
क्रन्दनं योधसंरावो बृंहितं करिगर्जितम् ।
विस्फारो धनुषः स्वानः पटहाडम्बरौ समौ ॥ १०९ ॥
प्रसभं तु बलात्कारो हठोथ स्खलितं छलम् ।
अजन्यं क्लीब उत्पात उपसर्गः समं त्रयम् ॥ ११० ॥
मूर्च्छा तु कश्मलं मोहोप्यवमर्दस्तु पीडनम् ।
अभ्यवस्कन्दनं त्वभ्यासादनं विजयो जयः ॥ १११ ॥

न्यतेत्रास्कन्दनम् । संचक्षतेस्मिन् संख्यं, संपूर्वश्चक्षिर्वधार्थः । समीयन्तेस्मिन् समीकं, इङ् गतौ । संपरायो मृत्युः प्रयोजनमस्य सांपरायिकं, [ठञ्], विनयादित्वात्स्वार्थे (सू०) ठगवा ॥ १०५ ॥ समियुराति (ते) संघट्टन्तेस्मिन् समरः । न नीयन्ते चाल्यन्तेत्रानीकम्, अनीकमस्त्यत्र वा । रणन्ति दुन्दुभयोत्र रणं, वशिरण्योश्चेतिवक्तव्यादप् (वा०) । कल्यते क्षिप्यतेत्र कलहः, कलं हीनबलं हन्ति वा । विगृह्णन्त्यत्र विग्रहः, ग्रहवृदृ- इति (सू०) अप् । संप्रहरन्त्यन्योन्यं घ्नन्त्यत्र संप्रहारः । अभिसंपतन्त्यत्राभिसंपातः । कल्यतेत्र कलिः । संस्फुटन्त्यत्र संस्फोटः, संस्फेट इति युक्तः पाठः, स्फिट अनादरे, भरते तु संफेटः । संयुज्यतेत्र संगता रथयुगा अत्र वा संयुगः ॥ १०६ ॥ अभ्यामृद्नन्त्यत्राभ्यामर्दः । समाघ्नन्त्यत्र समाघातः । संग्रामयन्तोस्मिन् संग्रामः । अभ्यागच्छन्त्यत्राभ्यागमः । आह्वयन्तेत्राहवः, आङियुद्धे (सू०) इत्यप्, संप्रसारणम् । समुदीयन्ते मिलन्त्यत्र समुदायः । संयतन्ते संयच्छन्ति वास्यां संयत् । संयन्ति संगच्छन्तेत्र समितिः । आ- अज्यन्ते क्षिप्यन्तेत्राजिः । युध्यन्तेस्यां युत्-द् ॥ १०७ ॥ नियत युद्धं (नियुद्धं) । ताम्यन्त्यत्र तुमुलं, तुमुः औलो वा । (क्ष्वेडा) क्ष्वेडृ अव्यक्ते शब्दे- इति दुर्गः । सिंहानामिव नदनं भटानां सिंहनादः । क्ष्वेला वा । (घटा) घटादयःषितः (ग०) इति षिद्भिदादिभ्योङ् (सू०) ॥ १०८ ॥ समन्ताद्रवणं संरावः, उपसर्गेरुवः (सू०) इति घञ् । (बृंहितं) बृहि शब्दे । (विस्फारः) स्फुर संचलने । पटो हन्यतेस्य पटहः । आदम्यते- आडम्बरः, डमरुवद्रस्य डत्वम् ॥ १०९ ॥प्रगता सभात्र प्रसभं, सभया युक्तायुक्तविचारो लक्ष्यते, प्रस[प्रसभ]प्रसवे वा । बलादिति निपातो हठार्थः । (हठः) हठ प्लुतिशठत्वयोः । स्खलनं मार्गाच्चलनम् । छ्यति छिनत्ति छलम् । न जने साधु- अजन्यम् । उत्पतत्यकस्मादायाति- उत्पातः, ज्वलादित्वाण्णः (ज्वलितिकसन्तेभ्योणः) । उपसृज्यत उपद्रूयतेत्रोपसर्गः ॥ १११ ॥ कशति(ते) वैचित्यात्कश्मलम् । (पीडनं) पीड अवगाहने । (अभ्यवस्कन्दनं) छलादाक्रमणमित्यर्थः । धाटी च । रात्रौ च सौप्तिकम् । (विजयः) विः स्वार्थे लोचनाविलोचनवत् ॥ १११ ॥ प्रतीपं करणं प्रतीकारः शुद्धिः । निर्यातनं शोधनं, यत निकारोपस्कारयोः । जितकाशी जिताहवः । एतेष्टौ पलायनार्थकाः, प्रेद्रुस्तुस्रुवः, (सू०), उदिश्रयतियौतिपूद्रुवः (सू०),

वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ।
प्रद्रावोद्द्रावसंद्रावसंदावा विद्रवो द्रवः ॥ ११२ ॥
अपक्रमोपयानं च रणे भङ्गः पराजयः ।
पराजितपराभूतौ त्रिषु नष्टतिरोहितौ ॥ ११३ ॥
प्रमापणं निबर्हणं निकारणं विशारणम् ।
प्रवासनं परासनं निषूदनं निहिंसनम् ॥ ११४ ॥
निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ।
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ॥ ११५ ॥
निर्वापणं विशसनं मारणं प्रतिघातनम् ।
उद्वासनप्रमथनक्रथनोज्जासनानि च ॥ ११६ ॥
आलम्भपिञ्जविशरघातोन्माथ(न्मन्थ)वधा अपि ।
स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ॥ ११७ ॥
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ।
परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ॥ ११८ ॥
मृतप्रमीतौ त्रिष्वेते चिता चित्या चितिः स्त्रियाम् ।
कबन्धोऽस्त्री क्रियायुक्तमपमूर्ध कलेवरम् ॥ ११९ ॥

समियुद्रुदुवः (सू०) इति घञ् ॥ ११२ ॥ अपद्वारेण क्रमणं (अपक्रमः) । भङ्गोपसरणं, अन्यत्रोपचारात् । परिभूतोऽभिभूतोऽपि । त्रिष्वित्येव, नश्यति स्म नष्टम्– अदृश्यम् । तिरोधीयते स्म तिरोहितं गृहीतदिक्कम् ॥ ११३ ॥ अत्राहिंसार्था अप्युपसर्गवशाद् हिंसार्था ज्ञेयाः, अकर्मकाश्च णिचा सकर्मकाः । प्रमापणं, मीञ् हिंसायां णिच्, मीनातिमिनोतीति (सू०) आत्वं, पुक् । निपूर्वाद् बर्हेर्वृहेर्वा निबर्हणम् । विकारणं, कॄञ् हिंसायाम् । विशारणं, शॄ हिंसायाम् । प्रवसतः प्रयुक्तिः प्रवासनम्, एवं निर्वासनम् । असु क्षेपणेऽस्मात्परासनमपासनं च । षूद क्षरणेऽस्मान्निषूदनं जीवाच्चालनम् ॥ ११४ ॥ (संज्ञपनं) ज्ञपेर्मारणतोषणेति मित्त्वाद् ह्रस्वः (मितांह्रस्वः) । निर्ग्रन्थनं, ग्रथि कौटिल्ये । निस्तर्हणं, तृहेर्हिंसार्थान्निः–पूर्वात्, स्तृहेर्वा निष्पूर्वात् । क्षणनं, क्षणु हिंसायाम् ॥ ११५॥ निर्वापणं, पै ओवै शोषणे । विशसनं, शसु हिंसायाम् । क्रथनं, क्रथ हिंसायाम् । उज्जासनं, जसु हिंसायाम् ॥ ११५ ॥ आलम्भः, लभिराङ्पूर्वो हिंसार्थः, (लभेः) उपसर्गात्खल्घञोरिति (सू०) नुम् । पिञ्जः, पिञ्जिर्हिंसार्थः । विशरणं हिंसनं विशरः । हननं वधः, हनश्चवधइति (सू०) अप्, वधादेशश्च, पक्षे घञि घातः । (उन्माथः) मथ संक्लेशने । व्यापादनं विशमनं कदनं च निशुम्भनम् । (पञ्चता) देहस्तावन्महाभूतारब्धः, मरणं त्वेतस्य पञ्चभावः प्रत्येकं स्वांशसंक्रमात् । कालो मृत्युद्यूतलक्षणः, क्षयाद्यात्मको वा यदाहुः– कालः संहरति प्रजाः, तस्य धर्मः कालधर्मः संहारः । दिष्टस्य कालस्य जीवितावधेरन्तो दिष्टान्तः ॥ ११७ ॥ अमत्यन्तः पर्यन्तः । मरणं मृत्युः, द्वयोः स्त्रीपुंसयोः । निवृत्तं धनमत्र निधनं, निपूर्वो धनिर्मरणार्थ इति **सभ्याः** । प्रमयोऽस्त्री दीर्घनिद्रा हिंसा संस्था प्रमालनम् । परागता असवोऽस्य परासुः । संतिष्ठते स्म संस्थितः, संपूर्वस्तिष्ठतिर्मरणे वर्तते । सर्वेऽप्येते वाच्यलिङ्गाः ॥ ११८ ॥ चीयते स्म चिता । चेतव्या चित्या, चित्याग्निचित्येचेति (सू०) साधुः । चीयते चितिः । एते प्रेतदाहार्थेऽग्न्याधाने वर्तन्ते । कस्य शिरसो बन्धोऽत्र कबन्धः, केन बन्धो वा । क्रियया युक्तं नृत्यदपगतो मूर्धास्यापमूर्धं यत्कलेवरम् । रुण्डोऽपि ॥ ११९ ॥ शवशयनं श्मशानम् । पितॄन्प्रेतान्वनति भजति पितृवनम् । प्रेतवनं करवीरं च । कुणं शब्दं पाति कुणपः, धनं-

श्मशानं स्यात्पितृवनं कुणपः शवमस्त्रियाम् ।
प्रग्रहोपग्रहौ बन्द्यां कारा स्याद्बन्धनालये ॥ १२० ॥
पुंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणम् ।
आयुर्जीवितकालो ना जीवातुर्जीवनौषधम् ॥ १२१ ॥

इति क्षत्रियवर्गः । ८ ।

ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः ।
आजीवो जीविका वार्त्ता वृत्तिर्वेत(वर्त)नजीवने ॥ १ ॥
स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः ।
सेवा श्ववृत्तिरनृतं कृषिरुञ्छशिलं त्वृतम् ॥ २ ॥
द्वे याचितायाचितयोर्यथासंख्यं मृतामृते ।
सत्यानृतं वणिग्भावः स्यादृणं पर्युदञ्चनम् ॥ ३ ॥

जयाख्यस्य बाणोः शवे संभवात् । शवति यात्यस्माज्जीवः शवः । प्रगृह्यते बध्यते प्रग्रहः । वन्द्यते याच्यते वन्दी इत्यहन्ता स्त्री, बध्यतो हस्तासितो राजपुत्रादिश्च, यदाहुः— वन्दी स्यात्पणबन्धस्थः । कीर्यते क्षिप्यतेऽस्यां कारा, भिदाद्यङ् (षिद्भिदादिभ्योऽङ् इति) ॥ १२० ॥ अस्यन्तेऽसवः, स्वभावाद्बहुत्वे पुंलिङ्गः । प्राणन्त्यनेनेति प्राणाः, एवं शब्दस्तु पुंसि भूम्नि । प्राणो नाम वायुरित्येकत्वमजीवार्थत्वात् । जीवनं जीवः प्राणधारणम् । जीवोऽपि । आयत्यायुर्जीवितावधिः, उसन्तः क्लीबे, छन्दस्युदन्तोऽपि । जीवत्यनेन जीवातुः, जीवनायौषधं जीवनरक्षोपायः, यथा— जीवातवे विसृज शूद्रमुनौ कृपाणम् (उ०), जीवितमौषधं चेत्युपाध्यायः ॥ १२१ ॥ इति क्षत्रियवर्गः । ८ ।

ऊर्वोर्भवा ऊरव्याः, शरीरावयवाच्चेति (सू०) यत्, यच्छ्रुतिः— ऊरू तदस्य यद्वैश्यः । अर्यणीयोऽर्यः, अर्यः स्वामिवैश्ययोः (सू०) इति साधुः । विशोऽपत्यं जातिर्वैश्यः, गर्गादिभ्यो यञ् (सू०) । भूमिं स्पृशति कृष्यादिना भूमिस्पृक् । विशतीति विट् । (आजीवः) आजीवन्त्यनेनेति करणे भावे वा साध्यः, जीवनं जीविका, संज्ञायां (सू०) इत्यत्र धातुमात्राद् भावे ण्वुल् वक्तव्यः (धात्वर्थनिर्देशे ण्वुल्) । कृष्यादिस्त्रुपचारात् । वर्तनं वृत्तिरस्त्यस्यां वार्त्ता, प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः (सू०) । वर्तन्तेऽनया वृत्तिः । वेति खादत्यनेन वेतनम् ॥ १ ॥ कर्षणं कृषिः, इक्कृष्यादिभ्यः (वा०) । पशुपालस्य कर्म पाशुपाल्यम् । वणिजः कर्म वाणिज्यम्, ब्राह्मणादित्वात्ष्यञ् (गुणवचनब्राह्मणादिभ्यः कर्मणि च) । दूतवणिग्भ्यां चेति वक्तव्यात् (वा०) वाणिज्यापि । चात्कुसीदम् । ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा । सत्यानृताभ्यामपि वा न श्ववृत्त्या कथंचनेति ये षड्वृत्तिभेदास्तानाह । (सेवा) शुन इव वृत्तिः परपिण्डोपजीवितत्वादधमेत्यर्थः । न ऋतमनृतं पापिष्ठत्वात्, प्रमृतमिति तु सभ्यः पाठः । उञ्छो धान्यकणोच्चयः— शिलं धान्यमञ्जरी, समस्तं व्यस्तं विपर्यस्तं वैतत्, वन्द्यत्वादृतं सत्यम् ॥ २ ॥ मृतं निर्जीवमिव । अमृतमनश्वरम् । किंचित्सत्यं किंचिच्चासत्यं, अत्र मनुः— ऋतमुञ्छशिलं ज्ञेयं स्यादयाचितममृतम् । मृतं तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम् ॥ सत्यानृतं तु वाणिज्यं तेनापि खलु जीव्यते । सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ॥ अर्यते स्म ऋणं, ऋणमाधमर्ण्ये इति (सू०) साधुः । (पर्युदञ्चनं) परित उदञ्चनमुत्तमर्णमुद्धारत्वेन ग्रहणम् ॥ ३ ॥ अर्थस्य प्रयोगः कालान्तरेण दानम् । कुत्सितं सीदन्त्यत्र कुसीदम् । (याचितकं) अपमित्ययाचिताभ्यां कक्कनौ (सू०) । विनिमयाद् भाण्डपरिवर्तनादागतमापमित्यकं, मेङ् प्रणिदाने, उदीचांमाङोव्यतीहारे (सू०), मयतेरिदन्यतरस्यां (सू०),

उद्धारोऽर्थप्रयोगस्तु कुसीदं वृद्धिजीविका ।
याच्ञयाप्तं याचितकं निमयादापमित्यकम् ॥ ४ ॥
उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ।
कुसीदिको वार्धुषिको वृध्याजीवश्च वार्धुषिः ॥ ५ ॥
क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः ।
क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितम् ॥ ६ ॥
यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि तत् ।
तिल्यतैलीनवन्माषोमाणुभङ्गाद् द्विरूपता ॥ ७ ॥
मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्षमम् ।
बीजाकृतं तूप्तकृष्टं सीत्यं कृष्टं च हल्यवत् ॥ ८ ॥
त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन् ।
द्विगुणाकृते तु सर्वं पूर्वं शम्बाकृतमपीह ॥ ९ ॥
द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः ।
खारीवापस्तु खारीक उत्तमर्णादयस्त्रिषु ॥ १० ॥

इति ल्यप्- तुक्, तत आगतेऽर्थे, अपमित्ययाचिताभ्याकक्नौ (सू०)। **मुनिस्तु**- निमयः परिवर्तः स्यादुद्धारोऽप्यपमित्यकः ॥ ४ ॥ उत्तम ऋणं उत्तमर्णः प्रयोक्ता, अधम ऋणं- अधमर्णो ग्राहकः, सुप्सुपेति (सू०) समासः । कुसीदं गृह्णाति कुसीदिकः, कुसीददशैकादशात्ष्ठन्ष्ठचौ (सू०)। वृद्धिं गर्ह्यां प्रयच्छति वार्धुषिकः, प्रयच्छतिगर्ह्यमिति (सू०) ठक्, वृद्धेर्वृधुषिभावः (वा०)। (वार्धुषिः) लक्ष्यादिभन्तोपि, यन्मनुः- श्रोत्रियस्य कदर्यस्य वदान्यस्यापि वार्धुषी । वृद्धिनाजीवति वृध्याजीवः । द्वैगुणिकश्च । वृद्धिर्लाभः कलान्तरम् ॥ ५ ॥ कर्षति कृषिकः, औणादिक इकः (वृश्चिकृष्योःकिकन्)। कार्षकोपि । कृषिरस्त्यस्य कृषीवलः, रजःकृष्यासुतीति (सू०) वलच्, वले (सू०) इति दीर्घः । व्रीहीणां भवनं क्षेत्रं व्रैहेयं, व्रीहिशाल्योर्ढक् (सू०) ॥६॥ यवानां भवनं क्षेत्रं यव्यं, यवयवकषष्टिकाद्यत् (सू०)। यवकोल्पयवः । षष्टिकाः षष्टिरात्रेण पच्यन्ते । **उपाध्यायो** यवादिभवने हितमिति पाठं परिकल्प्य प्रस्तावात्- चोद्यमित्यशुद्धं पठति । तिलानां भवनं क्षेत्रं, विभाषातिलमाषोमाभङ्गाणुभ्यः (सू०) इति यत्खञौ । एवं माषादीनां द्विरूपता- माष्यं माषीणं, उम्यमौमीनं (उमा-अतसी), अणव्यमाणवीनं, भङ्ग्यं भाङ्गीनम् ॥ ७ ॥ मुद्गानां कोद्रवाणां च भवनं क्षेत्रं, धान्यानांभवनेक्षेत्रेखञ् (सू०)। आदिशब्दान्मासूरीणादि । शेषाणि व्रीह्यादिभ्योन्यानि । शाकक्षेत्रे द्वयं- शाकशाकटं शाकशाकिनं, भवने-क्षेत्रेशाकटशाकिनौवक्तव्यात् (वा०)। अबीजं सबीजं संपन्नं बीजाकृतं, कृञोद्वितीयतृतीयशम्बबीजा-त्कृषौ (सू०) इति डाच् । आदावुप्तं पश्चात्कृष्टं (उप्तकृष्टं), पूर्वकालैकेति (सू०) समासः । सीतया हललेखया समितं संगतं सीत्यं, नौवयोधर्मेति (सू०) सीतया समिते यत् । हलेन कृष्टं हल्यं, मतजन-हलात्करणजल्पकर्षेषु (सू०) इति यत् ॥ ८ ॥ त्रिगुणं कृष्टं क्षेत्रं त्रिगुणाकृतं, संख्यायाश्चगुणान्तायाः (सू०) इति डाच् । त्रिहल्यं त्रिसीत्यमपि प्राग्वद्यत्, रथसीताहलेभ्यो यद्विधौ तदन्तविधिः (येनविधि-स्तदन्तस्य)। सर्वं पूर्वं डाच्-यच्च, द्वितीयाकृतं द्विहल्यं द्विसीत्यम् । शम्बाकृतं हि सम्यक् कृष्ट्वा तिर्यक् कृष्टमाहुः ॥ ९ ॥ द्रोणस्य वापः क्षेत्रं द्रौणिकं, उप्यतेस्मिन्वापः, तस्यवापइति (सू०) ठञ् । आदि-शब्दात्प्रस्थादिभ्यः, संभवत्यवहरतिपचतीति (सू०) ठनि प्रास्थिकादयः । (खारीकः) खार्या ईकन् (सू०)। वाच्यलिङ्गत्वात्क्षेत्रम् ॥ १० ॥ उप्यतेस्मिन्वप्रम् । के जले दार्यते केदारः । क्षीयते धान्यै-

पुंनपुंसकयोर्वप्रः केदारः क्षेत्रमस्य तु ।
कैदारकं स्यात्कैदार्यं क्षैत्रं कैदारिकं गणे ॥ ११ ॥
लोष्टानि लेष्टवः पुंसि कोटिशो लोष्टभेदनः ।
प्राजनं तोदनं तोत्त्रं खनित्रमवदारणम् ॥ १२ ॥
दात्रं लवित्रमाबन्धो योत्रं योक्त्रमथो हलम् ।
निरीषं कुटकं फालः कृषको लाङ्गलं हलम् ॥ १३ ॥
गोदारणं च सीरोथ शम्या स्त्री युगकीलकः ।
ईषा लाङ्गलदण्डः स्यात्सीता लाङ्गलपद्धतिः ॥ १४ ॥
पुंसि मेथिः(धिः) खलेदारु न्यस्तं यत्पशुबन्धने ।
आशुर्व्रीहिः पाटलः स्याच्छितशूकयवौ समौ ॥ १५ ॥
तोक्मस्तु तत्र हरिते कलायस्तु सतीनकः ।
हरेणुखण्डिकौ चास्मिन्कोरदूषस्तु कोद्रवः ॥ १६ ॥
मङ्गल्यको मसूरोथ मकुष्ठ(ष्ट)कमयुष्टकौ ।
वनमुद्गे सर्षपे तु द्वौ तुन्तुभकदम्बकौ ॥ १७ ॥

रुध्यतेत्र, फलैर्हीय(हिंस्य)ते वा क्षेत्रं, क्षि निवासे, क्षिणु हिंसायां वा । अस्य क्षेत्रस्य समूहेर्थे– एते स्युः । (कैदार्यं, इ०) केदाराद्यञ्चेति (सू०) यञ्वुञ. (कैदारिकं) ठञ्कवचिनश्चेति (सू०) ठञ् । (क्षैत्रं) क्षेत्रात्– अचित्तहस्तीति (सू०) ठकि प्राप्ते भिक्षादित्वात् (सू०) अण् ॥ ११ ॥ लुष्यते लुषति वा लोष्टम् । लेष्टुश्च मृत्खण्डः । कोटिभिः कोणैः श्यति भिनत्ति कोटिशः । प्राज्यते (प्रवीयते) प्रेर्यतेनेन प्राजनं, वायाविति (सू०) पक्षेऽजेर्वी, प्रवयणं च । तुद्यतेनेनेति तोत्त्रम् । प्रेषणं च । खन्यतेनेन खनित्रं कुद्दालादि ॥ १२ ॥ द्य(दा)न्ति लुनन्ति चानेन, दाम्नीतिष्ट्रन्(सू०) । (लवित्रं) आर्तिलूधूसूखनसहचरइत्रः (सू०) । आबध्यते यूयते युज्यते चानेनेति, चर्मरज्जुः । इतो हलप्रकरणमारब्धमित्यर्थः । निष्कान्ता– ईषास्मान्निरीषम् । कुटति कुटकं यस्याग्रे फालो बध्यते । फलति विशीर्यते भूमिरनेन फालः । कृषति क्ष्मां कृषकः, क्वुन्–शिल्पिसंज्ञयोः (उ०) । कृषिकः फलं च । लङ्गति लाङ्गलम् । हलति विलिखति हलम् ॥ १३ ॥ गौर्भूमिर्दार्यतेनेन गोदारणम् । सीयते बध्यतेनेन सीरः । शाम्यति शम्या । ईषति– ईषा, ईष उञ्छे । स्यति भुवं सीता हललेखा ॥ १४ ॥ मीयते क्षिप्यते मेथिः, मेथ्यन्ते (सं)गम्यन्तेस्मिन्वा, खलेदार्विति हलदन्तात्सप्तम्याः (सू०) इत्यलुक् , पशुबन्धनानिमित्तम् । खलेवाली च । खलं तु खलवान[धान्य]कम् । अश्यतेश्नुते वा– आशुः, शीघ्रपाको वा, यद् दुर्गः– आश्वाख्या शालिशीघ्रयोः । व्रीणाति व्रीहिः षष्टिकादिधान्यविशेषः, व्री भरणे, यतः– व्रीहिर्यवो मसूरो गोधूमो मुद्गमाषतिलचणकाः । अणवः प्रियङ्गुकोद्रवमयुष्टकाः (शालिराढक्यः) ॥ द्वौ च कलायकुलत्थौ शणसप्तदशानि धान्यानि । शितस्तीक्ष्णः शूकः किंशारुरस्य शितशूकः । यूयते यवः ॥ १५ ॥ तत्र नीले यवे, तुज्यते तोक्मः, तुजिर्हिंसार्थः । कल[म]यति सारमयते कलायः, कं लाति वा । सीदन्त्यनेन सतीनकः, सातीनकोपि । ह्रियते हरेणुः । खण्ड्यते खण्डिकः । कोरं भक्तं दूषयति कोरदूषः कदन्नत्वात् । केनाम्भसा– उद्यते कोद्रवः ॥ १६ ॥ (मसूरः) मसी परिणामे । मङ्क्यतेनेन मकुष्ठः । मीयते मयुष्टकः । सरति सर्षपः । तुदति तुन्तुभः । कुत्सितमम्बते कदम्बः ॥ १७ ॥ (सिद्धार्थः) सिद्धयोजनो रक्षोघ्नत्वात् , एष सर्षपः । गुध्यति परिवेष्टयति गोधूमः, गां धुनोति वा । सुष्ठु मन्यते सुमनः, अकारान्तः । यूयतेम्भसा यावकः । कोलति कुलेन मस्यति परिणमति वा कुल्माषः, अर्धस्विन्नो यवादिः, धान्यविशेष इत्येके । चण्यते दीयते चणकः । हरिमि-

सिद्धार्थस्त्वेष धवलो गोधूमः सुमनः समौ।
स्याद्यावकस्तु कुल्माषश्चणको हरिमन्थकः॥ १८॥
द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले।
क्षवः क्षुताभिजननो राजिका कृष्णिकासुरी॥ १९॥
स्त्रियौ कङ्गुप्रियङ्गू द्वे अतसी स्यादुमा क्षुमा।
मातुलानी तु भङ्गायां व्रीहिभेदस्त्वणुः पुमान्॥ २०॥
किंशारुः शस्यशूकं स्यात्कणिशं शस्यमञ्जरी।
धान्यं व्रीहिः स्तम्बकरिः स्तम्बो गुच्छस्तृणादिनः॥ २१॥
नाडी नालं च काण्डोस्य पलालोस्त्री स निष्फलः।
कडङ्गरो बुसं क्लीबे धान्यत्वचि पुमांस्तुषः॥ २२॥
शूकोस्त्री श्लक्ष्णतीक्ष्णाग्रे शमी शिम्बा त्रिषूत्तरे।
रिद्धमावसितं धान्यं पूतं तु बहुलीकृतम्॥ २३॥
माषादयः शमीधान्ये शूकधान्ये यवादयः।
शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी॥ २४॥

मथ्यते हरिमन्थः॥ १८॥ तिलान्निष्फलात्पिञ्जपेजौ वक्तव्यौ (वा०)। जर्तिलः स्याद्वनतिलः। क्षौत्यनेन क्षवः। क्षुतमभिजनयति क्षुताभिजननः। कृष्णसर्षपोयं राजसर्षपाख्यः। राजते राजिका। कृष्णा वर्णेन, कर्षति विलिखति वा। अस्यते– आसुरी, असुरस्त्रीव वा॥ १९॥ कुत्सितं कृत्वाङ्गयते कङ्गुः, कङ्गुः कङ्गुश्चेत्येके। प्रीणाति प्रियङ्गुः। न तस्यते– अतसी। अवते– उमा, ऊङ् शब्दे। क्षौत्यनया भुक्तया क्षुमा। न तोल्यते मातुलानी। भज्यते भङ्गा। शणोपि। अणुरल्पकणत्वात्, अणति पदेत्यनेनेति वा। तुवरी त्वरके वल्लो निष्पावे श्यामाकः श्यामके च॥ २०॥ कुत्सितं शृणाति किंशारुः। श्यति शूकम्। कणाः सन्त्यस्य कणिशम्। धान्ययवादिशिलः, शिलं च। धन्यतेर्थ्यते धान्यम्। स्तम्बं करोति स्तम्बकरिः, स्तम्बशकृतोरिन् (सू०)। शीं[सी]त्यं च। कुसूलो वलजः कोष्ठागारं धान्यादिकोष्ठकः। तृणादेर्यः स्तम्बो नालं, स गुध्यतेनेनेति गुच्छः। यं प्रति स्तम्बोऽप्रसिद्धस्तं प्रत्यन्यथाविध्यनुवादौ कार्यौ। एवं सर्वत्रोन्नेयम्॥ २१॥ अस्य गुच्छस्य यः काण्डः– कण्ड(य)त्यनेन– सा नाडी, नड(तो)ति। (नालं) णल गन्धे। स काण्डः पलालः, पलतीति। कटत्यावृणोति, कट(ड्) अङ्गं रूपमस्य कडङ्गरः। बुस्यते– उत्सृज्यते बुस तृणादिक्षोदः। तुष्यत्यनेनाग्निस्तुषः॥ २२॥ श्यति शूकम्, श्लक्ष्णं च तीक्ष्णाग्रं च तत्। सस्यादेरन्यत्र वृश्चिकादिकण्टकोपि शूक इति किंशारोरन्यत्र निर्दिष्टः, शूकधान्यशमीधान्यभेदार्थं वा पुनरुक्तः। शाम्यत्यस्यां सस्यं शमी। शिनोति शिम्बा। शामः शिम्बिरित्यपि। रिद्धाद्याश्चत्वारो वाच्यलिङ्गाः। रिद्धं संसिद्धं राधेः, ऋद्धं संपन्नमित्येके ऋधेः। आवसितं रक्षार्थमाच्छादितं, वस आच्छादने, आ– अवसितं निष्पन्नमित्येके। पूयते स्म पूतं निर्बुसीकृतम्। बहु लाति बहुलं सारं, ततश्च्विः, मार्जनीशोधितमित्येके॥ २३॥ वर्तन्त इति शेषः। (माषादयः) आदिशब्दान्मुद्गमसूरादयः। (यवादयः) आदिशब्दाद् गोधूमशालयः। शाल्यते शालिः। कल्यते कलमः। आद्यशब्दाद्राजशाल्याद्या जलजाः। षष्टिकाः षष्टिरात्रेण पच्यन्ते। आद्यशब्दात्कक्कोलाद्याः स्थलजाः। अमी इति पुंलिङ्गनिर्देशान्माषाद्याः शाल्यन्ताः पुंसि॥ २४॥ नियते व्रियन्ते नीवाराः, मुन्यन्नत्वात्, नौवृधान्य इति (सू०) घञ्। बहुवचनाच्छ्यामाकादयोपि। गवे(वि)अम्भसि निधीयते गवेधुर्नाम मुन्यन्नम्। अयोग्रेस्य– अयोग्रं, अयोनिरित्येके पेठुः। मुस्यते खण्ड्यतेनेन मुसलम्। ऊर्ध्वं खं लाति (उदूखलमुलूखलं)

तृणधान्यानि नीवाराः स्त्री गवेधुर्गवेधुका ।
अयोग्रं मुसलोऽस्त्री स्यादुदूखलमुलूखलम् ॥ २५ ॥
प्रस्फोटनं शूर्पमस्त्री चालनी तितउः पुमान् ।
स्यूतप्रसेवौ कण्डोलपिण्डौ कटकिलिञ्जकौ ॥ २६ ॥
समानौ रसवत्यां तु पाकस्थानमहानसे ।
पौरोगवस्तदध्यक्षः सूपकारास्तु बल्लवाः ॥ २७ ॥
आरालिका आन्धसिकाः सूदा औदनिका गुणाः ।
आपूपिकः कान्दविको भक्ष्यकार इमे त्रिषु ॥ २८ ॥
अश्मन्तमुद्धा(द्वा)नमधिश्रयणी चुल्लिरन्तिका ।
अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि ॥ २९ ॥
हसन्यप्यथ न स्त्री स्यादङ्गारोलातमुल्मुकम् ।
क्लीबेऽम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियाम् ॥ ३० ॥
अलं(लि)जरः स्यान्मणिकः कर्कर्यालूर्गलन्तिका ।
पिठरः स्थाल्युखा कुण्डं कलशस्तु त्रिषु द्वयोः ॥ ३१ ॥

उद्घणोऽवणवत् पृषोदरादित्वात् (सू०) उभयम् ॥ २५ ॥ प्रस्फोट्यतेऽसारं बहिः क्रियतेनेन प्रस्फोटनम् । शीयते शीर्यते वानेन शूर्पं, शूर्प माने वा । चाल्यतेनेनेति चालनं, कात्यः– क्षुद्रच्छिद्रसमोपेतं चालनं तितउः स्मृतः । तनोति सारं तितउः, तनोतेर्डउःसन्वच्च (उ०) । परिपवनं च । समानावित्येव । सीव्यते स्म स्यूतः, वस्त्राद्यावपनं च । प्रसीव्यते प्रसेवकः । कण्ड्यते कण्डोलः । पिण्ड्यते पिण्डः, वंशदलादिमयं भाण्डम् । पिटकोपि । कटत्यावृणोति कटः । किल्यते क्षिप्यतेऽस्मिन् किलिञ्जः, वीरणतृणादिमयं कुणालाख्यम् ॥ २६ ॥ रस आस्वादोऽस्त्यस्यां रसवती । महदनोस्य महानसं, अनसा पकरणं लक्ष्यते, अनोऽश्मायःसरसामिति (सू०) समासान्तष्टच् । पुरो गौः मांसं जल वाऽस्याः पुरोगुस्तस्या रसवत्या अयं पौरोगवः । सूपं कुर्वन्तीत्युपलक्षणं मांसादेः । (बल्लवाः)बल्लिः सौत्रः प्रीत्यर्थः ॥ २७ ॥ (आरालिकाः, इ०) आरालमन्धः ओदनं च पण्यमेषाम् । सूदयन्ति तण्डुलान्सूदाः । गुणयन्ति गुणाः । भक्तकाराश्च । अपूपाः कन्दुश्च पण्यमस्य, इसुसुक्तान्तात् (सू०) कः, कन्दुक इति स्वामी । खरविशदमभ्यवहार्यं भक्ष्यम् । पौरोगवाद्या वाच्यलिङ्गाः ॥ २८ ॥ अश्मनुरन्तम् । उद्ध(द्व)न्ते(न्ति) उद्धा(द्वा)नम् । अधिश्रीयतेऽनयाधिश्रयणी, श्रिञ् पाके । चुल्ल भावकरणे स्म च्चुल्लिः चुल्लिः । अन्तोऽस्त्यस्यामन्तिका, अन्त्याधिश्रयणी भवेदिति माला । अङ्गारा धीयन्तेऽस्यामङ्गारधानी मन्त्रिणः । हसन्त्यङ्गारैर्हसनी ॥ २९ ॥ अङ्गत्यङ्गारः, लिङ्गार्थं विधिः । अलन्ति वारयन्त्यनादरेते न लान्ति वा (अलातम्) । उल्कां मुञ्चत्युल्मुकमर्धदग्धं काष्ठं, उलति वा, उलिः सौत्रः । अम्ब्यतेऽर्थ्यतेऽम्बरीषम् । भृज्ज्यतेऽत्र भ्राष्ट्रम् । वल्येव विकल्पेन कन्दुर्ना पुमान्, पक्षे स्त्री, कन्द्यन्तां कन्दुः । स्वेदयति स्वेदनी ॥ ३० ॥ अलं जीर्यत्यलंजरो महाकुम्भः । मणत्यञ्जसा भ्रियमाणा मणिकः । किरत्यम्बु कर्करी । आलात्यालूः, अड उद्यमे स्मादाद्यूर्वा । गलत्यम्भोऽस्या गलन्तिका, वर्धनीत्यर्थः । पि(पे)ठति पिठरः पिठरी च, पिठ अवयवे । तिष्ठत्यस्यां स्थाली । स्थालं कुम्भी च । ओखत्युखा । कुण्ड्यते पच्यतेऽस्मिन्कुण्डं कुण्डी च । कं लाति कलयति वा कलशः ॥ ३१ ॥ घटते घटः । कुटति कौत्यम्भसा वा कुटः । निपिबन्त्यस्मान्निपः । शीर्यमाणमवति शरावः । वर्धते मृत्पिण्डादूर्ध्वं छिद्यते वा चक्रादूर्ध्वमानकः । शालाजिरोपि । अर्च्यते पाकोत्कर्षादृचीकं, ऋजीषमिति तान्त्रिकाः, ऋजिभृजी भर्जने । पिष्टकृतं भक्ष्यं पच्यतेऽस्मिन् पिष्टपचनम् । काम्यतेऽस्मात्कंसः ।

घटः कुटनिपावस्त्री शरावो वर्धमानकः।
ऋचीकं पिष्टपचनं कंसोऽस्त्री पानभाजनम् ॥ ३२ ॥
कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान् ।
सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम् ॥ ३३ ॥
दर्विः कम्बिः खजाका च स्यात्तन्दू(र्दू)र्दारुहस्तकः।
अस्त्री शाकं हरितकं शिग्रुरस्य तु नाडिका ॥ ३४ ॥
कडम्बश्च कलम्बश्च वेषवार उपस्करः।
तिन्तिडीकं च चुक्रं च वृक्षाम्लमथ वेल्लजम् ॥ ३५ ॥
मरीचं कोलकं कृष्णमूषणं धार्मपत्तनम् ।
जीरको जरणोजाजी कणा कृष्णे तु जीरके ॥ ३६ ॥
सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका ।
आर्द्रकं शृङ्गवेरं स्यादथ छत्त्रा वितुन्नकम् ॥ ३७ ॥
कुस्तुम्बरु च धान्याकमथ शुण्ठी महौषधम् ।
स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम् ॥ ३८ ॥

चषको मल्लिका पारी च ॥ ३२ ॥ कुत्सितं तन्यते कुतूः । कृत्तेश्चर्मणः (स्नेहपात्रम्) । ह्रस्वा कुतूः कुतुपः, कुत्वाडुपच् (सू०) । आ- उप्यते- आधेयमस्मिन्नावपनम् । भण्ड[य]त्याधेयं भाण्डम्, भडि परिभाषणे । पात्याधेयं पीयतेऽस्माद्वा पात्रम् । अमत्याधेयमत्रामत्रम् । भज्यतेऽस्मिन्नाधेयं भाजनम् । भाण्डावपने पृथगाहुः, यन्मुनिः- उष्ट्रिकादि तु यद्भाण्डं सर्वमावपनं विदुः ॥ ३३ ॥ दृणाति पाक्यं दर्विः । काम्यते कम्बिः । खजति मथ्नाति खजाका । ततं दुनोति खण्डयति तन्दूः, तनोति वा । दारुमयो हस्तप्रतिकृतिर्दारुहस्तकः, दर्वीभेदोऽयम् । श्यति देहं शक्यतेऽनेन वा भोक्तुं शाकम् । हरितकं नीलत्वात् । शिनोति शिग्रुः, द्व्यर्थे शिग्रुः शोभाञ्जनं हरितकविशेषश्च ॥ ३४ ॥ अस्य शाकस्य नाडी, कडति के लम्बते वा कडम्बः (कलम्बः), शाकविशेष इत्येके, प्राकृते दस्य(श्च) लडात्कदम्ब इत्याहुः । कडंबो वा । वेषं व्याप्तिं वृणीते वेषवारः । कासमर्दकसुरसादिर्येन मांसान्युपस्क्रियन्तेऽसावुपस्करः, समवाये च (सू०) इति सुट् । तद्भेदानाह । तिन्तिडिशैलजं तिन्तिडीकम् । चुक्रं, चुक व्यथने । वृक्षस्याम्लमम्लवेतसमाहुः । वेल्ले वेल्लातटे जायते वेल्लजं, वेल्लाख्यः शाखीत्येके ॥ ३५ ॥ म्रियते जिह्वानेन मरीचम् । सौक्ष्म्यात्कोलकं, कुड बाल्ये । कृष्णं वर्णेन कर्षति तैक्ष्ण्याद्वा । ऊषति रुजाति- ऊषणम् । धर्मपत्तने भवं धार्मपत्तनम् । आह च- मरीचं वलितं श्यामं वेल्लकं(जं) कृष्णमूषणम् । यवनेष्टं सितवृन्तं कोलकं धार्मपत्तनम् ॥ जीर्यतेऽनेनान्नं जीरकः । जरयतीति जरण इति सभ्याः । अजं स्वाभाविकं मन्दाग्नित्वमजति- अजाजी, स्त्री । कणाः सन्त्यस्याः कणा, अर्शआदिभ्योच् (सू०) । कणा कृष्णा तु पिप्पलीत्येके पेठुः ॥ ३६ ॥ सुष्ठु सुवति प्रेरयति दोषान् सुषवी । कारोरियं कारवी । पृथ्वी बृहत्कणा । काला वर्णेन । उपकुञ्चयत्यल्पीकरोति दोषानुपकुञ्चिका । आह च- उपकुञ्चिकोपकुञ्ची च कालिका चोपकालिका । सुषवी कुञ्चिका कुञ्ची पृथ्वीका कृष्णजीरके ॥ (आर्द्रकं) आर्द्रात्संज्ञायां कन् (सू०) । शृङ्गोपलक्षितं वेरं देहोऽस्य शृङ्गवेरम् । आह च- महौषधं शृङ्गवेरं कटुभद्रं तथार्द्रकम् । छत्त्रातपत्रा, छादयति दोषान्वा छत्त्रा । वितुदति मन्दाग्नित्वं वितुन्नकम् ॥ ३७ ॥ कुत्सितं तुम्बति कुस्तुम्बरु, तुबि तुबि अर्दने, पारस्करादित्वात्सुट् (सू०) । धान्यमकति धान्याकं, अल्लुका धान्यकं च । शुण्ठति शुष्यति शुण्ठी । नागराख्ये देशे भवं नागरम् । विश्वभेषजमनेकदोषजित् । विश्वं विश्वा च भीमवत् ॥ ३८ ॥ आरनालो भक्तं तज्जमारनालम् । सुवीरेषु प्रायो

आरनालकसौवीरकुल्माषाभिषुतानि तु ।
अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्चि(ञ्जि)के ॥३९॥
सहस्रवेधि जतुकं बाह्लीकं हिङ्गु रामठम् ।
तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः ॥ ४० ॥
निशाख्या काञ्चनी पीता हरिद्रा वरवर्णिनी ।
सामुद्रं यत्तु लवणमक्षीवं वशि(सि)रं च तत् ॥ ४१ ॥
सैन्धवोऽस्त्री शीतशिवं माणिबन्धं च सिन्धुजे ।
रौमके वस्त(सु)कं पाक्यं बिडं च कृतके द्वयम् ॥ ४२ ॥
सौवर्चलेऽक्षरुचके तिलकं तत्र मेचके ।
मत्स्यण्डी फाणितं खण्डविकारे शर्करा सिता ॥ ४३ ॥

भवं सौवीरम् । (अभिषुतं) षुञ् अभिषवे, अस्माद्वा पृथक् कुल्माषाख्या नास्ति, चेद् भीमवत् स्यात् । कुल्माषैर्यवादिभिरर्धस्विन्नैरभिषूयते परिवास्यते स्म कुल्माषाभिषुतम् । अवन्तिषु सूयते– अवन्तिसोमम् । कुञ्जं लाति कुत्सितं जलमस्य वा कुञ्जलम् । कञ्ज(ञ्च)यति दीपयत्यग्निं बध्नाति दोषान्वा काञ्चिकं, काञ्च्यां पुरि भवं वा । आह च (**धन्वन्तरिः**)– काञ्चिकं काञ्जिकं वीरं कुल्माषाभिषुतं तथा । अवान्तिसोमं धान्याम्ल्लमारनालं महारसम् ॥ सौवीरकं सुवीराम्लं तथा शुक्तं तुषोदकम् ॥३९॥ सहस्रं बहु विध्यति सहस्रवेधि । जायते जतुकम् । बाह्लीकरामठावुद्देशौ । हिनोति हिङ्गु । अत्युग्रं भूतनाशनमगूढगन्धं च । तस्य हिङ्गोः पत्त्री, कारोरियं कारवी संस्कर्त्री । बाष्पं स्रवति बाष्पिका । कबर्याकृतिः कबरी, कर्वरीति च पाठभेदः ॥ ४० ॥ निशाख्या रात्रिपर्याया नानार्थे रजनीत्वात् । काञ्चनवर्णा काञ्चनी । हरि पीतं वर्णं द्राति (गच्छति) हरिद्रा । वरो वर्णोऽस्त्यस्या वरवर्णिनी । आह च– हरिद्रा पीतिका पिण्डा र(रं)जनी रजनी[काञ्चनी] निशा । गौरीवर्णवती पीता हरिता वरवर्णिनी ।. लुनाति जाड्यं लवणं, नन्द्यादित्वाल्ल्युः (सू०), णत्वं च। अक्ष्णोति व्याप्नोति– अक्षीवम् । उश्यते वाशिरं, वश कान्तौ ॥ ४१ ॥ सिन्धुनद्युपलक्षिते देशे भवं सैन्धवम् । शीतं शिनोति शीतशिवं, उष्णवीर्यत्वात् । मणिबन्धगिरौ भवं माणिबन्धम् । मणिमन्तं(न्थं) माणिमन्थं वाहुः । आह च– सैन्धवं साधु सिन्धूत्थं नादेयी(यं) सिन्धुजं शिवं । शुद्धं शीतशिवं चान्यन्माणिबन्धं शिलातकम् ॥ रुमायामाकरे भवं रौमकम् । वस्तगन्धि वस्तकं नाम लवणं, रौमके वस्तकं वदन्ति **माला** । पाके साधु पाक्यं पक्तव्यं वा कल्लराख्यम् । बिलति भिनत्ति मलं बिडम् । कृतकस्य लवणस्य द्वे नामनी, पाक्यबिडलवणयोर्भेदेपि कृतकत्वादैक्यम् । त्यर्थे पाक्यं बिडलवणं यवक्षारः काचश्चेति ॥ ४२ ॥ सुवर्चलाकरे भवं सौवर्चलं, सुवर्चस्येदमग्निदीपनं लाति वा, वर्च दीप्तौ, अच् । अक्ष्णोति व्याप्नोत्यक्षम् । रोचतेऽनेन रुचकम् । हृद्यगन्धं च । तिलति स्निह्यति तिलकम् । तत्र तस्मिन्मेचके कृष्णे लवणे वर्तते, पूर्वं तु मधु(र)लवणम् । अगन्धं कृष्णलवणं तिलकमित्येके, यद्**वैद्याः**– कृष्णे सौवर्चलगुणा लवणे गन्धवर्जिते । मदं स्यन्दते मत्स्यण्डी सामान्यशर्करा, मत्स्यानमति रुजति मत्स्य(स्या)ण्डीति **वैद्याः**, यद्**धन्वन्तरिः**– शर्करोक्ता तु मीनाण्डी श्वेता मत्स्यण्डिका सिता । मत्स्यण्डिकाखण्डसिताः क्रमेण गुणवत्तरा इति तु **वाह(भ)टः** । फण्यते द्रवत्वात्फाणितं खण्डश्वेता । क्षौद्रकं त्विक्षुरसविकारः खण्डवत् । शीर्यते शर्करा । सीयते सिता खण्डशर्कराख्या ॥४३॥ कूर्चवत्तन्(क)मस्तु तदस्त्यस्याः कूर्चिका, कुचति कुचिका, कुचीकेत्येके किलाटिकाख्या । रसमलति रसाला । माज्यते मार्जिता दधिसितामरीचादिकृतं लेह्यं, यत्**सूदशास्त्रम्**– अर्धा-

कूर्चिका क्षीरविकृतिः स्याद्रसाला तु मार्जिता ।
स्यात्तेमनं तु निष्ठानं त्रिलिङ्गा वासितावधेः ॥ ४४ ॥
शूलाकृतं भटित्रं च शूल्यमुख्यं तु पैठरम् ।
प्रणीतमुपसंपन्नं प्रयस्तं स्यात्सुसंस्कृतम् ॥ ४५ ॥
स्यात्पिच्छिलं तु विजिलं संमृष्टं शोधितं समे ।
चिक्कणं मसृणं स्निग्धं तुल्ये भावितवासिते ॥ ४६ ॥
आपक्वं पौलिरभ्यूषो लाजाः पुंभूम्नि चाक्षताः ।
पृथुकः स्याच्चिपिटको धाना भृष्टयवे स्त्रियः ॥ ४७ ॥
पूपोपूपः पिष्टकः स्यात्करम्भो दधिसक्तवः ।
भिस्सा स्त्री भक्तमन्धोन्नमोदनोस्त्री स दीदिविः ॥ ४८ ॥

ढकं सुचिर[दृढ]पर्युषितस्य दध्नः खण्डस्य षोडश पलानि शशिप्रभस्य । सर्पिष्पलं मधुपलं मरिचद्वि-कर्षं शुण्ठ्याः पलार्धमपि वा[चा]र्धपलं चतुर्णाम् । श्लक्ष्णे पटे ललनया मृदुपाणिघृष्टा कर्पूरधूलिसुरभी-कृतभाण्डसंस्था । एषा वृकोदरकृता सु[स]रसा रसाला या स्वादिता भगवता मधुसूदनेन ॥ तिम्यत्या-र्द्रीभवत्यन्नमनेन तेमनमुपसेचनं क्नोपनाख्यम् । नितिष्ठत्यन्नमनेन निष्ठानम् । व्यञ्जनं च सूपाद्युपचा-रात् ॥ ४४ ॥ इतः प्रभृति वासितान्ता वाच्यलिङ्गाः । (शूलाकृतं) शूलात्पाके (सू०) इति डाच् । भटत्यनेन भटित्रं, भट भृतौ । शूले संस्कृतं शूल्यं, शूलोखाद्यत् (सू०) । भारुटकं भृष्टं च । संस्कृतं सर्पिषा दध्ना सार्पिष्कं दाधिकं क्रमात् । उदलावणिकं तत्स्याद्यत्सिद्धं लवणाम्भसा ॥ उखायां स्थाल्यां संस्कृतं– उख्यम् । पिठरे संस्कृतं पैठरं, संस्कृतंभक्षाः (सू०) इत्यण् । रूपरसादिनिष्पन्नमन्नं, प्रणीयते स्म प्रणीतम् । परिव्ययपाकादिना प्रयत्ननिष्पन्नं प्रयस्तम् । संस्कृतम् (सू०) अनित्ये साधुः ॥४५॥ (पिच्छिलं) पिच्छादित्वादिलच् (लोमादिपामादीति) । विजते चलति विजिलं, विज्जलमिति **वैद्याः** । वालमक्षि-कादिरहितं संमृष्टं, मृजू शुद्धौ । चिगित्यव्यक्तं कणति चिक्कणम् । मस्यति मसृणम् । भाव्यते मिश्रीक्रियते स्म भावितं, भुवोऽवकल्कने (धा० सू०) णिच् । वास्यते द्रव्यान्तरेण मेल्यते, धूपपुष्पादिना वाधिवास्यते वासितं, यन्मुनिः– धूपितं वासितं विदुः ॥४६॥ ईषद्भृष्टं कलायादि– आपक्वं खलभर्जिताख्यम् । पु(पो)-लति वर्धते पौलिः, पुल महत्त्वे । ऊषरुजार्थादभ्यूषः, उषदाहार्थादभ्योष इत्येके । लज्यन्ते लाजाः, लज भर्जने । न क्षण्यन्तेऽक्षताः, चाद्भिन्नक्रमात्तेपि पुंसि बहुत्वे च । अक्षता यवा इति **पुराणं** तन्मते पुंबहुत्वार्थो विधिः । आर्द्रं भृष्टं सस्यं तद्विपाकात्पृथूभवति चिपिटीभवति च, नीऽधान्यं वा भृष्टमुलूखल-क्षोदाच्चिपिटीभूततण्डुलम् । धीयन्ते धानाः । भृष्टयव इति जात्याख्यायामेकत्वम् । धानाचूर्णं सक्तवः स्युर्बुस्तिः स्यान्मांसशष्कुली, भूस्तिरिति **द्रवि[मि]डाः** ॥ ४७ ॥ पुनाति पूपः । न पूय[य्य]तेऽपूपः पिष्टातकमयो मण्डकाख्यः, पूयी विशरणे, अद्भिरूप्यत इति **नैरुक्ताः** । (पिष्टकः) पिष्टाच्चसंज्ञायां (सू०) कन् । **मुनिस्तु**– अपूपः पिष्टपूपः स्यात्पूपा भक्ष्याः प्रकीर्तिताः । केन रम्यते मील्यते कीर्यते वा करम्भः । दध्युपसिक्ताः सक्तवः (दधिसक्तवः) । भस्यते भक्ष्यते भिस्सा, भ्यसेः संप्रसारणं वा, ब्राह्मणभिस्सेति **भाष्यम्** । भज्यते भक्तम् । अनित्यनेना-न्धः सान्तम् । अद्यतेऽन्नम् । उनत्ति क्लिद्यत्योदनम् । भृशं दीव्यत्यनेन दीदिविः, स इति विशेषणात्पुंसि ॥४८॥ कुत्सिता भिस्सा भिस्सटा, य ओदनभिस्सटा, लक्ष्यानुरोधाट्टः– यथा स्वर्गग्रामटिका, वधूटिका । सर्वद्रव-द्रव्याणामग्रं मुख्यं, मण्डयति मण्डः । मस्यति परिणमते मासरः । आचम्यत आचामः । निस्राव्यते

भिस्सटा दग्धिका सर्वरसाग्रे मण्डमस्त्रियाम् ।
मासराचामनिस्रावा मण्डे भक्तसमुद्भवे ॥ ४९ ॥
यवागूरुष्णिका श्राणा विलेपी तरला च सा ।
गव्यं त्रिषु गवां सर्वं गोविड् गोमयमस्त्रियाम् ॥ ५० ॥
तत्तु शुष्कं करीषोऽस्त्री दुग्धं क्षीरं पयः समम् ।
पयस्यमाज्यदध्यादि द्रप्सं दधि घनेतरत् ॥ ५१ ॥
घृतमाज्यं हविः सर्पिर्नवनीतं नवोध्दृतम् ।
तत्तु हैयंगवीनं यद् ह्योगोदोहोद्भवं घृतम् ॥ ५२ ॥
दण्डाहतं कालशेयमरिष्टमपि गोरसः ।
तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥ ५३ ॥
मण्डं दधिभवं मस्तु पीयूषोऽभिनवं पयः ।
अशनाया बुभुक्षा क्षुद् ग्रासस्तु कवलः पुमान् ॥ ५४ ॥

निस्रावः ॥ ४९ ॥ यूयते पिष्टादिना यवागूः, सृयुवचिभ्यइत्यागूच् (उ०) । संज्ञितोष्णा– उष्णिका, ब्राह्मणकोष्णिकेसंज्ञायाम् (सू०) । श्रायते श्राणा, श्रा पाके । विलिम्पति विलेपी । तरला लेह्यत्वाच्चपला । म्रक्षणाभ्यञ्जने तैलं कृश[स]रस्तु तिलौदनः । गोरिदं गवि भवमित्यादिष्वर्थेषु गव्यं क्षीरादि– सर्वत्रगोरजादिप्रसंगेयत् (वा०) । गोर्विष्ठा गोविट् गोमयं च, गोश्चपुरीषे (सू०) मयट् ॥ ५० ॥ करोत्यग्निं करीषं शुष्कगोमयम् । दुह्यते दुग्धम् । घस्यते(अद्यते) क्षीरम्, घसेःकिच्च (उ०) इतीरन्, गमहनजनेति (सू०) उपधालोपः, खरिच (सू०) इति चर्त्वम्, शासिवसिघसीनांच (सू०) षत्वम् । पीयते पयते वा रसत्वात्पयः, असुन् । सममिति पयसो नपुंसकत्वार्थम् । पयसो विकारः पयस्यं, गोपयसोर्यत् (सू०) । आदिशब्दान्नवनीतादि । दृप्यति(अनेन) द्रप्सम् । घनादन्यदघनमित्यर्थः, यन्माला द्रप्सं दध्यघनं तथा । एतच्च द्रप्सं शरमिति **भागुरि**पाठे सरमिति बुध्द्वा **मालाकारो** भ्रान्तः । केचिन्नष्टैस्तु नाशिता इत्ययमपि **माला**पाठेन विप्रलब्धः, यदाह **दुर्गः**– बाणद्रप्सौ शराविति । इत्थं तु समर्थ्यं, तरल्– उपरि प्लवमानं घनं दधि द्रप्सम् ॥ ५१ ॥ जिघर्ति घृतम् । आ– अज्यमीयमाज्यं, आङ्पूर्वादञ्जेःसंज्ञायांक्यप् (वा०) । हूयते हविः, हविष्यं च । सर्पति सर्पिः, इसन्तौ । दध्नो मथितान्नवं तत्कालं नीतमुध्दृतं नवनीतं घृतयोनिः । ह्योगोदोहस्य विकारो हैयङ्गवीनं, हैयङ्गवीनंसंज्ञायां (सू०) इति साधुः । **कात्यो** नवनीतमित्याह ॥ ५२ ॥ मन्थदण्डेनाहतं दण्डाहतम् । कलश्यां गर्गर्यां भवं कालशेयम् । न रिष्यति हिनस्ति– अरिष्टं, सर्वरोगजित्त्वात् । तद्विशेषानाह । तञ्चति द्रुतं गच्छति तक्रं चतुर्भागाम्बु । उदकेन श्वयति– उदश्विदर्धाम्बु । दध्नो मथनमात्रसाध्यं मथितं निर्जलम् । द्विगुणाम्बु श्वेतरसमर्धोदकमुदश्वितम् । तक्रं त्रिभागभिन्नाम्बु केवलं मथितं स्मृतमिति **धन्वन्तरिः** ॥५३॥ दध्नो मण्डं द्रवो भागः, मस्यति परिणमते मस्तु । पीयते पीयूषः, नवप्रसूतगवीक्षीरं क्वथितं सत् । अशनेच्छा– अशनाया, अशनायोदन्येति (सू०) साधुः । भोक्तुमिच्छा बुभुक्षा । क्षुत्, क्षुध बुभुक्षायाम् । रोचकोऽस्त्री रुचिश्च । ग्रस्यते ग्रासः । के तालुनि वलते कवलः ॥ ५४ ॥ सहपानं सपीतिः । सहादनं सग्धिः, क्तिन्, बहुलंछन्दसि (सू०) इति घस्लृ, घसिभसोर्हलिच (सू०) इत्युपधालोपः, झलोझलि (सू०) इति सलोपः, झषस्तथोर्धोऽधः (सू०), झलांजश्झशि (सू०) । उदकेच्छा उदन्या, अशनायोदन्येति (सू०) साधुः । तर्षणं तृट् तर्षश्च, ञितृष पिपासायाम् । तृष्णा नानार्थे । अदनं जग्धिः अदोज–

सपीतिः स्त्री तुल्यपानं सग्धिः स्त्री सहभोजनम् ।
उदन्या तु पिपासा तृट् तर्षो जग्धिस्तु भोजनम् ॥ ५५ ॥
जेमनं लेह आहारो निघसो न्याद इत्यपि ।
सौहित्यं तर्पणं तृप्तिः फेला भुक्तसमुज्झितम् ॥ ५६ ॥
कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।
गोपे गोपालगोसंख्यगोधुगाभीरवल्लवाः ॥ ५७ ॥
गोमहिष्यादिकं पादबन्धनं द्वौ गवीश्वरौ ।
गोमान्गोमी गोकुलं तु गोधनं स्याद्गवां व्रजे ॥ ५८ ॥
त्रिष्वाशितंगवीनं तद् गावो यत्राशिताः पुरा ।
उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥५९॥
अनड्वान्सौरभेयो गौरुक्ष्णां संहतिरौक्षकम् ।
गव्या गोत्रा गवां वत्सधेन्वोर्वात्सकधैनुके ॥ ६० ॥
वृषो(उक्षा)महान्महोक्षः स्याद् वृद्धोक्षस्तु जरद्गवः ।
उत्पन्न उक्षा जातोक्षः सद्योजातस्तु तर्णकः ॥ ६१ ॥

ग्धिर्ल्यप्तिकिति (सू०) ॥ ५५ ॥ जमेर्जेमनमाहुः, जमनं जवनं वा, यद् दुर्गः— जवनं भोजनं क्वचित् । न्यदनं निघसः, नौणच (सू०) इत्यप्, घञपोश्च (सू०) इति घस्लादेशः । णे (नौणच) न्यादः । प्रत्यवसानमभ्यवहारश्च । सुहितस्य भावः सौहित्यम् । फलति विशीर्यते फेला, फेल्ट चलने- स्म द्वा ॥५६॥ काम्यते कामम् । पर्याप्तिः पर्याप्तम् । इष्यत इष्टम् । ईप्सितमनतिक्रम्य यथेप्सितम् । प्रायः क्रियाविशेषणान्येतानि अत एवाव्ययत्वे— एतेषां श्रीभोजो भ्रान्तः, यच्छाश्वतः— कामे निकामे कामा- ख्या । गाः पाति गोपः । गाः संख्याति गोसंख्यः । गा दोग्धि गोधुक् । आ—अभित ईरयति— आभीरः । वल्लयति गा बल्लवः, वल्लिः सौत्रो वा ॥ ५७ ॥ पादे बन्धनमस्य पादबन्धनम् । आदिशब्दात्खरादि । यादवं धनमित्येके पेठुः । गावः सन्त्यस्य गोमी, ज्योत्स्नातमिस्रेति (सू०) साधुः । व्रजन्त्यस्मिन्व्रजः- गोसंबन्धी समूहः, गोचरसंचरेति (सू०) साधुः । घनं च ॥ ५८ ॥ आशिता भोजिता गावो यत्राशितं- गवीनं, अषडक्षाशितंग्वि ति (सू०) स्वार्थे खः । आषितंगवीनमिति प्राच्यानां भ्रमः यच्चाख्यन्- गावो यत्रोषिताः पुरेति । उक्षति— उक्षा । भन्दते भद्रः । बलीन्वृदते बलीवर्दः । ऋषति गच्छति ऋषभः ॥ ५९ ॥ अनोवहत्यनड्वान् , अनसिवहेःक्विबनसोडश्च (उ०) । सुरभेरपत्यं सौरभेयः । गच्छति गौः । अवान्तरभेदोस्य न विवक्षितः । शङ्करशाङ्करौ वाडवेयः शाङ्करश्च । (औक्षकं) गोत्रोक्षोष्ट्रेति (सू०) वुञ् । संहतिरित्येव । (गव्या, गोत्रा) खलगोरथादिति (सू०) यः, इनित्रकट्यचश्चेति (सू०) त्रः । वत्सानां समूहो वात्सकं, गोत्रोक्षोष्ट्रेति (सू०) वुञ् । धेनूनां समूहो धैनुकम् , अचित्तहस्तिधेनोष्ठक् (सू०)॥६०॥ महांश्चासावुक्षा च महोक्षः, अचतुरविचतुरेति (सू०) साधुः । एवं वृद्धोक्षजातोक्षौ । माला- यां— महोक्षः स्यादुक्षतरे स्कान्धिकः स्कन्धवाहकः । षोडन् षड्दशनो वत्सः कूटो भग्नविषाणकः ॥ जरंश्चासौ गौश्च जरद्गवः, गोरतद्धितलुकि (सू०) इति टच् । तृणोत्पत्ति केवलं तर्णकः ॥ ६१ ॥ शकृत्करोति शकृत्करिः, स्तम्बशकृतोरिन् (सू०), व्रीहिवत्सयोरुपसंख्यानात् (वा०) । वसति वत्सः । दमार्हो दम्यः । वत्सत्वं तनुत्वमस्य वत्सतरः, वत्सोक्षाश्वर्षभेभ्यश्च (सू०) इति ष्टरच्, तनुत्वं द्वितीयवयः- प्राप्तिः । (आर्षभ्यः) अण्डकर्षणोचितः, षण्डतेत्येके, अत एव ऋषभस्य प्रतिकृतिरार्षभ्यः, ऋषभोपान-

शकृत्करिस्तु वत्सः स्याद्दम्यवत्सतरौ समौ ।
आर्षभ्यः षण्डतायोग्यः षण्डो गोपतिरिट्चरः ॥ ६२ ॥
स्कन्धप्रदेशस्तु वहः सास्ना तु गलकम्बलः ।
स्यान्नस्तितस्तु नस्योतः प(प्र)ष्ठवाड् युगपार्श्वगः ॥ ६३ ॥
युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः ।
खनन्ति तेन तद्वोढास्येदं हालिकसैरिकौ ॥ ६४ ॥
धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः ।
उभावेकधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥
स तु सर्वधुरीणो यो भवेत्सर्वधुरावहः ।
माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी ॥ ६६ ॥
अर्जुन्यघ्न्या रोहिणी स्यादुत्तमा गोषु नैचिकी ।
वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः ॥ ६७ ॥
द्विहायनी द्विवर्षा गौरेकाब्दा त्वेकहायनी ।
चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायणी ॥ ६८ ॥

छोर्थ्यः (सू०) । सन्यत उत्सृज्यते षण्डः । एषणमिट्, इषा चरति- इट्चरः स्वेच्छाचारी, इत्वर इत्येके पेठुः ॥ ६२ ॥ वहत्यनेनेति वहः, गोचरसंचरेति (सू०) साधुः । सस्ति स्वपितीव व्याप्रियमाणत्वात् सीयते वा सास्ना, षस स्वप्ने, षोऽन्तकर्मणि । नासाया नस्तः, नस्नासिकाया यत्तःक्षुद्रेष्विति (वा०) नस् । नस्तः क्रियते स्म नस्तितः, प्रातिपदिकाद्धात्वर्थे इति (ग०) णिजन्तान्निष्ठा, नासायां कृतच्छिद्रो गौरित्यर्थः । नासिकायां भव नस्यं नासाकृते रन्ध्रे रज्ज्वादिना- उत उत्तम्भितो नस्योतः । पञ्चमं षष्ठं वा वर्षं वहति पष्ठवाड् युवा गौः, वहश्च (सू०) इति ण्विः । युगस्य स्कन्धकाष्ठस्य पार्श्वं गच्छति युगपार्श्वगो हलवोढेत्यर्थः । दमनाय योजित इत्येवं लक्षणविचक्षणेनापि ग्रन्थकृता वहंलिहाद्या नोक्ताः ॥ ६३ ॥ (युग्य इ०) युगं प्रासङ्गं शकटं च वहति, तद्वहतिरथयुगप्रासङ्गं-(सू०) इति यत्, शकटादण् (सू०) । (हालिक इ०) हलेन खनति, तेनदीव्यतिखनतीति (सू०) ठक् । हलं वहति हलस्येदं वेति, हलसीराट्ठक् (सू०) ॥ ६४ ॥ (धुर्य इ०) धुरं वहति, धुरोयड्ढकौ (सू०), खः सर्वधुरादिति (सू०) योगविभागात्खः । धुरं धारयति धुरंधरः, कथंचित्संज्ञात्वात्खच् (संज्ञायां भृतृवृजीति), धूर्धरोऽन्यथा स्यात् । (एकधुरीण इ०) एकधुराल्लुक्च (सू०) इति खो लुक् च, लुक्पक्षे, ऋक्पूरब्धूरिति (सू०) अः समासान्तः ॥ ६५ ॥ (सर्वधुरीणः) खः सर्वधुरात् (सू०) । मह्यते पूज्यते मही, तस्या अपत्यं माहेयी । वसति क्षीरमस्यामुस्रा । शृङ्गिण्यादयः सामान्यान्यपि विशेषे वर्तन्ते ॥ ६६ ॥ अर्जुनीति शुक्लगवी । न हन्त्यघ्न्या, अघ्न्यादयश्च (उ०) इति साधुः । रोहिणी शबला । अनड्वाही गौरनडुही, प्रशस्ता गोमतल्लिका । सुरभिर्नानार्थे । नीचैश्चरति नैचिकी, ठक्, अव्ययानां भमात्रे टिलोपोत्र वाच्यः (वा०) । इतो गवां विकारः प्रागुक्तः । शबलीति, अन्यतो ङीष् (सू०) । धवला, अन्तोदात्तत्वानुदात्तत्वाभावाद् ङीष् नास्ति । आद्यादित्वाद्शीर्षच्छेदा मुण्डाद्याः, द्वितीयाक्रुद्धाकरिण्याद्याः ॥ ६७ ॥ द्वौ हायनौ वयःप्रमाणमस्याः इत्यार्हीयस्य ठञ- अध्यर्धपूर्वद्विगोरिति (सू०) लुक्, दामहायनान्ताच्च (सू०) इत्यत्र हायनाद् वयसि स्मृते (सू०) इति ङीप् । द्वे वर्षे प्रमाणमस्या द्विवर्षा (गौः), वर्षाल्लुक् च (सू०), चित्तवतिनित्यम् (सू०), अपरिमाणबिस्ताचितेति (सू०) ङीप्- नास्ति, कालसंख्या च न परिमाणमिति । त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यं (वा०) वयसि ॥ ६८ ॥ वाटिकमयते परं वशा । बध्नाति

वशा वन्ध्यावतोका तु स्रवद्गर्भाथ सन्धिनी ।
आक्रान्ता वृषभेणाथ वेहद्गर्भोपघातिनी ॥ ६९ ॥
काल्योपसर्या प्रजने प्रष्ठौही बालगर्भिणी ।
स्यादचण्डी तु सुकरा बहुसूतिः परेष्टुका ॥ ७० ॥
चिरसूता बष्कयिणी धेनुः स्यान्नवसूतिका ।
सुव्रता सुखसंदोह्या पीनोध्नी पीवरस्तनी ॥ ७१ ॥
द्रोणक्षीरा द्रोणदुघा धेनुष्या बन्धके स्थिता ।
समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥ ७२ ॥
ऊधस्तु क्लीबमापीनं समौ शिवककीलकौ ।
न पुंसि दाम संदानं पशुरज्जुस्तु दामनी ॥ ७३ ॥
वैशाखमन्थमन्थानमन्थानो मन्थदण्डके ।
कुट(ठ)रो दण्डविष्कम्भो मन्थनी गर्गरी समे ॥ ७४ ॥

असूतिं बन्ध्या बन्धनीया वा । अवस्तुनं तोकमपत्यमस्या अवतोका, अप(व)स्रवन्ती च, मृतवत्सा स्रवद्गर्भेति **माला** । संधानं संधा गर्भग्रहणमस्त्यस्याः संधिनी, अदुग्धा दोहकाले तु संधिनीति **कात्यः**, संधिन्य-कालदुग्धा गौर्वृषाक्रान्ता च संधिनीति **शाश्वतः** । विहन्ति गर्भं वेहत्, वेह प्रयत्नेस्म द्वा, वेहद्वृषोपग-तेति **भागुरिः** ॥ ६९ ॥ प्रजने गर्भग्रहणे (काल्या)प्राप्तकाला, वृषेणोपसरणीयोपसर्या, उपसर्याकाल्या-प्रजने (सू०) इति साधुः । प्रष्ठं वहति प्रष्ठौही, वहश्च (सू०) इति ण्विः, वाहइति (सू०) ङीष्, वाहऊठ् (सू), एत्येधत्यूठ्सु (सू०) इति वृद्धिः । प्रष्ठौही गर्भिणीति सर्वे, असिक्नी बालगर्भिणीति **भागुरिः**, पलिक्नी बालगर्भिणीति **माला** । अचण्डा— अकोपनेत्यर्थः, बाह्वादित्वात् (सू०) वा ङीप् । सुखेन क्रियते सुकरा, सुखाकरीत्यागमः । परमिच्छति परेष्टुका । सकृत्प्रसूता गृष्टिः ॥ ७० ॥ बष्कतेतिक्रामति बष्कयश्चिरकालः, औणादिकत्वात् (अयन्), सोस्त्यस्याः (बष्कयिणी), बष्कयणीति **सभ्याः** । धयत्येनां धेनुः । (सुव्रता) सुशीलेत्यर्थः । पीनमूधोस्याः पीनोध्नी, ऊधसोनङ् (सू०), बहुव्रीहेरूधसोङीष् (सू०)। पीवरस्तनी, स्वाङ्गाच्चोपसर्जनादिति (सू०) ङीष् ॥ ७१ ॥ द्रोणं दोग्धि द्रोणदुघा, दुहःकब्घश्च (सू०) । धेनुष्या) संज्ञायांधेनुष्येति (सू०) साधुः, आ ऋणशुद्धेर्या बन्धके स्थापिता पीतदुग्धाख्या । (समांसमीना) समांसमांविजायते (सू०) इति खः ॥ ७२ ॥ उनत्त्यूधः । आप्यायत आपीनं, प्यायःपी (सू०), सोपसर्गान्न (वा०), आङ्य(आङ्पूर्वस्या)न्धूधसोर्वक्तव्यात् (वा०), ओदित्वात् (ओदितश्चेति) निष्ठानत्वम् । हम्भा(म्बा)रावो गवां ध्वनिः । शिवात्कन्, शिनोति वा शिवकः । कील्यते बध्यतेस्मिन्कीलकः । दीयते रक्ष्यतेनेनेति संदानं बन्धनरज्जुः । (दामनी) नित्यंसंज्ञाछन्दसोः (सू०) इति ङीष् ॥ ७३ ॥ विशाखासु जातो वैशाखः, विशाखाषाढादण्मन्थदण्डयोः (सू०), विशाखस्यायं वा । मथ्यतेनेन मन्थः, पुंसिसंज्ञायांघःप्रायेण (सू०) । मथ्नाति मन्थानः, शानच् । (मन्थाः) मथिन्— शब्दस्य— इतोत्सर्वनामस्थाने (सू०), थोन्थः (सू०) । मन्थानार्थो दण्डो मन्थनदण्डः । खजकः क्षुब्धोपि । कुटति कुटरः, कुटको वा दण्डकटके वर्तते । दण्डं विष्क-म्नाति दण्डविष्कम्भः, यस्मिन्बध्द्वा दण्ड आकृष्यते । मञ्जीरोपि, दण्डकरोटकमित्येके । मथ्य-तेस्यां मन्थनी । गिरति दधिगर्गरी । कलशश्च ॥ ७४ ॥ उष्यते दह्यते मरौ— उष्ट्रः । क्रमानेल्यति क्रमेलकः । मीनात्यहीन्मयः, मयते गच्छति वा, मयेत इत्येके । दासेरको दीर्घ-जङ्घो ग्रीवो रवणधूम्रको । कं शिरो रभत कत्तम्भयति करभो बालोष्ट्रः । (शृङ्खलकः) शृङ्ख-

उष्ट्रे क्रमेलकमयमहाङ्गाः करभः शिशुः ।
करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः ॥ ७५ ॥
अजा छागी शुभ(स्तभ)छागवस्तच्छगलका अजे ।
मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके ॥ ७६ ॥
उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकम् ।
चक्रीवन्तस्तु बालेया रासभा गर्धभाः खराः ॥ ७७ ॥
वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् ।
पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः ॥ ७८ ॥
विक्रेता स्याद्विक्रयिकः क्रायकः क्रयिकः समौ ।
वाणिज्यं तु वणिज्या स्यान्मूल्यं वस्नोऽप्यवक्रयः ॥ ७९ ॥
नीवी परिपणो मूलधनं लाभोऽधिकं फलम् ।
परिदानं परीवर्तो नैमेयनिमयावपि ॥ ८० ॥

लमस्यबन्धनंकरभइति (सू०) कन् । विकारे नित्यंवृद्धशरादिभ्यः (सू०) इति मयटा दारुमयैरिति भवितुं युक्तम् ॥ ७५ ॥ अजति गच्छति व्यत्ययमशीलत्वादजा, अजाद्यतष्टाप् (सू०) । छयति रोगं छागी, जातेरस्त्रीविषयादयोपधात् (सू०) इति ङीष् । स्त्रीविषयप्रत्ययार्थं पृथक्पाठः । शोभते शुभः, शु(तु)भो निघण्टुषु । वस्ते वस्तः । छयति रोगांश्छागः, छगलश्च । छगोपि । मेहति मेढ्रः । उरु भ्राम्यति– उरभ्रः, उच्चै रभते वा, उः स्वरप्रतिरूपको निपातः । एवमुच्चै रणोस्येत्युरणः, उरण्यति देवताः प्रीणातीति **श्रीभोजः** कण्ड्वादिपाठात् । ऊर्णास्त्यस्योर्णायुः, ऊर्णाया युस् (सू०) । मेषति वाशते मेषः, पचाद्यच् (नन्दिग्रहीति) । वर्षति वृष्णिः । आ–ईड्यन्ते देवा अनेन-एडकः । हुडुश्च । अविर्नानार्थे ॥ ७६ ॥ (औष्ट्रकं, इ०) गोत्रोक्षोष्ट्रोरभ्रेतिवुञ् (सू०) । चक्रमस्त्यस्य तैलिकादिचक्रभ्रमणाच्च, आसन्दीवदष्ठीवच्चक्रीवदिति (सू०) साधुः । चक्रवालस्तु बालेय इति **माला** । बालेभ्यो हितो बालेयः, वाले व[च]लने भवो वा । रासते रासभः, रास शब्दे । गर्दति गर्दभः, गर्द शब्दे । खं शब्दं राति खरः, खमस्त्यस्य वा, (रप्रकरणे) खमुखकुञ्जेभ्योरः (वा०) । क्रूरोपि, शङ्कुकर्णोपि । षड्-द्वित्वयोः पशुभ्यः षड्गवमथ गोयुगं च परं, यथा मेषषड्गवं गोगोयुगम्, पशुनामभ्योद्वित्वेगोयुगच् (वा०), षट्त्वेषड्गवच् (वा०) । अविसोढमविमरीसं तथाविदूसं पयो मेष्याः, अवेर्दुग्धे-सोढदूसमरीसचोवक्तव्याः (वा०) ॥ ७७ ॥ विदेहे– उपचये भवो वैदेहकः । सार्थान्सधनान्सरतो वा पान्थान्वहति सार्थवाहः । निगमे– आपणे भवो नैगमः । पणते वणिक् । वणिगेव वाणिजः, प्रज्ञादित्वा-त्स्वार्थेऽण् (सू०) । आपणः प्रयोजनमस्त्यस्यापणिकः । क्रयविक्रयाभ्यां जीवति क्रयविक्रयिकः, वस्नक्र-यविक्रयाट्ठन् (सू०) इति संघातविगृहीताट्ठन् ॥ ७८ ॥ विक्रीणीते भाण्डेन मूल्यं गृह्णाति विक्रेता । क्रीणाति मूल्येन भाण्डं क्रायकः । क्रयेण जीवति क्रयिकः । वणिजो भावो वाणिज्यं, ब्राह्मणादित्वात्ष्यञ् (गुणवचनंब्राह्मणादिभ्यः कर्मणिच) । (वणिज्या) दूतवणिग्भ्यांचेतिवक्तव्याद्यच्च (वा०) । मूले-नानाम्यं मूल्यं, नौवयोधर्मेति (सू०) यत् । वसत्यास्मिन्पण्यं वस्नः । अवक्रीयतेनेनावक्रयः ॥ ७९ ॥ नीवीव परहस्तेर्प्यमाणत्वात् । परिपण्यते वृद्धर्थं प्रयुज्यते परिपणः । मूलं लाभकारणम् । मूलधनादधिकं निष्पन्नं स लाभः फलं च । कलान्तरादि । परिवर्ताद्दानं परिदानम् । निमेये परिवर्तनीये भवो नैमेयः । निमानं निमयः, मेङ् प्रणिदाने ॥ ८० ॥ उपसृत्य समीपं निधीयते गुप्तं स्थाप्यते– उपनिधिः, उप-

पुमानुपनिधिर्न्यासः प्रतिदानं तदर्पणम् ।
क्रये प्रसारितं क्रय्यं क्रेयं क्रेतव्यमात्रके ॥ ८१ ॥
विक्रेयं पणितव्यं च पण्यं क्रय्यादयस्त्रिषु ।
क्लीबे सत्यापनं सत्यंकारः सत्याकृतिः स्त्रियाम् ॥ ८२ ॥
विपणो विक्रयः संख्याः संख्येये ह्यादश त्रिषु ।
विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ॥ ८३ ॥
संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः ।
पङ्क्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम् ॥ ८४ ॥
पौ(यौ)तवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ।
मानं तुलाङ्गुलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः ॥ ८५ ॥

समीपे निधेर्वा । न्यस्यते निक्षिप्यते न्यासः । निक्षेपोपि । स्मार्ते(याज्ञव०)स्त्वेषां भेदोस्ति— वासनस्थमनाख्याय हस्तेन्यस्य यदर्पितम् । द्रव्यमुपनिधिर्न्यासः प्रकाश्य स्थापितं तु यत् ॥ निक्षेपः शिल्पिहस्ते तु भाण्डं संस्कर्तुमर्पितम् ॥ तस्य न्यासस्य निक्षेप्त्रे प्रतीपं दानं प्रतिदानं, परिदानमित्येके । प्रत्यक्षादाने स्वीकारोवक्रयः [वक्तव्यः] क्रुसकं च तत् । क्रयनिमित्तमापणे न्यस्तं (क्रय्यं), क्रय्यस्तदर्थ इति (सू०) साधुः । (क्रेयं) यथा क्रेयो गौर्वर्तते न च क्रय्योस्ति ॥ ८१ ॥ (पण्यं) अवद्यपण्यवर्येति (सू०) साधुः । (त्रिषु) वाच्यलिङ्गा इत्यर्थः । अवश्यं मयैतद्विक्रेयामीति सत्यस्य करणं सत्यापनं, सत्यापपाशरूपेति (सू०) णिच्, अर्थवेदसत्यानामापुक् (वक्तव्यः) (वा०) । (सत्यंकारः) कारेसत्यागदस्येति (सू०) मुम् । (सत्याकृतिः) सत्यादशपथ इति (सू०) डाच् ॥ ८२ ॥ विपणनं विपणः, चुराद्यदन्तादच् (नन्दिग्रहीति), अन्यतो विपाणः स्यात् । एकाद्या दशान्ताः संख्याः संख्येयेषु वर्तमानास्त्रिलिङ्गाः, एका शाटी, एकः पटः, एकं कुण्डं, दश स्त्रियः, दश पटाः, दश कुण्डानि । आदशेत्यष्टादशान्ताः । विंशत्याद्याः सर्वा एव संख्याः संख्येये संख्यायां च नित्यमेकवचनान्ता एव वर्तन्ते, यद् भाष्यम्— आदशभ्यः संख्या संख्येये वर्तते, ऊर्ध्वं संख्याने संख्येये च, विंशतिः पटाः, विंशतिः पटानां, शतं गावः, शतं गवाम् । [अत्र विंशतिशब्देनैकान्नविंशतिशब्दोपि ज्ञेयः] ॥ ८३ ॥ संख्यामात्रार्थे वर्तमानाया विंशत्यादेः संख्याया द्विवचनबहुवचने अपि स्तः [भवतः] एकशेषात्, द्वे विंशती, तिस्रो विंशतयः, गवां विंशती, गवां विंशतयः । विंशत्याद्या नवत्यन्ताः स्त्रीलिङ्गाः । द्वौ(द्वे) पञ्चतौ पङ्क्तिर्दशाख्या, पङ्क्तिविंशतित्रिंशदिति (सू०) साधुः । दश पङ्क्तयः शतम् । दश शतानि सहस्रम् । दश सहस्राण्ययुतम् । इत्थं परार्धान्तान्यष्टादश गणितस्थानानि, यदाहुः— एकदशशतसहस्राण्ययुतं प्रयुताख्यलक्षमथ नियुतम् । अर्बुदकोटिन्यर्बुदपद्मं खर्वं निखर्वमिति दशभिः ॥ गुणनान्महाब्जशङ्कू समुद्रमध्यान्तमथ परार्धं च । स्वहतं परार्धममितं तत्स्वहतं पूर्यते संख्येति । प्रयुतसंज्ञं लक्षमर्बुदसंज्ञा कोटिरित्यर्थः ॥ ८४ ॥ पुनाति पोतुः— मानभाण्डशोधकः पौतवाध्यक्षः, तस्येदं पौतवम् । द्रोर्विकारो द्रुवयं, द्रोश्च (सू०), मानेवयः (सू०) । माति पाय्यं, पाय्यसान्नाय्येति (सू०) साधुः । मीयतेनेनेति मानम् । पौतवं तुलादि, द्रुवयं प्रस्थादि, पाय्यं हस्तादीति गौडो भ्रान्तः । मितिर्मानं मीयतेनेन च । तत्र तुलायुन्मानं, अङ्गुल्यादि प्रमाणं, प्रस्थादि परिमाणं, यदाहुः— ऊर्ध्वं मानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात्संख्या भिन्ना तु सर्वतः ॥ गुञ्जा रक्तिकाः । आद्यो मुख्यः । धान्यकणा दश माषकः । तथा द्वे कृष्णले रूप्यमाष इत्यपि दर्शनात् । अस्मिन्काले— भद— इत्येके, यदाहुः— माषकं सप्त कृष्णलः ॥ ८५ ॥ अक्ष्णोत्यक्षः । कर्षति कर्षः । (पलं) पल रक्षायाम् । सुवर्णमस्त्यस्य सुवर्णः, अर्शआदित्वा-

ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम् ।
सुवर्णविस्तौ हेम्नोऽक्षे कुरुविस्तस्तु तत्पले ॥ ८६ ॥
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः ।
आचितो दश भाराः स्युः शाकटो भार आचितः ॥ ८७ ॥
कार्षापणः कार्षिकः स्यात्कार्षिके ताम्रिके पणः ।
अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः ॥ ८८ ॥
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ।
अंशस्तुरीयः पादः स्यादंशभागौ च वण्टकः ॥ ८९ ॥
द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ॥ ९० ॥
स्यात्कोश(ष)श्च हिरण्यं च हेमरूप्ये कृताकृते ।
ताभ्यां यदन्यत्तत्कुप्यं रूप्यं तद् द्वयमाहतम् ॥ ९१ ॥

दच् (सू०) । विस्यते विस्तः, विस उत्सर्गे । अक्षे षोडशमाषके माने द्वौ वर्तेते, यत्स्मृतिः– पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश । कुरुदेशे प्रसिद्धो विस्तो हेमपलम्, यन्माला– पलेन हि सुवर्णस्य कुरुविस्तः ॥ ८६ ॥ तोल्यते तुला, चिन्तिपूजीति (सू०) चकारादङ्, ङित्करणसामर्थ्याद् गुणाभावः । भ्रियते भारः, पुंसा हि द्वे पलसहस्रे वोढुं शक्येते । आचीयत आचितः स च शकटेन वोढुं शक्यः । अन्ये तु विंशतिः पलसहस्राण्याचितमाहुः । शाकटभारस्तु नोतिरिक्तो वाप्याचित एव । अत एव शाकटाख्योप्याचित इति पुनराचितशब्देन द्योत्यते ॥ ८७ ॥ कर्षसंबन्धिना पण्यते व्यवह्रियतेनेन रूप्यरूपकेण कार्षापणः । कर्षः प्रमाणमस्य कार्षिकः । ताम्रमयं कर्षप्रमाणं तु रूप्यं पणः । तन्मूल्यं चोपचारादशीतिः श्वेतकाः । पृथगित्येषामपर्यायत्वम् । परिमाणविशेषा एते, यदाहुः– पलं प्रकुञ्चकं मुष्टिः कुडवस्तच्चतुष्टयम् । चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढकम् ॥ अष्टाढको भवेद् द्रोणो द्विद्रोणः शूर्प उच्यते । सार्धशूर्पो भवेत्खारी द्विशूर्पी गोण्युदाहृता ॥ तामेव भारं जानीयाद्वाहो भारचतुष्टयम् । शुष्कमेये त्विदं मानं द्विगुणं तद् द्रवेषु तु ॥ तत्र देशभेदात्संख्यान्यथात्वं, तथा क्वचिच्चतुराढको भवेद् द्रोणः, षोडशद्रोणा खारी, विंशतिद्रोणः कुम्भः, दशकुम्भो वाहः ॥ ८८ ॥ रूपकादेश्चतुर्थोंशः पादः, पदरुजेति (सू०) कर्तरि घञ् । अंश्यतेंशः । भज्यते भागः । वण्ट्यते विभज्यते वण्टः ॥ ८९ ॥ (द्रव्यं) द्रव्यंचभव्य इति (सू०) साधुः । विन्द(द्य)ते तद्वित्तं, वित्तोभोगप्रत्ययोरिति (सू०) साधुः । स्वपतौ साधु स्वापतेयं, पथ्यतिथिवसतिस्वपतेर्ढञ् (सू०) । ऋच्यते स्तूयते ऋक्थम् । रिच वियोजनेस्माद्वा- (दृ), रिच्यते विभज्यते रिक्थम् । दधन्ति धनम् । वस्ते छादयति वसु, वसतीश्वरगृहे वा वसु । ह्रियते हिरण्यम् । द्रवति द्रविणम् । द्यूयते द्युम्नं, द्यु अभिगमने । अर्थ्यतेर्थः । रात्येनं राः, स्त्रीत्येके । विभवति विभवः ॥ ९० ॥ कूयते शब्द्यते कोशः, कुष्यते आकुष्यत आयस्थानेभ्यः कोष इत्येके । हेम कृताकृतं घटिताघटितं, रूप्यं चैवम् । हेमरूप्याभ्यामन्यत्तैजसं कुप्यं, राजसूयसूर्यमृषोद्यरुच्यकुप्येति (सू०) साधुः । आहन्यत आहतम् । रूप्यं, रूपादाहतप्रशंसयोर्यप् (सू०) । तद् द्वयं कुप्याकुप्यम् ॥ ९१ ॥ गरुत्मत इदं जातं विषं हन्तुं गारुत्मतम् । मरकं तरन्त्यनेन मरकतम् । अश्मगर्भेऽश्मयोनिः ।

गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ।
शोणरत्नं लोहितकः पद्मरागोऽथ मौक्तिकम् ॥ ९२ ॥
मुक्ताथ विद्रुमः पुंसि प्रवालं पुंनपुंसकम् ।
रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ॥ ९३ ॥
स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयं शातकौम्भं गाङ्गेयं भर्म कर्वुरम् ॥ ९४ ॥
चामीकरं जातरूपं महारजतकाञ्चने ।
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ॥ ९५ ॥
अलंकारसुवर्णं यच्छृङ्गीकनकमित्यदः ।
दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ॥ ९६ ॥
रीतिः स्त्रियामारकूटो न स्त्रियामथ ताम्रकम् ।
शुल्वं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुम्बराणि च ॥ ९७ ॥
लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ।
अश्मसारोऽथ मण्डूरं सिंहान(शिंघाण)मपि तन्मले ॥ ९८ ॥

हरिन्नीलवर्णो मणिः । शोणं च तद्रत्नं च । लोहित एव लोहितकः, लोहितान्मणौ (सू०) इति कन् । मुच्यते शुक्तिभिर्मुक्ता । (मौक्तिकं) विनयादित्वात् (सू०) स्वार्थे ठक् ॥ ९२ ॥ विशिष्टो द्रुमो विद्रुमः, विद्रवत्यब्धौ वा । प्रवलते प्लु(प्र)वते वा– अब्धेरूर्ध्वं प्रवालम् । सूर्यकान्तस्त्वग्निमाणिर्वैडू(दू)र्यं बालवायजम् । रमन्तेऽस्मिन् रत्नम् । मण्यते शब्द्यते मणिः पुंस्त्रीलिङ्गः । अश्मजातीयं मरकतेन्द्रनीलादि । आदिशब्दाद्विद्रुमादि, वज्रपद्मरागादि वा पार्थिवमाण्डत्वात् ॥ ९३ ॥ शोभनो वर्णोऽस्य स्वर्णं, समासे वर्णस्य वा वलोपमाहुः– यथा पञ्चार्णो मन्त्रः । कनति कनकं, कनी दीप्तिकान्तिगतिषु । हिनोति हेम । हटति हाटकं, हट दीप्तौ । तपति तपनीयम् । शतकुम्भे गिरौ भवं शातकौम्भं, अनुशतिकादित्वात् (सू०) उभयपदवृद्धिः, शातकुम्भमित्येके । गङ्गाया अपत्यं गाङ्गेयम् । भ्रियते धार्यते भर्म । कर्वति लोकमध्ये दृप्यति कर्वुरं, नानारूपं वा ॥ ९४ ॥ चमीकरकृतस्वराबाकरौ, तत्रभवइति (सू०) अण् । जातरूपमकृतकरूपं, भोट्टदेशजम् । महच्च तद्रजतं रञ्जकं (महारजतं) । कञ्चति(ते) काञ्चनं, कचि दीप्तौ । रोचते रुक्मम् । जम्बूद्वीपे जम्बूफलरसोत्थनद्यां जातं जाम्बूनदम् । अष्टसु लोहेषु पदं प्रतिष्ठाऽस्याष्टापदं, अष्टनःसंज्ञायां (सू०) इति दीर्घः । कल्याणमर्जुनं कलधौतं गैरिकं [भूरि]चन्द्रं वसु च ॥ ९५ ॥ शृङ्ग्यलंकारमकरिका, तदर्थं कनकम् । दुर्वर्णं स्वर्णापेक्षया । रज्यते हेम्ना रजतम् । रुप्यति रूप्यं(रुप्यं), रुप लुप विमोहने । खर्जति खर्जूरं, कर्ज खर्ज व्यथने । इति शब्दात्सितादि । अपिशब्दात्तारं कलधौतं च ॥ ९६ ॥ रीयते स्रवति रीतिः, इयर्ति– आरस्तस्य कूटं पित्तलाख्यम् । आरोपि, कपिलोहं च । ब्राह्मी पिङ्गा ब्रह्मरीतिः कांस्यं घोषो द्विलोहकम् । ताम्यति ताम्रम् । शवति द्रवति शुल्वम् । म्लेच्छदेशो मुखमुत्पत्तिरस्य । द्वे हेमरूप्ये अश्नुते द्व्यष्टम् । अतिशयेन वरं वरिष्ठम् । कालिकानिवृत्तौ स्वर्णं हि तत्, अत एवोदुम्बरं, उद्गताम्बरमिति नैरुक्ताः । औदुम्बरमित्येके । रक्तधातुकं च । सौराष्ट्रकं पञ्चलोहे वर्तलोहे तु वर्तकम् ॥ ९७ ॥ लुनाति लोहम्, लुह कथनादौ वा । शस्यतेऽनेन शस्त्रं, शसु हिंसायाम् । तेज्यते तेजयति वा तीक्ष्णं, शस्त्रान्तरच्छेदकत्वाद्विकृतकाठिन्यं तत्, तिज निशाने । पिण्ड्यते पिण्डम् । कालं च तदयश्च कालायसम्, अनोश्मायःसरसामिति (सू०) टच् । अयते भेद्यमयः । अश्मनः सारोऽश्मसारः, यत्स्मृतिः– अश्मभ्यो लोहमुत्थितम् । पारशवं घनं च । मण्डते मण्डूरम् । हिनस्ति सिंहानं ध्मायमानस्यायसो मलः ॥ ९८ ॥ तेजसो विकारस्तैजसं हेमाद्यपि लोहं, यदाहुः–

सर्वं च तैजसं लोहं विकारस्त्वयसः कुशी ।
क्षारः काचोथ चपलो रसः सूतश्च पारते(दे) ॥ ९९ ॥
गवलं माहिषं शृङ्गमभ्रकं गिरिजामले ।
स्रोतोञ्जनं तु सौवीरं कापोताञ्जनयामुने ॥ १०० ॥
तुत्थाञ्जनं शिखिग्रीवं वितुन्नकमयूरके ।
कर्परी दार्विकाक्काथोद्भवं तुत्थरसाञ्जनम् ॥ १०१ ॥
रसगर्भं तार्क्ष्यशैलं गन्धाश्मनि तु गन्धिकः ।
सौगन्धिकश्च चक्षुष्याकुलाल्यौ तु कुलत्थिका ॥ १०२ ॥
रीतिपुष्पं पुष्पके तु पौष्पकं कुसुमाञ्जनम् ।
पिञ्जरं पीतनं तालमालं च हरितालके ॥ १०३ ॥
गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु ।
बोलगन्धरसप्राणपिण्डगोप(स)रसाः समाः ॥ १०४ ॥

सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु । सीसं च वीमरं (कालायसं) चैव ह्यष्टौ लोहानि चक्षते ॥ शस्त्रं तु विशेषाल्लोहम् । कुत्सितं श्यति कुशी फालः, यच्छाश्वतः– कुशो दर्भः कुशी फालः, जानपदकुण्डेति (सू०) अयोविकारे कुशाद् ङीष् । क्षरति गलति क्षारः । कचाति(ते) काचः । चपलोऽस्थैर्यात् । रस्यते रसायनार्थिभी रसः । सूते हेमायुषी सूतः, शिवात्प्रसूतो वा । पिपर्ति पारतः, पारं तनोति वा ॥ ९९ ॥ गा अलति वारयत्यनेन गवलं, गवते वा । अभ्रप्रतिकृतिरभ्रकम् । गिरिजं च तदमलं च गिरिजामलं, गौर्या मलमिति **धातुविदः** । अज्यतेनेनाक्षि– अञ्जनं, यमुनास्रोतसो जातम् । सुवीरदेशे भवं सौवीरम् । कपोतवर्णं कापोताञ्जनम् । **धन्वन्तरिस्तु**– अञ्जनं मेचकं कृष्णं सौवीरं स्यात्सुवीरजम् । कापोतं यामुनं तच्च स्रोतोञ्जनमुदाहृतम् ॥ १०० ॥ तुदत्यक्षिरोगं तुत्थम् । शिखिग्रीवं मयूरग्रीवाभम् । वितुदति रोगान् वितुन्नकम् । मयूरप्रतिकृतिर्मयूरकम् । कल्पते रोगाञ्जेतुं कर्परी । दारुहरिद्राक्काथोत्थं, तुत्थं च तद्रसाञ्जनं च तुत्थरसाञ्जनम् ॥ १०१ ॥ दार्वीरसस्य गर्भो रसगर्भम् । तार्क्ष्यशैले कुलूतायां भवं (तार्क्ष्यशैलं) । रसजातं रसाग्र्यं च । गन्धोस्यास्तीति गन्धिको गन्धपाषाणः, रसग्रन्थे गन्धकोयम् ॥ चक्षुषे हिता चक्षुष्या दृक्प्रसादाख्या । कुलमलति कुलाली । कुले तिष्ठति कुलत्था, कुलत्थप्रतिकृतिर्वा, लोकोक्तौ ताड[तर्क्ष]काख्या, आह च– कुलाली लोचनहिता दृक्प्रसादा कुलत्थिका ॥ १०२ ॥ रीतेर्ध्मायमानस्य पुष्पाभं मलं रीतिपुष्पम् । पुष्पप्रतिकृतिः पुष्पकं, पक्षे स्वार्थेऽण् । पिजि हिंसादौ, पिज्यते पिञ्जरम् । पीयते पीतनं, पीतं वर्णं नयति वा । आलाति शोभामालं, अलति भूषयति वा । हरेः पीतवर्णस्य तालः प्रतिष्ठाऽस्मिन् हरितालं, हरितमलति भूषयति वा । तालं च भीमवत्, यद्धन्वन्तरिः– हरितालं च गोदन्तं पीतकं नटमण्डनम् । आलं च तालं गौरं च पिञ्जरं विस्रगन्धिकम् ॥ १०३ ॥ गिरेरिदं गैरेयम् । अर्थ्यते रसायनार्थिभिरर्थ्यम् । शिलातः स्रवज्जत्वाकृति शिलाजतु । बोल्यते बोलः, बुल निमज्जने । गन्धप्रधानो रसोस्य गन्धरसः, [रसगन्धोपि] । प्राणित्यनेन प्राणः । पिण्ड्यते द्रव्यान्तरैः पिण्डः, पिण्डसहत्वात् । पिष्ट इत्येके । गां पाति रसोस्य गोपरसः, गोपो रसोपि भीमवत् ॥ १०४ ॥ डिण्डीति शब्दमीरयति डिण्डीरः, दादिर्वा डि(दि)ण्डिमवत् । अब्धेः कफ इवा–

डि(हि)ण्डीरोऽब्धिकफः फेनः सिन्दूरं नागसंभवम् ।
नागसीसकयोगेष्टवप्राणि त्रपु पिच्चटम् ॥ १०५ ॥
रङ्गवङ्गे अथ पिचुस्तूलोऽथ कमलोत्तरम् ।
स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि ॥ १०६ ॥
मेषकम्बल ऊर्णायुः शशोर्णं शशलोमनि ।
मधु क्षौद्रं माक्षिकादि मधूच्छिष्टं तु सिक्थकम् ॥ १०७ ॥
मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटी गोला यवक्षारो यवाग्रजः ॥ १०८ ॥
पाक्योऽथ स्वर्जिकाक्षारः कापोतः सुखवर्चकः ।
सौवर्चलं स्याद्रुचकं त्वक्क्षीरी वंशरोचना ॥ १०९ ॥

धिक्येन बहिःप्रसारादब्धिकफः सागरमलाख्यः, नद्यादौ तूपचारात् । स्फायते फेनः । सिनोति बध्नाति चेतः स्यन्दते वा सिन्दूरम् । नागात्सीसात्संभवोऽस्य नागसंभवम् । चीनपिष्टं गान्धारपिष्टो[पङ्को]पि । **धन्वन्तरिस्तु**– सिन्दूरं रक्तरेणुश्च रागरक्तं च नागजम् । शृङ्गारभूषणं श्रीमद्वसन्तोत्सवमण्डनम् ॥ हंसपादो हिङ्गुलके– । न न गच्छति चलत्वान्नागम् । सिनोति बध्नाति पारतं सीसं सीसपत्त्रं च । हेम्नो वर्णोत्कर्षार्थं योगे श्लेषे– इष्टं (योगेष्टम्) । उप्यते वप्रं वर्णोत्कर्षे बीजत्वात् । त्रपत इवाग्नेराशु द्रवते(ति) त्रपु । पिच्चयते कुट्यते पिच्चटम् ॥ १०५ ॥ रज्यतेऽनेन रङ्गम् । वङ्गति वङ्गम् । आलीनमपि । पञ्च्यते सूत्रमस्य पिचुः पिचयति वा, पिचि गतौ । तूल्यते फलात्तूलः, तूल निष्कर्षे, निर्बीजः कार्पासोयम् । रङ्गवङ्गेथ पिचुल इति प्रगह्यसंज्ञाविस्मृतेः पाठः । कमलेभ्य उत्तरं वर्णाधिक्यात्कमलोत्तरम् । कुस्यति कुसुम्भं, कुस श्लेषणे, कौ सुम्भ्यत निकुम्भ्यत वा, सुम्भिः सौत्रः । वह्नेरिव शिखास्य वह्निशिखम् । महच्च तद्रजनं च, रज्यतेऽनेनेति रजनं, रजकरजनरजःसूपसंख्यानात् (वा०) नलोपः ॥१०६॥ काम्यते शीतार्तैः कम्बलः, कम्बलः कमनीयो भवतीति **निरुक्तम्** । ऊर्णास्यास्ति– ऊर्णायुः । शशस्योर्णा शशोर्णं, गृहस्थूणवत्क्लीबे । मन्यतेऽभिलष्यते मधु पुष्परसाख्यम् । क्षुद्राभिर्मक्षिकाभिश्च कृतं (क्षौद्रं माक्षिकं च), क्षुद्राभ्रमरेति (सू०) अञ् । सारघं च । आदिशब्दात्पौत्तिकभ्रामरादि । अगणितावान्तरभेदा गजनिर्मालिकयैते, यन्निमिः– माक्षिकं तैलवर्णं स्याद् घृतवर्णं तु पौत्तिकम् । विज्ञेयं भ्रामरं श्वेतं क्षौद्रं तु कपिलं मतम् । मधुनोच्छिष्यते त्यज्यते मधूच्छिष्टम् । सिञ्चति सिक्थकम् ॥ १०७ ॥ मनोवाच्या शिला मनःशिला । मनःशब्देन हूयते मनोह्वा । नागजिह्वानतिकृतिर्नागजिह्विका । शिला च । नेपालदेशे भवा मनःशिला नैपाली द्विसंज्ञा, अभेदान्नेपाली पाली वा । कौ नटति कुनटी । गां लाति गोला, गुडति वा । सप्तैकार्था इत्येके । दग्ध्वा यवाङ्कुराज्जन्यते यवक्षारः ॥ १०८ ॥ पचनीयः पाक्यः । स्वर्जिका दग्ध्वा क्षार्यते स्वर्जिकाक्षारः । कापोतः कपोतवर्णः, कपोतस्यायमिति वा, ईषत्पूयते वा । (सुखवर्चकः) वर्च दीप्तौ । सुवर्चलाख्याकरादेयेदं सौवर्चलम् । रुच्यते दीप्यते जाठराग्निरनेन रुचकं, क्षारप्रसङ्गात्पुनरुक्तम् । एवं ग्रन्थिकपत्राङ्गादि । त्वचो वंशात्क्षीरमस्यास्त्वक्क्षीरी, त्वक्क्षीरं च । वंशोत्था रोचना वंशरोचना, आह च (**शाश्वतः**)– स्याद्वंशरोचना वांशी तुकाक्षीरी तुका शुभा । त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी तु वैणवी ॥ १०९ ॥ शिनोति तैक्ष्ण्याच्छिग्रुः, (तस्माज्जातं) शौभा-

शिग्रुजं श्वेतमरिचं मोरटं मूलमैक्षवम् ।
ग्रन्थिकं पिप्पलीमूलं चटकाशिर इत्यपि ॥ ११० ॥
गोलोमी भूतकेशो ना पत्त्राङ्गं रक्तचन्दनम् ।
त्रिकटु त्र्यूषणं व्योषं त्रिफला तु फलत्रिकम् ॥ १११ ॥

इति वैश्यवर्गः । ९ ।

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः ।
आचाण्डालात्तु संकीर्णा अम्बष्ठकरणादयः ॥ १ ॥
शूद्राविशोस्तु करणोम्बष्ठो वैश्याद्विजन्मनोः ।
शूद्राक्षत्रिययोरुग्रो मागधः क्षत्रियाविशोः ॥ २ ॥
माहिष्योर्याक्षत्रिययोः क्षत्तार्याशूद्रयोः सुतः ।
ब्राह्मण्यां क्षत्रियात्सूतस्तस्यां वैदेहको विशः ॥ ३ ॥
रथकारस्तु माहिष्यात्करण्यां यस्य संभवः ।
स्याच्चाण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः ॥ ४ ॥

रञ्जनबीजम् । मुरति मोरटं, मुर संवेष्टने । ग्रन्थिप्रतिकृतिर्ग्रन्थिकम् । चटकाशिरोरूपत्वाच्चटकाशिरः ॥११०॥ गोरिव लोमान्यस्या गोलोमी । भूताः केशा अस्य भूतकेशः, भूतस्येव केशा अस्य वा । ना पुमान् । पत्त्राण्यङ्क्ते(गे) पत्त्राङ्गम् । त्रीणि कटून्यूषणानि च शुण्ठीपिप्पलीमरीचानि समाहृतानि (त्रिकटु, त्र्यूषणम्) । विशेषेणोषति दहाति व्योषम् । कटुतिक्तं च । त्रयाणां फलानां हरीतक्यामलक-बिभीतकानां समाहारास्त्रिफला, अजाद्यतष्टाप् (सू०) । वरा च ॥१११॥ इति वैश्यवर्गः । ९ ।

शु पूजितं कृत्वोन्दन्ति सूरीन् क्लेदयन्ति शूद्राः, शीयन्ते वा । वृषान्– लुनन्ति वृषलाः, **नारदस्तु** –वृषो हि भगवान्धर्मस्तस्य यः कुरुते लवम् । वृषलं तं विजानीयात्– । जघन्याज्जाता जघन्यजाः यच्छ्रुतिः– पद्भ्यां शूद्रो अजायत । पद्याः पज्जाश्च । चाण्डालो ब्राह्मण्यां शूद्राज्जातोत्र । संकीर्णाः प्रतिलोमानुलोमजत्वान्मिश्राः, यत्स्मृतिः (**याज्ञव०**)– विप्रान्मूर्धावसिक्तस्तु क्षत्रियायां विशः स्त्रियाम् । जातोम्बष्ठस्तु शूद्रायां निषादः पार्शवोपि वा ॥ माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात् । शूद्रायां करणो वैश्याद्विन्नास्वेष विधिः स्मृतः ॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकः स्मृतः । शूद्राज्जातस्तु चाण्डालः सर्वधर्मबहिष्कृतः ॥ क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च । शूद्रादायोगवं वैश्या जनयामास वै सुतम् ॥ माहिष्येण करण्यां तु रथकारः प्रजायते । असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः ॥ १ ॥ सिंहावलोकितन्यायेन सुत इत्येव । शूद्रायां वैश्याज्जातः, करोति प्रेष्यकर्माणीति करणः, ल्युट् । एवं सर्वत्राध्याहारानुषङ्गादि । अम्बायां तिष्ठत्यम्बष्ठः, अम्बाम्बगोभूमीति (सू०) षत्वम्, ह्रस्वो निर्देशात् । द्विजन्मात्र विप्रः । वैश्येति, यञश्च (सू०) इति ङीप्– नास्त लक्ष्यात् । शूद्राचामहत्पूर्वेति (ग०) अजादित्वाट्टाप् । उच्यत्युग्रः, उच समवाये । मगध्यति स्तौति मागधः ॥ २ ॥ महिष्यां साधुर्माहिष्यः, स हि– अन्तःपुररक्षितेति **स्मार्ताः** । अर्या वैश्या । क्षदति द्वाःस्थत्वात्क्षत्ता तृन्तृचौशंसिक्षदादिभ्यः (उ०) इत्यनिट् तृच्, क्षदस्त्वौणादिको धातुः क्षदादिपाठात् । सुवति प्रेरयत्यश्वान् सूतः । ब्राह्मण्यां वैश्याज्जातो [वैदेहको] वणिक्कर्मा ॥ ३ ॥ माहिष्याद्वैश्याक्षात्रेयजातात् करण्यां शूद्रावैश्यजातायां सूनो रथकारस्त्वष्टा । चण्डमुग्रं कर्मालति पर्याप्नोति चण्डालः ॥ ४ ॥ करोति कारुः, कृवापाजीति (उ०)

कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः ।
कुलकः स्यात्कुलश्रेष्ठी मालाकारस्तु मालिकः ॥ ५ ॥
कुम्भकारः कुलालः स्यात्पलगण्डस्तु लेपकः ।
तन्त्र(न्तु)वायः कुविन्दः स्यात्तुन्नवायस्तु सौचिकः ॥ ६ ॥
रङ्गाजीवश्चित्रकरः शस्त्रमार्जोसिधावकः ।
पादूकृच्चर्मकारः स्याद् व्योकारो लोहकारकः ॥ ७ ॥
नाडिंधमः स्वर्णकारः कलादो रुक्मकारके ।
स्याच्छाङ्खिकः काम्बविकः शौल्बिकस्ताम्रकुट्टकः ॥ ८ ॥
तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट् ।
ग्रामाधीनो ग्रामतक्षः कौटतक्षोनधीनकः ॥ ९ ॥
क्षुरिमुण्डिदिवाकीर्तिनापितान्तावसायिनः ।
निर्णेजकः स्याद्रजकः शौण्डिको मण्डहारकः ॥ १० ॥
जावालः स्यादजाजीवो देवाजीवी तु देवलः ।
स्यान्माया शाम्बरी मायाकारस्तु प्रातिहारिकः ॥ ११ ॥

उण् । शिल्पं कलास्त्यस्य शिल्पी । समानजातीयकारुसंघः, श्रीयत इति श्रेणिर्द्विलिङ्गः । कु [illegible] ति कुलकः, कुलिक इत्यन्ये, श्रेण्यादौ श्रेष्ठार्थः । कुले वणिग्वृन्दे श्रेष्ठत्वमस्त्यस्य कुलश्रेष्ठी । ([illegible]) तदस्यपण्यमिति (सू०) ठक् ॥ ५ ॥ कुलानि गृहाण्यलति कुलालः, कुं मृदं लाडयति मृद्न [illegible] वा । पलेन मांसेनेव मृदादिना गण्डति संहन्ति पलगण्डो लेप्यकृत् । तन्त्रं तन्त्वातानं वयति तन्त्रवायः ह्वावाम-श्चेत्यण् (सू०) । कुं विन्दति कुविन्दः । तुन्नं विद्धं वयति तुन्नवायः । सूचिवानं शिल्पमस्य सौचिकः ॥ ६ ॥ रङ्गान् रक्तपीतान्याजीवति रङ्गाजीवः । चित्रंकरोति चित्रकरः, दिवाविभेत्यादिना (सू०) टः । शस्त्रं मार्ष्टि तेजयति शस्त्रमार्जः । असीन्धावति शोधयति–असिधावकः । पादूः पादत्राणानि करोति पादूकृत्, पादकृदित्येके । विशेषेणोकं समवायमियर्ति व्योकारः, व्योरित्ययःपर्याय इति **श्रीभोजः** ॥७॥ नाडीं धमति नाडिंधमः, नाडीमुष्टयोश्च (सू०) इति खश् । कला आदत्ते कलादः, कलं सुवर्णकालिका-माद्यत्याखण्ड[य]ति वा, अत एव कलं धौतं यत्रेति कलधौतं रुक्मम् । हेममुष्टिकोपि । कम्बुघटनं शिल्पमस्य काम्बविकः शङ्खवलयादिकृत्, लक्ष्याद्दस्य कादेशाभावः । शुल्बघटनं शिल्पमस्य शौल्बिकः । मणिकारो वैकटिकः ॥ ८ ॥ तक्ष्णोति तक्षा । वर्धयति वर्धकिः, वर्ध छेदने । त्वक्षति तनूकरोति दारु त्वष्टा । काष्ठं तक्ष्णोति काष्ठतट् । स्थपतिश्च । ग्रामस्यायत्तस्तक्षा ग्रामतक्षः, ग्रामकौटाभ्यांचतक्ष्णः (सू०) इति टच् । कुट्यां भवः कौटः स्वतन्त्रः । नास्त्यध्युपरि– इनः स्वाम्यस्यानधीनः ॥ ९ ॥ क्षुरोस्यास्ति क्षुरी । मुण्डयति मुण्डी । दिवा कीर्त्यते दिवाकीर्तिः, रात्रौ क्षुरकर्मनिषेधात् । नाप्यते नापितः, नञ् प्रकृत्या । अन्तमवस्यत्यन्तावसायी । चण्डिलोपि । संवाहकोङ्गमर्दः स्यात् । निर्णेनक्ति क्षालयति निर्णेजकः । रञ्जयति रजकः, शिल्पिनि क्वुन् (क्वुन्शिल्पिसंज्ञयोरिति), रजकरजनरजःसूपसंख्यानात् (वा०) नलोपः । क्वचित्तु य एव धावकः स एव रजकः, **स्मार्तै** तु भिन्नावेतौ । शुण्डा पानमदस्थानं सुरा वा पण्यमस्य शौण्डिकः । मण्डमच्छसुरां हरति मण्डहारकः । सुराजीवी कल्यपालाख्यः ॥ १० ॥ जवमलति जवालश्छागस्तस्यायं जावालः, अजपालापभ्रंशो वा । देवान्– लाति देवलः । मात्यस्यां विश्वं माया । शम्बराख्यस्यासुरस्येयं शांम्बरी, शं वृणोति शंवगे व्याज इति तु युक्तम् । इन्द्रजालं तु कुसृतिः कुहकं कुहिका च । प्रतिहरणं व्याजः प्रयोजनमस्य प्रातिहारिक ऐन्द्रजालिकः ॥ ११ ॥ शिलालिना कृशाश्वेन

शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः ।
भरता इत्यपि नटाश्चारणास्तु कुशीलवाः ॥ १२ ॥
मार्दङ्गिका मौरजिकाः पाणिवादास्तु पाणिघाः ।
वेणुध्माः स्युर्वैणविका वीणावादास्तु वैणिकाः ॥ १३ ॥
जीवान्तकः शाकुनिको द्वौ वागुरिकजालिकौ ।
वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ॥ १४ ॥
भृतको भृतभुक्कर्मकरो वैतनिकोऽपि सः ।
वार्त्तावहो वैवधिको भारवाहस्तु भारिकः ॥ १५ ॥
विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ।
निहीनोपश(स)दो जाल्मः क्षुल्लकश्चेतरश्च सः ॥ १६ ॥
भृत्ये दासेरदासेयदासगोप्यकचेटकाः ।
नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥ १७ ॥
पराचितपरास्कन्दपरजातपरैधिताः ॥ १८ ॥

च प्रोक्तं नटसूत्रमधीते शैलाली कृशाश्वी च, पाराशर्यशिलालिभ्याम् (सू०) इति णिनिः,कर्मन्दकृशाश्वात् (सू०) इनिः । शिलूषस्यर्षेरपत्यं शैलूषः । भरतस्यापत्यं, बिदाद्यञि बहुत्वे लुक् (यञञोश्च) । नटति नटः । चरणस्य भ्रमणस्यायं चारणः, यतो देशान्तरभ्रमणाज्जीवति । कुत्सितं शीलं वाति कुशीलवः ॥ १२ ॥ मृदङ्गमुरजवादनं शिल्पमेषां (मार्दङ्गिका मौरजिकाः)। पाणी हन्ति पाणिघः, पाणिघता-ढघौशिल्पिनीति (सू०) साधुः । वेणुं धमति वेणुध्मा वांशिकः । वीणावादनं शिल्पमस्य वैणिकः ॥ १३ ॥ शकुनान् हन्ति शाकुनिकः, पाक्षिमत्स्यमृगान् हन्तीति (सू०) ठक् । एकार्थाविति शेषः । वागुरया मृगबन्धनरज्ज्वा चरति वागुरिकः । वितन्यते वीतंसः प्राणिबन्धोपकरणं, कूटः कूटयन्त्रं, ताभ्यां जीवति चरति वेति ठक् (चरतीति) । मांसं पण्यमस्य मांसिकः । सौनिकार्थौ इत्येके ॥ १४ ॥ भ्रियते भृतकः, स्वार्थे कन् । भृतिं वेतनं भुङ्क्ते भृतिभुक् । कर्मकरः, कर्मणिभृतौ (सू०) इति टः । वेतनेन जीवति वैतनिकः, वेतनादिभ्योजीवति (सू०) इति ठक् । वृत्तिर्जीविकास्त्यस्यां वार्त्ता– अन्नाद्यं, प्रज्ञाश्रद्धार्चेति (सू०) णः, वार्त्ताया वहो वार्त्तावहः । विवध्यते विवधो भारः पर्याहारो वा, वध संयमने, पुंसिसंज्ञायांघःप्रायेण (सू०), तं वहति वैवधिकः, विभाषाविवधवीवधात् (सू०) इति ठन् । भारोऽस्त्यस्य भारिकः ॥ १५ ॥ विरुद्धो वर्णोऽस्य विवर्णः, वर्णान्तरालत्वात् । पामाः सन्त्यस्याधमत्वात् पामरः, पामा(नं) राति वा । निम्नमञ्चतीति नीचः । प्रकृतौ भवः प्राकृतो गुणासंस्कृतः । पृथग्जनेभ्यः पृथग्जनः । नियतं हीयते निहीनः । अपशीयतेपशदः । जलति जाल्मः, जल घातने । क्षुधं लाति क्षुल्लस्तुच्छत्वात् । इतं रात्येति वा–इतरः । वर्वरोपि [यथाजातोपि] । भारतादौ रेफशकारौ ॥ १६ ॥ भरणीयो भृत्यः, भृञोऽसंज्ञायां (सू०) इति क्यप् । दासस्यापत्यं दासेरो दासेयश्च, क्षुद्राभ्योवा (सू०) इति ढक्–ढ्रकौ । दीयते दासः, दस्यते(ति) वा, दसु उपक्षये । गोपनीयो गोप्यः । चेटति चेटः, चिट प्रेष्ये । (नियोज्यः) प्रयोज्यनियोज्यौशक्यार्थेसाधू (सू०) । किं-करोमीत्याज्ञाप्रतीक्षकः किंकरः, दिवाविभा-निशेति (सू०) टः । प्रेषणीयः प्रैष्यः, प्रादूहोढोढ्येषैष्येष्विति (वा०) वृद्धिः, ईष उञ्छे– इत्यस्मात्तु प्रेष्यः । भुङ्क्ते स्वाम्युच्छिष्टं भुजिष्यः ॥ १७ ॥ परैराचीयते वर्ध्यते पराचितः । परिस्कन्यते– आक्रम्य नियुज्यते परिस्कन्दः, परिस्कन्दःप्राच्यभरतेषु (सू०) । परैरेध्यते वर्ध्यते परैधितः ॥ १८ ॥ मन्दते

मन्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः ।
दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च ॥ १९ ॥
चण्डालप्लवमातङ्गदिवाकीर्तिजनंगमाः ।
निषादश्वपचावन्तेवासिचाण्डालपुक्कसाः ॥ २० ॥
भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः ।
व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः ॥ २१ ॥
कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ।
शुनको भषकः श्वा स्यादलर्कस्तु स योगितः ॥ २२ ॥
श्वा विश्वकद्रुर्मृगयाकुशलः सरमा शुनी ।
विट्चरः सू(शू)करो ग्राम्यो वर्करस्तरुणः पशुः ॥ २३ ॥
आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् ।
दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मा कुरङ्गकः ॥ २४ ॥

स्वपितीव मन्दः, अत एव मदि जाड्य इति चान्द्रा धातुः । तुन्दं परिमार्ष्टि तुन्दपरिमृजः, तुन्दशोकयोःपरिमृजापनुदोः (सू०) इति सूत्रे– आलस्यसुखाहरणयोरितिवक्तव्यात् (वा०) कः । आलस्यमस्त्यस्यालस्यः, अर्शआदित्वात् (सू०) अच् । (शीतकः) शीतादलसे, शीतोष्णाभ्यांकारिणीति (सू०) कन् । न लसत्यलसः । दक्षते दक्षः । चतते कर्म चतुरः । पिशति पियति वा पेशलः, पिश अवयवे, रि पि गतौ । पटति पाटयति वा पटुः । सुष्ठूत्थानमुद्योगोऽस्य सूत्थानः । उषति दहतीवोष्णः । उष्णलोऽपि ॥ १९ ॥ चण्डते चण्डालः । प्लवते प्लवः । मा निषिद्धं तङ्गति मातङ्गः, अमानोनाः प्रतिषेधे, मतङ्गस्यापत्यमिति पौराणिकाः । दिवा कीर्त्यते दिवाकीर्तिः, रात्रौ भयदत्वात् । जनं गच्छति जनंगमः, गमश्च (सू०) इति खच् । निषण्णमस्मिन्पातकमिति निषादः, निषीदति वा, ज्वलादित्वाण्णः (ज्वलितिकसन्तेभ्योणः) । श्वानं पचति श्वपचः, पचादित्वादणोपवादोच् (नन्दिग्रहीति) । ग्रामान्ते वसति– अन्तेवासी, अन्तावसायी च । (चाण्डालः) कुलालवरुड(कर्मार)निषादचण्डालमित्रामित्रेभ्यश्छन्दस्युपसंख्यानात् (वा०) स्वार्थेऽण् । पुत्कुत्सितं कसति पुक्कसः, पुष्कस इत्येके । अत्रान्तरभेदोऽनादृतः, यतः श्वपचो[श्वपो] डोम्ब:[मः] पुक्कसो मृतपः ॥२०॥ किराताद्यास्तथा म्लेच्छजातीयाः– दरद्भुट्टभेदादयश्चाण्डालभेदाः । किरति शरान् किरातः । शवत्यरण्यं शवरः । पोलति भ्रमति पुलिन्दः । एतेऽरण्यचरा देशभेदाद् भिन्नाः । म्लेच्छत्यव्यक्तं वक्ति म्लेच्छः । रिष्टया मालभटा भिल्ला नाहलाश्चान्त्यजाः पृथक् । विध्यति व्याधः, श्याद्व्यधेति (सू०) णः । मृगान् याति मृगयते वा मृगयुः । लुभ्यते (स्म) गृध्यति मांसं लुब्धकः ॥ २१ ॥ कुले गृहे भवः कौलेयकः, कुलकुक्षीति (सू०) ढकञ् । सरमाया अपत्यं सारमेयः । कोकते कुक्, चोरप्राक्कुक्शब्दं वा कुरति (कुक्कुरः), कुर शब्दे । मृगान्दशति मृगदंशकः । शुनति शुनकः, शुन गतौ । भषति कुत्सितं वाशते भषकः । शवति श्वयति वा श्वा । मण्डली च । रथ्यामृगो देश्याम् । स श्वा संजातगरपयोगोऽलर्क्यते वार्यते दशनभयादलर्क उन्मत्तः श्वा ॥ २२ ॥ विश्वं कन्दत्याह्वयते विश्वकद्रुः, विगतं श्वकदनमस्येत्येके, विश्वकं द्रवति वा । सरति सरमा देवशुनी, विशेषवृत्तिरपि सामान्येऽभिधानात् । विषं गूथं चरति(अत्ति) विट्चरः । सूयते बहून् सूकरः । वर्कतेऽन्नान् वर्करः, वृक आदाने ॥ २३ ॥ आचोद्यन्ते त्रास्यन्ते प्राणिनोऽत्रेत्याच्छोदनं, चुदेश्छत्वम् । मृगान्व्ययति मृगव्यं, मृगव्येति मुनिः, व्येञ् संवरणे । आखेट्यन्ते प्राणिनोऽत्राखेटः, खिट उत्त्रासने । मृग्यन्ते प्राणिनोऽस्यां मृगया, मृगयाटाप्येत्यङ् (परिचर्यापरिसर्येति) । पापर्द्धिश्च । लुब्ध[क]संबन्धाद्दक्षिणे पार्श्वेऽर्व्रणमस्य दक्षिणारुः (दक्षिणेर्मा), दक्षिणेर्मालुब्धकयोगइति (सू०) साधुः, व्रणोक्रिया–

चौरैकागारिकस्तेनदस्युतस्करमोषकाः ।
प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः ॥ २५ ॥
चौरिका स्तैन्यचौर्ये च स्तेयं लोप्त्रं तु तद्धनम् ।
वीतंसस्तूपकरणं बन्धने मृगपक्षिणाम् ॥ २६ ॥
उन्माथः कूटयन्त्रं स्याद्वागुरा मृगबन्धनी ।
शुम्बं वटाकरः (वराटकः) स्त्री तु रज्जुस्त्रिषु वटी गुणः ॥ २७ ॥
उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः ।
पुंसि वेमा वापदण्डः सूत्राणि नरि तन्तवः ॥ २८ ॥
वाणिर्व्यूतिः स्त्रियौ तुल्ये पुस्तं लेप्यादिकर्मणि ।
पा(प)ञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता ॥ २९ ॥

मीमिमरुरित्युक्तम् ॥ २४ ॥ चोरयति चोरः, स्वार्थेऽण् (चौरः), चुराशीलो वा, छत्त्रादित्वाण्णः (सू०) । एकस्मिन्नसहायेऽगारे भव ऐकागारिकः, ऐकागारिकट्चौरे (सू०) । स्तेनयति स्तेनः, स्तेन चौर्ये, स्यास्त्यःहृञाविभ्य इति (उ०) इनचि स्त्येनः स्यात् । दस्यत्युपक्षिणोति दस्युः । तत्करोति तस्करः, तद्बृहतोःकरपत्योश्चोरदेवतयोःसुट्तलोपश्च (ग०) । मुष्णाति मोषकः । प्रतिरुणद्धि प्रतिरोधी । परानास्कन्दति परास्कन्दी । पाटयंश्चरति पाटच्चरः, पटच्चरे जीर्णवस्त्रे भवो वा । मलिनैर्म्लोचयति मलिम्लुचः, म्लुच स्तेयकरणे । पारिपन्थिकः पश्यतोहरश्च, वाग्दिक्पश्यद्भ्योयुक्तिदण्डहरेष्विति (सू०) षष्ठ्या अलुक् । व्यलीकं चातिसंधानं व्यञ्जनं च प्रतारणम् ॥ २५ ॥ चोरस्य भावश्चौरिका, मनोज्ञादित्वात् (द्वन्द्वमनोज्ञादिभ्यश्च) वुञ् । ब्राह्मणादित्वात्ष्यञ् (गुणवचनब्राह्मणादिभ्यः कर्मणि च) चौर्यम् । स्तेनस्य भावः कर्म वा स्तैन्यं, स्तेनादिति योगविभागात्ष्यञ् (इ०)। स्तेनाद्यन्नलोपश्च (सू०) इति स्तेयम् । लुप्यते लोप्त्रं चौर्यधनम् । मृगादिबन्धननिमित्तं जालवागुरादिसाधनं, वितन्यत इति वीतंसः, वितस्यते बध्यतेऽनेन वा, तसिः सौत्रः ॥ २६ ॥ ऊर्ध्वपातान्मथ्यतेऽनेनोन्माथः । छलेन यम्यतेऽनेन कूटयन्त्रं, पाशयन्त्रमित्येके । (मृगबन्धनी) रज्जुरिति शेषः । अवगुरयति मृगान् वागुरा जालाकृतिः । शु[सु] पूजायां ऽव्ययं, पूजितं मीयते शु[सु]म्बं, शुल्वं वा । वध्यते वेष्टयते वटाकरः, वटी च । सृज्यते रज्जुः । गुण्यतेऽभ्यस्यते गुणः । वटी गुण इति पृथगाहुः । यैर्वेष्टनैर्द्विगुणा त्रिगुणा वा रज्जुर्वेष्ट्यते वटीगुण इत्येके ॥ २७ ॥ उद्घाट्यते प्रकाश्यतेऽम्भोऽनेनोद्घाटनं, ऊर्ध्वं हन्य[घात्य]तेऽनेनेत्युद्घातनमिति कौटिल्यः । प्रहेररघट्टादेर्जलमूर्ध्वं वाह्यतेऽनेनोद्वाहनम् । पादावर्तोऽपि । वयन्त्यनेन वेमा । उप्यते पीड्यते यन्त्रे सूत्रमनेनेति वापस्तदर्थो दण्डो वापदण्डः, वायदण्ड इति तु युक्तम् । सूयते सूच्यते वा पटोऽनेन सूत्रम् । तन्यतेऽनेन तन्तुः । नरि पुंसि ॥ २८ ॥ व(वा)नं वाणिः, वयनं वा, अत एव निष्प्रवाणिर्नवः पटः । विवयनं व्यूतिः, ऊतियूनीति (सू०) साधुः । तुल्या च तुल्या च तुल्ये । पुस्यतेऽभिमर्द्यते मृदत्र पुस्तं, पुस्त आदरे वा । पञ्चालदेशे भवा पाञ्चालिका यया बालाः खेलन्ति । (पुत्रिका) पुत्रात्कृत्रिमइति (ग०) कन् (यावादिभ्यःकन्) । आदिशब्दाच्चर्मलेराद्यैः, स्यात्सालभञ्जिका स्तम्भे लेप्येनाञ्जलिकारिका । जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिषु ॥ त्रपुजतुनोःषुक् (सू०) ॥ २९ ॥ पेटति पिटः, पिट

पिटकः पेटकः पीडा मञ्जूषाथ विहङ्गिका ।
भारयष्टिस्तदालम्बि शिक्यं काचोथ पादुका ॥ ३० ॥
पादूरुपानत्स्त्री सैवानुपदीना पदायता ।
नर्ध्री वर्ध्री वरत्रा स्यादश्वादेस्ताडनी कशा ॥ ३१ ॥
चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी ।
नाराची स्यादेषणिका शाणस्तु निकषः कषः ॥ ३२ ॥
व्र(वृ)श्चनः पत्त्रपरशुरेषिका तूलिका समे ।
तैजसावर्तनी मूषा भस्त्रा चर्मप्रसेविका ॥ ३३ ॥
आस्फोटनी वेधनिका कृपाणी कर्तरी समे ।
वृक्षादनो वृक्षभेदी टङ्कः पाषाणदारकः(णः) ॥ ३४ ॥
क्रकचः करपत्त्रं स्यादारा चर्मप्रभेदिका ।
सूर्मी स्थूणायःप्रतिमा शिल्पं कर्म कलादिकम् ॥ ३५ ॥

संघाते, कः । ण्वुलि पेटकः । पीड गहने (अवगाहने),अस्मात्पीडा, पीङ् पानेस्मात्पेटेति **श्रीभोजः** । मञ्जु मनोज्ञं कृत्वा वस्त्राद्यैरुष्यतेत्र मञ्जूषा । आद्यौ पेटारिकायां परौ महत्याम् । विहंगप्रतिकृतिश्चर्मादिमयी, या भित्त्यादौ लम्बमाना स्थाप्यते प्रयाणके च संचार्यते (विहंगिका) । भारोद्वहनाय यष्टिः, चतुर्दण्डिकेति सभ्याः, शिक्याधारस्कन्धग्राह्यो लगुड इति **द्रवि[मि]डाः**, विहंगमेत्येके । तदालम्बो भारालम्बः, तस्या आलम्बते वा । शक्नोति वोढुं शिक्यं, अघ्न्यादिः (उ०) । कच्यतेनेनेति काचः, कच बन्धने, यत्र रज्जुनद्धे वे ढव्यमास्ते ॥ ३० ॥ पद्यतेनया पादूः, णित्कसिपद्यर्तेरित्यूः (उ०) । (पादुका) स्वार्थे कन्, केऽणइति (सू०) ह्रस्वः । उपनह्यति पादमुपानत्, नहिवृतिवृषीति (सू०) दीर्घः । पादत्राणं च । अनुपदं पादायामेन बद्धानुपदीना, अनुपदसर्वान्नेति (सू०) खः । नह्यति बध्नाति नध्री । वर्धते दीर्घीभवति चर्मरज्जुत्वाद्वर्ध्री । व्रियतेनया वरत्रा, वरत्रा वेत्रवेणवीति तु **चाणक्यः** सूत्राध्यक्षे(?) उपचारादाख्यत् । कशति कशा चर्मयष्टिः ॥ ३१ ॥ चण्डालस्येयं चाण्डालिका । कव्य(ण्य)ते तन्त्रीभिराव्रियते कटो(ण्डो)लवीणा किन्नर्याख्या । नरमञ्चति नराङ्, तस्येयं, नाराची । अन्विष्यते वर्णोनयेत्येषणिका, स्वर्णतुलेतीह युक्तम् । श्यति तनूकरोति शाणः । निकष्यतेत्र निकषः, गोचरसंचरेति (सू०) चकारात्साधुः , पुंसिसंज्ञायांघो वा (सू०) । एवं कषः, निकषोपल इत्येके, पचाद्यच् (-नन्दिग्रहीति), मणिकारादिभाण्डमाहुः, **यन्मुनिः**– शाणस्तु निकषोपलः ॥ ३२ ॥ वृश्चति छिनत्ति व्रश्चनः । पत्त्राकारः पत्त्राणां वा परशुः (पत्त्रपरशुः) । एषःयेषिका, ईष उञ्छे । काष्ठलोहमयी शलका तूलिका, तूल निष्कर्षे । ईषिकेत्येके, शलाकेषिकयोस्तूलिरिति **दुर्गो** भेदेनाह । तैजसं हेमादि– आवर्त्यते द्रवीक्रियतेस्याम् । मूयते मूषा, मूङ् बन्धने । बभस्ति भक्षयतीव स्थाप्यं भस्त्रा । चर्ममयी, प्रसीव्यते प्रसेविका, प्रसेवकोपि ॥ ३३ ॥ आस्फोट्यते विध्यते चानया मौक्तिकादि (आस्फोटनी, इ०) । कल्प्यते छिद्यतेनया कृपाणी । कर्त्यतेनया कर्तरी । वृक्षोऽद्यते छिद्यतेनेन शस्त्रकेण वृक्षादनः । टङ्क्यतेनेन टङ्कः, टकि बन्धने, हन्यमानः– टंशब्दं कायति वा ॥ ३४ ॥ क्रशब्दोच्चारणेन कचति क्रकचः । करसंचार्यं शस्त्रपत्त्रं करपत्त्रं, करशब्दोच्चारणेन पतति वा । इयर्त्यनयेत्यारा, भिदादौ– आराशस्त्र्यां (ग०) साधुः । चर्मसीवनी च । सुवति सूर्मी, शोभनोर्मिरित्येके । तिष्ठति स्थूणा, **यच्छाश्वतः**– स्थूणा स्तम्भेथ सूर्म्यां च । अयोमयी प्रतिकृतिः (अयःप्रतिमा), **यत्स्मृतिः**– सूर्मीं ज्वलन्तीमालिङ्ग्येन्मृत्यवे गुरुतल्पगः । शिनोति शिल्पं, शिञ् निशाने, शिल उञ्छेस्माद्वा । कला गीताद्याश्चतुःषष्टिः । आदिशब्दः प्रकारे ॥ ३५ ॥ प्रतिमीयतेनेनेति प्रतिमानं, प्रतिमा च । प्रतिबिम्ब्य-

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया ।
प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात् ॥ ३६ ॥
वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् ।
साधारणः समानश्च स्युरुत्तरपदे त्वमी ॥ ३७ ॥
निभसंकाशनीकाशप्रतीकाशोपमादयः ।
कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनम् ॥ ३८ ॥
भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि ।
सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा ॥ ३९ ॥
गन्धोत्तमा प्रसन्नेरा कादम्बर्यः परिस्रुता ।
मदिरा कश्यमद्ये चाप्यवदंशस्तु भक्षणम् ॥ ४० ॥
शुण्डा पानमदस्थानं मधुवारा मधुक्रमाः ।
मध्वासवो माधवको मधुमार्द्वीकमद्ययोः ॥ ४१ ॥

-ते प्रतिबिम्बं, बिम्बसदृशं वा । प्रतियात्यतेनया प्रतियातना, यत निकारोपस्कारयोः । अर्च्यतेऽर्चा । प्रतिनिधीयते प्रतिनिधिर्मुख्यसदृशः । प्रतिरूपं [प्रतिच्छन्दः] प्रतिकायश्च । उपमितिरुपमा । केचिदेतत्पूर्वैः सबध्नन्ति ॥ ३६ ॥ समति समः । तुलया संमितस्तुल्यः, नौवयोधर्मेति (सू०) यत् । (सदृक्ष इ०) समान इव दृश्यते, त्यदादिषुदृशोरनालोचनेकञ्च (सू०) इत्यत्र समानान्ययोश्चेतिवक्तव्यात् (वा०) क्सः कन् क्विन् च, दृग्दृशवतुष्विति (सू०) समानस्य सः । समानमाधारणं मानं चास्य साधारणः समानश्च ॥ ३७ ॥ वाच्यलिङ्गास्तुल्यार्थाश्चैते, यथा चन्द्रनिभं मुखं, पद्मसंकाशम् । नियतं भाति निभम् । समं काशते संकाशः । आदिशब्दाच्चन्द्रप्रतिमः, पितृरूपः, आयासभूत इत्यादि । चन्द्रेण निभ इत्यादौ न भवति समास एवोत्तरपदत्वस्य रूढेः । कर्मणि साधु कर्मण्या, भर्मण्या वा । विधीयतेनया विधा, लक्ष्ये भोजनपिण्डे रूढा । (भृत्या, इ०) भ्रियतेनयेति, संज्ञायांसमजेति (सू०) क्यप्, स्त्रियां क्तिन्, मनिन्, ल्युट् । वीयतेयते वेतनं, वी गत्यादौ ॥ ३८ ॥ भरणे साधु भरण्यम् । मूलेनानाम्यं मूल्यं, नौवयोधर्मेतियत् (सू०) । निर्विश्यते भुज्यते निर्वेशः । पण्यते- आभाष्यते पणः, नित्यंपणः- परिमाण इति (सू०) साधुः । सूयते परिवास्यते सुरा । हलिनो बलस्य प्रिया । जहाति लज्जामनयेति हाला, हलति विलिखत्यङ्गं वा, ज्वलादित्वाण्णः (ज्वलितिकसन्तेभ्योणः) । परिस्रवति परिस्रुत्, परिस्रुता च । वरुणात्मजा वारुणी समुद्रोत्थत्वात् ॥ ३९ ॥ गन्धेनोत्तमा । प्रसीदति प्रसन्ना, अच्छसुरा । एति भ्राम्यत्यनया- इरा । कुत्सिताम्बरस्य नीलवाससः इयं कादम्बरी, रुद्रार्थे तृतीया । माद्यत्यनया मदिरा । कशादेशे भवं कश्यम् । मदे साधु मद्यं, माद्यन्त्यनेन वा, कृत्यल्युटोबहुलं (सू०) इति करणे गदमदचरेति (सू०) यत् । स्वादुरसा मदिष्ठा कल्यं हारहूरं कापिशायनं च । अवदश्यते पानरुचिजननार्थ- मवदंशः, खरविशदमभ्यवहार्यम् । चर्वणमुपदंशश्च ॥ ४० ॥ शुण्य(न्य)ते शुण्डा, शुण(न) गतौ । पान- मदयोरास्पदं कल्यपालगृहैकदेशः । शाश्वतस्तु- कुञ्जराणां करः शुण्डा शुण्डा कादम्बरी मता । (मधुवारा इ०) क्रमेण मधुपानावसराः । गौडी पैष्टी च माध्वी च फलोत्था च सुरा स्मृतेति सुराया भेदानाह । माक्षिकमिश्र आसूयते मध्वासवः । मधुनो विकारो मधुना कृतो वा माधवकः, कुलालादित्वा- द्वुञ् (सू०) । मन्यते मधु, माद्यन्त्यनेन वा । मृद्वीकाया विकारो मार्द्वीकं, माध्वीकमित्युपाध्यायः । मद्यस्योक्तत्वाद्- अद्वयोरित्येके पेठुः, तन्न- सामान्यविशेषरूपत्वात् ॥ ४१ ॥ मिरायां देशे भवो गोध्याः

मैरेयमासवः शीधुर्मेदको जगलः समौ ।
संधानं स्यादभिषवः किण्वं पुंसि तु नग्नहूः ॥ ४२॥
कारोत्तमः(रः) सुरामण्ड आपानं पानगोष्ठिका ।
चषकोऽस्त्री पानपात्रं सरकोप्यनुतर्षणम् ॥ ४३ ॥
धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत्समाः ।
स्युर्लग्नकाः प्रतिभुवः सभिका द्यूतकारकाः ॥ ४४ ॥
द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ।
पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते ॥ ४५ ॥
परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियाम् ।
अष्टापदं शारिफलं प्राणिद्यूतं समाह्वयः ॥ ४६ ॥
उक्ता भूरिप्रयोगत्वादेकस्मिन्येत्र यौगिकाः ।
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ॥ ४७ ॥

इति शूद्रवर्गः । १० ।

सुराया विशेषो मैरेयः । शेरतेनेन शीधुः, शीङोधुक्- (उ०) । शीधोरित्येके पठित्वा शीधुप्रतिकृतिक इति व्याख्यन् । यदाहुः- मध्वासवस्तु मैरेयं, तन्न-यन्माला- मैरेयो गदितः शीधुः, (इक्षोः) [अ]पक्वरसोऽपि । मेद्यति स्निह्यत्यनेन मेदकः । भृशं गलति जगलः स्वच्छः सुरासंधानद्रव्यपङ्कः । संधीयन्ते संधानं, वंशांकुरफलादीन् बहुकालं संधाय क्रियते । अभिषूयते चिरं क्लिद्यतेऽभिषवः । भावसाधनौ वा द्वौ सुरासंधौ वर्तेते । कि(क)णति कीयते वा सुरानेन किण्वं माषदलन्या(ला)दि सुराबीजाख्यम् । नग्नेनाह्वयते स्पर्धते सुराच्छादनाभावान्नग्नहूः, नग्नहुर्मालायाम् ॥ ४२ ॥ कारेण क्रियावशान्मुख्यः कारोत्तमः । सुरोर्ध्वे स्वच्छो भागः (सुरामण्डः) । आपीयतेऽस्मिन्नापानम् । पानाय गोष्ठी-आसनैबन्धः पानगोष्ठी, गावो नानाविधा वाचस्तिष्ठन्त्यत्रेति । चषन्त्यनेन चषकम् । गल्वर्कोऽपि, स्फाटिके पात्रेयं रूढः, विवक्षातो विध्यनुवादौ । सरति सरकः । अनुतृष्यन्त्यनेनानुतर्षणं सुरापरिवेषणम् । चषकपर्यायावेतावित्येके, यन्मुनिः- चषकश्चानुतर्षश्च सरकश्चेति ॥ ४३ ॥ धूर्वति हिनस्ति धूर्तः । अक्षैर्दीव्यति विजिगीषते तच्छीलोऽक्षदेवी । किं तवास्तीति पणते कितवः । लगति लग्नकः । प्रतिनिधिर्भवति प्रतिभूः । सभा द्यूतशालास्त्यस्य सभिकः । द्यूतं कारयति द्यूतकारकः । द्वौ द्वौ भिन्नार्थौ, आद्ययोः सर्वसामान्यात् ॥ ४४ ॥ दीव्यतेऽस्मिन् द्यूतम् । कितवस्य कर्म कैतवम् । पणनं पणः । दुरोदरं नानार्थे । पण्यते पणो बन्धकः । गृह्यते ग्लहः, अक्षेषु ग्लहः (सू०) इत्यप् । अक्ष्णोत्यक्षः । दीव्यत्यनेन देवनः । पाश्यते बध्यतेनेन पाशकः, प्राशक इत्येके ॥ ४५ ॥ वामदक्षिणयोः शारीणां परिणयनं परिणायः, परिन्योर्नीणोर्द्यूताभ्रेषयोः (सू०) इति घञ् । शृणातीति शारी खेलनी । अष्टौ पदान्यस्याष्टापदम् । शारयः फलन्त्यत्र शारिफलं खेलनाधारः, चतुरङ्गफलकादि । आकर्षो नानार्थे । प्राणिभिर्मेषकुक्कुटादिभिर्द्यूतं प्राणिद्यूतम् । संघर्षेणाह्वयन्तेऽत्र समाह्वयः ॥ ४६ ॥ येऽत्र संबन्धिशब्दा लक्ष्यबाहुल्यादेकस्मिन्-लिङ्गे- उक्तास्ते तद्गुणयोगादन्यत्र वर्तमाना लिङ्गान्तरेऽप्युत्प्रेक्ष्याः, यथा कर्मण्या भृतिः, कर्मण्यं वेतनं, हालिप्रिया सुरा, हालिप्रियं मद्यं, अक्षवती सभा, अक्षवद् द्यूतम् । एवं मालाकारी स्त्री, अक्षदेविनी स्त्री । तथानुपदीनं पादत्राणम् ॥ ४७ ॥ इति शूद्रवर्गः । १० । इति श्रीक्षीरस्वाम्युत्प्रेक्षितेमरकोशोद्घाटने भूम्यादिकाण्डो द्वितीयः समाप्तः ।

तृतीयं काण्डम् ।

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥
स्त्रीदाराद्यैर्यद्विशेष्यं यादृशं प्रस्तुतं पदैः ।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ २ ॥
सुकृती पुण्यवान्धन्यो महेच्छस्तु महाशयः ।
हृदयालुः स(सु)हृदयो महोत्साहो महोद्यमः ॥ ३ ॥
प्रवीणनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥ ४ ॥
पूज्यः प्रतीक्ष्यः सांशयिकः संशयापन्नमानसः ।
दक्षिणी(णे)यो दक्षिणार्हस्तत्र द(दा)क्षिण्य इत्यपि ॥ ५ ॥

श्रीगणेशाय नमः । विशेष्यनिघ्नो विशेषणम् । विशेषणादिभिर्हेतुभूतैर्ये पञ्च वर्गास्ते काण्डद्वयोक्तसाधारण्यात्सामान्यकाण्डेऽस्मिंस्तृतीयेवान्तरवर्गान् संश्रयन्ति, यथा नानार्थे कान्तादिवर्गाः, अव्ययवर्गेऽनेकार्थैकार्थवर्गौ, लिङ्गशेषवर्गे स्त्रीलिङ्गादिवर्गाः । वर्गसंग्रह इत्येके पेठुः, सामान्यकाण्डे ये पञ्च वर्गाः स वर्गसंग्रह इति योजना । आदिशब्दः प्रकारे ॥ १ ॥ स्त्र्यादिभिः पदैर्यादृग्लिङ्गैर्यादृग्वचनैश्च विशेषणैर्यद्विशेष्यं भेद्यं प्रस्तुतं तस्य गुणादिशब्दास्तथा तादृग्लिङ्गास्तादृग्वचनाश्च भेदका विशेषणानि भवन्ति । गुणशब्दा यथा प्रवीणा स्त्री, प्रवीणा दाराः, प्रवीणं कलत्रम् । द्रव्यशब्दा यथा दण्डिनी स्त्री, दण्डिनो दाराः, दण्डि कलत्रम् । क्रियाशब्दा यथा पाचिका स्त्री, पाचका दाराः, पाचकं कलत्रम् । दाराद्यमिति पाठो युक्तः । स्त्रीनराद्यैरित्येके, स्त्रीपुंनपुंसकैरित्यर्थः । क्षेमंकरोरिष्टतातिः शिवतातिः शिवंकर इति वक्तव्यम् ॥ २ ॥ धने साधुर्धन्यः । महानाशयोस्य महाशय उदाराभिलाषः । उदीर्ण उद्भटोदारावुदात्तश्च महामनाः । प्रशस्तं हृदयमस्त्यस्य हृदयालुः, हृदयादेरा(चा)लुरन्यतरस्याम् (वा०) । स एव हि हृदयेन सह वर्तते, अन्ये मांसखण्डे सत्यप्यहृदयाः, यन्ममैव– हृदयं तद्विविक्ते यद्भावमन्यच्चलं पलम् । शतैकीयाः सहृदया गण्यन्ते कथमन्यथा ॥ विद्रूपोपि । (महोत्साहः) उद्यमवानित्यर्थः ॥ ३ ॥ प्रकृष्टा वीणास्येति प्रवीणः, मुख्यार्थं परित्यज्य निपुणे रूढः, यदाहुः (**कुमारिलभ०**)– निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत् । क्रियन्तेऽद्यतनैः काश्चित्काश्चिन्नैव त्वशक्तित इति । एवं निष्णातकुशलौ । निपुणति निपुणः, शोभनकर्मत्वात् । अभितो जानात्यभिज्ञः । विजानाति विज्ञः, इगुपधज्ञेतिकः (सू०) । निष्णा(स्ना)ति निष्णातः, निनदीभ्यांस्नातेःकौशले (सू०) इति षत्वम् । शिक्षा संजातास्येति शिक्षितः । विज्ञानं प्रयोजनमस्येति वैज्ञानिकः । कृतं संस्कृतं मुखमस्येति कृतमुखः । प्रशस्तं कृतं कर्मास्येति कृती । कुशान्– लाति कुशलः, ते हि व्युत्पन्नैरादातुं शक्याः । कृतकर्मा कृतकृत्यः कृतार्थश्च ॥ ४ ॥ प्रतीक्षणीयो मुख्यत्वात् (प्रतीक्ष्यः) । (सांशयिकः) संशयमापन्नइति (सू०) ठक् । (दक्षिणीय इ०) दक्षिणामर्हति, कडङ्गरदक्षिणाच्छचेति (सू०) छयतौ । तत्र दक्षिणार्हे ॥ ५ ॥ वदति दीयतामिति वदान्यः, वदेरान्यः (उ०) । वदन्योपि,

स्युर्वदान्यस्थूललक्ष(क्ष्य)दानशौण्डा बहुप्रदे ।
जैवातृकः स्यादायुष्मानन्तर्वाणिस्तु शास्त्रवित् ॥ ६ ॥
परीक्षकः कारणिको वरदस्तु समर्धु(र्ध)कः ।
हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ७ ॥
दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मनाः ।
दक्षिणे सरलोदारौ सुकलो दातृभोक्तरि ॥ ८ ॥
तत्परे प्रसितासक्ताविष्टार्थोद्युक्त उत्सुकः ।
प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ९ ॥
गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ ।
इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता ॥ १० ॥
अधिभूर्नायको नेता प्रभुः परिवृढोधिपः ।
अधिकर्द्धिः समृद्धः स्यात्कुटुम्बव्यापृतस्तु यः ॥ ११ ॥
स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।
वराङ्गरूपोपेतो यः सिंहसंहननो हि सः ॥ १२ ॥

साधौ यत् (तत्रसाधुः) । (स्थूललक्षः) स्थूलं लक्षयत्यालोचयति ददातीति यावत् । दाने शौण्डः शक्त उपचारात्, शुण्डा हि पानमदस्थानं तत्र भवः शौण्डः । जीवति जैवातृकः, जीवेरातृकन्वृद्धिश्च (उ०) । (अन्तर्वाणिः) अन्तर्वाण्यस्य ॥ ६ ॥ करणं प्रयोजनमस्य कारणिकः, मठादौ दानार्थं ब्राह्मणपरीक्षिता । आक्षपटलिकोपि । करणेनाधिकार(रि)वर्गेण चरतीति वा । समृध्नोति संवर्धयति समर्धुकः । हृष्यति हर्षमाणः, ताच्छील्यवयोवचनशक्तिषुचानश् (सू०) । हर्षाद्विकारं याति विकुर्वाणः । प्रकृष्टं मनोस्य प्रमनाः ॥ ७ ॥ अन्तर्लीनं मनोस्यान्तर्मनाः । उद्गतं मनोस्योत्कः, येनान्तर्जलचारिभिर्जलचैरप्युत्कमुत्कूजितमिति धर्ममात्रेपि, उत्कउन्मनाइति (सू०) साधुः । सोत्कण्ठश्च । (दक्षिण इ०) दक्षते, सरति, उदियर्ति च । शोभना कलास्य सुकलः, दाता भोक्ता च यः ॥ ८ ॥ तत्परं यस्य स तत्परस्तन्निष्ठः । प्रसिनोति स्म प्रसितः, षिञ् बन्धने । आसजति स्मासक्तः । प्रियमर्थं प्रेप्सुः, उच्छब्द उद्योगार्थः सुशब्दः शोभनार्थः, उत्कादिवत्कन् (ज्ञा०) । प्रत्येकमेति प्रतीतः । प्रथते प्रथितः । ख्यायते ख्यातः । विद्यते प्रतीयते वित्तः, वित्तोभोगप्रत्यययोः (सू०) इति साधुः ॥ ९ ॥ कृताः प्रसिद्धा लक्षणरूपा गुणा यस्यासौ कृतलक्षणः । आहतान्युद्घोषितानि लक्षणानि यस्यासावाहतलक्षणः । इभमर्हति– इभ्यः, दण्डादित्वाद्यत् (सू०) । आध्यायन्ति तमाढ्यः, कः, पृषोदरादिः (सू०) । स्वमस्त्यस्य स्वामी, स्वामिन्नैश्वर्ये (सू०) इति साधुः । ईष्टे तच्छील ईश्वरः, स्थेशभासेति (सू०) वरच् । पातीति पतिः ॥ १० ॥ अध्युपरि भवत्यधिभूः । नयति नियुङ्क्ते नायकः । प्रभवति प्रभुः, विप्रसंभ्यइति (सू०) डुः । परिवृंहति परिवृढः, प्रभौपरिवृढइति (सू० साधुः । ग्रामणीरग्रणीश्च ॥ ११ ॥ कुटुम्बे कलत्रादौ व्यापृतः, तत्पोषणोद्युक्तः, अभितोगारे भवोभ्यागारिकः । उपाधीयत उपाधिः । सिंहस्येव संहननं देहोस्य सिंहसंहननः ॥ १२ ॥

निर्धा(र्वा)र्यः कार्यकर्ता यः संपन्नः(तन्) सत्त्वसंपदा ।
अवाचि मूकोथ मनोजवसः(वः स) पितृसंनिभः ॥ १३ ॥
सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः ।
लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान् स्निग्धस्तु वत्सलः ॥ १४ ॥
स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ।
स्वतन्त्रोपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥ १५ ॥
परतन्त्रः पराधीनः परवान्नाथवानपि ।
अधीनो निघ्न आयत्तोस्वच्छन्दो गृह्यकोप्यसौ ॥ १६ ॥
खलपूः स्याद्बहुकरो दीर्घसूत्रश्चिरक्रियः ।
जाल्मोसमीक्ष्यकारी स्यात्कुण्ठो मन्दः क्रियासु यः ॥ १७ ॥
कर्मक्षमोलंकर्मीणः क्रियावान्कर्मसूद्यतः ।
स कार्मः कर्मशीलो यः कर्मशूरस्तु कर्मठः ॥ १८ ॥
कर्म(भर)ण्यभुक्कर्मकरः कर्मकारस्तु तत्क्रियः ।
अपस्नातो मृतस्नात आमिषाशी तु शौष्कलः ॥ १९ ॥

निर्धार्यः समुदायाद् गुणैः पृथग्व्यपदेश्यः । सत्त्वसंपच्चित्तोत्कर्षः, तया संपतन्(न्नः) संपद्यमानः । नास्ति वागस्य- अवाक् । मूयते बध्यते वागस्य मूकः, मूङ् बन्धने । मनो जवतेस्मिन् पितायमिति धावति मनोजवसः, औणादिकोऽसः- चमसादिवत्, मनोजेभिलाषे वसति वा । पितेव सम्यङ् निभाति पितृसंनिभः ॥ १३ ॥ कोकत आदत्ते धर्मं कूकुदः, कूङ् शब्द इत्यस्य वा रूपमाकूतवत्, ब्राह्मे विवाहे दाता, यन्मनुः- आच्छाद्य चार्हयित्वा च श्रुतशीलवते स्वयम् । आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥ लक्ष्मीरस्त्यस्य लक्ष्मणः, पामादित्वात् (लोमादिपामादीति) लक्ष्म्याअंच्चेतिणः (वा०) । श्रियं लाति श्रीलः, सिध्मादित्वाल्लज्वा (सू०) । रलयोरेकत्वस्मरणात्- श्रीलः । वत्सोस्यास्तीति वत्सलः, वत्सांसाभ्यांकामबले (सू०) इति लच् ॥१४॥ (दयालुः, इ०) दया कृपा चास्त्यस्य । करुणाप्रयोजनमस्त्यस्य कारुणिकः । सुष्ठु रमते सूरतः, सूरोर्क इव तपति वा, डः । स्व आत्मा तन्त्रं मुख्योस्य स्वतन्त्रः । अपगतमावरणं नियन्तास्येत्यपावृतः । स्वेन- ईर्ते तच्छीलः स्वैरी, स्वादीरेरिणोः (वा०) इति वृद्धिः । स्वश्छन्दोभिप्रायोस्य स्वच्छन्दः । निष्क्रान्तोवग्रहान्नियन्त्रणातो निरवग्रहः । निर्यन्त्रणो निरङ्कुशो यथाकामी च ॥ १५ ॥ परोध्युपर्यस्य पराधीनः, अषडक्षाशितेति (सू०) खः । परो नियन्तास्त्यस्य परवान् । अधि- उपरीनोस्याधीनः । निहन्यते निघ्नः, घञर्थेकविधानम् (वा०) । आयत्यते नियुज्यते- आयत्तः । गृह्यते गृह्यकः, पदास्वैरिबाह्येति (सू०) क्यप् ॥ १६ ॥ खलं पुनाति खलपूः । बहु करोति बहुकरः, दिवाविभेति (सू०) टः, अत एत बहुकरी मार्जनी, बहुधान्यार्जक इत्येके । दीर्घं चीरेण सुव्रति सूत्रयते वा दीर्घसूत्रः । जडति जाल्मः । (कुण्ठः) कुठि आलस्ये । मन्दोलसः ॥ १७ ॥ अलं कर्मणेलंकर्मीणः, पर्यादयोग्लानाद्यर्थेचतुर्थ्येति (वा०) समासः, अषडक्षाशितेति (सू०) खः । (क्रियावान्) नित्ययोगेव(म)तुप् (का०) । (कार्मः) कार्मस्ताच्छील्ये (सू०) इति साधुः । कर्मणि घटते कर्मठः, कर्मणिघटोठच् (सू०) ॥ १८ ॥ कर्मणि साधु कर्मण्यं वेतनं भुङ्क्ते कर्मण्यभुक् । कर्म करोति कर्मकरः, कर्मणिभृतौ (सू०) इति टः । (कर्मकारः) कर्मण्यण् (सू०), विना भृतिं कर्मसंपादकः । (अपस्नातः) अपेति विरुद्धार्थः । (मृतस्नातः) मृतसंस्कारार्थं स्नापितः । शुष्कली मांसोपलक्षणं, तामत्ति शौष्कलः [शाष्कलः], शेषे (सू०) इत्यण् ॥ १९ ॥ बुभुक्षा संजातास्य (बुभु-

बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः ।
पराह्नः परपिण्डादो भक्षको घस्मरोऽद्मरः ॥ २० ॥
आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते ।
उभावात्मंभरिः कुक्षिंभरिः स्वोदरपूरके ॥ २१ ॥
सर्वान्नीनस्तु सर्वान्नभोजी गृध्नुस्तु गर्धनः ।
लुब्धोऽभिलाषुकस्तृष्णक् समौ लोलुपलोलुभौ ॥ २२ ॥
सोन्माद(उन्मद)स्तून्मदिष्णुः स्यादविनीतः समुद्धतः ।
मत्ते शौण्डोत्कटक्षीबाः कामुके कमितानुकः ॥ २३ ॥
कम्रः कामयिताभीकः कमनः कामनोऽभिकः ।
विधेयो विनयग्राही वचने स्थित आश्रवः ॥ २४ ॥
वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः ।
धृष्टे धृष्णुर्वि(धृष्णग्वि)यातश्च प्रगल्भः प्रतिभान्विते ॥ २५ ॥

क्षितः)। क्षुध्यति स्म क्षुधितः । अत्तुमिच्छति जिघत्सुः । अशनमिच्छति, सुप आत्मनःक्यच् (सू०), अशनायोदन्येति (सू०) साधुः, ततः क्ते, इट् । परादन्नमस्य पराह्नः । अत्ति तच्छी॰ लोऽद्मरः, सृघस्यदःक्मरच् (सू०), निर्देशात्पक्षे घस्लादेशः, घस्लृ अदने वा ॥ २० ॥ आ– ईषद्दीव्यति स्म– आद्यूनः, दिवोविजिगीषायां (सू०) इति नत्वम् । उदरेण भृतः (उदरे प्रसितः) औदरिकः, उदराट्ठगाद्यूने (सू०)। आत्मानं बिभर्त्यात्मंभरिः, आत्मोदरयोर्भृञः (सू०) इति खिः । उदरंभरिरपि । (कुक्षिंभरिः) कुक्षौचेतिवक्तव्यात् (वा०) खि(च)। स्वोदरयोः क्रमादात्मोदरयोः पूरकः ॥ २१ ॥ सर्वाण्यन्नानि भक्षयति सर्वान्नीनः, अनुपदसर्वान्नायानयमिति (सू०) खः । (गृध्नुः) त्रसिगृधीति (सू०) क्नुः । (गर्धनः) जुचङ्क्रम्येति (सू०) युच् । अभिलषति तच्छीलोऽभिलाषुकः, लषपतपदेत्युकञ् (सू०)। तृष्यति तच्छीलस्तृष्णक्, स्वपितृषोर्नजिङ् (सू०), तृष्णग्जान्तः, लुब्धे– उपचारः । तृषितस्तर्षितः पिपासितश्च । भृशं लुम्पति भृशं लुभ्यति (लोलुप इ०), यङ्लुगन्तादच् । केचित्पूर्वैः संबध्नन्ति । लालसो लम्पटश्च ॥ २२ ॥ उन्माद्यति तच्छील उन्मदिष्णुः– भूताद्याविष्टः, अलंकृञ्निराकृञिति (सू०) इष्णुच् । (अविनीतः) निर्मर्यादोऽपि । मद्येन माद्यति स्म मत्तः । शुण्डायां भवः शौण्डः शुण्डास्त्यस्य वा, अण्प्रकरणे ज्योत्स्नादिभ्यउपसंख्यानात् (वा०)। उत्क्रान्तः कटीछादनादुत्कटः, उद्रिक्तो वा, संप्रोदश्चकटच् (सू०)। क्षीबते स्म क्षीबः, क्षीबृ मदे, अनुपसर्गात्फुल्लक्षीबेति (सू०) साधुः । कामयते तच्छीलः (कामुक इ०), लषपतपदेत्युकञ् (सू०), तृन् (सू०) ॥ २३ ॥ (कम्रः) नमिकम्पीति (सू०) रः । (कमनः) अनुदात्तेतश्चेति (सू०) युच्, औणादिकस्त्वपरः । कामनः कमनोऽभिक इति तु युक्तः पाठः, आयादयआर्धधातुकेवा (सू०) इति पक्षे कर्मणिङ् । अनुकाभिकाभीकःकमितेति (सू०) अन्वभिभ्यां के (कनि) साधवः । [छेको विदग्धे व्यसनिपञ्चभद्रावुपप्लुते । वेश्यापतिर्भुजंगः स्यात्षिड्गः पल्लविको विटः ॥] विधातव्यो विधेयो यथेष्टं विनियोज्यः । विनयः शास्त्रजः संस्कार इन्द्रियजयो वा । आशृणोति वाक्यमाश्रवः॥ २४ ॥ (वश्यः) वशंगतः (सू०) इति यत् । प्रणेतव्य आयत्तः (प्रणेयः)। प्रणेयान्ताः षडेकार्था इत्येके । निभृतोऽचपलः । प्रश्रयति प्रश्रितः । धृष्णोति स्म धृष्टः, धृषिशसीवैयात्ये (सू०) इतीडभावः । धृष्णोति तच्छीलो धृष्णुः, त्रसिगृधीति (सू०) क्नुः । धृषेश्चेतिवक्तव्यात् (वा०) नजिङि धृष्णक् । विरुद्धं याति स्म वियातः । प्रगल्भते प्रगल्भः । प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता (रुद्रः), प्रतिभाऽस्त्यस्यामिति (प्रतिभा)। प्रत्युत्पन्नमतिस्तत्कालधीश्च ॥ २५ ॥ शालां प्रवेष्टुमर्हति शालीनः, शालीन-

स्यादधृष्टे तु शालीनो विलक्षो विस्मयान्विते ।
अधीरे कातरस्त्रस्नौ भीरुभीरुकभीलुकाः ॥ २६ ॥
आशंसुराशंसितरि गृहयालुर्ग्रहीतरि ।
श्रद्धालुः श्रद्धया युक्ते पतयालुस्तु पातुके ॥ २७ ॥
लज्जाशीलेऽपत्रपिष्णुर्वन्दारुरभिवादके ।
शरारुर्घातुको हिंस्रः स्याद्वर्धिष्णुस्तु वर्धनः ॥ २८ ॥
उत्पतिष्णुस्तूत्पतितालंकरिष्णुस्तु मण्डनः ।
भूष्णुर्भविष्णुर्भविता वर्तिष्णुर्वर्तनः समौ ॥ २९ ॥
निराकरिष्णुः क्षिप्नुः स्यात्सान्द्रस्निग्धस्तु मेदुरः ।
ज्ञाता तु विदुरो विन्दुर्विकासी तु विकस्वरः ॥ ३० ॥
विसृत्वरो विस्मरः प्रसारी च विसारिणि ।
सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥ ३१ ॥
क्रोधनोऽमर्षणः कोपी चण्डस्त्वत्यन्तकोपनः ।
जागरूको जागरिता घूर्णितः प्रचलायितः ॥ ३२ ॥

कौपीनइति (सू०) साधुः । विरुद्धं लक्षयते विरुद्धं लक्षमस्य वा विलक्षः, निष्प्रतिपत्तिरित्यर्थः । ईषत्तरति कातरः, कतरस्यायं वा, अत्र कातरा स्त्रीति न स्यात् । इतो निद्रालस्तनास्ताच्छील्ये । त्रस्यति त्रस्नुः, त्रसिगृधीति (सू०) क्नुः । (भीरुः, इ०) बिभेति तच्छीलः, भियःक्रुक्लुकनौ (सू०), क्रुकन्नपि वक्तव्याच्च (वा०) । दरितो भीतस्त्रस्तश्चकितश्च ॥ २६ ॥ (आशंसुः) सनाशंसभिक्षउः (सू०) । गृह्यते गृहयालुः, स्पृहिगृहीति (सू०) आलुच् । श्रद्धधाति तच्छीलः श्रद्धालुः । आद्यः पतिश्चौरादिकोऽदन्तः, पतयाति पतयालुः, स्पृहिगृहीति (सू०) आलुच् । पतति तच्छीलः पातुकः, लषपतपदेत्युकञ् (सू०) ॥ २७ ॥ (अपत्रपिष्णुः) अपत्रपते तच्छीलः, भ्राज्यलंकृञिति वक्तव्यात् (वा०) इष्णुच् । वन्दते तच्छीलः (वन्दारुः), शॄवन्द्योरारुः (सू०) । (शरारुः, इ०) शृणाति हन्ति हिनस्ति च तच्छीलः, शॄवन्द्योरारुः (सू०), लषपतपदेत्युकञ् (सू०), नमिकम्पीति (सू०) रश्च । (वर्धिष्णुः, इ०) अलंकृञिति (सू०) इष्णुच्, अनुदात्तेतश्चेति (सू०) युच् । भवति तच्छीलः (भूष्णुः), ग्लाजिस्थश्चग्स्नुः । (भविष्णुः, इ०) भुवश्चेति (सू०) इष्णुच्, तृन् (सू०) । (वर्तिष्णुः, इ०) इष्णुच्, युच ॥ २९ ॥ क्षिपति तच्छीलः क्षिप्नुः, त्रसिगृधीति (सू०) क्नुः । [सान्द्रशब्दोऽत्यन्तार्थो भवति] सान्द्रः पीनः स्निग्धश्च (सान्द्रस्निग्धः) । मेद्यति मेदुरः, भञ्जभासमिदो घुरच् (सू०) । वेत्ति तच्छीलो विदुरः, विदिभिदिच्छिदेःकुरच् (सू०) । वेत्ति विन्दुः, विन्दुरिच्छुः (सू०) इति साधुः । (विकासी) विकसति तच्छीलः, वौकस(ष)लसेतिघिनुण् (सू०) । (विकस्वरः) स्थेशभासपिसकसोवरच् (सू०) ॥ ३० ॥ (विसृत्वरः) विसरति तच्छीलः, इण्नशजीति (सू०) क्वरप् । (विस्मरः) सृघस्यदः क्मरच् (सू०) । (प्रसारी) प्रेलपसृद्रुमथेति (सू०) घिनुण् । (सहिष्णुः, इ०) सहेरिष्णुच्, युच । (क्षन्ता) क्षमेस्तृन्, ऊदित्वाद्वेट् । (तितिक्षुः) तिजेःक्षमायाम् (वा०), गुप्तिजीति (सू०) सन्, सनाशंसेति (सू०) उः । (क्षमी) शमित्यष्टाभ्योघिनुण् (सू०) ॥ ३१ ॥ (क्रोधनः) क्रुधमण्डार्थेभ्यश्चेति (सू०) युच् । कोपनो रोषणश्च । (चण्डः) चडि कोपे । (जागरूकः) जागरूकश्च (सू०) इति- ऊकञ् , (जागरिता) चकारात्तृन् । प्रचल इवाचरन् प्रचलायितः, य उपविष्टो निद्रया घूर्णितः

स्वप्नक् शयालुर्निद्रालुर्निद्राणशयितौ समौ ।
पराङ्मुखः पराचीनः स्यादवाङप्यधोमुखः ॥ ३३ ॥
देवानञ्चति देवद्र्यङ् विष्वद्र्यङ् विष्वगञ्चति ।
यः सहाञ्चति सध्र्यङ् स स तिर्यङ् यस्तिरोऽञ्चति ॥ ३४ ॥
वदो वदावदो वक्ता वागीशो वाक्पतिः समौ ।
वाचोयुक्तिपटुर्वाग्ग्मी वावदूकोऽतिवक्तरि ॥ ३५ ॥
स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ।
दुर्मुखे मुखराबद्धमुखौ शक्तः(क्तः) प्रियंवदे ॥ ३६ ॥
लोहलः स्यादस्फुटवाग्गर्ह्यवादी तु कद्वदः ।
समौ कुवादकुचरौ स्यादसौम्यस्वरोऽस्वरः ॥ ३७ ॥
रवणः शब्दनो नान्दीवादी नान्दीकरः समौ ।
जडोऽज्ञेऽने(जडोऽज्ञ ए)डमूकस्तु वक्तुं श्रोतुमशिक्षिते ॥ ३८ ॥
तूष्णींशीलस्तु तूष्णीको नग्नोऽवासा दिगम्बरः ।
निष्कासितोऽवकृष्टः स्यादपध्वस्तस्तु धिक्कृतः ॥ ३९ ॥

॥ ३२ ॥ (स्वप्नक्) स्वपितृषोर्नजिङ् (सू०) । (शयालुः) शीङश्चेतिवक्तव्यादालुच् (शीङो॰ वाच्यः) । (निद्रालुः) निद्राति तच्छीलः, निद्रातन्द्रेश्चालुच् (स्पृहिगृहिपतिदयीति) । निद्राति स्म निद्राणः, संयोगादेरातोधातो (सू०) इति निष्ठा नत्वम् । पराञ्चतीति पराङ् (पराचीनः), विभाषाञ्चेरादिक्स्त्रियाम् (सू०) इति स्वार्थे खः । संमुखीनस्त्वभिमुखः । अवाञ्चत्यवाङ्, अवाचीनोपि ॥ ३३ ॥ (देवद्र्यङ्, इ०) विष्वग्देवयोश्चटेरद्र्यञ्चतावप्रत्यये (सू०), विष्वक्सर्वतोर्थेऽव्ययम् । (सध्र्यङ्) सहस्य सध्रिः (सू०) इत्यञ्चतौ परं सध्र्यादेशः । (तिर्यङ्) तिरसस्तिर्यलोपे (सू०) ॥ ३४ ॥ वदति (वदः) वदावदः, चरिचलिपतिवदिभ्योद्वित्वमभ्यासस्याग्वा (वा०) । वाचो युक्तौ पटुः, वाग्दिक्पश्यद्भ्योयुक्तिदण्डहरेषु (वा०) इति षष्ठ्या अलुक् । प्रशस्ता वागस्त्यस्य वाग्ग्मी, वाचोग्मिनिः (सू०) । वावद्यते तच्छीलो वावदूकः, यजजप- (सू०) इत्यत्र वदेरनु[प]देशः कार्य इति **पदकार**वाक्यादूकः । वक्तरीति, तृन् (सू०) । प्रवाक् प्रगल्भः सुमुखश्च ॥ ३५ ॥ (जल्पाकः) जल्पभिक्षेति (सू०) ताच्छील्ये षाकन् । (वाचाल इ०) आलजाटचौबहुभाषिणि (सू०) । गर्ह्यजापी जञ्जपूकः । मुखेन वाग्लक्ष्यते, निन्दितं मुखमस्त्यस्य मुखरः, (रप्रकरणे) खमुखकुञ्जेभ्योरोवक्तव्यः (वा०) । अबद्धमनियन्त्रितं मुखमस्त्यस्याबद्धमुखः । शक्नोति वक्तुं शक्तः । (प्रियंवदः) प्रियवशेवदःखच् (सू०) ॥ ३६ ॥ (लोहलः) लुह कत्थनादौ । कुत्सितं वदतीति कद्वदः, रथवदयोश्च (सू०) इति कोः कत् । अनुत्तरो यद्वदश्च । कुत्सितो वादोस्य कुवादः । कुत्सितं चरति कुचरः, पचाद्यच् (नन्दिग्रहीति) । विपरीतः स्वरोस्य- अस्वरः, नञ् तद्विरुद्धनर्थवत् ॥ ३७ ॥ (रवणः, इ०) रौति शब्दायतीति, चलनशब्दार्थात् (सू०) इति युच् । नान्दीं मङ्गलपाठं करोति नान्दीकरः, दिवाविभेति (सू०) टः । (जडः) जल घान्ये (चान्द्रोधातुः), डलयोरेकत्वम् । अज्ञोऽतीक्ष्णधीः । मातृमुखो मातृशासितश्च । तीक्ष्णधीस्तु कुशाग्रीयः । न- एडोपि (अ)वर्करोपि मूकः- एडमूकसदृशो वा- अनेडमूकः, नञिवयुक्तमन्यसदृशाधिकरणेतथाह्यर्थः (भाष्यत्र०), एडो हि बधिरः ॥ ३८ ॥ (तूष्णीकः) तूष्णीमः शीलेकोमलोपश्चवक्तव्यः (वा०) । ओणजी व्रीडे, नजते स्म नग्नः । अविद्यमानं वासोस्य- अवासाः । अवकृष्यते दूरीक्रियते स्मावकृष्टः, निःसारित इत्यर्थः ॥ २९ ॥ आत्तो गृहीतो गन्धोभिमानोस्यात्तगन्धः ।

आत्तगन्धो(र्वो)भिभूतः स्याद्दापितः साधितः समौ ।
प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः ॥ ४० ॥
निः(नि)कृतः स्याद्विप्रकृतो विप्रलब्धस्तु वञ्चितः ।
मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥ ४१ ॥
अधिक्षिप्तः प्रतिक्षिप्तो बद्धे कीलितसंयतौ ।
आपन्न आपत्प्राप्तः स्यात्कान्दिशीको भयद्रुतः ॥ ४२ ॥
आक्षारितः क्षारितोऽभिशस्ते संकसुकोऽस्थिरे ।
व्यसनार्तोपरक्तौ द्वौ विहस्तव्याकुलौ समौ ॥ ४३ ॥
विक्लवो विह्वलः स्यात्तु विवशोऽरिष्टदुष्टधीः ।
कश्यः कशार्हे सन्नद्धे त्वाततायी वधोद्यते ॥ ४४ ॥
द्वेष्ये त्वक्षिगतो वध्यः शीर्षच्छेद्य इमौ समौ ।
विष्यो विषेण यो वध्यो मुसल्यो मुसलेन यः ॥ ४५ ॥
शिश्विदानोऽकृष्णकर्मा चपलश्चिकुरः समौ ।
दोषैकदृक् पुरोभागी निकृतस्त्वनृजुः शठः ॥ ४६ ॥

चत्वार एकार्था इत्येके । (समौ) दण्डितार्थे । प्रत्यादिश्यते स्म प्रत्यादिष्टः, अनङ्गीकृत इत्यर्थः । अपविद्धोपि ॥ ४० ॥ निःक्रियते खलीक्रियते स्म निःकृतः । मनसि हतो मनोहतः । प्रतिबन्धः प्रवृत्तिनिवारणार्थः ॥४१॥ प्रतिक्षिप्यते न्यक्क्रियते स्म प्रतिक्षिप्तः । (कीलितः) कील बन्धने । प्राप्त आपदं आपत्प्राप्तः, प्राप्तापन्नेचद्वितीययेति (सू०) समासः । (कांदिशीकः) कां दिशं व्रजामीति व्याकुलः, पृषोदरादिः (सू०) । भयाद् द्रुतः पलायितः ॥ ४२ ॥ आक्षार्यते स्वरूपाच्चाल्यते– आक्षारितः, अलीकोत्पन्नपातकव्यपदेशः । अभिशस्तोभिदूषितः, मैथुनं प्रतीत्येके । (संकसुकः) समिकसउकन् (उ०), आनिश्चित इत्येके । समावित्येव । व्यस्यति श्रेयोमार्गाद्व्यसनं तेन ऋतो व्यसनार्तः, ऋतेचतृतीयासमासे (सू०) इति वृद्धिः । उपरज्यते स्मोपरक्तः । विगतो हस्तो यस्य स विहस्तः, किंकर्तव्यतामूढत्वात् ॥ ४३ ॥ विक्लवते कातरीभवति विक्लवः, क्लविधातुगणापरिसमाप्तेर्लौकिकः । विरुद्धं ह्वलति विह्वलः । विरुद्धं वष्टि कामयते विवशः । अरिष्टेन मरणचिह्नेन श्वासादिना दुष्टा धीर्यस्य । कशा चर्मयष्टिस्तद्धातोप्युपचारात्, तामर्हति कश्यः–अश्वादिः, दण्डादित्वाद्यः (सू०) । सन्नद्धः सन् यो वधार्थमुद्यतः स आततः सोद्योगः सन्नेति वधाद्यर्थं धावति अवश्यं, आर्तं पलायमानं तायते वा– आततायी । वध उपलक्षणं यत्स्मृतिः– अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते त्वाततायिनः ॥ ४४ ॥ अक्षिगतो यथा किंशारुकादिः खेदकृत् । वधं शीर्षच्छेदं चार्हति । (विष्यः) नौवयोधर्मेति (सू०) यत् । (मुसल्यः) मुसलेन वध्य इत्यर्थः ॥४५॥ (शिश्विदानः) श्विदि श्वैत्ये, लिटःकानज्वा (सू०) । अकृष्णं निष्पापत्वाच्छुक्लं कर्मास्याकृष्णकर्मा । चप्यते चपलः, चप सान्त्वने । चिनोति चिकुरः, चकेर्वा रूपं, लक्ष्यं च– तां वीक्ष्य लीलाचिकुरामनङ्गः स्वचापसौन्दर्यमदं मुमोच (कु० सं०) । चलाचले स्यात्तरलश्चापलश्चचलश्चलः । दोष एकस्मिन्नेव दृग्ज्ञानमस्य, यत्कात्यः– दोषैकग्राहिहृदयः पुरोभागीति कथ्यते । पुरोग्रे भजते पूर्वं[सूर्पं]वत्पुरोभागी । निकृणोति हिनस्ति स्म निकृतः । (शठः) शठ कैतवे ॥ ४६ ॥ कर्णे जपति सूचयति कर्णेजपः, स्तम्बकर्णयोरमि

कर्णेजपः सूचकः स्यात्पिशुनो दुर्जनः खलः ।
नृशंसो घातुकः क्रूरः पापो धूर्तस्तु वञ्चकः ॥ ४७ ॥
अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।
कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः ॥ ४८ ॥
निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोपि सः ।
वनीयको याचनको मार्गणो याचकार्थिनौ ॥ ४९ ॥
अहंकारवानहंयुः शुभंयुस्तु शुभान्वितः ।
दिव्योपपादुका देवा नृगवाद्या जरायुजाः ॥ ५० ॥
स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोण्डजाः ।
उद्भिदस्तरुगुल्माद्या उद्भिदुद्भिज्जमुद्भिदम् ॥ ५१ ॥
सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥ ५२ ॥

अपोः (सू०) इत्यच् । पेशयत्येकदेशेन सूचयति पिशुनः, पिश अवयवे, अपिश्यति खण्डयतीति श्रीभोजः । दुष्टो जनः, दुष्टं जनयति वा दुर्जनः । खं शून्यं लाति खलः, खलति चलति वा । नृन्शंसति नृशंसः । हन्ति तच्छीलो घातुकः, लषपतपदेति (सू०) उकञ् । कुङ् गतिकौटिल्ये (अस्मात्) क्रूरः, कृणाति वा । पिबति धर्मं पापः, पापं वास्त्यस्य । धूर्वते (धुर्वति स्म) धूर्तः ॥४७॥ मुह्यति मूढः । यथैव जातस्तथैव स्थितोऽसंस्कृतत्वाद्यथाजातः । मुह्यति मूर्खः, मुहेःखोमूर्च (उ०) । विधाया भोजनस्यापत्यमिव वैधेयः, विधेयात्स्वार्थेऽण् वा । बाल्यते बालिशः, बाडृ आप्लाव्ये, बडिशाच्छेपेऽण् वा । मातृशासितश्च । यद्भविष्यो दैवपरः । कुत्सितोर्यः स्वामी कदर्यः । कल्पते कृपणः । क्षुद्यतेल्पत्वात्क्षुद्रः । किंचित्पचति किंपचानः, औणादिक आनच् । मितं पचति मितंपचः, मितनखेच (सू०) इति पचः खच् । कीनाशोपि ॥ ४८ ॥ दुष्टा विधा प्रकारो भोजनं वास्य दुर्विधः । दीयते दीनः, दीङ् क्षये, स्वादयओदितः (ग०) । दुःस्थः कीकटश्च । (वनीयकः) वनु याचने । याचते याचनः, युच् कन् । मार्गति मार्गणः । अर्थयते तच्छीलोऽर्थी, अर्थाच्चासंनिहितइति (सू०) इनिर्वा । तर्कु[र्क]कश्च ॥ ४९ ॥ अहमिति विभक्तिप्रतिरूपको निपातः, अहमस्त्यस्य– अहंयुः, अहंशुभमोर्युस् (सू०), निपातनान्मान्तत्वम् । दिवि भवा दिव्या उपपा[प]द्यन्ते दिव्योपपादुकाः, द्युप्रागपागिति (सू०) यत्, लषपतपदेत्युकञ् (सू०) । अदृष्टसंहतेभ्यः परमाणुभ्यो जायन्ते सद्य इत्यर्थः । अयोनिजत्वार्थं पुनरिहोक्ताः । नरो गोमहिष्याद्याश्च जरायुजाः, जरायुर्गर्भशय्या ॥ ५० ॥ आद्यशब्दान्मशकयूकाद्याः । आदिशब्दः प्रकारे व्यवस्थायां वा पिपीलिकाद्यर्थः । आद्यशब्दात्तृणाद्याः । उद्भिनत्ति भुवमुद्भित्– उद्भिदं च, क्विप्, कश्च । उद्भेदनमुद्भित्ततो जायत इत्युद्भिज्जं, डः । इत्थमयोनिजजरायुजस्वेदजाण्डजोद्भिज्जत्वेन पञ्चधा भूतसर्गः । एषामेवा(वा)न्तरभेदाच्चतुर्दशविधत्वं, यदाहुः– अष्टविकल्पो दैवस्तिर्यग्योनिश्च पञ्चधा भवति । मानुष्य एकविधः स समासाद् भौतिकः सर्गः ॥ पैशाचो राक्षसो याक्षो गान्धर्वः शाक्र एव च । सौम्यश्च प्राजापत्यश्च ब्राह्मोष्टौ देवयोनयः ॥ ५१ ॥ सुन्दरं सुष्ठु नन्दयतीति नैरुक्ताः । रोचते रुचिरं, रुचिं राति वा । चरति मनोस्मिंश्चारु । सुष्ठु समं शोभना समाप्नोति वा सुषमं, लक्षणया चारु । साध्नोति साधु । शोभते शोभनं, युच् । काम्यते कान्तम् । रोचते रुच्यं, राजसूयसूर्यमृषोद्यरुच्येति (सू०) कर्तरि साधुः । जानातीति ज्ञं, इगुपधज्ञेति (सू०) कः, मन एव ज्ञं यत्र तन्मनोज्ञम् । सर्वैर्मन्यते मञ्जु, धर्मि । (मञ्जुलं) धर्ममात्रवृत्त्या तु मत्वर्थीयो लः श्यामलपिङ्गलादिवत् । हारि वल्गु मनोहारि च ॥ ५२ ॥ आसिच्यत

तदा(द)सेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।
अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥ ५३ ॥
निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ।
कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ॥ ५४ ॥
मलीमसं तु मलिनं कच्चरं मलदूषितम् ।
पूतं पवित्रं मेध्यं च वीध्रं तु विमलार्थ(त्म)कम् ॥ ५५ ॥
निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ।
असारं फल्गु शून्ये तु वाशिकं तुच्छरिक्तके ॥ ५६ ॥
क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः ।
मुख्यवर्यवरेण्याश्च प्रवर्हानवरार्ध्यवत् ॥ ५७ ॥
परार्ध्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम् ।
श्रेयाञ्श्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने ॥ ५८ ॥
स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ ५९ ॥

आप्याय्यते दृगनेन– आसेचनकं, यस्य दर्शनाद् दृग्न तृप्यति । आभिमुख्येनेष्यतेभीष्टम् । अभ्याप्तुमिष्टम-भीप्सितम् । हृदयस्य प्रियं हृद्यं, हृदयस्यप्रियइति (सू०) यत् , हृदयस्यहृल्लेखेति (सू०) हृत् । दयते चित्तमादत्ते दयितम् । (वल्लभं) वल्लति सौत्रः प्रीत्यर्थः । प्रीणाति प्रियं, कः ॥ ५३ ॥ निकृष्यते निकृष्टः । एवं प्रतिकृष्टः । अर्यत्यर्वा । रिफति हिनस्ति रेफः । यापिता गुणा अस्माद्याप्यः, जपादित्वाद्वत्वे (ग०) याव्योपि । अवोभवोवमः । अधोभवोधमः, अवोधसोर्लोपश्च (सू०) इति मः सलोपश्च । कुत्सितं पूयते कुपूयः । नोद्यतेवद्यः, अवद्यपण्यवर्यागर्ह्येति (सू०) साधुः । खेटति त्रस्यतीति खेटः, खिट उत्त्रासने । अणति रटतीत्यणकः, अच् कुत्सायां कन् (कुत्सिते) । कट्वरोपि ॥ ५४ ॥ (मलिनं, मलीमसं) मलोस्त्यस्येति, ज्योत्स्नातमिस्रेति (सू०) साधुः । कुत्सितं चरति कच्चरम् । म्लानं कल्मषं च । पुनाति पूतम् । पूयतेनेनेति पवित्रम् । मेधनीयं मेध्यं, मेधायां साधु वा । विशेषेणेन्द्धे वीध्रं, रक् ॥५५॥ (निर्णिक्तं) णिजिर् शौचे । (मृष्टं) मृजू(ष्) शुद्धौ । निष्क्रान्तं शोध्यान्निःशोध्यम् । अविद्यमानोवस्करो वर्चे-स्कोस्यानवस्करम् । फलति विशीर्यते फल्गु, ञिफला विशरणे । शुने हितं शून्यं शुन्यं च, उगवादि-भ्योयत् (सू०) इत्यत्र शुनःसंप्रसारणंवाच्चदीर्घत्वम् (ग०) । उश्यते काम्यतेनावृतत्वाद्वाशिकम् । तुद्यते स्म तुच्छम् । रिच्यते रिक्तं, रिच वियोजने ॥ ५६ ॥ प्रधीयते प्रधानम् । प्रकृष्टं मुखमस्य प्रमुखः । प्रकृष्टो वेकः पृथक्त्वमस्य प्रवेकः । नास्त्युत्तमोस्मादनुत्तमः । अतिशयेनोद्गत उत्तमः । मुखमिव मुख्यः, शाखादिभ्योयः (सू०) । वरणीयो वर्यः । व्रियते वरेण्यः, वृञएण्यः (उ०) । प्रकृष्टो वर्हः परिच्छदोस्य (प्रवर्हः), वृह वृद्धौ वर्ह प्राधान्ये वा, प्रवृहत्युद्यच्छते वा प्रवर्हः, वृह उद्यमे । अनवरार्धे मुख्ये भागे भवोऽनवरार्ध्यः ॥५७॥ परार्धे भवः परार्ध्यः, परावराधमोत्तमपूर्वाच्चेति (सू०) यत् । अगति न गच्छति वा–अग्रं [ग्रः] । प्रकृष्टमग्रं हरति प्राग्रहरः । प्राग्रे भवः प्राग्र्यः । (अग्र्यः, इ०) अग्राद्यत् (सू०), घच्छौच (सू०) । अग्रणीर्ग्रामणीः शालीवरश्च । (श्रेयान्, इ०) अतिशयेन प्रशस्यः, इष्ठन्नीयसुनौ, प्रशस्यस्यश्रः (सू०) । पुष्यति पुष्कलः । अतिशयेन सन् सत्तमः ॥ ५८ ॥ पुरुषो व्याघ्र इव शूरः पुरुषव्याघ्रः, गोनागः । आद्यशब्दान्मुखचन्द्रपादपद्माद्याः, उपमितंव्याघ्रादिभिः (सू०) इति समासः । श्रेष्ठस्यार्थो गोचरो विषय एषाम् ॥ ५९ ॥ उपसृज्यते नियुज्यत उपसर्जनं, आविष्टलिङ्गत्वा-

अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ।
विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् ॥ ६० ॥
वड्रोरुविपुलं पीनपीव्नी तु स्थूलपीवरे ।
स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु ॥ ६१ ॥
स्त्रियां मात्रात्रुटी पुंसि लवलेशकणाणवः ।
अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ॥ ६२ ॥
प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।
पुरुहु(हं) पुरु भूयिष्ठं स्फिरं भूयश्च भूरि च ॥ ६३ ॥
परःशताद्यास्ते येषां परा संख्या शतादिकात् ॥ ६४ ॥
गणनीये तु गणेयं संख्याते गणितमथ समं सर्वम् ।
विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम् ॥ ६५ ॥
समग्रसकलाखण्डपूर्वादि स्यादनूनके ।
घनं निरन्तरं सान्द्रं पेलवं विरलं तनु ॥ ६६ ॥

क्लीबे, यथा— उपसर्जनं भार्या । अप्राग्र्यस्तु वाच्यलिङ्गः । उपाग्रं च । विशी(स्ती)र्यते विशंकटः, वेःशालच्-शंङ्कटचौ (सू०) । प्रथते पृथुः । गुणमात्रवृत्तेर्लः (पृथुलः) । बृंहते (बर्हति) बृहत् । महति महत्, वर्तमानेपृषद्बृहन्महदिति (उ०) निपात्यते ॥६०॥ वलते वड्रम् । अवते— उरु, उङ् शब्दे । विपोलति विपुलं, पुल महत्वे, कः । विकटं च । प्यायते पीनः, क्तः, प्यायःपी (सू०), ओदितश्च (सू०) इति निष्ठा नत्वम् । (पीवन्, पीवरं) क्वनिप्करपच् । (स्थूलं) स्थूल परिबृंहणे । घनो बहलश्च । स्तौति स्तोकम् । अल्यते— अल्पम् । क्षुद्यते क्षुल्लः । सुष्ठु— उक्ष्यत आप्याय्यते सूक्ष्मम् । दभ्यते दभ्रम् । (कृशं) कृश तनूकरणे । तन्यते तनु ॥६१॥ मीयतेऽल्पत्वान्मात्रा । त्रुटति त्रुटिः । लूयते लवः । लिश अल्पीभावे, लिश्यते लेशः । कणति निमीलति कणः । अणत्यणुः । अतिशयेनाल्पं (अल्पीय इ०), इष्ठन्नीयसुनौ । (कनीयः) युवाल्पयोःकनन्यतरस्याम् (सू०) । अतिशयेनाणु— अणीयः, तुरिष्ठेमेयस्सु (सू०), टेः (सू०) इति टेर्लोपः ॥ ६२ ॥ प्रभवति प्रभूतम् । प्रचीयते प्रचोयते वा प्रचुरम् । प्राज्यते प्राज्यं, प्रकर्षेणाजी(वी)यते वा । न दभ्रमदभ्रम् । बंहते बहु । (बहुलं) प्राग्दिन्मत्वर्थीयो लः । पूर्वते पुरु । पुर्विति हूयते पुरुहु । अतिशयेन बहु भूयिष्ठं, बहोर्लोपोभूचबहोः (सू०), इष्ठस्ययिट्च (सू०) इति भूरादेशो यिडागमश्च । स्फायते स्फिरम् । भवति भूरि ॥ ६३ ॥ शतात्परं परःशतं (परःशता अपि), यत्— ब्रह्मर्षयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि (उ० रा०), पारस्करादित्वात्सुट् । श्रीभोजस्तु परःशब्दं निपातं मन्यते, यथा परोवरः, परोक्षम् ॥ ६४ ॥ (गणेयं) उणादौ गणेरेयः । (गणितं) कर्मणि क्तः । समति समं सर्वार्थे सर्वनाम, यथा— सूर्यः समेषां समः । सर्वति सरति वा सर्वम् । वेवेष्टि विश्वम् । नास्ति शेषमस्याशेषम् । कृती वेष्टने, कृत्यते व्याप्यतेनेन कृत्स्नम् । समस्यते— एकीक्रियते समस्तम् । निवृत्तं खिलाच्छून्यान्निःखिलम् । नास्ति खिलमस्याखिलम् । निष्क्रान्तं शेषान्निःशेषम् ॥ ६५ ॥ संगतमग्रमस्य समग्रं, समं ग्रसते वा । सह कलाभिर्भागैर्वर्तते सकलम् । न खण्डं भिन्नमखण्डम् । पिपर्ति पूर्वति वा पूर्वम् । पूर्णमित्येके । आदिशब्दादभिन्नादि । नास्त्यूनमस्यानूनम् । (घनं) मूर्तौघनः (सू०) इति साधुः । निर्गतमन्तरं व्यवधानमस्य निरन्तरम् । सहान्यते बध्यते सान्द्रम् । निबिडं निविरीशं(सं) गाढं [निरन्तरे] च । पेल्यते क्षिप्यते पेलवम् । विराल्यन्तरं विरलम् । तन्यते तनु । शिथिलं श्लथं च ॥ ६६ ॥ संभूता आपोऽत्रेत्युपचारात्समीपं, द्व्यन्तरुप-

समीपे निकटासन्नसंनिकृष्टसनीडवत् ।
सदेशाभ्यास(श)सविधसमर्यादसवेशवत् ॥ ६७ ॥
उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम् ।
संसक्ते त्वव्यवहितमपदान्तरमित्यपि ॥ ६८ ॥
नेदिष्ठमन्तिकतमं स्याद् दूरं विप्रकृष्टकम् ।
दवीयश्च दविष्ठं च सुदूरे दीर्घमायतम् ॥ ६९ ॥
वर्तुलं निस्तलं वृत्तं बन्धुरं तून्नतानतम् ।
उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गेथ वामने ॥ ७० ॥
न्यङ्नीचखर्वह्रस्वाः स्युरवाग्रेवनतानतम् ।
अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् ॥ ७१ ॥
आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ।
ऋजावजिह्मप्रगुणौ व्यस्ते त्वप्रगुणाकुलौ ॥ ७२ ॥
शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः ।
स्थास्नुः स्थिरतरः स्थेयानेकरूपतया तु यः ॥ ७३ ॥

सर्गेभ्योपईत् (सू०) । निबध्नाति निकटं, संप्रोदश्चेति (सू०.) कटच् । आसीदति स्मासन्नः । संनिकृष्यते स्म संनिकृष्टः । समानं नीडमस्य सनीडं, सविधसनीडसमर्यादसवेशसदेशेषुसामीप्ये (सू०) इति सामीप्यं लक्षणयात्र । समानो देशोस्य सदेशः । अभ्यस्यतेवाप्यतेभ्यासः । (सविध इ०) समाना विधा मर्यादा वेशश्चास्य ॥ ६७ ॥ कण्ठस्य समीपमुपकण्ठम् । अन्तोस्यास्तीत्यन्तिकः । अभ्यर्द्यतेभ्यर्णः, अभेश्चाविदूर्ये (सू०) इतीडभावः । अभिमुखमग्रमस्याभ्यग्रम् । अभित इति निपातः, अभेस्तसिर्वा । नास्ति पटेन तिरस्करिण्यान्तरं व्यवधानमपटान्तरम् ॥ ६८ ॥ अतिशयेनान्तिकं नेदिष्ठं, नेदीयोपि, अन्तिकबाढयोर्नेदसाधौ (सू०) । दूयतेत्र दूरम् । अतिशयेन दूरं दवीयः, स्थूलदूरेति (सू०) यणादि परं लुप्यते पूर्वस्य च गुणः । दृणाति दीर्घम् । आयम्यत आयतं, आयतते वा ॥ ६९ ॥ वर्तते भ्रमति वर्तुलम् । निर्गतं तलं प्रतिष्ठास्य निस्तलं, भूमौ नास्ते तत्र वा रजो न तिष्ठति । बध्नाति गतिं बन्धुरम् । (उन्नतानतं) उन्नतं सदुपाधिशादीषन्नतं, यथा– कण्ठस्य तस्याः स्तनबन्धुरस्य (कु० सं०) । उन्नीयत उच्चम्, डः, उदश्चो वा, आचपराचादिवत्– मयूरव्यंसकादिर्वा (सू०) । प्राश्नुते प्रांशुः । उन्नमति स्मोन्नतम् । ऊर्ध्वमग्रमस्योदग्रम् । ऊर्ध्वं श्रयति स्मोच्छ्रितम् । तुजत्यादत्ते तुङ्गम् । उत्तुङ्गमुद्दुरं च । वसति वामोस्त्यस्य वा वामनः ॥ ७० ॥ नियतमञ्चति न्यक् । निम्नं चीयते नीचं, नीचैर्विद्यतेस्य वा । खर्वति खर्वः । ह्रसति ह्रस्वः । अवनतमग्रमस्यावाग्रं, अधोमुखमित्यर्थः । अवनमति स्मावनतम् । आनमति स्मानतम् । इयर्ति– अराः सन्ति वास्य– अरालम् । वर्ज्यते वृजिनम् । जी(ही)यते जहाति वा जिह्मम् । (ऊर्मिमत्)ऊर्मयो भङ्गाः सन्त्यस्य । (कुञ्चितं) कुञ्च गतिवैकल्ये । नमति स्म नतम् ॥ ७१ ॥ आविध्यत आविद्धम् । भुजो कौटिल्ये, भुग्नम् । वेल्लति वेल्लितम् । वञ्चति वक्रं, रक् । भङ्गुरं च । इयर्ति ऋज्यते वा ऋजुः । प्रकृष्टो गुणोस्य सदृशो गुणेन मौर्व्या वा प्रगुणः । व्यस्यते विपर्यस्यते स्म व्यस्तम् । आकोलत्येकीभवति– आकुलम् ॥ ७२ ॥ शश्वद्भवः शाश्वतः, अव्ययानांभमात्रेटिलोपः (वा०), आराच्छश्वतोर्नेष्यते (इ०) । शाश्वतिकोपि । ध्रुव', ध्रुव स्थैर्ये । नियतं भवं नित्यं, त्यब्नेर्ध्रुवे (वा०) इति त्यप् । (सदातन इ०) सदाभवः सनाभवश्चेति, सायंचिरमिति (सू०) ट्युट्युलौ तुट् च । तिष्ठति तच्छीलः स्थास्नुः, ग्लाजिस्थश्चग्स्नुः (सू०)। अतिशयेन स्थिरः स्थेयान्, प्रियस्थिरेति (सू०) स्थादेशः ॥ ७३ ॥ एकरूपो निर्विकारः । निरवधिं कालं

कालव्यापी स कूटस्थः स्थावरो जङ्गमेतरः ।
चरिष्णुजङ्गमचरं त्रसमिङ्गं चराचरम् ॥ ७४ ॥
चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम् ।
चञ्चलं तरलं चैव पारिप्लवपरिप्लवे ॥ ७५ ॥
अतिरिक्तः समधिको दृढसन्धिस्तु संहतः ।
खक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम् ॥ ७६ ॥
जरठं मूर्तिमन्मूर्तं प्रवृद्धं प्रौढमेधितम् ।
पुराणे प्रतनप्रत्नपुरातनचिरंतनाः ॥ ७७ ॥
प्रत्यग्रोभिनवो नव्यो नवीनो नूतनो नवः ।
नूत्नश्च सुकुमारं तु कोमलं मृदुलं मृदु ॥ ७८ ॥
अन्वगन्वक्षमनुगेनुपदं क्लीबमव्ययम् ।
प्रत्यक्षं स्यादैन्द्रियकमत्यध्य(प्रत्य)क्षमतीन्द्रियम् ॥ ७९ ॥

व्याप्नोति स्थिरत्वात् (कालव्यापी) । कूटेनाचलत्वेन तिष्ठति कूटस्थः, आत्माकाशादिः । तिष्ठति तच्छीलः स्थावरः शैलादिः, स्थेशभासेति (सू०) वरच् । जङ्गमात्प्राणिनोन्यः (जङ्गमेतरः) । (चरिष्णुः) चरेस्ताच्छील्ये- इष्णुच् । भृशं गच्छति जङ्गमः, अकौटिल्येप्यभिधानाद्यङ् (ज्ञा०) । (चरं) चरेरचि चरिचलिपतीति (वा०) वा द्विर्भाव आगागमश्च । त्रस्यति चलत्वात्त्रसम् । इङ्गतीङ्गं, इगि गत्यर्थः ॥ ७४ ॥ चलति तच्छीलश्चलन., चलनशब्दार्थाद्युच् (सू०) । (कम्पनः) कम्पते तच्छीलः, युच् । (कम्प्रः) नमिकम्पीति (सू०) रश्च । लुड विलोडनेस्माल्लोलम् । (चलाचलं) चरिचलीति (वा०) द्वित्वमागागमश्च ॥ ७५ ॥ अतिरिच्यतेतिरिक्तः । सम्यगध्युपरिभवः समधिकः । संहन्यते स्म संहतोऽच्छिद्रः । खक्ख हसने, कक्खटमित्येके । (कठिनं, कठोरं) कठ कृच्छ्रजीवनेऽस्मादिनच्- ओरंश्चौणादिकौ । कृणाति क्रूरम् । नियतं तिष्ठति निष्ठुरम् । (दृढं) दृह वृद्धौ, क्ते, दृढो बलवति साधुः (दृढःस्थूलबलयोः) ॥ ७६ ॥ जीर्यति जरठम् । मूर्च्छति मूर्तम् । नवैकार्था इत्येके । प्रोह्यते स्म प्रौढम्, प्रादूहोढोढ्येषैष्येष्विति (वा०) वृद्धिः । (एधितं) एध वृद्धौ । पुरापि नवं(भवं)पुराणम्, नश्चपुराणे (वा०) । (प्रतनं, इ०) पुरात्- त्नतनौ प्रादेशश्च भवार्थे (नश्चपुराणेप्रात्) । पुराभवं चिरंभवं, सायंचिरमिति (सू०) ट्युट्युलौ तुट् च, निर्देशान्मान्तत्वम् ॥ ७७ ॥ प्रतिनवमग्रमस्य प्रत्यग्रः । अभि नूयतेभिनवं, णु स्तुतौ । नव एव नव्यः । (नवीन इ०) नवस्यनूभावे त्नप्तनप्खाश्चप्रत्ययाः (वा०), यच्च । सवस्कश्च । सुष्ठु कुत्सितं म्रियते म्लायति वा सुकुमारं, कुमार क्रीडायामित्यस्माद्वा । मृद्यते मृदु । (मृदुलं) गुणमात्रवृत्तित्वे लच् ॥ ७८ ॥ अन्वञ्चत्यन्वक्- कान्तोव्ययत्वात्प्रागादिवत् अक्षस्य पश्चादन्वक्षम्, अक्षेण रथो लक्ष्यते । पदस्य क्रमस्य पश्चादनुपदं, पश्चादर्थेव्ययीभावः । अनुगच्छत्यनुगं, डः । तत्रैतत्त्रयं (अन्वक्, अन्वक्षं, अनुपदं च) अव्ययं वर्तते, क्लीबत्वं तु द्वयोः (अन्वक्षं, अनुपदं च) । अक्षिणी प्रतिगतं प्रत्यक्षं, अत्यादयःक्रान्ताद्यर्थेद्वितीयया (वा०) इति समासः । इन्द्रियेषु भवमैन्द्रियकम् । अक्षमधिकृतमध्यक्षं, तदतिक्रान्तमत्यध्यक्षम् ॥ ७९ ॥ एकं तननम-

एकतानोनन्यवृत्तिरे(रै)काग्र्यैकायनावपि ।
अप्येकसर्ग एकाग्र्योप्येकायनगतोपि सः ॥ ८० ॥
पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम् ।
अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमम् ॥ ८१ ॥
मोघं निरर्थकं स्पष्टं स्फुटं प्रव्यक्तमुल्वणम् ।
साधारणं तु सामान्यमेकाकी त्वेक एककः ॥ ८२ ॥
भिन्नार्थका अन्यतर एकस्त्वोन्येतरावपि ।
उच्चावचं नैकभेदमुच्चण्डमवलम्बितम् ॥ ८३ ॥
अरुंतुदं तु मर्मस्पृगबाधं तु निरर्गलम् ।
प्रसव्यं प्रतिकूलं स्यादपसव्यमपष्ठु च ॥ ८४ ॥
वामं शरीरे सव्यं स्यादपसव्यं तु दक्षिणम् ।
संकटं ना तु संबाधः कलिलं गहनं समे ॥ ८५ ॥

विच्छिन्नो विस्तारोस्यैकतानः । अनन्यैकरूपा वृत्तिर्व्यापारोस्यानन्यवृत्तिः । एकमग्रं पुरोगतं ज्ञेयमस्यैकाग्रः, स्वार्थेऽण्वा । एकमयनं गतिरस्यैकायनः । एकः सर्गो निश्चयोस्यैकसर्गः । एकमयनं गतः (एकायन-गतः) ॥ ८० ॥ आदीयते प्रथममित्यादिः, धर्मिवृत्तित्वेप्यजहल्लिङ्गं, यथा– आदिर्गर्गकुलम् । धर्म-वृत्तित्वे भवे यत्, आद्यो वाच्यलिङ्गः– अन्त्यवत् । पूर्वति पूर्वः । पुरो भवः पौरस्त्यः, दक्षिणापश्चात्पुर-सस्त्यक् (सू०) । प्रथते प्रथमः । आदिमोग्रिमश्च । अमत्यन्तः, धर्म(र्मि)वृत्तित्वेप्यस्त्रीलिङ्गः, यथा– कुलस्यान्तः प्रभु स्त्रियः । जघने भवो जघन्यः, दिगादिभ्योयत् (सू०) । चरति चरमः । पश्चाद्भवः पाश्चात्यः– पश्चिमः, दक्षिणापश्चात्पुरसस्त्यक् (सू०), अग्रादिपश्चाड्डिमच् (सू०) । अन्तिमोपि ॥ ८१ ॥ मुह्यन्त्यस्मिन्मोघः, न्यङ्क्वादित्वात् (सू०) कुत्वम् । (स्पष्टं) स्पश बाधनस्पर्शनयोः । स्फुटति बहिः प्रकाशते स्फुटम् । प्रकृष्टं व्यज्यते स्म प्रव्यक्तम् । उद्वणत्युल्वणं, पृषोदरादित्वात् (सू०) पक्षे लः । एतौ पूर्वत्र संबध्नंति । उद्भुतमुत्कटमुद्रिक्तं च । समानमाधारणमस्य साधारणम् । समानं मान-मस्य सामान्यं, भावे(स्वार्थे) ष्यञ् । (एकाकी, इ०) एकादाकिनिच्चासहाये (सू०), चात्कन्– लुकौ च ॥ ८२ ॥ भिन्न इत्यर्थे । त्वोन्यार्थः सर्वनाम, यथा– उत त्वः पश्यन्न ददर्श वाचं[च्यं] (निरुक्तं) । एत्येकः, यथा– इत्येके मन्यन्ते, यत्कात्यः– प्रधानान्यासहायेषु संख्यायां चैक इष्यते । अनित्यन्यः, अघ्न्यादिः (उ०) । (अन्यतरः) तरप्स्वार्थे– अल्पाच्तरवत् (सू०) । एति– इतरः । उदक्चावाक्चोच्चावचं, उन्नतं चावनतं च वा, मयूरव्यंसकादिः (सू०) । नैकशब्दः सुप्सुपेति (सू०) समासात्, नानाप्रकारमित्यर्थः । उच्चण्डते– उच्चण्डम् । अवलम्बतेवलम्बित[म्बन]म् । अत एव उच्चण्डं जानुलम्बि चेति पेठुः । केचित्त्वविलम्बितमित्याशुकार्यमाहुः, उच्चण्डमुत्तालमिति हि सभ्याः ॥ ८३ ॥ अरूंषि तुदत्यरुंतुदं, विध्वरुषोस्तुदः (सू०) इति खच् । (मर्मस्पृक्) स्पृश उप-तापे, मर्मव्यथकमित्यर्थः । निष्क्रान्तमर्गलाया निरर्गलमनियन्त्रणम् । उद्दाममुच्छृङ्खलं च । (प्रसव्यं, अपसव्यं) प्रगतं– अपगतं सव्याद्वामादित्यर्थः, सव्यशब्दो हि– आराच्छब्दवद्वामदक्षिणार्थः । प्रतीपं कूला-त्प्रतिकूलं, लक्षणया विरुद्धार्थं प्रतिलोमवत् । अपतिष्ठत्यपष्ठु, कुः, सुषामादित्वात् (सू०) षत्वम् । विपरीतं विलोमं च ॥ ८४ ॥ वम्यते वामम् । सूयते सव्यं, षु प्रसवे । शरीर इत्येव । अपक्रान्तं सव्या-दपसव्यम् । दक्षिणं, दक्ष वृद्धौ । संकटत्यावृणोति संकटं, संप्रोदश्चकटच्वा (सू०), विशेष्यलिङ्गम् । पुंलिङ्गस्तु संबद्धाद्बाध्यन्तेस्मिन् संबाधः । कल्यते क्षिप्यतेत्रान्यत्कलिलम् । गाह्यते व्याप्यत्वाद्गहनम् ॥ ८५ ॥

संकीर्णे संकुलाकीर्णे मुण्डितं परिवापितम् ।
ग्रन्थितं संदितं दृब्धं विसृतं विस्तृतं ततम् ॥ ८६ ॥
अन्तर्गतं विस्मृतं स्यात्प्राप्तप्रणिहिते समे ।
वेल्लितप्रेङ्खिताधूतचलिताकम्पिता धुते ॥ ८७ ॥
नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः ।
परिक्षिप्तं तु निवृतं मूषितं मुषितार्थकम् ॥ ८८ ॥
प्रवृद्धप्रसृते न्यस्तनिसृष्टे गुणिताहते ।
निदिग्धोपचिते गूढगुप्ते गुण्ठितरूषिते ॥ ८९ ॥
द्रुतावदीर्णे उद्गूर्णोद्यते काचितशिक्षिते(काचितशिक्यिते)।
घ्राणघ्राते दिग्धलिप्ते समुदक्तोद्धृते समे ॥ ९० ॥
वेष्टितं स्याद्वलयितं संवीतं रुद्धमावृतम् ।
रुग्णं भुग्नेथ निशितक्ष्णुतशातानि तेजिते ॥ ९१ ॥
स्याद्विनाशोन्मुखं पक्वं ह्रीणह्रीतौ तु लज्जिते ।
वृत्ते तु वृतवावृत्तौ संयोजित उपाहितः ॥ ९२ ॥

संकीर्यते संकीर्णं निरन्तरं व्याप्तम् । संकोलति निरन्तरीभवति संकुलम् । एतान्यत्र संबध्नन्ति व्याप्त्यर्थत्वात् । (मुण्डितं) मुडि खण्डने । (परिवापितं) परिपूर्वो वपिर्मुण्डनार्थः, यथा– मद्रात्परिवापणे (सू०)। संहितं दितं यत्रेति संदितं, दोवखण्डने । संदानितं संयमितं बद्धं निगडितं च । दृब्धं, दृभी ग्रन्थे । विसरति स्म विस्तीर्यते स्म तन्यते स्म (विसृतं, इ०) ॥ ८६ ॥ स्मृतेर्व्यवहितमन्तर्गतम् । प्रणिधीयते स्म प्रणिहितम् । (वेल्लितं) वेल्ल चलने । (प्रेङ्खित) इखि गत्यर्थः । धूञ् धुञ् वेत्युभयः पाठः । प्रेङ्खोलितस्तरलितो लुलितान्दोलितावपि ॥ ८७ ॥ (नुत्तं, नुन्नं), नुदविदेति (सू०) वा निष्ठा नत्वम् । अस्यते स्मास्तम् । निष्ठीव्यते स्म निष्ठ्यूतम् । आविध्यते स्माविद्धम् । परिक्षिप्यते समन्ताद्वेष्ट्यते स्म परिक्षिप्तम् । नियतं व्रियते स्म निवृतम् । परीतं परिवेष्टितं वलितं परिकृतं परिचारितं च । मुषिः क्र्यादिः, मूषिर्भ्वादिः ॥ ८८ ॥ आहन्यते स्म– एकादिरङ्कोङ्कान्तरेणाभ्यस्यते– आहतम् । द्वे द्वे तुल्यार्थे । गुण्ठितं गुण्डितमाहुः । रूपिर्लौकिको व्याप्त्यर्थः, यथा– अन्तर्गिरिरेणुरूषितः (किरा०) । प्रवर्धते, प्रसरति, न्यस्यते, निसृज्यते, गुण्यते, आहन्यते, निदिह्यते, उपचीयते, गुह्यते, गुण्यते, गुण्ठ्यते, रूष्यते ॥ ८९ ॥ द्रूयते, अवदीर्यते, उद्गूर्यते । द्रुतमत्र विभिन्नम् । (उद्गूर्णं) गुरी उद्यमे । कार्यते शिक्षां कारितः । घ्रायते स्म घ्राणं, नुदविदोन्देति (सू०) वा निष्ठा नत्वम् । समुदच्यते समुदक्तं, अञ्चोनपादाने (सू) इतीण्नास्ति ॥ ९० ॥ वलयः संजातोस्य वलयितम् । (संवीतं) व्येञ् संवरणे । (रुग्णं) रुजो भङ्गे । (भुग्नं) भुज कौटिल्ये । (शातं, निशित)शो तनूकरणे, शाच्छोरन्यतरस्याम् (सू०) इति वेत्वम्, उपसर्गप्राधान्यात् । शितनिशातौ च । (क्ष्णुतं) क्ष्णु तजने । (तेजितं)तिज निशाने ॥ ९१ ॥ पच्यते स्म पक्वं फलादि, पचोवः (सू०) इति निष्ठा वत्वम्, आहुश्च– ओषध्यः फलपाकान्ताः (धन्व०)। जिहेति स्म (ह्रीणह्रीतौ), नुदविदोन्देति (सू०) वा नत्वम् । व्रियते वृतः । वर्तते वृत्यते वा वृत्तः । वावृत्तः, वृतु– वावृतु वरणे[वर्तने], इत्थमबुद्ध्वा वृत्तव्यावृत्ताविति पेठुः, लक्ष्येपि– ततो वावृत्तमानसेति(–त्यमाना सति) भट्टिः । उपाधीयते स्मोपाहितः ॥ ९२ ॥ (स्यन्नं) स्यन्दू स्रवणे । (रीणं)रीङ् स्रवणे, स्वादय ओदितः (ग०) । (स्नुतं)ष्णु उद्गि-

प्राप्यं गम्यं समासाद्यं स्यन्नं रीणं स्नुतं स्रुतम् ।
संगूढः स्यात्संकलितोऽवगीतः ख्यातगर्हणः ॥ ९३ ॥
विविधः स्याद्बहुविधो नानारूपः पृथग्विधः ।
अवरीणो धिक्कृतश्चाप्यवध्वस्तोऽवचूर्णितः ॥ ९४ ॥
अनायासकृतं फाण्टं स्वनितं ध्वनितं समे ।
बद्धे संदानितं मूतमुद्दितं संदितं सितम् ॥ ९५ ॥
निष्पक्के क्वथितं पाके क्षीराज्यहविषां शृतम् ।
निर्वाणो मुनिवह्न्यादौ निर्वातस्तु गतेऽनिले ॥ ९६ ॥
पक्वं परिणते गूनं हन्ने मीढं तु मूत्रिते ।
पुष्टे तु पुषितं सोढे क्षान्तमुद्वान्तमुद्गते ॥ ९७ ॥
दान्तस्तु दमिते शान्तः शमिते प्रार्थितेऽर्दितः ।
ज्ञप्तस्तु ज्ञपिते छन्नश्छादिते पूजितेऽञ्चितः ॥ ९८ ॥
पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः ।
प्रुष्टप्लुष्टोषिता दग्धे तष्टत्वष्टौ तनूकृते ॥ ९९ ॥
वेधितच्छिद्रितौ विद्धे विन्नवित्तौ विचारिते ।
निष्प्रभे विगतारोकौ विलीने विद्रुतद्रुतौ ॥ १०० ॥

रणे । विरुद्धमवगीयतेऽवगीतः ॥ ९३ ॥ विचित्रा विधा प्रकारोऽस्य विविधः । बहुरूपः पृथग्रूपो नानाविधश्च । (अवरीणः) अवेति विरुद्धार्थः । चूर्णेनावध्वस्तोऽवचूर्णितः, सत्यापपाशेति (सू०)णिच्क्तः ॥ ९४ ॥ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानीति (सू०) फणः फाण्टं साधुः, त्रिफलाकषायादिसारम् । (स्वनितं, ध्वनितं) मनस्तमसोरन्यत्रेट् । (संदानितं) दान अवखण्डने । (मूतं) मूङ् बन्धने । द्यतिस्यतीति (सू०) इत्वे– उद्दितं संदितं च । षिञ् बन्धने, सितः ॥ ९५ ॥ निःशेषेण पक्वं निष्पक्वम् । श्रातेः श्रपेश्च शृतंपाके (सू०) इति साधुः । निर्वाति स्म निर्वाणः, वातादन्यत्र शान्त्यर्थे साधुः (निर्वाणोऽवाते) । आदिशब्दान्निर्वाणं मुक्तिर्निर्वृतिश्च, यथा– प्रिय[या]दर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः । निर्वाणमाप्यते येन सरागेणापि चेतसा ॥ निर्वाति निर्वातः, गतो वात इत्यर्थः ॥९६॥ परिणमतेऽवस्थान्तरं प्राप्नोति स्म, यथा– परिपक्वधीः । (गूनं)गु पुरीषोत्सर्गे, दुग्वोर्दीर्घश्च (वा०) । (मीढं) मिह सेचने, ढ्रलोपेपूर्वस्यदीर्घोणः (सू०) । पुष्यति स्म पुष्टम् । पोषति स्म पुषितम् । सह्यते स्म सोढं, सहिवहोरोदवर्णस्य (सू०) । (उद्वान्तः) टुवम उद्गिरणे ॥ ९७ ॥ (दान्तः) वादान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः (सू०) इति ण्यन्तात्क्ते वा साधुः । एवं शान्तादयः । अर्द गतौ याचने च, अर्दितः । मारणादन्यत्र मित्वेपि ज्ञप्तः सामान्येन निपातनात्, यथा– आज्ञापितः, आज्ञप्तः । (अञ्चितः) अञ्चेःपूजायाम् (सू०) इतीड् नलोपाभावश्च ॥ ९८ ॥ (क्लिष्टः) क्लिशःक्त्वानिष्ठयोः (सू०) इति वेट् । (सितः) षान्तकर्मणि, द्यतिस्यति मास्थेति (सू०) इत्वम् । (प्रुष्ट इ०) प्रुषु प्लुषु उष दाहे । (तष्ट इ०) तक्षू त्वक्षू तनूकरणे ॥ ९९ ॥ (वेधितः) विध विधानेनेकार्थः । छिद्यते स्म छिद्रितः, छिद्रं संजातं वास्य । व्यधेः क्तः, विद्धः । विद विचारणे, नुदविदोन्देति (सू०) नत्वं, यदाह– वेत्तेर्विन्नश्च वित्तश्च (भाष्यव०) । नास्ति रोको रोचनमस्यारोकः । (विलीनः) लीङ् द्रवीकरणे ॥ १०० ॥

सिद्धे निर्वृत्तनिष्पन्नौ दारिते भिन्नभेदितौ ।
ऊतं स्यूतमुतं चेति त्रितयं तन्तुसंतते ॥ १०१ ॥
स्यादर्हिते नमस्यितनमसितमपचायितार्चितापचितम् ।
वरिवसिते वरिवस्यितमुपासितं चोपचरितं च ॥ १०२ ॥
संतापितस्तु तप्तो धूपितधूपायितौ च दूनश्च ।
हृष्टो मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः ॥ १०३ ॥
छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् ।
स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं च गलितं च ॥ १०४ ॥
लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ।
अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ॥ १०५ ॥
आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ।
त्राणं त्रातं रक्षितमवितं गोपायितं च गुप्तं च ॥ १०६ ॥
अवगणितमवमतावज्ञाते अवमानिते च परिभूतम् ।
न्यस्तं त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टे ॥ १०७ ॥

(भिन्न इ०) भिदिः– रुधादिश्चुरादिश्चेति वा– इट् । ऊतं, ऊयी तन्तुसंताने, क्तः, लोपोव्योर्वलि (सू०) । स्यूतं, षिवु तन्तुसंताने, च्छ्वोःशूडिति (सू०) वस्योत्वम् । उतं, वेञ् तन्तुसंताने, क्तः, संप्रसारणम् । तन्तुभिः संतते विस्तृते ॥ १०१ ॥ (नमस्यितं, इ०) नमोवरिवइति (सू०) नमसः पूजायां क्यच्, क्यस्यविभाषा (सू०) इति यस्य वा लोपः । (अपचायितं, इ०) अपचितश्च (सू०) इति चायेर्वा साधुः । पूजितं च । वरिवसः परिचर्यायां क्यच् ॥ १०२ ॥ (संतापित इ०) तपिश्चुरादिर्भ्वादिश्च । (धूपित इ०) गुपूधूपेति (सू०) आयः, आयादयआर्धधातुकेवा (सू०) । (दूनः) दूङ् परितापे, स्वादयओदितः (ग०) इति निष्ठा नत्वम् । प्रह्लादते स्म प्रह्लन्नः, ह्लादोनिष्ठायाम् (सू०) इति ह्रस्वः ॥ १०३ ॥ ल्वादिभ्यश्च (सू०) इति नत्वे लूनम् । छो छेदने, शाच्छोरन्यतरस्याम् (सू०) इतीत्वं वा (छातं, छितं) । दाप् लवने, अस्माद्दातम् । दो अवखण्डने, अस्माद् द्यतिस्यतीति (सू०) इत्वे दितम् । वृश्च्यते स्म वृक्णं, ओव्रश्चू छेदने । स्कन्नं, स्कन्दिर् गतिशोषणयोः । पन्नं, पद गतौ । एते हस्तादेः पतितेर्थे वर्तन्ते ॥ १०४ ॥ प्राप्तं कर्मणि, प्राप्तप्रणिहिते समे इति कर्तरि । विन्नं, विद्लृ लाभे । भावितं, भू प्राप्तौ, आधृषाद्वा (ग०) इत्यस्य वा णिच्, पक्षे भूतं, यथा– इत्थंभूतम् । आसादितं, आङः षद पद्यर्थे णिच् । अन्वेषितं, जेषृ णेषृ एषृ गतौ । अन्विष्टं, इषेः तीषसहेति (सू०) वेट् । गवेष मार्गणे । मार्ग अन्वेषणे । मृग अन्वेषणे ॥ १०५ ॥ आ–अर्द्यते– आर्द्रः पटादिः । सहार्द्रेण गुणेन वर्तत इति सार्द्रः । तिम ष्टिम आर्द्रीभावे । (समुन्नं, इ०) उन्दी क्लेदने, नुदविदोन्देति (सू०) वा नत्वम् । (गोपायितं, इ०) गुपेः, आयादयआर्धधातुकेवा (सू०) ॥ १०६ ॥ (अवगणितं) अवेति विपर्ययेर्थे । अवमतं, मन ज्ञाने । अवमानितं, मनिश्चुरादिः, मान पूजायां वा । अनादृतं च । हीयते हीनम्. ओहाक् त्यागे, निष्ठा नत्वं (ओदितश्च), घुमास्थागेति (सू०) इत्वम् ॥ १०७ ॥ (उक्तं, उदितं) क्ते वचिवदोः संप्रसारणम् । (अभिहितं) अभिपूर्वो धाञ्– उक्तमर्थः, दधातेर्हिः (सू०) । (बुद्धं) बुध अवगमने– अनिट् । (बुधितं) बुधिरवबोधने सेट् । मनु अवबोधनेऽस्मान्मनितं, कृतीचृतीनृतीनामिदित्करणेन सेऽसिचिकृतचृतछृदतृदनृतः (सू०) इति विकल्पे, यस्यविभाषा (सू०) इति

उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितं ।
बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते ॥ १०८ ॥
ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ।
संगीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतम् ॥ १०९ ॥
ईलितशस्तपणायितपनायितप्रणुतपणितपनितानि ।
अपि गीर्णवर्णिताभिष्टुतेडितानि स्तुतार्थानि ॥ ११० ॥
भक्षितचर्वितलिप्तप्रत्यवसितगिलितखादितप्सातम् ।
अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुक्ते ॥ १११ ॥
क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः ।
क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः ॥ ११२ ॥
साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृन्दिष्ठाः ।
बाढव्यायतबहुगुरुवामनवृन्दारकातिशये ॥ ११३ ॥

इति विशेष्यनिघ्नवर्गः । १ ।

निषेधस्यानित्यत्वज्ञापनात् । मतं तु मन्यतेः । वेत्तेस्तु विदितं, निष्ठा । प्रतिपन्नं, पद गतौ, सर्वे गत्यर्था ज्ञानार्था इति ॥ १०८ ॥ ऊर्यूररी तु विस्तारेऽङ्गीकारे च गतिसंज्ञाः (ऊर्यादिच्विडाचश्च), तेन ऊररीकृतमपि । (संगीर्णं) समःप्रतिज्ञाने (सू०) इति संगीरङ्गीकारार्थः, गॄ शब्दे ॥ १०९ ॥ ईलितं, ईड स्तुतौ, डलयोरेकत्वम् । (शस्तं) शंसु स्तुतौ । (पणायितं, इ०) पण व्यवहारे स्तुतौ च, पन च, आयादयआर्धधातुकेवा (सू०) । अपि स्वार्थे, उपसर्गं इत्येके । गीर्णं, गॄ शब्दे ॥ ११० ॥ लिप्तस्थाने लीढं पेठुः । (प्रत्यवसितं) प्रत्यवपूर्वः स्यतिर्भोजने वर्तते । (गिलितं) गॄ निगरणे, अचिविभाषा (सू०) इति लत्वम् । (प्सातं) प्सा भक्षणे । (अभ्यवहृतं) अभ्यववपूर्वो हृञ् भोजने । अद्यते स्मान्नं, अदोनन्ने (सू०) इति निपातनात्साधुः । (जग्धं) अबाधकान्यपि निपातनानि भवन्तीति पक्षे जग्धिः । वाच्यं चात्र– ब्रह्मण्यो ब्राह्मणहितो वीतदम्भस्त्वकल्मषः । असंमतः प्रणाय्यः स्याच्चक्षुष्यः प्रियदर्शनः ॥ वैरागिको विरागार्हः शंसितस्तु सुनिश्चितः । ईर्ष्यालुः कुहनो गोष्ठश्वोन्यद्वेष्टा स्वगेहगः ॥ [गोष्ठश्वः, अचतुरेति (सू०) साधुः] । तीक्ष्णोपायेन योन्विच्छेत्स आयःशूलिको जनः । गेहेशूरो गृहेनर्दी पिण्डीशूरोथ संस्कृतः ॥ व्युत्पन्नप्रहतक्षुण्णा अन्वेष्टानुपदी समौ ॥ नीलीरागः स्थिरस्नेहो हारिद्रारागकोन्यथा ॥ आसीन उपविष्टः स्यादूर्ध्वस्थोर्ध्वंदमौ स्थिते । उत्तरय उन्मुखे गृह्यः पक्षे(क्ष्ये) न्युब्जस्त्वधोमुखे ॥ १११ ॥ अतिशयेन क्षिप्रः क्षेपिष्ठः । एवं क्षुद्रः क्षोदिष्ठः । अतिशयेन प्रियः प्रेष्ठः । एवमुरुर्वरिष्ठः, प्रियस्थिरस्फिरोर्विति (सू०) प्रस्थस्फवर्बंहादेशाः । स्थूलः स्थविष्ठः, स्थूलदूरयुवेति (सू०) यणादिर्लुप्यते पूर्वस्य च गुणः । बहुलो बंहिष्ठः ॥ ११२ ॥ अतिशयेन बाढं साधिष्ठं, अन्तिकबाढयोर्नेदसाधौ (सू०) । एवं दीर्घो द्राघिष्ठः । स्फिरः (बहुः) स्फेष्ठः । गुरुर्गरिष्ठः । ह्रस्वो ह्रसिष्ठः । वृन्दारको वृन्दिष्ठः, प्रियस्थिरेति (सू०) आदेशः । वाच्यं चात्र–ग्राम्ये ग्रामेयकग्रामीणावाच्छिन्नो बलाद्धृते । चोरिते मुषितं मुष्टं स्थपुटं तु नतोन्नतम् ॥ उत्पाटितोन्मूलितार्थमुद्धृतं वर्हिते वृढम् । आचितं निचितं पूर्णे पूरितं निभृते भृतम् ॥ प्रतिश्रितं प्रविष्टं स्यादन्तर्गडु निरर्थके । न्यञ्चितं स्यादधः क्षिप्तं क्षिप्तमूर्ध्वमुदञ्चितम् ॥ स्पष्टेऽचितं चतुर्थे तु तुरीयं तुर्यमास्थिते । आकारे श्लिष्टसंपृक्तः खचिते क्षुरित(?)भूषितौ ॥ प्रचर्चितं प्रतीष्टं द्वेष्यामृष्याक्षिगताः समाः । स्त्यानं शीनेन्वितेन्वीतं प्रकाशप्रकटौ स्फुटे ॥ ११३ ॥ इति विशेष्यनिघ्नवर्गः । १ ।

प्रकृतिप्रत्ययार्थाद्यैः संकीर्णे लिङ्गमुन्नयेत् ।
कर्म क्रिया तत्सातत्ये गम्ये स्युरपरस्पराः ॥ १ ॥
साकल्यासङ्गवचने पारायणतुरायणे ।
यदृच्छा स्वैरिता हेतुशून्या त्वास्या(स्था) विलक्षणम् ॥ २ ॥
शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः ।
अवदानं कर्म वृत्तं कामदानं प्रवारणम् ॥ ३ ॥
वशक्रिया संवननं मूलकर्म तु कार्मणम् ।
विधूननं विधुवनं तर्पणं प्रीणनावनम् ॥ ४ ॥
पर्याप्तिः स्यात्परित्राणं हस्तधा(वा)रणमित्यपि ।
सेवनं सीवनं स्यूतिर्विदरः स्फुटनं भिदा ॥ ५ ॥
आक्रोशनमभीषङ्गः संवेदो वेदना न ना ।
संमूर्च्छनमभिव्याप्तिर्याच्ञा भिक्षार्थनार्दना ॥ ६ ॥

प्रकृत्याद्यैः प्रकीर्णकेऽत्र लिङ्गमुत्प्रेक्षेत । प्रकृत्या (यथा)– अपरस्पराः सार्था यान्ति, अपरस्पराणि क्षणानि वहन्ति [अक्षराणि वदन्ति] । प्रत्ययेन (यथा)– क्तिन्, शान्तिः, नपुंसके भावे क्तः (सू०) ल्युट् च– आसितं, तर्पणम् । अर्थेन तु (यथा)– कर्मैव कार्मणम् । आद्यशब्दाद्रूपभेदग्रहणादिना (यथा)– यदृच्छा स्वैरिता, शमथस्तु शमः । (कर्म, क्रिया) भावकर्मणोर्मनिन् (सर्वधातुभ्यो मनिन्), कृञः शच (सू०) । क्रियासंततत्वे गम्यमाने, अपरे च परे च– अपरस्पराः सार्था यान्ति, अपरे च परे च यत्र तदपरस्परं कृत्वा वा, अपरस्पराः क्रियासातत्ये (सू०) इति साधुः ॥ १ ॥ पारमयन्ते येन सकलं व्याप्नुवन्ति पारायणम् । त्वरणं तुरणं वा तूः, तया हेतुभूतया– अयन्ते येनासक्तं गच्छन्ति तत्तुरायणम् । या या– इच्छा यदृच्छा, यदृच्छाशक्तिजानुकरणेति (भाष्यव०) वाक्यलिङ्गात्साधुः । स्वेन– ईर्ते तच्छीलः स्वैरी, भावे तल् (तस्य भावस्त्वतलौ), स्वैरस्य भावो वा । आसनमास्या, ण्यासश्रन्थेति (सू०) युचि प्राप्ते, वाऽसरूपेण (वाऽसरूपोऽस्त्रियां) ऋहलोर्ण्यत् (सू०), अस्त्रियामिति निषेधो द्वयोरेवोत्सर्गापवादयोर्न त्वेकस्य । विगतं लक्षणमालोचनं यत्रेति विलक्षणमप्रतिपत्तिरित्यर्थः ॥ २ ॥ (शमथः, इ०) औणादिकोऽथच्, घञि तु नोदात्तोपदेशस्येति (सू०) वृद्ध्यभावः । कामक्रोधाद्यभावः शान्तिस्तपःक्लेशसहिष्णुता दान्तिः । अवदीयतेनेन– अवदानं सोत्कर्षचरितं, वृत्तं परिशुद्धं, निर्व्यूढमित्येके । (कामदानं) कामनापूर्वं दानं स्वेच्छात्याग इत्यर्थः । काम्यदानमिति तु युक्तः पाठः ॥ ३ ॥ (वशक्रिया) वशीकरणम् । वनुचनोच्यते (ग०) इत्यनेकार्थत्वात्संवननं, वनु याचने वा । मूलैरोषधिभिर्यद्वशीकरणं तत्, कर्मैव कार्मणं, तद्युक्तात्कर्मणोऽण् (सू०) । (विधूननं) धूञ् णिच्, धूञ्प्रीञोर्नुक् (वा०), ल्युट् । विधुवनमिति धू विधूनने, कुटादित्वाद्ङित् (गाङ्कुटादिभ्योऽञ्णिन्ङित्) । (अवनं) अव प्रीतौ ॥ ४ ॥ प्रहर्तुमुद्यतस्य हस्तधारणं रोधः, रक्ष्यस्य पृष्ठे हस्तस्थापनं वा । (ष्ठीवनं) ष्ठिविसिव्योर्दीर्घश्च (चान्द्रसू०) इति वा दीर्घः । सेवनं स्यूतिः, छ्वोःशूडिति (सू०) ऊठ् । (विदरः) दॄ विदारणे, ऋदोरप् (सू०) । (स्फुटनं) स्फुटः कुटादिः । भेदनं भिदा, षिद्भिदादिभ्योऽङ् (सू०) ॥ ५ ॥ अभिषञ्जनं पराभिमुख्येन वाच्ययोजनमभीषङ्गः, उपसर्गस्य घञीति (सू०) दीर्घः । वेदना, विद चेतने, णिच्, ण्यासश्रन्थेति (सू०) युच्, वेत्तेर्वा, घट्टिवन्दिविदिभ्यश्चोपसंख्यानात् (वा०) । ल्युटि तु वेदनम् । (संमूर्च्छनं) मुर्च्छा मोहसमुच्छ्राययोः । अभिव्यापनं सर्वतो वृद्धिः । याचनं याच्ञा, यजयाचेति (सू०) नङ् । (अर्दना) अर्द याचनेऽस्मात् स्वार्थे णिच्, युच् ॥ ६ ॥ (वर्धनं) वर्ध छेदनपूरणयोः । (सभाजनं)

वर्धनं छेदनेऽथ द्वे आनन्दनसभाजने ।
आप्रच्छनमथाम्नायः संप्रदायः क्षये क्षिया ॥ ७ ॥
ग्रहे ग्राहो वशः कान्तौ रक्षणस्त्राणे रणः क्वणे ।
व्यधो वेधे पचा पाके हवो हूतौ वरो वृतौ ॥ ८ ॥
ओषः प्लोषे नयो नाये ज्यानिर्जीर्णौ भ्रमो भ्रमौ ।
स्फातिर्वृद्धौ प्रथा ख्यातौ स्पृष्टिः पृक्तौ स्नवः स्रवे ॥ ९ ॥
एधा समृद्धौ स्फुरणे स्फुरणा प्रमितौ प्रमा ।
प्रसूतिः प्रसवे श्च्योते प्राघारः क्लमथः क्लमे ॥ १० ॥
उत्कर्षोऽतिशये संधिः श्लेषे विषय आश्र(श)ये ।
क्षिपायां क्षेपणं गीर्णिर्गिरौ गूरणमुद्यमे ॥ ११ ॥
उन्नाय उन्नये श्रायः श्रयणे जप(य)ने जपः(यः) ।
निगादो निगदे मादो मद उद्वेग उद्भ्रमे ॥ १२ ॥

सभाज प्रीतिदर्शने । (आप्रच्छनं) आङ्पूर्वः प्रच्छिरालिङ्गनादिनानन्दनार्थः, यथा— आपृच्छस्व प्रियसखममुम् (मेघ०) । वृद्धपारंपर्येणाम्नानमाम्नायः । (क्षयः) क्षि क्षये, एरच् (सू०) । (क्षिया) क्षिष् हिंसायां, अङ् ॥ ७ ॥ (ग्रहः) ग्रहवृदिति (सू०) अप् । (ग्राहः) बाहुलकाद् घञ् (भावे) । (वशः) वशिरण्योरुपसंख्यानादप् (वा०) । (रक्षणः) यजयाचेति (सू०) भावे नङ् । रक्ष इत्यपपाठः, गुरोश्चहलः (सू०) इत्यकारः स्यात् । रणनं रणः, अप् । (क्वणः) क्वणो वीणायां च (सू०) । व्यधनं व्यधः, व्यधजपोरनुपसर्गे (सू०) इत्यप् । वेधनं वेधः, विध विधाने । पचनं पचा, षित्वादङ् (षिद्भिदादिभ्योऽङ्) । पक्तिर्बाहुलकात् । (हवः) ह्वः संप्रसारणं च (सू०) इत्यप् । वरणं वरः, व्रियते वा, यत्कात्यः— तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः, वृञ् वरणे, वृङ् संभक्तौ च ॥ ८ ॥ (ओषः) उष दाहे । (नायः) श्रिणीभुवोऽनुपसर्गे (सू०) इति घञ् । (ज्यानिः) ग्लाम्लाज्याहाभ्यो निः (वा०) । जरणं जीर्णिः, ऋल्वादिभ्यः क्तिन्निष्ठावत् (वा०) । (भ्रमः) घञ् । भ्रमणं भ्रमिः, इक्कृष्यादिभ्यः (वा०) । (स्फातिः) स्फायी वृद्धौ । प्रथनं प्रथा, घटादयः षितः (ग०) इत्यङ् । पृक्तिः, पृची संपर्के । (स्नवः) ष्णु प्रस्रवणे ॥ ९ ॥ विधा समृद्धाविर्त्येके पेठुः । एधनमेधा, षिद्भिदादिभ्योऽङ् (सू०) । स्फुरणं स्फुरणा, स्फुर चलने कुटादिः । (प्रमितिः) माङ् माने, क्तिन्, द्यतिस्यतीति (सू०) इत्वम् । (प्रमा) आतश्चोपसर्गे (सू०) इत्यङ् । (प्रसूतिः, इ०) षूङ् प्राणिगर्भविमोचने, षू प्रसवे वा । (श्च्योतः) श्च्युतिर् क्षरणे । (प्राघारः) घृ क्षरणदीप्त्योः । (क्लमथः) औणादिकोऽथच्, क्लमथुरित्यपपाठः ॥ १० ॥ ऊर्ध्वं कर्षणं (उत्कर्षः) । (संधिः) उपसर्गे घोः किः (सू०) । विषीयतेऽत्र विषयः, विषिणोति वा, आश्रयस्थानम् । (क्षिपा) भिदादित्वादङ् (षिद्भिदादीति) । गिरणं गिरिः, इक्कृष्यादिभ्यः (सू०) । कुटादित्वाद् गुरणमाहुः, चुरादेर्गोरणमपि । अडउद्यमे (ग०) इति निपातनादुद्यमः ॥ ११ ॥ ऊर्ध्वं नयनमनुसरणं वोन्नायः, अवोदोर्नियः (सू०) इति घञ् । (उन्नयः) बाहुलकाद्— एरच् (सू०) (श्रायः) श्रिणीभुवोऽनुपसर्गे (सू०) इति घञ् । (जपः) व्यधजपोरनुपसर्गे (सू०) इत्यप् । (निगाद इ०) स्फुटकथने, नौगदनदेति (सू०) वा घञ् । (मदः) मदोऽनुपसर्गे (सू०) इत्यप् । (मादः) सधमादस्थयोश्छन्दसि (सू०) इति निपातनाद् घञ् । (उद्वेगः) ओविजी भयचलनयोः, घञ् ॥ १२ ॥ (परिमलः) संज्ञापूर्वकत्वाद् वृध्यभावः । अभ्यु-

विमर्दनं परिमलोऽभ्युपपत्तिरनुग्रहः ।
निग्रहस्तु विरोधः स्यादभियोगस्त्वभिग्रहः ॥ १३ ॥
मुष्टिबन्धस्तु संग्राहो डिम्बे डमरविप्लवौ ।
बन्धनं प्रसितिः स्वारः(तिश्वारः) स्पर्शः स्प्रष्टोपतप्तरि ॥ १४ ॥
निकारो विप्रकारः स्यादाकारस्त्विङ्ग इङ्गितम् ।
परिणामो विकारे द्वे समे विकृतिविक्रिये ॥ १५ ॥
अपहारस्त्वपचयः समाहारः समुच्चयः ।
प्रत्याहार उपादानं विहारस्तु परिक्रमः ॥ १६ ॥
अभिहारोऽभिग्रहणं निर्हारोऽभ्यवकर्षणम् ।
अनुहारोऽनुकारः स्यादर्थस्यापगमे व्ययः ॥ १७ ॥
प्रवाहस्तु प्रवृत्तिः स्यात्प्रवहो गमनं बहिः ।
वियामो वियमो यामो यमः संयामसंयमौ ॥ १८ ॥
हिंसाकर्माभिचारः स्याज्जागर्या जागरा द्वयोः ।
विघ्नोऽन्तरायः प्रत्यूहः स्यादुपघ्नोऽन्तिकाश्रये ॥ १९ ॥

पपत्त्यादिर्दानादिभिः स्वीकारे वर्तते । (अनुग्रहः) ग्रहेः– ग्रहवृद्– (सू०) इत्यप् । नियमनाय ग्रहणं निग्रहः, निरोध इति पाठ्यम्, विग्रहो विरोध इति वा । आभिमुख्येनोद्यमः (अभियोगः) ॥१३॥ समिमुष्टौ (सू०) इति घञ्, सग्राहो मल्लस्य । डयनं विद्रवो डिम्बः, डीङ् गतौ, अशस्त्रकलहः, लुण्ठयादिरित्येके । डयनं डमरः । (प्रसितिः) षिञ् बन्धने । स्वृ शब्दोपतापयोः, स्वराति स्वारः । (स्पर्शः) पदरुज– (सू०) इत्यत्र स्पृशउपतापएव (वा०) इति कर्तरि घञ् । (स्प्रष्टा) वाऽसरूपात्तृच् (वासरूपोऽस्त्रियाम्) ॥ १४ ॥ निकृष्टं करणं निकारः खलीकारः । (इङ्गः, इङ्गितं) भावे घञ्क्तौ । इङ्गिताकाराभ्यां भावज्ञानमित्यादौ गोबलीवर्दन्यायेन– इङ्गितं चेष्टितम् । आकृतिग्रहणमाकारो मुखरागादिरिति **कौटिल्यो** व्याख्यत्, अयं त्वनयोराशयज्ञापकत्वादैक्यं मन्यते । विकारेर्थे त्रयो वर्तन्ते, द्वयोस्तु साम्यं स्त्रीत्वात् ॥ १५ ॥ (अपहारः) हानिरित्यर्थः । उपसर्गवैचित्र्यादर्थभेदः । (समाहारः) अनेकस्यैकत्राध्यावापः । (प्रत्याहारः) एकत्र ढौकनं– अन्नादिकविषयेभ्य इन्द्रियाणामाकर्षणं च । (विहारः) क्रीडासंचारः ॥ १६ ॥ (अभिहारः) आभिमुख्येन हरणम् । (निर्हारः) युक्त्या निःसाराकर्षणम् । अनु सादृश्ये । (व्ययः) व्यय वित्तसमुत्सर्गे ॥ १७ ॥ प्रारम्भो वहनस्य प्रवाहः कार्यारम्भः, अविच्छिन्ना जलादेः प्रवृत्तिर्वा । (प्रवहः) गोचरसंचरेति (सू०) साधुः, बाहुलकादज्वा । द्वौ द्वौ भिन्नार्थौ, विविधं यमनं वियामः, उपरतिमात्रं यमः, संयमनं संयमः, यमःसमुपनिविषुचेति (सू०) वा घञ् ॥ १८ ॥ अभिभवितुं चरणं मारणोच्चाटनादिक्रियासाधनम् । (जागर्या) इच्छा (सू०) इत्यत्र जागर्तेरकारोवावक्तव्यः (वा०) पक्षे क्यप्, जाग्रोविचिण्णल्ङित्सु (सू०) इति गुणः, घञि तु जागरः । विहन्त्यस्मिन् विघ्नः, घञर्थेकविधानम् (वा०), विहन्यते कार्यमनेन वा । अन्तरायनं कार्यव्यवधानमन्तरायः । प्रतीपमूहनं प्रत्यूहः । उप समीपे हन्यते गम्यतेऽस्मिन्नुपघ्नः, उपघ्न आश्रये (सू०) इति साधुः ॥ १९ ॥ निःपूर्वो विशिरुपभोगार्थे । सर्वत्रात्र प्रलये तन्त्रम्, अतो निर्वेशनमुपभुक्तिः, उपसर्पणं, परिकर इत्याद्युन्नेयम् । समन्तात्सर्पणं परिसर्पः । विघटि[ट्टि]ता धूः कार्यभारोऽत्र विधुरमिति **प्रतीच्याः**, विरुद्धं धान(?)मित्युदीच्याः । (अभिप्रायः) प्रीङ् कान्तौ ।

निर्वेश उपभोगः स्यात्परिसर्पः परिक्रिया ।
विधुरं तु प्रविश्लेषेऽभिप्रायश्छन्द आशयः ॥ २० ॥
संक्षेपणं समसनं पर्यवस्था विरोधनम् ।
परिसर्या परीसारः स्यादास्या त्वासना स्थितिः ॥ २१ ॥
विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः ।
संवाहनं मर्दनं स्याद्विनाशः स्याददर्शनम् ॥ २२ ॥
संस्तवः स्यात्परिचयः प्रसरस्तु विसर्पणम् ।
नीवाकस्तु प्रयामः स्यात्सन्निधिः सन्निकर्षणम् ॥ २३ ॥
लवोऽभिलावो लवने निष्पावः पवने पवः ।
प्रस्तावः स्यादवसरस्त्रसरः सूत्रवेष्टनम् ॥ २४ ॥
प्रजनः स्यादुपसरः प्रश्रयः प्रणयः (प्रश्रयप्रणयौ) समौ ।
धीशक्तिर्निष्क्रमोऽस्त्री तु संक्रामो दुर्गसंचरः ॥ २५ ॥
प्रत्युत्क्रमः प्रयोगा(युद्धा)र्थः प्रक्रमः स्यादुपक्रमः ।
स्यादभ्यादानमुद्घात आरम्भः संभ्रमस्त्वरा ॥ २६ ॥
प्रतिबन्धः प्रतिष्टम्भोऽवनायस्तु निया(पा)तनम् ।
उपलम्भस्त्वनुभवः समालम्भो विलेपनम् ॥ २७ ॥

छन्दयति– आह्लादयते छन्दः, अच् । आशेरतेऽस्मिन् भावा इत्याशयः ॥ २० ॥ संगृहीतो [°वि]क्षेपो विप्रकीर्णता संक्षेपणम् । एवं समसनम् । पर्यवस्थानं (पर्यवस्था) । पर्यन्ते समन्ताद्वा सरणं परिसर्या, परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानात् (वा०) क्यप् । (आस्या) वासरूपत्वात् (वाऽसरूपोऽस्त्रियाम्)ण्यत् । (आसना) ण्यासश्रन्थोति (सू०) युच् ॥ २१ ॥ (विस्तारः) प्रथनेवावशब्दे (सू०) इति घञ् । विस्तीर्णं ग्रहणं विग्रहः । विविधमसनं व्यासः । (विस्तरः) घञः शब्दे निषेधाद् (अप्) । संवाहनं स्पर्शसुखमिति तु लक्ष्यम् ॥ २२ ॥ संगतं स्तवनं संस्तवः, धातोरनेकार्थस्य चोपसर्गेणैषोऽर्थो द्योत्यते । समन्ताच्चयनं परिचयः । प्रकर्षेण निकटे सरणं प्रसरः, बाहुलकादप् । नियत वचनं नीवाकः, तुलाकृतं न्यूनाधिक्यं क्रयादरो वा । संनिपूर्वो धाञ् नैकट्यार्थे ॥ २३ ॥ (अभिलावः) निरभ्योःपूल्वोः (सू०) इति घञ् । (निष्पावः) धान्यादेर्निर्बुसीकरणम् । प्रसङ्गेन स्तवनं प्रस्तावः, प्रेद्रुस्तुस्रुवः (सू०) इति घञ् । त्रस्यति चलति त्रसरः, सूत्रं वेष्ट्यते यत्र वानार्थम् ॥ २४ ॥ प्रजायतेऽस्मिन् प्रजनः पशूनां गर्भग्रहणकालः, जनिवध्योश्च (सू०) इति वृध्द्यभावः । (उपसरः) प्रजने सर्तेः (सू०) इत्यप् । (प्रसरः) प्रीत्या प्रार्थनम् । धीशक्तिः प्रज्ञासामर्थ्यमष्टधा । संक्रामन्त्यनेन- संक्रामः, संक्रम इत्येके, सेत्वादिः, यत्कौटिल्यः– मुखसमः संक्रमः । दुर्गं संचरन्त्यनेन, गोचरसंचरेति (सू०) साधुः, घञि तु संचारः ॥२५॥ प्रयुक्तिः कर्मारम्भे प्रयोगः, प्रकृष्टो युद्धार्थो (योगः) (प्रत्युत्क्रमः), [प्रकृष्टार्थे प्रत्युदौ प्राथौं], प्रत्युत्क्रान्तिर्वा । (प्रक्रम इ०) प्रोपौ– आरम्भार्थे । आभिमुख्येनादानमभ्यादानम् । उद्धननमुद्घातः, उपोद्घातोऽपि, यदाहुः– चिन्तां प्रकृतसिध्द्यर्थामुपोद्घात प्रचक्षते । (त्वरा) त्वरेर्घटादित्वात् षित्त्वादङ् (षिद्भिदादिभ्योऽङिति) ॥ २६ ॥ प्रतिष्टम्भनं रोधः, प्रतेस्तम्भेः (सू०) इति षत्वम् । अवनयनमवनायः खलीकारः, अवोदोर्नियः (सू०) इति घञ् । नियातनं, यत निकारोपस्कारयोः । उपलब्धिरुपलम्भः, उपसर्गात्खल्घञोः (सू०) इति नुम् । समाङ्पूर्वो लभिश्चर्चार्थे ॥ २७ ॥ विरहो विसंवादो वा । (विलम्भः) दानार्थे । (विश्रावः) वौक्षुश्रुवः (सू०)

विप्रलम्भो विप्रयोगो विलम्भस्त्वतिसर्जनम् ।
विश्रावस्तु प्रविख्यातिरवेक्षा प्रतिजागरः ॥ २८ ॥
निपाठनिपठौ पाठे तेमस्तेमौ समुन्दने ।
आदीनवास्रवौ क्लेशे मेलके सङ्गसंगमौ ॥ २९ ॥
संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।
परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ ३० ॥
निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् ।
प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥ ३१ ॥
उपशायो विशायश्च पर्यायशयनार्थकौ ।
अर्तनं च ऋतीया च हृणीया च घृणार्थके ॥ ३२ ॥
स्याद्व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये ।
पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः ॥ ३३ ॥
प्रेषणं यत्समाहूय तत्र स्यात्प्रतिशासनम् ।
स संस्तावः क्रतुषु या स्तुतिभूमिर्द्विजन्मनाम् ॥ ३४ ॥
निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्घनः ।
स्तम्बघ्नस्तु स्तम्बघनः स्तम्बो येन निहन्यते ॥ ३५ ॥
आविधो विध्यते येन तत्र विष्वक्समे निघः ।
उत्कारश्च निकारश्च द्वौ धान्योत्क्षेपणार्थकौ ॥ ३६ ॥

इति घञ्, प्रसिध्यर्थे । (अवेक्षा) अवधानार्थे ॥ २८ ॥ (निपाठ इ०) नौगदनदेति (सू०) वा घञ् । (तेम इ०) तिम ष्टिम ष्टीम आर्द्रीभावे । (समुन्दनं) उन्दी क्लेदने । (आदीनवः) दीङ् क्षये । आस्रवन्तीन्द्रियाण्यनेनास्रवः, यज्जैनाः– जीवाजीवास्रवसंवरनिर्जरबन्धमुक्तयः सप्त पदार्थाः । मेलनं मेलः, मिलिर्लौकिकः । सञ्जनं सङ्गः, घञ् । संगतिः संगमः, ग्रहवृदृनिश्चिगमश्च (सू०) इत्यप् ॥ २९ ॥ अन्वीक्षणमन्वेषणमित्येके पेठुः । (मार्गणं) मार्ग अन्वेषणे, ल्युट् । (मृगणा) मृग अन्वेषणे, युच्, अदन्तत्वाद् गुणाभावः । मृगः, एरच् (सू०), एरजण्यन्तानाम् (ज्ञा०) इत्यस्य प्रायिकत्वात् । गवेषणं च । (परिरम्भः) रभेरशब्लिटोः (सू०) इत्यचि नुम्, आलिङ्गनार्थे ॥ ३० ॥ (प्रत्याख्यानं, इ०) निराकरणार्थे ॥ ३१ ॥ (उपशायः) व्युपयोःशेतेःपर्याये (सू०) इति घञ् । पर्यायः क्रमः, (यथा)– तवावराजोपशायः । ऋतिः सौत्रो घृणार्थः, ऋतेरीयङ् (सू०) । हृणीङ् कण्ड्वादिः, यक्, अप्रत्ययात् (सू०) ॥३२॥ व्यतिक्रम्यासनं व्यत्यासः । विपरीतासनं विपर्यासः, अस्यतेर्घञ् । विपरीतायनमितीणोऽचि विपर्ययः, परावनुपात्ययइणः (सू०) इत्यपि विपर्ययः । परित्यज्यायनं पर्ययः, परावनुपात्ययइणः (सू०) इति– उपात्यये क्रमोल्लङ्घने घञ् नास्ति । अतिक्रम्य पतनं यथा– कालातिपातः । उपपन्नस्यात्ययोऽतिक्रमणमुपात्ययः ॥ ३३ ॥ आकारणं कृत्वा यद् भृत्यानां कार्येषु बिसर्जनं तत्प्रतिशासनम् । समं स्तूयतेऽस्मिञ्छन्दोगैः संस्तावः, यज्ञेसमिस्तुवः (सू०) इति घञ् ॥३४॥ उद्धन्यतेऽस्मिन्नुद्घनः, उद्घनोऽत्याधानम् (सू०) इति साधुः । (स्तम्बघ्नः) स्तम्बेकच (सू०) इति कः, स्तम्बस्तृणं विरुच्च । (स्तम्बघनः) अप् च ॥ ३५ ॥ (आविधः) व्यधेः, घञर्थेकविधानम् (वा०) । समन्तात्समः, समस्तुल्यारोहपरिणाहः । नियतं हन्यते निघः, निघोनिमितम् (सू०) इति साधुः । (उत्कारः) कृधान्ये (सू०) इति घञ्, उन्न्योरित्यनुवृत्तेः (उन्न्योर्ग्रः) । ऊर्ध्वं क्षेपो

निगारोद्गारविक्षावोद्ग्राहास्तु गरणादिषु ॥ ३७ ॥
आरत्यवरतिविरतय उपरामेऽथास्त्रियां तु निष्ठेवः ।
निष्ठ्यूतिर्निष्ठेवनं निष्ठीवनमित्यभिन्नानि ॥ ३८ ॥
जवने जूतिः सातिस्त्ववसाने स्यादथ ज्वरे जूर्तिः ।
उदजस्तु पशुप्रेरणमकरणिरित्यादयः शापे ॥ ३९ ॥
गोत्रान्तेभ्यस्तस्य वृन्दमित्यौपगवकादिकम् ।
आपूपिकं शाष्कुलिकमेवमाद्यमचेतसाम् ॥ ४० ॥
माणवानां तु माणव्यं सहायानां सहायता ।
हल्या हलानां ब्राह्मण्यवाडव्ये तु द्विजन्मनाम् ॥ ४१ ॥
द्वे पर्शुकानां पृष्ठानां पार्श्वं पृष्ठ्यमनुक्रमात् ।
खलानां खलिनी खल्याप्यथ मानुष्यकं नृणाम् ॥ ४२ ॥
ग्रामता जनता धूम्या पाश्या गल्या पृथक् पृथक् ।
अपि साहस्रकारीषवा(चा)र्मणाथर्वणादिकम् ॥ ४३ ॥
इति संकीर्णवर्गः । २ ।

राशीकरणं वा ॥ ३६ ॥ (निगार इ०) निगरणमुद्गरणं च, उन्योर्ग्रः (सू०) इति घञ् । विक्षावः काशे[से], वौक्षुश्रुवः (सू०) इति घञ् । (उद्ग्राहः) उद्ग्रहणं, उदिग्रहः (सू०) इति घञ् ॥ ३७॥ (उपरामः) निवृत्त्यर्थे, नोदात्तोपदेशस्यमान्तस्यानाचमः (सू०) इति वृद्धिनिषेधो नास्ति— अनुदात्तोपदेशत्वात्, यमउपरमे (ग०) इति निपातनात्तूपरमः । (निष्ठीवनं) ष्ठिविसिव्योर्ल्युटिवादीर्घः (चान्द्रसू०) ॥ ३८ ॥ (जूतिः) ऊतियूतिजूतिसातिहेतीति (सू०) साधुः, जवनमित्येके । (सातिः) षोन्तकर्मणि । (जूर्तिः) ज्वरत्वरस्रिव्यवीति (सू०) ऊत्वम् । (उदजः) समुदोरजः पशुषु (सू०) इत्यप्, अघञपोः (सू०) इति वी नास्ति । न करणं (अकरणिः), यथा— अकरणिरिह भूयादप्रशस्तस्य धातुः, तस्याजननिरेवास्तु (शिशु०), आक्रोशेनञ्यनिः (सू०) । तथा— आक्रोशेऽवन्योर्ग्रहः (सू०), निग्राहस्ते वृषल भूयात्, अवग्राहः ॥ ३९ ॥ औपगवानां समूहः (औपगवकम्) । आदिशब्दाद् गार्गकं, दाक्षकं, गोत्रोक्षोष्ट्रेति (सू०) वुञ् । तस्य वृन्दमित्येव— आ वर्गसमाप्तेः । अपूपानां समूह आपूपिकम्, अचित्तहस्तिधेनोष्ठक् (सू०) । आदिशब्दात् शाष्कुलिकादिः [वण्डकादिः] ॥४० ॥ (माणव्यं) ब्राह्मणमाणववाडवाद्यत् (सू०) । (सहायता) ग्रामजनबन्धुसहायेभ्यस्तल् (सू०) । (हल्या) पाशादिभ्योयः (सू०) ॥ ४१ ॥ पर्शूनां समूहः पार्श्वम्, पर्श्वाणसवक्तव्यः (वा०) । (पृष्ठ्यं) पृष्ठादुपसंख्यानात् (वा०) यत्, यज्ञविषयेऽदः स्मरन्ति । (खलिनी, इ०) खलगोरथात् (सू०), इनित्रकट्यचश्च (सू०) इति— इनिर्यंच्च । मनुष्याणां समूहः (मानुष्यकं), गोत्रोक्षोष्ट्रेति (सू०) वुञ्, प्रकृत्याकेराजन्यमनुष्ययुवानः (वा०) इति यलोपाभावः ॥ ४२ ॥ ग्रामादिसमूह एते वर्तन्ते, ग्रामजनेति (सू०) तल्, पाशादिभ्यश्चेति (सू०) यः, भिक्षादिभ्योऽण् (सू०) । पृथक्पृथगिति परस्परं पर्यायत्वाभावः । वर्मिणां समूहो वार्मणम् । आदिशब्दाच्चार्मणाङ्गारादि । वाच्यं चात्र— परभागो गुणोत्कर्षः प्रतिपत्तिः प्रगल्भता । श्रन्थनं ग्रन्थनं गुम्फः संदर्भो रचना न ना ॥ प्रणिपातस्त्वनुनयः प्रणयः सान्त्वना न ना । दवथुः परितापः स्यादनुतापो विसूरितम् ॥ क्रीडा विनोदः खेदस्तु निर्वेदश्चावसन्नता । आप्लवः प्लवनं गर्धो धनायाकूतमाशयः ॥ अङ्कपाली परिष्वङ्ग आसारं त्वासरद्बलम् । विगानं वचनीयत्वमत्याधानमतिक्रमः ॥ हानं त्यागस्तुला [illegible] क्रिया चेष्टा विकल्पनम् । वितर्कस्तर्क आलस्यं कौसीद्यमजिगीषुता ॥ ४३ ॥ इति संकीर्णवर्गः । २ ।

नानार्थाः केपि कान्तादिवर्गेष्वेवात्र कीर्तिताः ।
भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते ॥ १ ॥
आकाशे त्रिदिवे नाको लोकस्तु भुवने जने ।
पद्ये यशसि च श्लोकः शरे खड्गे च सायकः ॥ २ ॥
जम्बुकौ क्रोष्टुवरुणौ पृथुकौ चिपिटार्भकौ ।
आलोकौ दर्शन(नोद्)द्योतौ भेरी पटहमाण(न)कौ ॥ ३ ॥
उत्सङ्गचिह्नयोरङ्कः कलङ्कोङ्कापवादयोः ।
तक्षको नागवर्धक्योरर्कः स्फटिकसूर्ययोः ॥ ४ ॥
मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोम्बुनोः ।
स्यात्पुलाकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके ॥ ५ ॥
उलूके करिणः पुच्छमूलोपान्ते च पेचकः ।
कमण्डलौ च करकः सुगते च विनायकः ॥ ६ ॥
किष्कुर्हस्ते वितस्तौ च शूककीटे च वृश्चिकः ।
प्रतिकूल प्रतीकस्त्रिष्वेकदेशे तु पुंस्ययम् ॥ ७ ॥
स्याद्भूतिकं तु भूनिम्बे कट्फले भूस्तृणेपि च ।
ज्योत्स्निकायां च घोषे च कोशातक्यथ कट्फले ॥ ८ ॥
सिते च खदिरे सोमवल्कः स्यादथ सिह्लके ।
तिलकल्के च पिण्याको वाह्लिकं रामठेपि च ॥ ९ ॥

इह तावत्कान्तखान्तादिवर्गेष्वेव नानार्थाः कीर्तिताः । तन्मध्याच्च ये केपि येष्वर्थेषु भूरिप्रयोगाः प्रचुरव्यवहारास्ते तत्पर्यायेष्वपि कथिता इति पौनरुक्त्यादिदोषो नोद्भावनीयः । कान्ता इतो वक्ष्यन्ते । एवं खान्तगान्तादौ द्रष्टव्यम् ॥ १ ॥ व्योम्नि स्वर्गे च नाको वर्तते, नास्त्यकमश्रेयोऽत्रेति । लोक्यते लोकः, यथा– ब्रह्मलोकः, गतानुगतिको लोकः । पद्ये पदबद्धे वृत्ते, श्लोक्यते श्लोकः, श्लोकृ संघाते । स्यति– अन्तं करोति सायकः ॥ २ ॥ (जम्बुकः) जमु अदने । पर्थते वर्धते पृथुकः । चिपिट आर्द्रसस्याभ्योषः । (आलोकः) भावे करणे च घञ्, अवलोकनप्रकाशार्थौ । अन्तस्तन्त्रीका ढक्का भेरी । पटहो दुन्दुभिः, समन्तादणत्याणकः ॥ ३ ॥ अमन्त्यस्मिन्बालादय इत्यङ्कः, अङ्क्यतेनेन च, अकि, लक्षणे, यथा मृगाङ्कः । कल्यते क्षिप्यते कलङ्कः । अङ्कोऽत्र चिह्नम् । नागो नागविशेषः । वर्धकिस्तक्षा । अर्च्यतेऽर्कः, वृक्षेपि ॥ ४ ॥ आत्मन्यपि कः । कं सुखेपि च, कायति काम्यते कचति(ते) वा । पुलं विस्तारमकति पुलाकः, यथा– पुलाका इव धान्येषु । संक्षेपे क्षिप्रे, यथा– पुलाककारी विपुलाशयः स्यात् । सिक्थे, यथा– स्थालीपुलाकन्यायेन ॥ ५ ॥ (पेचकः) पिचि गतौ पचिर्वा । (करकः) चशब्दाद्वर्षोपले दाडिमे च, कॄ विक्षेपे । (विनायकः) चशब्दाद् गणपतौ धर्मराजे च विनेतृत्वात् ॥ ६ ॥ कीयते ज्ञायतेनेन किष्कुः, चतुर्विंशत्यङ्गुलं द्वादशाङ्गुलं च मानम् । वृश्चतीति (वृश्चिकः) शूकवान्कीटः कण्टकी च कृमिः । चाद्राशौ मदन्तिकायां च (वृश्चिकः) । प्रतीपमेति प्रतीकः । एकदेशोऽशः, यथा सप्रतीकः श्लोकः । द्वीपेपि (प्रतीकः) ॥ ७ ॥ एते वनौषधिवर्गे व्याख्याताः । तथा भूनिम्बः किराततिक्तकः । कट्फलः श्रीपर्णी । भुस्तृणं छत्रा । यवान्यां च (भूतिकं) । ज्योत्स्निका पटोलिका । घोषोपामार्गः ॥ ८ ॥ पीड्यते पिण्याकः । वाह्लीकमित्येके । अपिशब्दाद्बह्लीकदेशोत्पन्नेश्वादौ हिङ्गौ कुङ्कुमे च ॥ ९ ॥ कुशिकस्यापत्यं, कोशो वा प्रयोजनमस्य कौशिकः । (आत-

महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः ।
रुक्तापशङ्कास्वातङ्कः स्वल्पेऽपि क्षुल्लकस्त्रिषु ॥ १० ॥
जैवातृकः शशाङ्केऽपि खुरेऽप्यश्वस्य वर्तकः ।
व्याघ्रेऽपि पुण्डरीको ना यवान्यामपि दीपकः ॥ ११ ॥
सा(शा)लावृकाः कपिक्रोष्टुश्वानः स्वर्णेऽपि गैरिकम् ।
पीडार्थेऽपि व्यलीकं स्यादलीकं त्वप्रियेऽनृते ॥ १२ ॥
शीलान्वयावनूके द्वे शल्के शकलवल्कले ।
साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले ॥ १३ ॥
दीनारेऽपि च निष्कोऽस्त्री कल्कोऽस्त्री शमलैनसोः ।
दम्भेऽप्यथ पिनाकोऽस्त्री शूलशंकरधन्वनोः ॥ १४ ॥
धेनुका तु करेण्वां च मेघजाले च कालिका ।
कारिकायातनाकृत्योः कर्णिका कर्णभूषणे ॥ १५ ॥
करिहस्ताङ्गुलौ पद्मबीजकोश्यां त्रिषूत्तरे ।
वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः ॥ १६ ॥

ङ्कः) तकि कृच्छ्रजीवने । स्वल्पः खलः । अपिशब्दाद्दरिद्रे कनिष्ठेपि, क्षोदः क्षुत्– क्षुदं क्षुधं च लाति क्षुल्लकः ॥ १० ॥ जीवेरातृकन्वृद्धिश्च (उ०) । अपिशब्दादायुष्मति (जैवातृकः) । अपिशब्दात्पक्षिविशेषे (वर्तकः) । (पुण्डरीकः) पुणेः पुण्डेश्च रूपम् । अपिशब्दाद्दिग्गजे, सिताम्बुजसितच्छत्रयोस्तु नपुंसकं (पुण्डरीकम्) । यवान्यजमोदा । अपिशब्दाद्दीपेऽलंकारे जीरकेपि (दीपकः) ॥ ११ ॥ स्यन्ति साला आवृण्वन्ति (सालावृकाः) । धातुविशेषेपिशब्दात् (गैरिकं), गिरौ भवं गैरिकं, गिरिणा विग्रहो गिरिकात्प्रत्ययोऽव्यविकन्यायेन । अपिशब्ददप्रियाकार्यविलक्षविपर्ययेषु (व्यलीकं) । कामजेपराधेपि, विशेषेणालीकं, व्यलीकमपि च व्यङ्गमिति च **माला** । अल्यते वार्यतेलीकं न लीयते वा, अलीकमहितं विदुरिति **कात्यः** । (अलीकं) ललाटेप्याहुः ॥ १२ ॥ अनूच्यति समवैत्यनूकं, उच समवाये, न्यङ्क्वादिः (सू०) । द्वे इत्येव, शलति पृथग्भवति शल्कं खण्डः । वल्कलं वार्क्षी त्वक् । सहाष्टाभिर्वर्तते साष्टं, बहुव्रीहौसंख्येयेडजबहुगणात् (सू०) । सुवर्णं षोडश माषकाः । पलं सुवर्णाश्चत्वारः । दीनैर्यते दीनारं रूपकम् । निःशेषेण काम्यते निष्कः, आकर्षोपि ॥ १३ ॥ कल्यते कल्कं द्रवाधश्चूर्णं विनीयाख्यं, शमलं विष्ठेत्येके । एनः पापं, यथा– तपो न कल्कोऽध्ययनं न कल्कः । अपिनह्यते पिनाकं त्रिशूलं शांकरमेवात ॥ १४ ॥ चकारान्नवप्रसूतायां गवादौ (धेनुका), हस्तिन्यां तु नामैतत् । कृपाणीधेनुसमाभवानीषु च (धेनुका) । चात्सुवर्णादिदोषे सुरायां च, कालो वर्णः समयश्चास्त्यस्याः कालिका, कृष्णा वृद्धि[ष्टि]श्च । कृञ् हिंसायां, कारिका नारकी व्यथा । करणं कृतिश्च कारिका, पर्यायार्हर्णोत्पत्तिषु च (सू०) इति ण्वुच् । कारिका यातनावृत्त्योरित्येके, वृत्तिः श्लोकैर्विवरणं, कारिके वृत्ति यातने इति **दुर्गः** । कर्णस्यालंकारः कर्णिका, कर्णललाटात्कन्नलंकारे (सू०), द्वयोस्त्विवार्थे (इवेप्रतिकृतौ, संज्ञायांच) ॥ १५ ॥ खान्तेभ्यः प्राग्वाच्यलिङ्गाः । वृन्दमस्त्यस्येति (वृन्दारकः), शृङ्गवृन्दाभ्यामारकन् (वा०) । रूपमस्त्यस्य रूपी । देवोप्युपचारात् (वृन्दारकः) । संख्यायां च, **यत्कात्यः**– प्रधानान्यासहायेषु संख्यायां चैक इष्यते ॥ १६ ॥ दम्भः प्रयोजनमस्त्यस्य दाम्भिकः । यतः कुक्कुटी

स्याद्दाम्भिकः कौक्कुटिको यश्चादूरेरितेक्षणः ।
ललाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः ॥ १७ ॥
मयूखस्त्विट्करज्वालास्वलिवाणौ शिलीमुखौ ।
शङ्खो निधौ ललाटास्थ्नि कम्बौ न स्त्रीन्द्रियेपि खम् ॥ १८ ॥
घृणिज्वाले अपि शिखे शैलवृक्षौ नगावगौ ।
आशुगौ वायुविशिखौ शरार्कविहगाः खगाः ॥ १९ ॥
पतंगौ पक्षिसूर्यौ च पूगः क्रमुकवृन्दयोः ।
पशवोपि मृगा वेगः प्रवाहजवयोरपि ॥ २० ॥
परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि ।
गजेपि नागमातङ्गावपाङ्गस्तिलकेपि च ॥ २१ ॥
सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु ।
योगः संनहनोपायध्यानसंगतियुक्तिषु ॥ २२ ॥

माया कुक्कुटीपादपातश्च, तौ पश्यति कौक्कुटिकः, संज्ञायांललाटकुक्कुट्यौ पश्यति (सू०) इति ठक् । ललाटं कोपप्रसादचिह्नं पश्यति, ललाटमेव वा दूरात्कार्येष्वलिसः सन् पश्यति लालाटिकः । भालं ललाटं, भालदर्शीत्येके पेठुः ॥ १७ ॥ भूभृन्नितम्बवलयचक्रेषु कटकोस्त्रियाम् । सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः ॥ पाकौ पक्तिशिशू मध्यरत्ने नेतरि नायकः । पर्यङ्कः स्यात्परिकरेप्याद्रायामपि लुब्धकः ॥ पेटकस्त्रिषु वृन्देपि गुरौ देश्ये च देशिकः । खेटकौ ग्रामफलकौ धीवरेपि च जालिकः ॥ पुष्परेणौ च किञ्जल्कः शुल्कोस्त्री स्त्रीधनेपि च । स्यात्कल्लोलेप्युत्कलिका वार्धकं भाववृन्दयोः ॥ करिण्यां चापि गणिका दारकौ बालभेदकौ । अन्धेप्यनेडमूकः स्याट्टङ्कौ दर्पाश्मदारणौ ॥ मृद्भाण्डेप्युष्ट्रिका मन्थे खजको रसदर्वके ॥ इतः खान्ताः । मिनोत्यन्धकारं मयूखः । त्विड् दीप्तिः । करो रश्मिः । शिली शल्यं मुखेस्य (शिलीमुखः) । शं खनति शाम्यति वा शंखः । शंखपद्मौ वैश्रवणनिधी । ललाटप्रान्तास्थि शंखः, कम्बौ तु, अर्धर्चादिः (सू०) । खन्यते खम् । अपिशब्दात्स्वर्व्योम्नोः (खं), शून्ये तूपचारात् ॥१८॥ अपिशब्दाच्चूडाशाखाग्रमात्रे मयूरचूडा च, शिनोति शीयते वा शिखा । उपलेपेपि गोमुखम् । अथ गान्ताः । न गच्छति नगः, नगोऽप्राणिष्वन्यतरस्यां (सू०) इति नञ् प्रकृत्या । (आशुगः) विशिखो बाणः । खे गच्छन्ति खगाः ॥ १९ ॥ पदद्गच्छति पतति वा पतंगः । चशब्दाच्छलभः (पतंगः), शालिविशेषश्च । पूयते पूगः । क्रमुकः पूगवृक्षः । अपिशब्दाद्धरिणो हस्तिविशेषो मृगशीर्षं मार्गणा च (मृगः) । वेति वेगः, विजतेनेन वा, घञ् । प्रवाहे यथा– नदी वेगेन शुध्यति (चाणक्यः) । जवे यथा– वायुवेगः । अपिशब्दान्मूत्रादिप्रवृत्तौ यथा– वेगान्न धा[र]येद्वातविण्मूत्रक्षवतृट्क्षुधाः । मलोत्सर्गे प्रभावे शृङ्गारभावे च यथा– चण्डवेगो मन्दवेगः ॥ २० ॥ परागच्छति परागः । स्नात्यनेन स्नानीयं चूर्णम् । रजो धूलिः (परागः) । अपिशब्दात्काद्रवेये सीसे नागकेसरे नागदन्त्यां गजाह्वये जलदे रङ्गे च, न– अगो नागः । चण्डालेपि मातङ्गः । मा तङ्गति, मतङ्गापत्यं वा । अपगतोऽङ्गादपाङ्गः, अपिशब्दान्नेत्रान्ते ॥ २१ ॥ स्वभावे यथा– निसर्गः । निर्मोक्षे त्यागे (यथा)– विसर्गः, मोक्षाभावे वा, सर्गः संसारः । निश्चये यथा– गृहाण शस्त्रं यदि सर्ग एष ते (रघु०) । अधीयतेऽध्यायोत्र महाकाव्यादौ विश्रान्तिस्थानं, सर्गबन्धो महाकाव्यम् (काव्यादर्श) । सृष्टौ यथा– सर्गश्च प्रतिसर्गश्चेति (विष्णुपु०) । उत्साहेपि सर्गः । (योगः) संनहनं कवचादि, उपायः सामादिः, संनहनाङ्गं कवचादिरित्येके । ध्यानं चित्तवृत्तिनिरोधः, संगतिः श्लेषः (योगः) । युक्तिर्योजनम् । अपूर्वार्थप्राप्तिर्भेषजं विश्रम्भघाती चरश्च योगः ॥ २२ ॥ भुजेरभ्यवहारार्थात्कौटिल्यार्थाच्च घञ् । पण्यस्त्रीणां भृतिर्भाटिः

भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः ।
चातके हरिणे पुंसि सारङ्गः शबले त्रिषु ॥ २३ ॥
कपौ च प्लवगः शापे त्वभिषङ्गः पराभवे ।
यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु ॥ २४ ॥
स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ।
लक्ष्यदृष्ट्या स्त्रियां पुंसि गौर्लिङ्गं चिह्नशेफसोः ॥ २५ ॥
शृङ्गं प्राधान्यसान्वोश्च वराङ्गं मूर्धगुह्ययोः ।
भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु ॥ २६ ॥
परिघः परिघातेऽस्त्रेऽप्योघो वृन्देऽम्भसां रये ।
मूल्ये पूजाविधावर्घोऽहोदुःखव्यसनेष्वघम् ॥ २७ ॥
त्रिष्विष्टेऽपि(ल्पे) लघुः काचाः शिक्यमृद्भेददृग्रुजः ।
विपर्यासे विस्तरे च प्रपञ्चः पावके शुचिः ॥ २८ ॥

(भोगः) । आदिशब्दात्कर्मकृद्वेतनं, यच्छाश्वतः– पालनेऽभ्यवहारे च निर्वेशे च पणे स्त्रियाः । भोगः सुखे भुजंगानां शरीरफणयोरपि ॥ चातकस्तोककाख्यः पक्षी, सरति सारं गच्छाति सहारङ्गेण वा वर्तते सारङ्गः । गौडः स(श)बलः सारङ्ग इति व्याख्यत् ॥ २३ ॥ चशब्दाद्भेके पक्षिभेदे च (प्लवगः) । शापो मिथ्याभिशंसनमनिष्टावधारणं च, आहुश्च– अभिषङ्गाख्याः शापाक्रोशपराभवाः । (अभिषङ्गः) कर्मणि भावे च घञ् । यानं रथशकटादि । आदिशब्दाद्धलम् । तलाङ्गं दान्तादियोजनकाष्ठं, पुंसि यथा– अनोयुगः शकटयुगः । आदिशब्दात्त्रेतादि । हस्तचतुष्कं च यथा– विचरेद्युगमात्रदृक् ॥ २४ ॥ इषुर्बाणः । वागादौ स्त्रीलिङ्गो गौः स्वर्गादौ पुंलिङ्गः पशौ तूभयं, यथा– इयं गौर्धेनुः, अयं गौर्दान्तः । इत्थं जलाक्ष्णोः क्लीबे– इत्येके । लीनं गमयति लिङ्गति चित्रीकरोति वा लिङ्गम् । चिह्नं धूमादिः शेफः साधनम् ॥ २५ ॥ शीर्यते शृणाति च शृङ्गम् । प्रधानमेव प्राधान्यं, यथा– शृङ्गग्राहिकया । सानुरत्र गिरिशिखरं, कात्यस्तु– शृङ्गं शिखरं सान्वपीत्याह । चशब्दाद्विषाणं क्रीडाम्बुपात्रं च (शृङ्गम्) । गुह्यं योनिः । भज्यते सेव्यते मर्द्य[ह्य]ते च भगं, खलोभगःपदंचेति (वा०) वक्तव्याद् घः । कामोत्र योनिः । सूर्यविशेषो भगः पुंसि मित्रवत् । धर्मो मोक्षश्च भगः, यदाहुः– ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इति स्मृतः ॥ २६ ॥ अथ घान्ताः । परिहननं परि-हन्यतेनेन वा परिघः, परौघः (सू०) इत्यप्प्रत्यये हन्तेर्घत्वं, करणेऽयोविद्रुषु (सू०) इत्यतः करणा-नुवृत्त्या भावादौ नेच्छन्ति । अस्यतेस्त्रमायुधविशेषः । अपिशब्दादर्गलेपि (परिघः) । उह्यते वहति वा– ओघः, न्यङ्क्वादौ (सू०) साधुः । मूल्यं पणः, यथा– अनर्घा गुणाः, अर्घिर्घान्तरं, पूजार्थे त्वर्हे न्यङ्क्वादित्वात् (सू०) कुत्वम् ॥ २७ ॥ (लघुः) इष्टे यथा– दर्शनेन लघुना यथा तयोः प्रीति-मापुरुभयोस्तपस्विनः (रघु०) । अपिशब्दात्क्षिप्राल्पागुरुनिःसारेषु (लघुः) । निदाघस्त्वातपे स्वेदे ग्रीष्मे चैव (प्रकीर्तितः) । अथ चान्ताः । कमञ्चति कचाग्नि वा काचः । शिक्यं रज्जुयन्त्रम् । मृद्-भेदो धातुविशेषः, यथा– काचः काचो मणिर्मणिः (वृद्धचाणक्यः) । दृग्रोगः काचाख्यः । विपर्यासो माया । विपर्यासे च विस्तारे– इति पाठो युक्तः, प्रथनेवावशब्दे (सू०) इत्यपो निषेधात् । शुचिः शोधकोमिविशेषः , यच्छ्रुतिः– अग्नये शुचये च द्वितीयायाम् ॥ २८ ॥ मासोत्राषाढः, यच्छ्रुतिः–

मास्यमात्ये चात्युपधे पुंसि मेध्ये सिते त्रिषु ।
अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम् ॥ २९ ॥
केकिताक्ष्यावहिभुजौ दन्तविप्राण्डजा द्विजाः ।
अजा विष्णुहरच्छागा गोष्ठाध्वनिवहा व्रजाः ॥ ३० ॥
धर्मराजौ जिनयमौ कुञ्जो दन्तेपि न स्त्रियाम् ।
वलजे क्षेत्रपूर्द्वारे वलजा वल्गुदर्शना । ३१ ॥
समे क्ष्मांशे रणेप्याजिः प्रजा स्यात्संततौ जने ।
अब्जौ शंखशशाङ्कौ च स्वके नित्ये निजं त्रिषु ॥ ३२ ॥
पुंस्यात्मनि प्रधाने(वीणे) च क्षेत्रज्ञो वाच्यलिङ्गकः ।
संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना ॥ ३३ ॥
काकेभगण्डौ करटौ गजगण्डकटी कटौ ।
शिपिविष्टस्तु खलतौ दुश्चर्मणि महेश्वरे ॥ ३४ ॥
देवशिल्पिन्यपि त्वष्टा दिष्टं दैवेपि न द्वयोः ।
रसे कटुः कटुकार्ये त्रिषु मत्सरतीक्ष्णयोः ॥ ३५ ॥
रिष्टं क्षेमाशुभाभावेष्वरिष्टे तु शुभाशुभे ।
मायानिश्चलयन्त्रेषु कैतवानृतराशिषु ॥ ३६ ॥

शुक्रश्च शुचिश्च ग्रैष्मिकावृतू । उपधा धर्मार्थकामभयमुखेन सचिवपरीक्षा, तामतिक्रान्तोत्युपधः, यत्कौटिल्यः— उपधाभिः शौचाशौचपरिज्ञानममात्यानाम् । (रुचिः) अभिष्वङ्गो रागः, गभस्तिर्दीप्तिः ॥ २९ ॥ अथ जान्ताः । मयूरगरुडौ (अहिभुजौ) । विप्रः क्षत्रियवैश्योपलक्षणम्, यत्स्मृतिः— विप्रक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः । अण्डजाः पक्षिसर्पाद्याः । न जायते अजति वा— अजः । गावस्तिष्ठन्त्यस्मिन् गोष्ठम् । व्रजन्त्यस्मिन् व्रजोध्वा, गोचरसंचरेति (सू०) साधुः । निवहः समूहः, यथा— द्विजव्रजः ॥ ३० ॥ (धर्मराजौ) समवर्तित्वात् । दन्ते हस्तिदन्ते, यथा— कुञ्जरः । अपिशब्दाल्लतादिपिहितोदरे (कुञ्जः) । वलन्तेनेन वले जायते वा वलजं क्षेत्रं पुरद्वारं च । वल्गुदर्शने भद्राकृतौ त्रिलिङ्गम् ॥३१॥ आनिम्नोन्नतो भूभागो रणश्चाजिः, अज्यतेत्राजिः । अपिशब्दात्क्षणेपि, यद्दुर्गः— युद्धभागक्षणेप्याजिः । संततौ यथा— शोच्यं मिथुनमप्रजम् (चाणक्यश०) । जनो लोको यथा— प्रजापतिः । चकारात्पद्मम् (अब्जम्) । नियतं जायते निजम् । अग्रजौ विप्रपूर्वजौ— इति दुर्गः ॥ ३२ ॥ अथ ज्ञान्ताः । क्षेत्रं शरीरं पात्रं जानाति क्षेत्रज्ञः, आत्मा मुख्यश्च । संज्ञानं संज्ञा संज्ञायतेनया च । आद्यशब्दादक्षिनिकोचनाद्यैः, अर्थः प्रयोजनम् । दोषज्ञौ वैद्यविद्वांसौ ज्ञो विद्वान् सोमजोपि च ॥ ३३ ॥ इतष्टान्ताः । केति रटति करो(किर)ति मदं च करटः । कटति वर्षति मदं कटः । श्मशानं कलिञ्जोपि, कटत्यावृणोतीति, यथा— वर्जयेत्कटधूमं तु, कटे— आस्ते । शिपिश्चर्म विष्टं दोषव्याप्तमस्येति, दुश्चर्मा षण्ढः, आहुश्च— शिपिविष्टः शिवः शौरिर्दुश्चर्मा खलतिस्तथा ॥ ३४ ॥ देवशिल्पी विश्वकर्मा । अपिशब्दात्सूर्ये तक्ष्णि च त्वष्टा, त्वक्षति त्वक्ष्यते वा । समणेस्तेजःशातनात्त्वष्टा । दिशति शुभाशुभं फलं दिष्टं, दैवं पुराकृतं कर्म । अपिशब्दात्काले (दिष्टः) । कटत्यावृणोति कटुः, दुर्गन्धे चाप्रिये चोपचारात् ॥ ३५ ॥ रिष हिंसायां, नास्ति रिष्टमशुभं क्षेमं वा— अरिष्टं, आहुश्च— तक्रे मरणचिह्ने चारिष्टं वृक्षे च फेनिले । सुरायां च शुभेपि स्यात्काके निम्बे च पुंस्ययम् ॥ माया— इन्द्रजालं, निश्चले यथा— कूटस्थोक्षर उच्यते (भगवद्गीता), निश्चलं व्योमेति गौडः । यन्त्रं मृगादिवधार्थं छलं यथा— छित्त्वा पाशमपास्य कूटरचनाम्

अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम् ।
सूक्ष्मैलायां त्रुटिः स्त्री स्यात्कालेऽल्पे संशयेऽपि सा ॥ ३७ ॥
अत्त्युत्कर्षाश्रयः कोट्यो मूले लग्नकचे जटा ।
व्युष्टिः फले समृद्धौ च दृष्टिर्ज्ञानेऽक्ष्णि दर्शने ॥ ३८ ॥
इष्टिर्यागेच्छयोः सृष्टं(ष्टिः) निश्चिते बहुनि त्रिषु ।
कष्टे तु कृच्छ्रगहने दक्षामन्दागदेषु तु ।
पटुर्द्वौ वाच्यलिङ्गौ च नीलकण्ठः शिवेऽपि च ॥ ३९ ॥
पुंसि कोष्ठोऽन्तर्जठरं कुशूलोऽन्तर्गृहं तथा ॥ ४० ॥
निष्ठा निष्पत्तिनाशान्ताः काष्ठोत्कर्षे स्थितौ दिशि ।
त्रिषु ज्येष्ठोऽतिशस्तेऽपि कनिष्ठोऽतियुवाल्पयोः ॥ ४१ ॥
दण्डोऽस्त्री लगुडेऽपि स्याद् गुडो गोलेक्षुपाकयोः ।
सर्पमांसात्पशू व्याडौ गोभूवाचस्त्विडा इलाः ॥ ४२ ॥

(पंचतं०) । कैतवं व्याजः (कूटं) । राशिर्धान्यादिपुञ्जः (कूटः) ॥ ३६ ॥ अयोमयो घनः, आघातार्थमयःसारं भाण्डं कूटं नाराचो वा, कूटशाल्मलिरित्यके । सीराङ्गं फालाधारः कूटाख्यः, यद्दुर्गः— कूटं घटहलाङ्गयोः । त्रुटति त्रुटिः, कालेऽल्पे क्षणद्वयाख्ये । संशय यथा— त्रुटिं प्राप्तो रोगी ॥ ३७ ॥ आर्त्तिश्चापकोटिरटनिर्यथा— धनुःकोट्या नुदति । उत्कर्षे यथा— परां कोटिमारूढः । अश्रिर्धारा कोणो वा यथा— शतकोटिर्वज्रः । संख्यापि कोटिः, यद् भागुरिः— अत्यर्बुदाश्रयः कोट्यः, स्त्रीत्वार्थे ङीप् । वृक्षादिमूलं जटा । लग्नाः श्लिष्टाश्च कचा जटाः, जट संघाते । व्युच्छनं व्युष्टिः, उच्छी विवासे, फलं प्रयोजनम् । चशब्दात्स्तुतौ (व्युष्टिः) । (दृष्टिः) भावे करणे च क्तिन् ॥ ३८ ॥ यजेरिषेश्च क्तिन् (इष्टिः) । मुक्तनिर्मितयोश्च (सृष्टम्) । कषिष्यतीति कष्टं, यथा— कष्टं प्राप्तः क्लेशमित्यर्थः । कष्टानि सामानि गहनानीत्यर्थः, कृच्छ्रगहनयोःकषः (सू०) इत्यनिट् । (पटुः) दक्षोनलसः, अमन्दो धृष्टः, अगदो नीरुक् । चशब्दाल्लवणो रसः पटुः ॥ ३९ ॥ द्वौ कष्टपटू । पोटा दासी द्विलिङ्गा च घृष्टी घर्षणसूकरौ । घटा गोष्ठ्यां हस्तिपङ्क्तौ कूपीटमुदरे जले । इतष्ठान्ताः । अपिशब्दान्मयूरः (नीलकण्ठः) । कुष्यते कोष्ठो जठराभ्यन्तरं, यथा— मृदुकोष्ठः । कुशूलो धान्याधारः (कोष्ठः) । कोष्ठागारं गृहस्याभ्यन्तरमपवरकाख्यम् ॥ ४० ॥ निर्व्यूढं निर्वृत्तं नियतं च स्थानं निष्ठा । क्लेशतपोयाच्ञानिर्बर्ह(र्वह)णपरमगतयोपि (निष्ठाः) । काशनं काशते वा काष्ठा, स्थितिर्मर्यादा । कालविशेषेपि अष्टादश निमेषास्तु काष्ठेति । काष्ठं दारु च । इष्ठनि प्रशस्यस्यश्रः (सू०), ज्यच (सू०) । अपिशब्दादग्रजे वृद्धेपि (ज्येष्ठः) । युवाल्पयोःकनन्यतरस्याम् (सू०), अतियुवात्यल्पश्च ॥ ४१ ॥ अथ डान्ताः । दम्यतेनेन दण्डः, अपिशब्दाच्चतुरङ्गं बलं चतुर्थोपायो दमो मन्थश्च । गोलो वृत्तो मृदादिगुडकः, यथा - भक्षिता वाप्ययोगुडाः (चरक०) । लत्वेन गुलिका स्नुही गुलिका निशा । सन्नाहश्च गुडः । मांसमत्तीति मांसात् सिंहादिः । व्यडति हन्तुं व्याडः, व्यड उद्यमे, विविधमाल(ड)मस्माद्वा व्याडः । इल क्षेपणे, बुधभार्यापि— इडा यस्या अपत्यमैडः पुरूरवाः ॥ ४२ ॥ क्ष्वेडिः शब्दार्थ उन्नेयः, अपिशब्दात्सिंहनादो दन्तोष्ठवाद्यम् (क्ष्वेडा) । क्ष्वेडस्तु विषं ध्वनिश्च । षड्भिः क्षणैश्च षट्क्षण इति० नाडीव नालिकात्र, अपिशब्दात्सुषिरं वृक्षादि धमनिश्च । नाडो नालश्च जलनिर्गमः । डलयोरैक्यात्प्रणालो नालः कण्ठः पद्मादिवृन्तं

क्ष्वेडा वंशशलाकापि नाडी कालेपि षट्क्षणे ।
काण्डोस्त्री दण्डबाणार्ववर्गावसरवारिषु ॥ ४३ ॥
स्याद् भाण्डमश्वाभरणेमत्रे मूलवणिग्धने ।
भृशप्रतिज्ञयोर्वाढं प्रगाढं भृशकृच्छ्रयोः ॥ ४४ ॥
शक्तस्थूलौ त्रिषु दृढौ व्यूढौ विन्यस्तसंहतौ ।
भ्रूणोर्भके स्त्रैणगर्भे बाणो बलिसुते शरे ॥ ४५ ॥
कणोतिसूक्ष्मे धान्यांशे संघाते प्रमथे गणः ।
पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेपि च ॥ ४६ ॥
मौर्व्यां द्रव्याश्रिते सत्त्वशौर्यसंध्यादिके गुणः ।
निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः ॥ ४७ ॥
वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु चाक्षरे ।
अरुणो भास्करेपि स्याद्वर्णभेदेपि स त्रिषु ॥ ४८ ॥
स्थाणुः शर्वेप्यथ द्रोणः काकेप्यथ रवे रणः ।
ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ॥ ४९ ॥

च । दण्डो नालं यथा– उद्ध(त्का)ण्डैः पुण्डरीकैः । अर्वा कुत्सितः, यथा– काण्डपृष्ठः (महावीर०) । वर्गे यथा– बालकाण्डं, श्राद्धक[का]ण्डिका । काण्डस्यावसरस्याभावोऽकाण्डम् । लतावृक्षस्कन्धयोश्च (काण्ड०) । प्रकाण्डं तु वृक्षादिस्कन्धः, प्रशंसार्थे च यथा– पुरुषप्रकाण्डम् ॥ ४३ ॥ अश्वस्याभरण-मायानं पर्याणादि. यथा– भाण्डत्रासी हयः । अमत्रे यथा– प्रकीर्णभाण्डामनवेक्ष्यकारिणीम् । मूलं ऊर्ध्वं वणिजो धनं वा, यथा– भाण्डपतिः । संघातग्रासयोः पिण्डी द्वयोः पुंसि कलेवरे । गण्डौ कपोलविस्फोटौ मुण्डकं त्रिषु मुण्डिते ॥ इक्षुभेदेपि खण्डोस्त्री शिखण्डो बर्हचूडयोः । अथ ढान्ताः । बाहेः क्ते(बाढं), क्षुब्धस्वान्तध्वान्तेति (सू०) साधुः । (बाढं) प्रतिज्ञानेऽङ्गीकारेऽव्ययम् । (प्रगाढं) दृढेपि, यदाहुः– प्रगाढं कृच्छ्रमिच्छन्ति प्रगाढं बलवद् दृढम् ॥ ४४ ॥ दृहि वृद्धौ क्त दृढः, दृढःस्थूलबलयोः (सू०) इति साधुः । अत्यर्थे च यथा– दृढं शान्तोस्मि । त्रिष्वित्येव । विन्यस्तं रचितं यथा– व्यूढां द्रुपदपुत्रेण तव शिष्येण (भगवद्गीता) । संहतो घनो यथा– व्यूढोरस्कः (रघु०) । अथ णान्ताः । भ्रियते भ्रूणः । बलिसुतो बाणासुरः । दासीकुरण्टकेपि बाणशब्दार्थः ॥४५॥ अतिसूक्ष्मे मुक्तादिपुलके (कणः) । धान्यस्यांशः कणिका यथा– कणादो मुनिः । गण्यते गणः, संख्यायां सैन्यांशेपि । नित्यंपणःपरिमाणे (सू०) इति साधुः । द्यूतादावुत्सृष्टं जय्यत्वे स्थापितं (पणः) । आदिशब्दात्समाह्वयपणादौ । भृति-र्वेतनम् । अपिशब्दात्क(त्का)र्षिकस्ताम्रिकः पणः, यच्छाश्वतः– ग्लहे माने श्वेतकानां मूल्ये कार्षापणे धने । द्यूतादौ कल्पिते चैव बद्धमुष्टौ भृतौ पणः ॥ ४६ ॥ द्रव्याश्रिते पटादेः शुक्लादिर्गुणः, आत्मनो बुद्धिसुखादिः, रूपादिचतुर्विंशतेर्गुणत्वात् । सत्त्वेनिविशतेपैतीतिच (गुणः) (का०) । सत्त्वादीनि सत्त्वरजस्तमांसि, शौर्यौदार्यादयो गुणाः । संधिविग्रहयानासनद्वैधीभावसंश्रयाः षड् गुणाः । तेजोबलवीर्यै-श्वर्यवैराग्यशक्तयश्च षट् पराश्रितत्वात् , तेन गुणोऽप्रधानमित्यपि च वाच्यम् । शौर्यादयस्तूत्कर्षाद गुणाः । रज्ज्वप्रधानसूदेन्द्रियभोगेष्वपि (गुणः) । निर्व्यापारासने यथा– क्षणो नास्ति रहो नास्ति (पंचतं०) । कालविशेषो नाडिकाषष्ठांशः (क्षणः) । उत्सवे यथा– क्षणे रक्ष्याः कुलस्त्रियः । वृत्ते तूत्सवत्वाद्यथा– क्षणपरपुरजिद्दत्तशूलप्रहारान्, क्षणोति क्षणः ॥ ४७ ॥ वृणोति व्रियते वा, वर्ण्यते वर्णनं वा वर्णः । षड्जादिगतौ तालविशेषे गुणयशोविलेपनब्रह्मचर्येष्वपि (वर्णः) ॥ ४८ ॥ (ग्रामणीः) ग्रामः खेटको

ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवौ ।
हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या ॥ ५० ॥
त्रिषु पाण्डौ च हरिणः स्थूणा स्तम्भेपि वेश्मनः ।
तृष्णे स्पृहापिपासे द्वे जुगुप्साकरुणे घृणे ॥ ५१ ॥
वणिक्पथेपि विपणिः सुरा प्रत्यक्च वारुणी ।
करेणुरिभ्यां स्त्री नेभे द्राविणं तु बलं धनम् ॥ ५२ ॥
शरणं गृहरक्षित्रोः श्रीपर्णं कमलेपि च ।
विषाभिमरलोहेषु तीक्ष्णं क्लीबे खरे त्रिषु ॥ ५३ ॥
प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु ।
करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि ॥ ५४ ॥
प्राण्युत्पादे संसरणमसंबाधचमूगतौ ।
घण्टापथेथ वान्तान्ने समुद्धरणमुन्नये ॥ ५५ ॥
स्वतस्त्रिषु विषाणं स्यात्पशुशृङ्गेभदन्तयोः ।
प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे ॥ ५६ ॥

वृन्दं च ॥ ४९ ॥ ऊर्णोत्यूर्णा । आवर्तश्चक्रवर्तिचिह्नं यथा– ऊर्णेयमन्तर्भ्रुवोः, अन्तरा भ्रुवाविति– अन्तरान्तरेणयुक्ते (सू०) द्वितीया । हरति हरिणी मृगी हेम्नो वा प्रतिमा । हरिं पीतं वर्णं नयतीति, हरिता नीला, वर्णादनुदात्तात्तोपधात्तोनः (सू०) इति वा ङीप् । यूथिका पाण्डुरा च (हरिणी) ॥ ५० ॥ चशब्दान्मृगे (हरिणः) । तिष्ठति स्थूणा । अपिशब्दाल्लोहप्रतिमाव्याधिविशेषयोश्च (स्थूणा) । तर्षणं तृष्णा, स्पृहा निरूढलक्षणत्वात् । एवं तृट्तर्षावपि स्पृहापिपासार्थे । जिघर्ति क्षरति मनोनया घृणा, घृणु दीप्तौ वा ॥ ५१ ॥ वणिक्पथो हट्टः (विपणिः) । अपिशब्दात्पण्यवीथ्यां, विपण्यतेस्यां विपणिः । सुरा वरुणादब्धेर्जाता । प्रत्यक् प्रतीची दिक्, वरुणस्येयमिति । के मूर्ध्नि रेणुरस्य करेणुः । इभ्यां हस्तिन्यां स्त्री, इभे तु ना पुमान् । द्रवत्यनेन द्रवति वा द्राविणम् ॥ ५२ ॥ शीर्यते शृणाति च परं शरणं, श्रयन्ति तदिति **नैरुक्ताः** । श्रीः पर्णेष्वस्य श्रियं पिपर्ति च श्रीपर्णम् । अपिशब्दादग्निमन्थे (श्रीपर्णम्) । अभिमरो मरकं युद्धं च (तीक्ष्णं), लोहं शस्त्रम् । ये द्रव्यहेतोर्व्याडं हस्तिनं वा योधयेयुस्ते तीक्ष्णा इति **कौटिल्यः** । तेज्यते तीक्ष्णं, अतिक्ष्णोतीति **नैरुक्ताः** ॥ ५३ ॥ यथायोगं करणादौ ल्युट्, हेतुर्ज्ञप्तिनिमित्तं यथाग्न्यादेर्धूमादि (प्रमाणं) । मर्यादावधिः, यथा– कौटिल्यः राजानं मां च प्रमाणं कृत्वा यद्यस्याः कुशलं पश्यतीति । इयत्ता परिच्छेदः, यथा– कियत्प्रमाणमुदकम् । प्रमाता यथा– अत्रार्थे प्रभुः प्रमाणम् । (करणं) गात्रे यथा– उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया (कु० सं०) । (करणं) आपिशब्दात्कारणिकानां कायस्थाध्यक्षादीनां समूहे कृतौ क्रियाभेदे कामशास्त्रनाट्यशास्त्रोक्ते च ॥ ५४ ॥ प्राण्युत्पाद आजीवंजीविभावः संसाराख्यः । असंबाधेन[असंकटेन] सेनागमने (संसरणम्) । घण्टापथः पुरः समीपे विश्रामभूरुपनिष्कराख्या (संसरणम्) । (समुद्धरणं) कर्मणि भावे च ल्युट्, उन्नय ऊर्ध्वनयनं कूपादिभ्यो जलादेः ॥ ५५ ॥ स्वतो न तु वाच्यलिङ्गतया । वेवेष्टि विषाणम् । प्रवणति प्रवणः [अनुकूले], वण शब्दार्थः । त्रिष्वित्येव संकीर्णे यावत् । क्रमेण निम्नायां भुवि यथा– श्राद्धे दक्षिणप्रवणा भूः । प्रह्वे यथा– भक्तिप्रवणः । अनुकूले तूपचारात् । चतुष्पथे, प्रवन्तेनेन प्रवणः ॥ ५६ ॥ निचितं संकीर्णं व्याप्तम् । अशुद्धे संकीर्णं यतो मिश्रीभवतीति । ईरति– ईरणं,

संकीर्णौ निचिताशुद्धावीर(रि॰)णं शून्यमूषरम् ।
देवसूर्यौ विवस्वन्तौ सरस्वन्तौ नदार्णवौ ॥ ५७ ॥
पक्षिताक्ष्यौं गरुत्मन्तौ शकुन्तौ भासपक्षिणौ ।
अग्न्युत्पातौ धूमकेतू जीमूतौ मेघपर्वतौ ॥ ५८ ॥
हस्तौ तु पाणिनक्षत्रे मरुतौ पवनामरौ ।
यन्ता हस्तिपके सूते भर्ता धातरि पोष्टरि ॥ ५९ ॥
यानपात्रे शिशौ पोतः प्रेतः प्राण्यन्तरे मृते ।
ग्रहभेदे ध्वजे केतुः पार्थिवे तनये सुतः ॥ ६० ॥
स्थपतिः कारुभेदेऽपि भूभृद् भूमिधरे नृपे ।
मूर्धाभिषिक्तो भूपेऽपि ऋतुः स्त्रीकुसुमेऽपि च ॥ ६१ ॥
विष्णावप्यजिताव्यक्तौ सूतस्त्वष्टरि सारथौ ।
व्यक्तः प्राज्ञेऽपि दृष्टान्तावुभे शास्त्रनिदर्शने ॥ ६२ ॥
क्षत्ता स्यात्सारथौ द्वाःस्थे क्षत्रियायां च शूद्रजे ।
वृत्तान्तः स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्तयोः ॥ ६३ ॥
आनर्तः समरे नृत्यस्थाननीवृद्विशेषयोः ।
कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु ॥ ६४ ॥

ईर गतौ । शून्यं निराश्रयो देशः, ऊषः क्षारमृत्तिकास्यास्ति– इत्यूषरः, ऊषसुषीति (सू०) रः (ईरणम्) । सेतौ च वरणो वेणी नदीवाहे कचोच्चये । अथ तान्ताः । विवस्ते छादयति विवस्तेजोस्यास्तीति विवस्वान् । सरस्वान्नाम नदः ॥ ५७ ॥ गरुतः पक्षाः सन्त्यस्य गरुत्मान् । भासः पक्षिविशेष । कीटोऽपि, शक्नोति शकुन्तः । धूमः केतुर्लिङ्गमस्य धूमकेतुर्वह्निः । धूमप्रधानश्च केतुरुत्पातग्रहः । जीवनस्याम्भसो मूतः पुटबन्धः (जीमूतः) ॥ ५८ ॥ जहाति हस्तः पाणिः । हसति व्योम्नि हस्तो नक्षत्रम् । प्रशंसार्थेश्च (यथा)– केशहस्तः । म्रियतेनेन मरुत् । यमयतीत्यन्तर्भावितण्यर्थो यमिः, सूतः सारथिः । यज्ञस्य [वज्रस्य] भर्ता, स्त्रिया भर्ता ॥ ५९ ॥ पवते पुनाति च पोतः । प्रैति स्म प्रेतः, प्राण्यन्तरं नारकम् । ग्रहभेदो नवमः (केतुः), कित ज्ञाने । षु प्रसवैश्वर्ययोः (सुतः) ॥ ६० ॥ स्थापयति, स्थश्चासौ पतिश्च वा, तिष्ठन्त्यस्मिन्नायत्ताः स्थः, घञर्थेकः (वा०) । कारुविशेषो मुख्यतक्षा (स्थपतिः) । अपिशब्दात् स (यज्वा) गोष्पतीष्ट्या स्थपतिः (पृ० ११४), कञ्चुकी च । (भूभृत्) धारणात्पोषणाच्च । (मूर्धाभिषिक्तः) अपिशब्दाद्विप्रात्क्षात्रियायां जाते, मुख्येऽपि । ऋच्छत्यायाति ऋतुः स्त्रीणामार्तवं रजः । अपिशब्दाद्वसन्तादौ (ऋतुः) ॥ ६१ ॥ अपिशब्दादजितोऽपरिभूतो बुद्धश्च । अव्यक्तोऽस्फुटः । मूर्खश्च (अव्यक्तः) । प्रकृतिस्त्वव्यक्तम् । षू प्रेरणे, त्वष्टा रथकारः, तथा ब्राह्मण्यां क्षत्रियात्सूतः । प्रजाते पारदे च (सूतः) । व्यनक्ति व्यज्यते च (व्यक्तः) । अपिशब्दात् पुरोबुध्या[दि]निश्चितः, यथा– व्यक्तं मूर्खोयम् । दृष्टोन्तो निश्चयोस्य दृष्टान्तः, निदर्शनमुदाहरणं यथा– अग्निरत्र धूमान्महानसवत् ॥ ६२ ॥ क्षदति क्षत्ता, द्वास्थः प्रतीहारः । क्षत्रियायां शूद्राज्जातः क्षत्ता, क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च (पृ० १५८) । स्मृतौ क्षत्तशब्दोप्यस्ति । वृत्तोन्तोस्य वृत्तान्तः, वृत्तस्यान्तश्च । तथा प्रकारो विशेषः । वार्ता जनश्रुतिराख्यायिका च ॥ ६३ ॥ आनृत्यन्त्यत्रानर्तः । नीवृद्विशेषो जनपदः,

श्लेष्मादिरस्थि(ऽस)रक्तादिर्महाभूतानि तद्गुणाः ।
इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः ॥ ६५ ॥
कक्षान्तरेपि शुद्धान्तो नृपस्यासर्वगोचरे ।
कासूसामर्थ्ययोः शक्तिर्मूर्तिः काठिन्यकाययोः ॥ ६६ ॥
विस्तारवल्ल्योर्व्रततिर्वसती रात्रिवेश्मनोः ।
क्षयार्चयोरपचितिः सातिर्दानावसानयोः ॥ ६७ ॥
अर्त्तिः पीडाधनुष्कोट्योर्जातिः सामान्यजन्मनोः ।
प्रचारः स्यन्दयो रीतिरीतिर्डिम्बप्रवासयोः ॥ ६८ ॥
उदयेधिगमे प्राप्तिस्त्रेता त्वग्नित्रितये युगे ।
वीणाभेदेपि महती भूतिर्भस्मनि संपदि ॥ ६९
नदीनगर्योर्नागानां भोगवत्यथ संगरे ।
सङ्गे सभायां समितिः क्षयवासावपि क्षिती ॥ ७० ॥
रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः ।
जगती जगति च्छन्दोविशेषेपि क्षितावपि ॥ ७१ ॥

जलेपि (आनर्तम्) । कृतोन्तोनेन कृतान्तः, कृतः सिद्धान्तो निष्ठा यस्य, कृतस्यान्तश्च । शास्त्रेप्युपचारात्कृतान्तः ॥ ६४ ॥ श्लेष्मा वातः पित्तं च, धारणात्तु धातवः । अस्थिरक्तादीनि, व(र)सासृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः (वाग्भट०) । महाभूतानि पृथिव्यादीनि, तद्गुणाः शब्दादयः, अश्मविकृतिर्हरितालादिः, शब्दयोनिर्भ्वादिः (धातवः) । चशब्दाद् गैरिकं मनःशिलादिर्हेमादिश्च (धातुः) ॥ ६५ ॥ कक्षान्तरे राजधानीस्थानविशेषे वासगृहाख्ये (शुद्धान्तः) । अपिशब्दाद्राजदारेषु, अशौचप्रशमे च, शुद्धो रक्षितोन्तोस्य शुद्धान्तः । कासूर्नामायुधं सर्वलाख्यं, शक्यतेनया जेतुं शक्तिः । शकन उत्साहादौ च (शक्तिः) । मूर्च्छनं मूर्च्छति च मूर्तिः ॥ ६६ ॥ व्रजन्ती ततिरस्यां व्रततिः, व्रतव्रातव्रतत्यादिसिध्यर्थं व्रतिर्धातुरुन्नेय इति **श्रीभोजः** । वसन्त्यस्यां वसतिः, स्थितौ च । चिञश्च यतेश्च,(चायतेः)क्तिनि नित्यंचिभावः (वा०) अपचितश्च (सू०) इत्यत्र वक्तव्यात् । विकृतौ व्ययये च (निष्कृतौ व्यये च) (अपचितिः) । सनोतेः क्तिनि जनसनेति (सू०) आत्वम्, स्यतेः- ऊतियूतिजूतीति (सू०) साधुः ॥ ६७ ॥ अर्दनमर्त्तिः, अर्द्यतेनया च, अर्द गतौ याचने च । जायतेनया, भिन्नेष्वभिन्नाभिधानप्रत्ययो जातिः, जननं च । छन्दोलंकारविशेषयोः (जातिः), मालतीगोत्रयोश्च । प्रचारः शैली (रीतिः), री गतौ रीङ् स्रवणे । आरकूटे मर्यादायां वैदर्भ्यादौ (रीतिः) । ईङ् गतौ, डिम्ब उपद्रवः, यदाहुः— अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥ ६८ ॥ उदयो लाभः, अधिगम आसादनं (प्राप्तिः) । त्रेता, पृषोदरादिः (सू०) । शततन्त्री वीणा महती । अपिशब्दाद् बृहत्यां (महती) । भवनि भूयतेनया च भूतिः, भवनं च ॥ ६९ ॥ भोग उपभोगः सर्पकायश्चास्त्यस्याः (भोगवती) । समयनं सयन्ति संगच्छन्त्यस्यां वा समितिः । वासो निवासः (क्षितिः) । अपिशब्दाद् भूः, क्षि क्षये, क्षि निवासगत्योः ॥ ७० ॥ शस्त्रमायुधं, हिनोति हेतिः, ऊतियूतीति (सू०) साधुः । गच्छति जगती, छन्दो द्वादशाक्षरपादम् ॥ ७१ ॥ उक्तात्युक्ता मध्या प्रतिष्ठा सुप्रतिष्ठा गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्तिस्त्रिष्टुबिति दशमं दशाक्षरपादं वा । अपिशब्दाच्छ्रेणिर्दशसंख्या च (पङ्क्तिः),

पङ्क्तिश्छन्दोऽपि दशमं स्यात्प्रभावेऽपि चायतिः ।
पत्तिर्गतौ च मूले तु पक्षतिः पक्षभेदयोः ॥ ७२ ॥
प्रकृतिर्योनिलिङ्गे च कैशिक्याद्याश्च वृत्तयः ।
सिकताः स्युर्वालुकापि वेदे श्रवसि च श्रुतिः ॥ ७३ ॥
वनिता जनितात्यर्थानुरागायां च योषिति ।
गुप्तिः क्षितिव्युदासेऽपि धृतिर्धारणधैर्ययोः ॥ ७४ ॥
बृहती क्षुद्रवार्ताकी छन्दोभेदे महत्यपि ।
वाशि(सि)ता स्त्रीकरिण्योश्च वार्ता वृत्तौ जनश्रुतौ ॥ ७५ ॥
वार्त्तं फल्गुन्यरोगे च त्रिष्वप्सु च घृतामृते ।
कलधौतं रूप्यहेम्नोर्निमित्तं हेतुलक्ष्मणोः ॥ ७६ ॥
श्रुतं शास्त्रावधृतयोर्युगपर्याप्तयोः कृतम् ।
अत्याहितं महाभीतिः कर्म जीवानपेक्षि च ॥ ७७ ॥
युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु ।
वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले ॥ ७८ ॥

पञ्चतौ वर्गौ पङ्क्तिः, पङ्क्तिविंशतित्रिंशदिति (सू०) साधुः, पञ्चते च । अपिशब्दादागामिनि काले दैर्घ्ये च, आयतन्तेऽनयायतिः, आयमनं च । पदनं पद्यते च पत्तिः । चशब्दात्सेनांशे पदातौ च (पत्तिः) । पक्षविशेषयोर्मूलं प्रतिपदादिः पक्षांशश्च पक्षतिः, पक्षात्तिः (सू०) ॥ ७२ ॥ योनिरुपादानकारणं यथा— मूलप्रकृतिरविकृतिः (सांख्यकारिका) । लिङ्गं स्त्रीपुंनपुंसकं यथा— तृतीयाप्रकृतिः शण्ढः (पृ० ९७) । चशब्दात्स्वाम्यमात्यादिः (प्रकृतिः) । प्रत्ययात्पूर्वः स्वभावश्च (प्रकृतिः) । कैशिकीभारतीसात्वत्यारभट्यः (वृत्तयः) । चशब्दाद् ग्राम्या परुषोपनागरिका (वृत्तिः), कृष्यादिजीविकावृत्तिश्च, वर्तनं वृत्तिः, वर्तनेनया च । सिच्यन्ते सिकताः, नित्यं बहुत्वेयम् । अपिशब्दात्सिकतिले देशे, देशेलुबिलचौच (सू०) इत्यणो लुप् । श्रवः श्रोत्रम् । चशब्दात्किंवदन्त्यां षड्जाद्यारम्भिकायामाकर्णने च, श्रूयते शृणोत्यनय श्रवणं श्रुतिः ॥ ७३ ॥ वनु याचने । चशब्दात्स्त्रीमात्रे (वनिता) । गोप्यते गोपनं गुप्तिः, क्षितिव्युदासो भूगर्तः । अपिशब्दात्कारायां रक्षायां च (गुप्तिः), यच्छाश्वतः— गुप्तिः कारा च रक्षा च जीर्णं च विवरं भुवः । (धृतिः) भावे करणे च क्तिन्, सौख्येप्युपचारात् ॥ ७४ ॥ क्षुद्रवार्ताकी कण्टकारिका, छन्दोविशेषो नवाक्षरपादः (बृहती) । वाश्यते काम्यते वशे स्थाप्यते वाशते वा वाशिता । वासितेति गौडाः पेठुः, कृतवासेति च व्याख्यन् । वर्ततेनया वर्तते वा, वृत्तिर्जीविका वास्त्यस्या वार्त्ता । वृत्तिः कृषिपाशुपाल्यवाणिज्याख्यात्वाभेदोपचारात् । जनश्रुतिर्वृत्तान्तः (वार्ता) । वर्तनं[च] वार्ता ॥ ७५ ॥ फल्गु तुच्छं यथा— वार्त्तमेतत् । चशब्दात्सर्पिषि घृतं, पीयूषे हुतशेषेऽयाचिते भैक्ष्ये मोक्षे चामृतम् । कलः कालिका धौतास्येति । निमेद्यति निमित्तं, हेतुः कारणं, लक्ष्म चक्षुःस्पन्दनादि ॥ ७६ ॥ श्रूयते श्रवणं श्रुतं, अवधृतमाकर्णितम् । युगं कालभेदः (कृतम्) । पर्याप्तं यथा— कृतमतिविस्तरेण । क्रियाशब्दस्तु कृतस्त्रिलिङ्गः । अतीवाहितमाहितं वात्याहितं, जीवानपेक्षि कर्म साहसाख्यम् ॥ ७७ ॥ युक्ते यथा— यथाभूतवादी प्रामाणिकः स्यात् । क्ष्मादौ यथा— महाभूतानि । ऋतं सत्यं यथा— भूतमप्यनुपन्यस्तं हीयते व्यवहारतः । प्राणिनि यथा— भूतग्रामः । अतीते यथा— भूते लुङ् । समस्तुल्यो यथा— सुहृद्भूतोयम् । ग्रहेऽपि यथा— भूतमियं ब्राह्मणी । प्राप्ते यथा— इत्थंभूतं, भवति स्म भावयते स्मेति, भू प्राप्तौ । (वृत्तं) पद्यं पादबन्धः श्लोकादिः । चरित्रं शीलं (वृत्तम्) । अतीते यथा— वृत्तोत्सवं पुरम् (मुद्राराक्ष०) । दृढे यथा— वृत्तदेहः स्नायुसारः । निस्तलं वर्तुलं, अधीतेपि

महद्राज्यं चावगीतं जन्ये स्याद्गर्हिते त्रिषु ।
श्वेतं रूप्येपि रजतं हेम्नि रूप्ये सिते त्रिषु ॥ ७९ ॥
त्रिष्वितो जगदिङ्गेपि रक्तं नील्यादिरागि च ।
अवदातः सिते पीते शुद्धे बद्धार्जुनौ सितौ ॥ ८० ॥
युक्तेतिसंस्कृते मर्षिण्यभिनीतोथ संस्कृतम् ।
कृत्रिमे लक्षणोपेतेप्यनन्तोनवधावपि ॥ ८१ ॥
ख्याते हृष्टे प्रतीतोभिजातस्तु कुलजे बुधे ।
विविक्तौ पूतविजनौ मूर्च्छितौ मूढसोच्छ्रयौ ॥ ८२ ॥
द्वौ चाम्लपरुषौ शुक्तौ शिती धवलमेचकौ ।
सत्ये साधौ विद्यमाने प्रशस्तेभ्यर्हिते च सत् ॥ ८३ ॥
पुरस्कृतः पूजितेरात्यभियुक्तेग्रतः कृते ।
निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत् ॥ ८४ ॥
जातोर्ध्वक(च्चक)प्रवृद्धाः स्युरुच्छ्रिता उत्थितास्त्वमी ।
वृद्धिमत्प्रोद्यतोत्पन्ना आदृतौ सादरार्चितौ ॥ ८५ ॥

(वृत्तम्) ॥ ७८ ॥ महति मह्यते च महत् । चशब्दाद् बृहद् बुद्धितत्त्वं च (महत्) । विरुद्धं गीयते-वगीतम् । जननीयो जन्यः, जनस्य जल्पो वा, मतजनहलात्करणजल्पकर्षेषु (सू०) इति यत् । मुहुर्दृष्टेपि (अवगीतम्) । श्वेतते श्वेतं, अपिशब्दाच्छुक्ले । रज्यते रजतम् । हेम्नि महारजताख्यम् ॥ ७९ ॥ इतस्तान्ता वाच्यलिङ्गाः । गच्छति जगत्, इङ्गे जङ्गमे । अपिशब्दाद् भुवने (जगत्) । रज्यते रक्तं, नील्यादिरागोस्त्यस्य । चशब्दादसृक् (रक्तम्), कुङ्कुमं ताम्रमनुरक्तं च । (अवदातः) दैप शोधने । (सितः) अर्जुनः शुक्लः, षिञ् बन्धने ॥ ८० ॥ (अभिनीतः) मर्षिण्यक्रोधे । संस्कृतं (सू०) अनित्ये साधु, संलक्षणेन प्रकृत्यादिविभागेन सिद्धे शब्दे, संपर्युपेभ्यः (सू०) इति सुट् । अपिशब्दात्सतो गुणाधाने पक्वे च । अपिशब्दान्नागराजे (अनन्तः), विष्णौ व्योम्नि च । अनन्ता च भूः ॥ ८१ ॥ प्रतीयते प्रत्येति वा (प्रतीतः), ज्ञातेपि । सुकुमारे न्याय्ये चोपचारात् (अभिजातः) । विचिर्विरेचने, विजिर् पृथग्भावे, असंयुक्तो[पृक्तो]पि (विविक्तः) । मूर्च्छा मोहसमुच्छ्राययोः ॥ ८२ ॥ अम्लं चुक्रं, यदाहुः– यन्मूलादि शुचौ भाण्डे सक्षौद्रगुडकाञ्जिकं । धान्यराशौ त्रिरात्रस्थं चुक्रं शुक्तं तदुच्यते (वैद्यकम्) ॥ परुषे शुक्त उपचारात्, यथा– शुक्तां वाचं (न) वदेत् । चशब्दात्पूतिगन्धे, ईशुचिर् पूतीभावे (शुक्तः) । शिञ् निशाने, मेचकः कृष्णः (शितिः) । अस्तेः शतृप्रत्ययः, सत्त्वे च सत् ॥ ८३ ॥ (पुरस्कृतः) पुरोव्ययमिति (सू०) गतित्वात्सत्वम् । अरातिनाभियुक्तोभिषेणितः, अभिषिक्तोपि (पुरस्कृतः) । निवायते गम्यते निवातः, निवृत्तो वातोत्र । शस्त्राभेद्यं च वर्म, यथा– निवातकवचाः ॥ ८४ ॥ ऊर्ध्वक उच्चकः (उच्छ्रितः) । प्रोद्यतः सोद्यमः (उत्थितः) । कर्तृकर्मणोः क्तः (आदृतः) ॥ दुर्गश्चाह– कर्मविपाकेपि गतिर्गमुद् हेम्न्युल्बणे तृणे । ऋतमुञ्छशिले सत्ये शोभनेपि विवक्षितम् ॥ उदास्थितः प्रतीहारे चरभेदे समाहितः । ध्यानस्थे चाप्यनीकस्थो गजूर्लक्षणवेदिनि ॥ श्रद्धारचनयोर्भक्तिर्गौण्यां वृत्तौ च सेवने । आप्तौ लब्धप्रत्ययितौ नप्ता पुत्रश्च पुत्रयोः ॥ भ्रातृपुत्रौस्वसृदुहितृभ्यां (सू०) इत्येकशेषोत्र । समूहोत्पन्नयोर्जातमहिजिच्छ्रीपतीन्द्रयोः । सौप्तिकेपि प्रपातोथावपातावतटावटौ ॥ समित्सङ्गे रणेपि स्त्री व्यवस्थायामपि स्थितिः ॥ ८५ ॥ इतस्थान्ताः । अर्यतेर्थ्यते वार्थः । अभिधेयः शब्दार्थः । रा धनं

अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ।
निपानागमयोस्तीर्थमृषिजुष्टे जले गुरौ ॥ ८६ ॥
समर्थस्त्रिषु शक्तिस्थे संबद्धार्थे हितेऽपि च ।
दशमीस्थौ क्षीणरागवृद्धौ वीथी पदव्यपि ॥ ८७ ॥
आस्थानीयत्नयोरास्था प्रस्थोऽस्त्री सानुमानयोः ।
अभिप्रायवशौ छन्दावब्दौ जीमूतवत्सरौ ॥ ८८ ॥
अपवादौ तु निन्दाज्ञे दायादौ सुतबान्धवौ ।
पादा रश्म्यङ्घ्रितुर्यांशा अग्नीन्द्वर्कास्तमोनुदः ॥ ८९ ॥
निर्वादो जनवादेऽपि शादो जम्बालशष्पयोः ।
सारावे रुदिते त्रातर्याक्रन्दो दारुणे रणे ॥ ९० ॥
स्यात्प्रसादोऽनुरोधेऽपि सूदः स्याद्व्यञ्जनेऽपि च ।
गोष्ठाध्यक्षेऽपि गोविन्दो हर्षेऽप्यामोदवन्मदः ॥ ९१ ॥
प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम् ।
स्त्री संविज्ज्ञानसंभाषाक्रियाकाराजिनामसु ॥ ९२ ॥

(अर्थः) । वस्तुनि पदार्थे । निवृत्तौ यथा– मशकार्थोऽयं धूमः । इन्द्रियविषये कारणे च (अर्थः) । निपानं जलाशयः, आगमः शास्त्रं (तीर्थम्) । ऋषिजुष्टं प्रभासपुष्करादि, यदध्यासितमर्हद्भिस्तद्धि तीर्थमिति । गुरौ यथा– तीर्था(दा)प्तविद्यः । जलावतरणमार्गे सत्रिण्यध्वरे पुण्यक्षेत्रे पात्रेऽपि यथा– तीर्थं तद्भव्यकव्ययोः, तरत्यनेन तीर्थम् ॥ ८६ ॥ समर्थयते समर्थ्यते संगतोऽर्थोऽस्येति (वा) समर्थः दशम्यां कामावस्थायां वयोवस्थायां च तिष्ठति दशमीस्थः, क्षीणो रागेण क्षीणरागः, मरणावस्थां प्राप्तो नष्टबीजो वा । वेतेर्विथेश्च वीथी, पदवी मार्गः । अपिशब्दाद् गृहप्रान्तः पङ्क्तिश्च (वीथी) ॥ ८७ ॥ आतिष्ठन्त्यस्यामास्थानी । आलम्बनं चास्था । प्रतिष्ठन्तेऽस्मिन् प्रस्थो गिरेः समा भूः । मानमाढकचतुर्भागोत्र (प्रस्थः) । शास्त्रद्रविणयोर्ग्रन्थः संस्थाधारे स्थितौ मृतौ । अथ दान्ताः । (अभिप्रायवशौ) यथा– छन्दानुवर्ती, स्वच्छन्दः, छदेः– रूपम् । अपो ददात्यब्दः, आप्नोति च ॥ ८८ ॥ आज्ञामपवाद, माहुः । दायं रिक्थमादत्ते दायादः, बान्धवः सापिण्डः । (पादः) कर्तरि पदरुजेति (सू०) घञ्-कर्मकरणादौ च । तुर्यांशो रूपकादेश्चतुर्भागः, कुलाद्रेः प्रत्यन्तपर्वतोऽपि पादः ॥ ८९ ॥ अपिशब्दादाभाषा निश्चितवादश्च (निर्वादः) । शीयन्तेऽवसीदन्त्यनेन शादः पङ्कः । शाद्य(त्य)ते छिद्यते शादस्तृणम् । आक्रन्दनमाक्रन्दयते– आक्रन्दन्त्यस्मिंश्चाक्रन्दः । त्राता पार्ष्णिग्राहाक्रान्तस्य विजिगीषो रक्षिता, आहुश्च– पार्ष्णिग्राहस्तथाक्रन्दः (मनुः) ॥ ९० ॥ (अनुरोधे) यथा– प्रसादे वर्तस्व (शार्ङ्गधरप०) । अपिशब्दान्नैर्मल्ये प्रीतिदाने च (प्रसादः), काव्यगुणे तूपचारात् । सूद्यते पच्यते सूदयति च सूदः, व्यञ्जन सूपोऽत्र । अपिशब्दात्सूपकारे (सूदः) । अपिशब्दाद्विष्णौ, गां विन्दति गोविन्दः, अनुपसर्गाल्लिम्पविन्देति (सू०) शः । अपिशब्दाद् गन्धेऽप्यामोदः । गर्वे क्षैव्ये गजदाने च मदः, मदोऽनुपसर्गे (सू०) इत्यप् ॥ ९१ ॥ प्रधानमेव प्राधान्यं, राजलिङ्ग छत्रादि, कङ्कते कं कौति वा ककुदम् । शैलशृङ्गे ककुच्छब्दोऽप्यस्ति, यथा– ककुद्मान् । संवेदनं संवेद्यतेऽस्यां संविदन्ति(ते) अनया च संविद् । ज्ञाने यथा– एकमेवेदं संविद्रूपम् । संभाषा संकेतो यथा– प्रवृत्तौ च निवृत्तौ च संविदं स्थापयेद्रणे । क्रियाकारो व्यवस्थापनं यथा– संविदं लङ्घयेच्च यः (याज्ञवल्क्य०) । आजिर्युद्धं, नाम संज्ञा । तोषणाचारप्रतिज्ञास्वप्याहुः (संविद्) ॥९२॥ उपनिषीदन्त्यस्यामुपनिषद्, वेदान्तोऽपि रहस्यत्वात् । तत्त्वेऽपि यथा– धर्मस्योपनिषत्परा ।

धर्मे रहस्युपनिषत्स्यादृतौ वत्सरे शरद् ।
पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ॥ ९३ ॥
गोष्पदं सेविते माने प्रतिष्ठा कृत्यमास्पदम् ।
त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ ॥ ९४ ॥
मूढाल्पापटुनिर्भाग्या मन्दाः स्युर्द्वौ तु शारदौ ।
प्रत्यग्राप्रतिभौ विद्वत्सुप्रगल्भौ विशारदौ ॥ ९५ ॥
व्यामो वटश्च न्यग्रोधावुत्सेधः काय उन्नतिः ।
पर्याहारश्च मार्गश्च विवधौ वीवधौ च तौ ॥ ९६ ॥
परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ।
बन्धकं व्यसनं चेतःपीडाधिष्ठानमाधयः ॥ ९७ ॥
स्युः समर्थननीवाकनियमाश्च समाधयः ।
दोषोत्पादेऽनुबन्धः स्यात्प्रकृत्यादिविनश्वरे ॥ ९८ ॥

ऋतुरत्राश्वयुजकार्त्तिकौ (शरद्)। वत्सरं यथा– जीवेच्च शरदां शतम्। शीर्यन्तेऽस्यामोषधयः शरत्, स्त्री। (पदं) खलोभगःपदंचेतिवक्तव्यात् (वा०) खः। त्राणं शरणं यथा– पदमापदि माधवः। स्थानं यथा– सूर्यांशवः शशिनि लब्धपदा यथैव। लक्ष्म यथा– नवनखपदलेखालाञ्छितं बाहुमूलम्। अङ्घ्रिर्यथा– पादाग्रे प्रपदम् (पृ० १०३)। वस्तु यथा– पदार्थः। पादन्यासे पादमुद्रायां सुप्तिङन्ते च, यथा– कुरु घनोरु पदानि शनैः शनैः (वेणिसंहार०), पदं तुषारस्रुतिधौतरक्तम् (कु० सं०), पदसमूहो वाक्यम् (न्यायभाष्य०) ॥९३॥ गोभिः सेवितं गोष्पदं, गोष्पदंसेवितासेवितप्रमाणेषु (सू०) इति साधुः। माने गोखुरश्वभ्रे, यथा– गोष्पदं प्रविष्टो देवः। आस्पदंप्रतिष्ठायाम् (सू०) साधुः, कृत्य उपचारात्। इष्टो मृष्टः, मधुरो रसः, यथा– रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः, स्वदते स्वादु। मृद्यते मृदुः, अतीक्ष्णोऽनाहिंस्रः ॥ ९४ ॥ मूढो यथा– मन्दः कवियशःप्रार्थी (रघु०)। अल्पे यथा– मन्दोदरी। अपटुः सरुक्, यथा– मन्दं विचिकित्सति भिषक्। निर्भाग्ये यथा– मन्दभाग्यः। स्वैरेऽप्यल्पत्वाद्यथा– [मन्द]मन्दपदगामी[चारी], भद्रो मन्दो मृगश्चेति। हस्तिविशेषः सौरिश्च (मन्दः)। शरदि भवः शारदः, लक्षणयाभिनवः, अधृष्टोऽप्रतिभः। शुद्धौ वर्षे च (शारदः)। विगतो शारदोऽप्रतिभत्वदोषोऽस्य विशारदः ॥९५॥ अथ धान्ताः। व्यामस्तिर्यक्कृतबाह्वन्तरम्, न्यग्रुणाद्धि न्यग्रोधः न्यग्रोहति च, न्यङ्क्वादिः (सू०)। ऊर्ध्वं सिध्यत्यनेनोत्सेधः, ऊर्ध्वं सेच(ध)नं च। परित आहरणं व्रीहितृणादेः पर्याहारो भाराद्व्यः (विवधः)। विशिष्टो वधो गमनमत्रेति विवधः, बाहुलकाद्वा दीर्घः (उपसर्गस्येति) ॥ ९६ ॥ परितोऽग्नेश्चातुर्दिक्कं (चतुर्दिशं) धीयते बर्हिस्तरणवत् परिधिः, यदाहुः– बाहुप्रमाणं परिधिरच्छिन्नाग्रोऽतिपत्रलः। उपसूर्यकं सूर्यमण्डलं प्रतिसूर्याख्यम्। चक्रप्रान्तेऽपि (परिधिः)। बन्धकं यदुत्तमर्णाय भूम्याद्याधीयते, यथा– आधिर्विनश्येद् द्विगुणे धने यदि न मोक्ष्यते (मनुः)। व्यसनं यथा– आधिं प्राप्तो यो न मुह्येत्स धीरः। आध्यानमाधिर्मानसी पीडा। आधीयतेऽस्मिन्नाधिराधारः ॥ ९७ ॥ समर्थनं चोद्यपरिहारः, यथा– अत्रायं समाधिः। नीवाको वचनाभावः समाधिरिव । चशब्दाच्चित्तैकाग्र्यं समाधानं (च), समाधीयते मनोऽस्मिन्समाधिः। दोषोत्पादे यथा– अनुबन्धमवस्थां च ज्ञात्वा दण्डं निपातयेत्। प्रकृतिप्रत्ययागमादेशानां यः कार्यार्थमासज्यते विनश्वर उच्चरितप्रध्वंसी सोऽनुबन्धः ॥ ९८ ॥

मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ।
विधुर्विष्णौ चन्द्रमसि परिच्छेदे बिलेवधिः ॥ ९९ ॥
विधिर्विधाने दैवेपि प्रणिधिः प्रार्थने चरे ।
बुधवृद्धौ पण्डितेपि स्कन्धः समुदयेपि च ॥ १०० ॥
देश नद विशेषब्धौ सिन्धुर्ना सरिति स्त्रियाम् ।
विधा विधौ प्रकारे च साधू रम्येपि च त्रिषु ॥ १०१ ॥
वधूर्जाया स्नुषा स्त्री च सुधा लेपोमृतं स्नुही ।
संधा प्रतिज्ञा मर्यादा श्रद्धा संप्रत्ययः स्पृहा ॥ १०२ ॥
मधु मद्ये पुष्परसे क्षौद्रेप्यन्धं तमस्यपि ।
अतस्त्रिषु समुन्नद्धौ पण्डितंमन्यगर्वितौ ॥ १०३ ॥
ब्रह्मबन्धुरधिक्षेपे निर्देशेथावलम्बितः ।
अविदूरोप्यवष्टब्धः प्रसिद्धौ ख्यातभूषितौ ॥ १०४ ॥
सूर्यवह्नी चित्रभानू भानू रश्मिदिवाकरौ ।
भूतात्मानौ धातृदेहौ मूर्खनीचौ पृथग्जनौ ॥ १०५ ॥

मुख्यानुयायी यथा— अनुबन्धी(न्धः) शिशुः स्नेहेनानुबध्नातीति । प्रकृतानुवर्तने यथा— वैरानुबन्धः । विध्यति विदधाति विधत्ते वा विधुः, विध विधाने, विधीयते सुरैः पीयते वा, धेट् पाने । पर्यन्तेवधीयतेवधिः । उपचारादवधाने कालेपि (अवधिः) ॥ ९९ ॥ (विधिः) भावकरणादौ किः (उपसर्गेघोः किः) । अपिशब्दात्काले धातरि कल्पे प्रकारे विधायके च वाक्ये (विधिः) । (प्रणिधिः) भावे कर्मणि च किः । अवधानेपि (प्रणिधिः) । अपिशब्दाज्जिने स्थविरे च (बुधवृद्धौ) । स्कन्धति(?)स्कन्धः । समुदये यथा— सप्त वातस्कन्धाः । अपिशब्दात्सैन्यभागे यथा— स्कन्धवारः । अंसे राशि समूहे वृक्षजङ्घायां च (स्कन्धः) । बौद्धे च यथा— संज्ञारूपसंवेदनासंस्कारसमुदायाख्याः [विज्ञानलक्षणाः] पञ्च स्कन्धाः ॥ १०० ॥ देशे यथा— सिन्धुर्देशः, स्यन्दते सिन्धुः, सरित्सामान्ये, विशेषे च यथा— सिन्धोः परमपूरुषम् । विधौ विधाने (विधा) । प्रकारे यथा— द्विविधाः । चशब्दाद्धस्त्यश्वादिभोजने वेतने च (विधा) । साध्नोति साधुः । अपिशब्दात्सज्जने (साधुः) । युक्ते रम्यत्वात्, यथा— साधु दृष्टं यद् द्रष्टव्यम् ॥ १०१ ॥ उह्यते बध्नाति वा वधूः, स्त्रीति स्त्रीमात्रम् । सुष्ठु धीयते धयन्ति वैतां सुधा । लिप्यतेनेनेति लेपो मक्रोलादिः, स्नुही वज्रकन्दा यथा— सुधाक्षीरम् । मूर्वापि (सुधा) । (प्रतिज्ञा) यथा— सत्यसन्धः । संधारणं च (संधा) । संप्रत्ययो भक्त्यतिशयो यथा— श्रद्धया परयोपेताः (भगवद्गीता) । स्पृहा यथा— भोजने श्रद्धालुः ॥ १०२ ॥ माद्यन्त्यनेन मन्यते च मधु । क्षुद्राभिः कृतं क्षौद्रं, क्षुद्राभ्रमरवटरेति (सू०) अञ् । अपिशब्दाद्दैत्ये चैत्रे मधूके वसन्ते च पुंल्लिङ्गः (मधुः) । अपिशब्दादचक्षुषि जले च (अन्धम्) । इतो धान्ता वाच्यलिङ्गाः । ऊर्ध्वबद्धोपि (समुन्नद्धः) ॥ १०३ ॥ ब्रह्मणो ब्राह्मणस्य बन्धुः, परमनुष्ठानाभावाज्जातिब्राह्मणः । एवं क्षत्रबन्धुः । निर्देशे यथा— व्यवस्थिताख्याने ब्रह्मणो बन्धुर्ज्ञातिरिति । अवलम्बितो वस्त्रादौ रुद्धः (अवष्टब्धः) । अविदूरे यथा— अवष्टब्धे सेने, अवाच्चालम्बनाविदूर्ययोः (सू०) इति षत्वम् । अपिशब्दाद्बद्धोपि (अवष्टब्धः) । प्रसिध्यति प्रसाध्यते च प्रसिद्धः । लेशेपि गन्धः संबाधो गुह्यसंकुलयोरपि । बाधा निषेधे दुःखे च ज्ञातृचान्द्रिसुरा बुधाः ॥ १०४ ॥ अथ नान्ताः । चित्रा भानवो रश्मयोनयोः । भाति भानुः । भूतानामात्मा भूतान्येवात्मास्य वा भूतात्मा । पृथक्कार्यो जनः— असम्यत्वात्पृथग्जनः ॥ १०५ ॥ गिरति गृणाति

ग्रावाणौ शैलपाषाणौ पत्त्रिणौ शरपक्षिणौ ।
तरुशैलौ शिखरिणौ शिखिनौ वह्निबर्हिणौ ॥ १०६ ॥
प्रतियत्नावुभौ लिप्सोपग्रहावथ सादिनौ ।
द्वौ सारथिहयारोहौ वाजिनोऽश्वेषुपक्षिणः ॥ १०७ ॥
कुलेऽप्यभिजनो जन्मभूम्यामप्यथ हायनाः ।
वर्षार्चिर्व्रीहिभेदाश्च चन्द्राग्न्यर्का विरोचनाः ॥ १०८ ॥
केशेऽपि वृजिनो विश्वकर्मार्कसुरशिल्पिनोः ।
आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च ॥ १०९ ॥
शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघनः ।
अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः ॥ ११० ॥
घनो मेघे मूर्तिगुणे त्रिषु मूर्ते निरन्तरे ।
इनः सूर्ये प्रभौ राजा मृगाङ्के क्षत्रिये नृपे ॥ १११ ॥
वाणिन्यौ नर्तकीदूत्यौ स्रवन्त्यामपि वाहिनी ।
ह्रादिन्यौ वज्रतडितौ वन्दायामपि कामिनी ॥ ११२ ॥
त्वग्देहयोरपि तनुः सूनाधोजिह्विकापि च ।
क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके ॥ ११३ ॥

वा ग्रावा । पत्त्राणि पक्षाः सन्त्यस्य पत्त्री । श्येनोऽपि (पत्त्री) । वृक्षकुक्कुटौ च (शिखिनौ), दुर्गश्च-शिख्याख्या वह्निबर्हिद्रुद्विजकुक्कुटशार्ङ्गकाः, शार्ङ्गको मन्दपालसुतः पक्षी च ॥ १०६ ॥ उपग्रहो बन्दिग्रहणादिः (प्रतियत्नः) । सतो गुणान्तराधानं संस्कारश्च (प्रतियत्नः) । सीदत्यवश्यं सादयति वा सादी । वाजाः पक्षाः सन्त्यस्य वाजी । अश्वाः पूर्वं सपक्षा अभवन्, इषुः शरः (वाजी) ॥ १०७ ॥ अभिजायतेऽस्मादभिजनः, जनिवध्योश्च (सू०) इति ह्रस्वः । वर्षेऽर्चिषि च क्लीबे (हायनं) आहुः । व्रीहिविशेषः (हायनः) षष्टिकाख्यः । जहाति जलं हायनः, हश्वव्रीहिकालयोः (सू०) ण्युट् । विरोचते विरोचनः, अनुदात्तेतश्च (सू०) इति युच् ॥ १०८ ॥ अपिशब्दाच्चर्मपापयोः क्लीबे, वर्ज्यत इति वृजिनम् । विश्वस्य कर्मास्माद्विश्वं च कर्मास्य विश्वकर्मा । यत्ने यथा— महात्मा । स्वभावे यथा—दुष्टात्मा । ब्रह्मणि यथा— आत्मैवेदं सर्वमिदं नेह नानास्ति किंचन (कठोपानिष०) । वर्ष्म शरीरं यथा—कृशात्मा । चशब्दात्क्षेत्रज्ञः (आत्मा) ॥ १०९ ॥ हन्ति तच्छीलो घातुकः, स चासौ मत्तेभश्च (घनाघनः) । वर्षति तच्छीलो वर्षुकोऽब्दो मेघः, हन्तीति घनाघनः, चरिचलिपतिवदीनांवाद्वित्वमच्याक्चाभ्यासस्य (वा०), हन्तेर्घत्वंच (वा०) इति सिद्धिः । प्रणयः प्रार्थना, मानेर्मन्यतेश्च भावे रूपम् । हिंसायां तु मीनातेर्ल्युड्याहुः, मीनातिमिनोतिदीङामिति (सू०) आत्वम् ॥ ११० ॥ हन्यतेऽनेन हन्ति वा घनः, मूर्तौ घनः (सू०) इति साधुः । मूर्तिगुणः काठिन्यं, असर्वगतद्रव्यपरिमाणं मूर्तिः सैव गुणो वा, दर्शनं च स्पर्शनं च मूर्तिः । निरंतरं निबिडं (घनं) । मुस्ते लोहमुद्गरे बाहुल्ये च (घनः) । घनं तु कांस्यवाद्यम् । एतीति— इनः, प्रभुः स्वामी । सोमो राजा द्विजातीनामिति श्रुतिः ॥ १११ ॥ वनुते तच्छीला वाणिनी, वणेः शब्दार्थाद्वाणिनीति सभ्यः । विदग्धापि (वाणिनी) । स्रवन्त्यां नद्यां (वाहिनी) । अपिशब्दात्सेनायां, वहति वाहते वा तच्छीला वाहिनी, वाहृ प्रयत्ने । वन्दा वृक्षरुहा, अपिशब्दात्स्त्रीविशेषे (कामिनी) ॥ ११२ ॥ अपिशब्दात्कृशाल्पविरलेषु, तन्यते तनुः । (सूना)[षू प्रेरणे], अपिशब्दाद् भक्ष्यप्राणिवधस्थानम् । पञ्च सूना गृहस्थस्येति तूपचारात् । पुंस्त्वं तु सूनम् । वितन्यते वितानं, विगतं तननं वा त्र । शून्ये कदर्के [र्य,]के च (वितानम्) ॥ ११३ ॥

मन्देथ केतनं कृत्ये केतावुपनिमन्त्रणे ।
वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः ॥ ११४ ॥
उत्साहने च हिंसार्थसूचने चापि गन्धनम् ।
आतञ्चनं प्रतीवापजवनाप्यायनार्थकम् ॥ ११५ ॥
व्यञ्जनं लाञ्छनश्मश्रुनिष्ठानावयवेष्वपि ।
स्यात्कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम् ॥ ११६ ॥
स्यादुद्यानं निःसरणे वनभेदे प्रयोजने ।
अवकाशे स्थितौ स्थानं क्रीडादावपि देवनम् ॥ ११७ ॥
उत्थानं पौरुषे तन्त्रे संनिविष्टोद्गमेपि च ।
व्युत्थानं प्रतिरोधे च विरोधाचरणेपि च ॥ ११८ ॥
मारणे मृतसंस्कारे गतौ द्रव्येर्थदापने ।
निर्वर्तनोपकरणानुव्रज्यासु च साधनम् ॥ ११९ ॥
निर्यातनं वैरशुद्धौ दाने न्यासार्पणेपि च ।
व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ॥ १२० ॥
पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेप्यणीयसि ।
तिथिभेदे क्षणे पर्व वर्त्म नेत्रच्छदेध्वनि ॥ १२१ ॥

केत्यतेनेन केतनं, कित ज्ञाने । कृत्येवश्यंकार्ये यथा– कार्यकेतनम् । केतौ ध्वजे यथा– मीनकेतनः । उपनिमन्त्रणे यथा– ब्राह्मणो निकेतनं नातिक्रामेत् । तत्त्वं ज्ञानं, ब्रह्म वेदा ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतम् । बृह वृद्धौ, विप्रे यथा– ब्रह्महत्या । त्रिष्वर्थेषु क्लीबे द्वयोः पुंसि ॥ ११४ ॥ हिंसार्थे यत्सूचनं मतदर्शनं, यदाहुः– गन्धनं हिंसाप्रयुक्तं सूचनं, हिंसायामित्येके पेठुः । अपिशब्दात्प्रकाशने (गन्धनम्)। तञ्चु गतौ, प्रतीवापः स्वर्णादेर्द्रुतस्य द्रव्यान्तरेणावचूर्णनं विपरीतावपनम् (आतञ्चनम्)॥११५॥ व्यज्यतेनेन व्यञ्जनं निष्ठानं भक्ताद्युपसेचनं दध्यादि, अवयवः स्त्र्यादिचिह्नम् । आपिशब्दात्ककारादि (व्यञ्जनम्)। कुलीने भवं कौलीनं, कुलस्येदं वा । लोकवादोऽपवादः, यथा– मा कौलीनादसितनयने मय्यविश्वासिनी भूः (मेघ०) ॥ ११६ ॥ (उद्यानं) भावेधिकरणे च ल्युट् । वनभेद उपवनं (उद्यानं)। अधिकरणे भावे च ल्युट् (स्थानं) । आदिशब्दाद्विजिगीषादौ (देवनं) । अपिशब्दात्परिदेवने द्यूते च (देवनं) ॥ ११७ ॥ पौरुषमुद्योगः, तन्त्रं सैन्यं स्वमण्डलचिन्ता च (उत्थानम्) । सन्निविष्टोद्गम उपविष्टस्योर्ध्वीभावः । अपिशब्दान्मलोत्सर्गे चैत्यगृहे वास्त्वन्तरे च (उत्थानं)। प्रतिरोधे, विगतमुत्थानमत्रेति । अपिशब्दात्समाधिनिवृत्तौ (व्युत्थानम्) ॥ ११८ ॥ यथाक्रमं भावादौ ल्युट् (साधनम्) । चशब्दाल्लिङ्गे कारके सैन्ये– उपह्वरणे– उपाये सिद्धौ मेधे च (साधनम्) ॥ ११९ ॥ न्यासार्पणं निक्षेपप्रतिदानं (निर्यातनम्), अपिशब्दादृणादिसंशुद्धौ । व्यस्यति श्रेयोमार्गाद् व्यसनं, व्यस्तिश्च । कामजो दोषो मृगयाक्षपानस्त्रियः, क्रोधजो वाक्पारुष्यदण्डपारुष्यार्थदूषणानि । अशुभ पापे दैवानिष्टफले, अशक्तौ चोपचारात् (व्यसनम्) ॥ १२० ॥ पक्ष परिग्रहे, तन्तुतूलादीनां भागेल्पतरे (पक्ष्म) । गरुति च (पक्ष्म) । तिथिविशेषः षष्ठ्यष्टमी– अमावास्यादिः, यथा– पर्ववर्जं व्रजेच्चैनाम् । प्रतिपत्पञ्चदश्योः संधिश्च (पर्व) । क्षणः प्रस्ताव उत्सवश्च (पर्व) । ग्रंथौ चरिते च (पर्व), यथा– आदिपर्व । वर्तते वर्त्म, वर्तन्ते यान्त्यनेन च । नेत्रच्छदोक्षिपुटः (वर्त्म) ॥ १२१ ॥

अकार्यगुह्ये कौपीनं मैथुनं संगतौ रते ।
प्रधानं परमात्माधीः प्रज्ञानं बुद्धिचिह्नयोः ॥ १२२ ॥
प्रसूनं पुष्पफलयोर्निधनं कुलनाशयोः ।
क्रन्दने रोदनाह्वान वर्ष्म देहप्रमाणयोः ॥ १२३ ॥
गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे ।
संनिवेशे च संस्थानं लक्ष्म चिह्नप्रधानयोः ॥ १२४ ॥
आच्छादने संविधानमपवारणमित्युभे ।
आराधनं साधने स्यादवाप्तौ तोषणेपि च ॥ १२५ ॥
अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि ।
रत्नं स्वजातिश्रेष्ठेपि वने सलिलकानने ॥ १२६ ॥
तलिनं विरले स्तोके वाच्यलिङ्गं तथोत्तरे ।
समानाः सत्समैके स्युः पिशुनौ खलसूचकौ ॥ १२७ ॥
हीनन्यूनावूनगर्ह्यौ वेगिशूरौ तरस्विनौ ।
अभिपन्नोपराद्धोभिग्रस्तव्यापद्गतावपि ॥ १२७ ॥
कलापो भूषणे बर्हे तूणीरे संहतेपि च ।
परिच्छदे परीवापः पर्युप्तौ सलिलस्थितौ ॥ १२९ ॥

कूपं प्रवेष्टुमर्हति– इति कौपीनं, शालीनकौपीनेअधृष्टाकार्ययोः (सू०) इति साधुः । लक्षणया लिङ्गं तदाच्छादनं च (कौपीनं) । मिथुनं युग्मं स्त्रीपुंसौ च तस्येदं मैथुनम् । प्रधीयतेस्मिन्प्रवर्तते च प्रधानम्, अजहल्लिङ्गम् । प्रकृतिर्महामात्यो मुख्यश्च (प्रधानं) । (प्रज्ञानं) भावे करणे च ल्युट् ॥ १२२ ॥ प्रसूयते प्रसूनम् । नियतं धनं यत्र, निवृत्तिश्च धनस्य निधनम् । अन्तेपि (निधनम्) । (क्रन्दनं) भावे ल्युट् । वर्षति वृष्यते वर्ष्म । प्रमाणमत्युन्नतिः, यथा– व्याप्तं व्योमानि वर्ष्मणा ॥ १२३ ॥ त्विट् तेजः, धीयतेत्र धत्ते च धाम, जन्मापि । संनिवेशो रचना (संस्थानं), आकृतौ मृत्यौ च । लक्ष्यतेनेन लक्ष्म, लक्ष्ये च । आच्छादने द्वे, संपिधानमिति सभ्यः पाठः । अपवारणं स्थगनं, वस्त्रं तूपचारात् (आच्छादनम्) । (आराधनं) करणे भाव च ल्युट् ॥ १२५ ॥ (अधिष्ठानं) अधिकरणे भावे च ल्युट् । चक्रं रथाङ्गं, अपिशब्दादारोपणे व्यवस्थापने च (अधिष्ठानं) । (रत्नं) यदाहुः– जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते (चाणक्यश०) । अपिशब्दान्मणौ, रमन्तेस्मिन् रत्नम् । वने द्वे, वनु याचने ॥ १२६ ॥ तलमस्यास्ति तलिनं, अधस्तनेपि । पान्तेभ्यः प्राक् त्रिलिङ्गाः । सह मानेन वर्तते समानं मानं चास्य समानः । अपिश्यति तक्ष्णोति पिशुनः, पिश अवयवे वा ॥ १२७ ॥ हीयते हीनः, ऊन परिहाणे । ऊनोल्पः, गर्ह्यस्तूपचारात् । तरो जवो बलं वास्त्यस्य तरस्वी । अपराध्यत्यपराद्धः, अभिद्रुतोपि (अभिपन्नः) ॥ १२८ ॥ दुर्गश्चाह– लेख्यं भूम्यादिदानार्थं यातनाज्ञा च शासनम् । निदानमवसानेपि सार्थे वार्धुषिके धनी ॥ कक्षापटेपि कौपीनं न ना [ज्ञाने] खेदेपि बाधना [वेदना] । द्युम्नं बलेथ भार्यापि जनी दोषेपि लाञ्छनम् ॥ अथ पान्ताः । कला आप्नोति कल्पते च कलापः, भूषणे काञ्च्यादौ । संहते यथा– केशकलापः । तूणे[रूपे]पि (कलापः) । परिच्छदः परिवारः, पर्युप्तिः परितो बीजत्यागः (परीवापः), स्थितिरचलत्वं, सलिलस्थितिर्जलाधार इत्येके ॥ १२९ ॥ गोष्ठपतिर्गोष्ठाध्यक्षः, देशकुलस्वामी च, गाः पाति गोपायति च गोपः । वृषेण दान्तेन धर्मेण वा कपति याति वृषाकपिः,

गोधुग्गोष्ठपती गोपौ हरौ विष्णुर्वृषाकपिः ।
वाष्पमूष्माश्रु कशिपु त्वन्नमाच्छादनं द्वयम् ॥ १३० ॥
तल्पं शय्याट्टदारेषु स्तम्बेऽपि विटपोऽस्त्रियाम् ।
प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः ॥ १३१ ॥
भेद्यलिङ्गा अमी कूर्मी वीणाभेदश्च कच्छपी ।
अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने ॥ १३२ ॥
कम्बुर्ना वलये शंखे द्विजिह्वौ सर्पसूचकौ ।
पूर्वोऽन्यलिङ्गः प्रागाह पुंबहुत्वेऽपि पूर्वजान् ॥ १३३ ॥
कुम्भौ घटेभमूर्धांशौ डिम्भौ तु शिशुबालिशौ ।
स्तम्भौ स्थूणाजडीभावौ शंभू ब्रह्मत्रिलोचनौ ॥ १३४ ॥
कुक्षिभ्रूणार्भका गर्भा विश्रम्भः प्रणयेऽपि च ।
स्याद् भेर्यां दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम् ॥ १३५ ॥

अग्निश्च । वायति शोषयति स्रवति च वाष्पः । कशति क्लेशं कशिपु, द्वयं युगपत्पृथङ् नैव । कशिपू इत्यपपाठः ॥ १३० ॥ तल प्रतिष्ठायां, अट्टो दुर्गप्राकारः, रणमण्डप इत्येके, यथा– विशीर्णतल्पा- (ट्टशता,) पूः (रघु०) । शय्या यथा– तल्पं भूः स्तरणं तृणानि (भर्तृहरि०) । दारा यथा– गुरु- तल्पगः (मनुः) । स्तम्बो गुल्मः (विटपः) । अपिशब्दात्स्कन्धादूर्ध्वं तरोः शाखा विटपः (कात्यः) । कटप्रे विस्तारे तूपचारात्, विट आक्रोशे । बुधे लक्षणया (प्राप्तरूप इ०) ॥ १३१ ॥ कूर्मी कमठी, वीणाविशेषः सारस्वताख्यः, कच्छेन पिबति कच्छं पाति वा कच्छपी । कुतपो मृगरोमोत्थपटे चाह्नो- ष्टमेंशके । इतः फान्ताः । रवर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्गकः । शिफा शिखायां सरिति मांसिकायां च मातरि ॥ शफं मूले तरूणां स्याद्गवादीनां खुरेऽपि च । गुम्फः स्याद् गुम्फने बाहोरलंकारे च कीर्तितः । अथ बान्ताः [वान्ताश्च] । (गन्धर्वः) अन्तरा मरणजन्मनोर्मध्ये भवं सत्त्वं यातना- शरीरम् । यदाहुः– अन्तराभवदेहो हि नेष्यते विन्ध्यवासिना (कुमारिलभट्ट०), तन्न, लक्ष्यविरोधात् । तस्मादन्तरिक्षवासिनो गन्धर्वाख्या भूताः, यद् व्यासः– अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितम् । गन्ध्यते गन्धर्वः, पशुभेदेऽपि ॥ १३२ ॥ काम्यते कम्बुः, शम्बूकेऽपि । (द्विजिह्वः) जिह्वात्र वचनमुपचा- रात् । पूर्वो वाच्यलिङ्गः । प्रागिति दिशं देशं कालं चाह, तत्स्थं च वस्तु (पूर्वम्) । पूर्वजा आदि- पुरुषाः । आश्चर्ये तु क्लीबे यथा– क्षरत्येनः कृतं पूर्वम् ॥ १३३ ॥ चित्रपुङ्खेऽपि कादम्बो नितम्बोऽद्रितटे कटौ । दर्वी फणापि बिम्बोऽस्त्री मण्डले चाकृतौ फले ॥ अथ भान्ताः । इभस्य मूर्धांशः शिरोभागः (कुम्भः) । डयते डिम्भ्यते वा डिम्भः, बालिशो मूर्खः । ष्टभि प्रतिबन्धे, स्तम्भुः सौत्रो वा, स्तभ्नाति गृहं चेष्टितं च स्तम्भः । (शंभुः) अर्हन्नपि ॥ १३४ ॥ भ्रूण उदरस्थो जन्तुः (गर्भः) । कुक्षौ यथा– गर्भस्थेन समस्तदा । अन्तर्भवे तूपचारात्, यथा– रम्भागर्भमृदुः । भ्रूणे यथा– भर्तृगर्भद्रुहां चैव । अर्भके यथा– गर्भरूपः, गीर्यते गृणाति च गर्भः । प्रणयः शृङ्गारप्रार्थना (विश्रम्भः) । अपि- शब्दाद्विसंवादे विश्वासे च (विश्रम्भः) । दुन्दु भाषते दुन्दुभिः, दुनोति भीरूनिति नैरुक्ताः । भेर्यां यथा– दुन्दुभिस्ताडितोयम् (वेणीसंहार०) । अक्षोत्र पाशकः, यथा– दुन्दुभ्या किल तत्कृतं पतितया यद द्रौपदी हारिता ॥ १३५ ॥ महारजनं पद्मकम् । करकः कमण्डलुः, कुस्यति कुसुम्भाति मृद्नाति

स्यान्महारजने क्लीबं कुसुम्भं करके पुमान् ।
क्षत्रियेपि च नाभिर्ना सुरभिर्गन्धि च स्त्रियाम् ॥ १३६ ॥
सभा संसदि सभ्ये च त्रिष्वध्यक्षेपि वल्लभः ।
किरणप्रग्रहौ रश्मी कपिभेकौ प्लवंगमौ ॥ १३७ ॥
इच्छामनोभवौ कामौ शक्त्युद्योगौ पराक्रमौ ।
धर्माः पुण्ययमन्यायस्वभाचारसोमपाः ॥ १३८ ॥
उपायपूर्व आरम्भ उपधा चाप्युपक्रमः ।
वणिक्पथः पुरं वेदो निगमा नागरो वणिक् ॥ १३९ ॥
नैगमौ द्वौ बले रामो नीलचारुसिते त्रिषु ।
शब्दादिपूर्वो वृन्देपि ग्रामः क्रान्तौ च विक्रमः ॥ १४० ॥
स्तोमः स्तोत्रेध्वरे वृन्दे जिह्मस्तु कुटिलेलसे ।
उष्णेपि घर्मश्चेष्टालंकारे भ्रान्तौ च विभ्रमः ॥ १४१ ॥
गुल्मा रुक्स्तम्बसेनाश्च जामिः स्वसृकुलस्त्रियोः ।
क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु ॥ १४२ ॥

कुसुम्भं, सुम्भ (शुम्भ) भासने हिंसायां च । अपिशब्दाद्विजिगीषौ राज्ञि (नाभिः), ना पुमान् चक्रमध्ये तुन्दौ च स्त्री, नभते नभ्यते वा नाभिः । सुष्ठु रभते सुरभिः, चशब्दाद्वसन्ते पुमान्, सुगन्धौ च त्रिषु । मनोज्ञे तूपचारात् (सुरभिः) ॥ १३६ ॥ सह भान्त्यस्यां सभा, सभ्यास्तु तात्स्थ्यात् । समूहे शालायां द्यूते च (सभा) । अध्यक्षोत्र गो[त्रा]ध्यक्षः (वल्लभः) । अपिशब्दात् प्रिये (वल्लभः) । करभौ करपार्श्वोष्ट्रौ । इतो मान्ताः । (रश्मिः) प्रग्रहो वल्गादिः, राशिः सौत्रः । प्लवेन गच्छतीति, गमश्च (सू०) इति खच् ॥ १३७ ॥ काम्येपि (कामः) । कामं तु बाढार्थे । शक्तिरत्र प्रभुमन्त्रोत्साहलक्षणा, उद्योगोरीन् प्रति बलोत्साहः (पराक्रमः) । धरते धर्मः, पुण्यं यागादि- अहिंसा च । यमो धर्मराजः, धर्मस्तु भीमवत् । न्याये यथा- धर्माधिकरणम् । स्वभावे यथा- क्रूरधर्मा । आचारे यथा- धर्मशास्त्रम् । सोमपे यथा- एष धर्मः सनातनः (मनुः) । युधिष्ठिरपिता च (धर्मः) । वेदे च (धर्मः) । धर्मसाधने यागादौ क्लीबे, यच्छ्रुतिः- तानि धर्माणि प्रथमान्यासन् ॥ १३८ ॥ उपधामात्यपरीक्षा (उपक्रमः) । अपिशब्दात्तदायाचिख्यासा यथा- नन्दोपक्रमं मानानि । (उपक्रमः) चिकित्सा- उपायपूर्वारम्भत्वात् । निगम्यते निगमः, गोचरसंचरेति (सू०) साधुः । निगमे भवो नैगमः, द्वाविति ब्राह्मणस्य नैगमत्वे निषेधः ॥ १३९ ॥ बले हलधरे, रमते रामः, णः । भार्गवे काकुत्स्थे च (रामः) । वृन्दे यथा- शब्दग्रामः, गुणग्रामः । अपिशब्दाद्विषयैकदेशे षड्जग्रामादौ च, यदाहुः- सप्त स्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकविंशतिः । गिरन्ति गृणन्ति च यं स ग्रामः । क्रान्तौ पादादिभिराक्रमण (विक्रमः), चशब्दाच्छौर्ये क्वचित् ॥ १४० ॥ ष्टुञ् स्तुतौ, अर्तिस्तुसु (उ०) इति मन् । जहाति सतां वृत्तिं जिह्मः । घर्मः, घृणु दीप्तौ ॥ १४१ ॥ गुड रक्षणे, गुड्यतेनेन गुल्मः, रुक्- उदर्यो व्याधिः । स्तम्बोत्र लताप्रतानतृणादिसमूहः, सेनाक्षौहिण्यङ्गं (गुल्मः) । चशब्दाद् दुर्गादौ रक्षास्थानं (गुल्मः), बलानां सज्जनं विटपसंघातोपि । जमति विरुद्धं जामिः, यथा- जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । क्षमते क्षमणं क्षम्यते च (क्षमा, क्षमं) ॥ १४२ ॥ (श्यामः) श्यैङ् गतौ, हरि-

त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिवा निशा ।
ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु ॥ १४३ ॥
सूक्ष्ममध्यात्ममप्याद्ये प्रधाने प्रथमस्त्रिषु ।
वामौ वल्गुप्रतीपौ द्वावधमौ न्यूनकुत्सितौ ॥ १४४ ॥
जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् ।
तुरंगगरुडौ तार्क्ष्यौ निलयापचयौ क्षयौ ॥ १४५ ॥
श्वशुर्यौ देवरश्यालौ भ्रातृव्यौ भ्रातृजद्विषौ ।
पर्जन्यौ रसदब्देन्द्रौ स्यादर्यः स्वामिवैश्ययोः ॥ १४६ ॥
तिष्यः पुष्ये कलियुगे पर्यायोवसरे क्रमे ।
प्रत्ययोधीनशपथज्ञानविश्वासहेतुषु ॥ १४७ ॥
रन्ध्रे शब्देथानुशयो दीर्घद्वेषानुतापयोः ।
स्थूलोच्चयस्त्वसाकल्ये गजानां मध्यमे गते ॥ १४८ ॥
समयाः शपथाचारकालसिद्धान्तसंविदः ।
व्यसनान्यशुभं दैवं विपदित्यनयास्त्रयः ॥ १४९ ॥

नीलो वर्णः । शारिवा नामौषधिः (श्यामा), गन्धप्रियङ्गुश्च । ललति लालयति लल्यते च ललामं, पुण्ड्रोश्वमुखेल्पवर्णं चिह्नम् । अश्वभूषा ललामाख्या । प्रधानेपि प्राधान्यान्वयात्, यथा– नृपललामः । केतौ यथा– कपिललामोर्जुनः । प्रभावे शृङ्गे च (ललामम्) । नान्तोप्यस्ति यथा– कन्याललाम कमनीयमजस्य लिप्सोः (रघु०) ॥ १४३ ॥ सुष्ठु– उक्ष्यते सूक्ष्मं, आत्मनि–अधि– अध्यात्मम् । अपिशब्दादल्पेपि त्रिषु (सूक्ष्मम्) । प्रथतेस्मात्प्रथते च प्रथमः । वमेर्वातेर्वा रूपं, (वामो वल्गुः) यथा– वामलोचना । (वामः प्रतीपः) यथा– विधौ वामारम्भे (मालतीमा०) । चशब्दाद्वामं दक्षिणेतरत् । वामा स्त्री, अश्वा तु वामी । अधोमन्त्रोधमः, अवोधसोर्लोपश्च (सू०) इति मः सलोपश्च । तुच्छेपि (अधमः) ॥ १४४ ॥ जीर्णे यथा– यातयामं गतरसं पूति पर्युषितं च यत् (भगवद्गीता) । परिभुक्तं यथा– दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः । अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥ याता यामाः क्षपांशा अस्येति । दुर्गश्चाह– भ्रमो मूर्च्छा तक्षभाण्डमाजिराम्बुविनिर्गमः । ध्यामौ धूम्रास्फुटौ भीमा रुद्रभीषणपाण्डवाः ॥ इतो यान्ताः । तृक्षस्यापत्यं तार्क्ष्यः । क्षि निवासे, क्षिञ् हिंसायाम्, यक्ष्मा कल्पान्तश्च (क्षयः) ॥१४५॥ श्वशुरस्यापत्यं श्वशुर्यः, क्रमाद्दम्पत्योः । भ्रातुरपत्यं भ्रातृव्यः, भ्रातुर्व्यच्च (सू०), व्यन्सपत्ने (सू०), योगविभागाद् भ्रातृजे । पिपर्ति जनं पर्जन्यः, परोम्भःपूरो जन्यतेनेन वा । रसदब्दो गर्जन्मेघः, अगर्जत्यपि योग्यत्वात् (पर्जन्यः) । अरणीयोर्यः ॥ १४६ ॥ त्वेषति तिष्यः, त्विष दीप्तौ, अघ्न्यादिः (उ०) । (पर्यायः) परावनुपात्ययइणः (सू०) इति घञ् । (प्रत्ययः) यथायथं कर्तृभावकरणेष्वच् । अधीन आयत्तः, यथा– राजप्रत्ययाः प्रजाः । विश्वासे यथा– न शत्रौ प्रत्ययं गच्छेत् । हेतौ यथा– स्त्रीप्रत्ययः कलहः । रन्ध्रे यथा– रिपोः प्रत्ययमासाद्य प्रहरेत् । शब्दोत्र कृत्तद्धितादिः, प्रथितत्वे च (प्रत्ययः) ॥ १४७ ॥ देशविशेषेपि (अनुशयः) । स्थूलस्य मुख्यस्योच्चयनमन्यस्यासंग्रहात्, स्थूलावलोकनमित्यर्थः । हस्तिनां मध्यमगतौ, यत्पालकाप्यः– नीचैर्गतं स्थूलोच्चयो वीचिमार्ग इति तिस्रो गतयः ॥ १४८ ॥ शपथे यथा– कृतसमयः । आचारे यथा– समयाञ्श्रावयेच्छिष्यम् । काले यथा– संध्यासमयः । सिद्धान्ते यथा– बौद्धसमयः । संविदि यथा–

अत्ययोऽतिक्रमे कृच्छ्रे दोषे दण्डेऽप्यथापदि ।
युद्धायत्योः संपरायः पूज्यस्तु श्वशुरेऽपि च ॥ १५० ॥
पश्चादवस्थायि बलं समवायश्च संनयौ ।
संघाते संनिवेशे च संस्त्यायः प्रणयास्त्वमी ॥ १५१ ॥
विस्र(श्र)म्भयाच्ञाप्रेमाणो विरोधेऽपि समुच्छ्रयः ।
विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि ॥ १५२ ॥
निर्यासेऽपि कषायोऽस्त्री स्यात्सभायां प्रतिश्रयः ।
प्रायो भूम्न्यन्तगमने मन्युर्दैन्ये क्रतौ क्रुधि ॥ १५३ ॥
रहस्योपस्थयोर्गुह्यं सत्यं शपथतथ्ययोः ।
वीर्यं बलं प्रभावश्च द्रव्यं भव्ये गुणाश्रये ॥ १५४ ॥
धिष्ण्यं स्थाने गृहे भेऽग्नौ भाग्यं कर्म शुभाशुभम् ।
कसे(शे)रुहेम्नोर्गाङ्गेयं विशल्या दन्तिकापि च ॥ १५५ ॥

अन्योन्यसमयः । संकेतोवसरो नियमश्चोपचारात्, यथा– न समयपरिक्षणं क्षमं ते (किरातार्जु०) । विरुद्धो नयो व्यसनं (अनयः), षाड्गुण्यस्यायथावत्प्रयोगात् । न श्रेयः (अयः) अनुकूलं दैवमनयः । विरुद्धं नयनं विपद् (अनयः) ॥ १४९ ॥ अतिक्रम उल्लङ्घनं यथा– धर्मस्यात्ययः । कृच्छ्रे यथा – प्राणात्ययः । दोषे यथा– गुणिनां नात्ययं कुर्यात् । दण्डे यथा– वक्रगत्येऽत्ययः शतम् । सम्यक्परागमनं यत्रेति (संपरायः), यथा– सांपरायिकं दुर्गं कुर्यात् । श्वशुरः पूज्य इति स्मृतः, सर्वस्यैव हि दानस्य प्रदाता गुरुरुच्यते । कन्यायाश्चैव विद्यायाः प्रदाता पूज्यते गुरुः ॥ अपिशब्दान्मान्यः (पूज्यः) ॥ १५० ॥ पश्चादवस्थायि बलमनुबलाख्यं, समवायो मेलः, संनयति संनयनं च सनयः । स्त्यै संघाते, चशब्दाद् गृहे, यथा– विश्रम्य लौकिकान् संस्त्यायान् प्रविशेयुः । परिचयोऽपि (प्रणयः) ॥ १५१ ॥ विरोधो वैरं, अपिशब्दादुन्नतौ (समुच्छ्रयः), समुल्लङ्घ्य श्रयणं– ऊर्ध्वश्रयणं च. उदिश्रयनीत (सू०) घञ् बाहुलकादत्र नास्ति । विषिणोति बध्नाति विषयः, यस्य मत्स्यादेर्यो जलादिर्ज्ञातः प्रसिद्धस्तत्र वर्तते । शब्दस्पर्शरूपरसगन्धाश्चेति विषयाः । अपिशब्दाद् ग्रामसमूहे गोचरे देशे च (विषयः) ॥१५२॥ निर्यासः क्वाथरसः, यथा– त्रिफलाकषायः । अपिशब्दात्कषायस्तुवराख्यो रसः । रागविशेषेऽपि, यथा– परिपक्वकषायो मुनिः । रक्तपीतवर्णयोगेऽपि, यथा– कषायवस्त्रः । आस्पदे च (प्रतिश्रयः) । भूम्नि बाहुल्ये यथा– प्रायेणाकृतकृत्यत्वान्मृत्योरुद्विजते जनः । अन्तगमनेऽनशने यथा– प्रायोपवेशनमतिर्नृपतिर्बभूव (रघु०) । तुल्ये च यथा– मूर्खप्रायः, अत्रापि वा मूर्खैः प्रायेणेति व्युत्पत्तिः । मन्यते मन्युः, क्रतौ यथा– शतमन्युरिन्द्रः ॥ १५३ ॥ रहस्यं गोप्यं, उपस्थो योन्यादिः, गूहनीयं गुह्यं, शंसिदुहिगुहिभ्योवाक्यप्– वक्तव्यः (वा०) । सति साधु सत्यं, शपथे यथा– सत्येन शापयेद्विप्रम् (मनुः) । तथ्ये यथा– सत्यवादी । बलं प्राणसामर्थ्यं यथा– सत्त्ववान् वीर्यसंपन्नः । प्रभावो द्रव्यशक्तिर्यथा– रसवीर्यविपाकाः (पृ० ५६) । चशब्दद्वेतो वीरकर्म च (वीर्यम्) । भव्ये योग्ये, द्रव्यंचभव्ये (सू०) साधुः, यथा– क्रिया हि द्रव्यं विनयति नाद्रव्यम् (कौटिल्यः) । गुणाश्रये यथा– क्रियावद्गुणवत्समवायि कारणं द्रव्यं पृथिव्यादि (वैशेषिकसू०) । धनमौषधं च द्रव्यम् ॥१५४॥ धिष शब्दे, भं नक्षत्रं (धिष्ण्यं) । अग्निविशेषे पुमान् (धिष्ण्यः) । भागाद्यत् (सू०). शुभमशुभं शुभाशुभं पुरा कृतं कर्म (भाग्यम्) । राजकसेरुर्जलजः कन्दोऽत्र न पार्श्वास्थि (गाङ्गेयम्) । दन्तिका नामौषधी, अपिशब्दाल्लाङ्गली विगतशल्या च (विशल्या) ॥ १५५ ॥ वृषाकपेः स्त्री वृषाकपायी, वृषाकप्यग्नीति (सू०) ङीष् ऐत्वम् । स्वाहा च, शचीमप्याहुः,

वृषाकपायी श्रीगौर्योरभिख्या नामशोभयोः ॥ १५६ ॥
आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम् ।
उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः ॥ १५७ ॥
छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः ॥ १५८ ॥
कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ।
कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः ॥ १५९ ॥
जन्यः स्याज्जनवादेऽपि जघन्योऽन्त्ये(न्ते)धमेऽपि च ।
गर्ह्याधीनौ च वक्तव्यौ कल्यौ सज्जनिरामयौ ॥ १६० ॥
आत्मवाननपेतोऽर्थादर्थ्यौ पुण्यं तु चार्वपि ।
रूप्यं प्रशस्तरूपेऽपि वदान्यो वल्गुवागपि ॥ १६१ ॥

यथा– वृषाकपायीमभ्येति सत्रपः किं न गोत्रभिद् । अभिख्यायतेऽनयाभिख्या संज्ञा, यथा– चैत्राभिख्या । शोभायां यथा– कान्त्यभिख्या तयोरासीत् (रघु०) । कीर्तौ च (अभिख्या) ॥ १५६ ॥ भावादौ कृञः शच (सू०), आरम्भे यथा– सर्वाः क्रिया मन्त्रमूला नृपाणाम् । निष्कृतिर्यथा– महापातकिनां पुंसां भवेत्प्राणान्तिका क्रिया । शिक्षा यथा– क्रिया हि द्रव्यं विनयति नाद्रव्यम् (कौटिल्यः)। पूजनं यथा– गुरुदेवक्रियारतः । संप्रधारणं विचारः, यथा– क्रियां विना को हि जानाति कुलम् । उपायो यथा– सामादिकः क्रिया । कर्म यथा– पाकक्रिया । चेष्टा यथा– स्तम्भे स्यान्निष्क्रियो जन्तुः प्रलये गतचेतनः । चिकित्सा यथा– पुनर्ज्वरे समुत्पन्ने क्रिया पूर्वज्वरानुगा (चरकसं०) । धात्वर्थेऽपि, यथा– क्रियाभावो धातुः । आख्यातं तूपचारात्, यथा– क्रिया वा कारकान्विता (पृ० २८) । गर्भाधानादिसंस्कारेऽपि यथा– स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति । और्ध्वदैहिकं यथा– अतो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः ॥ १५७ ॥ छ्यति सतापं छाया, छो छेदने । छायाख्यार्कभार्या । कान्तौ यथा– निच्छायः पुरुषो भवेत् । प्रतिबिम्बे यथा– संक्रान्तच्छाय आदर्शः । आतपाभावे यथा– नष्टच्छायो मध्याह्नः ॥ १५८ ॥ राजगृहादेः प्रारम्भकोष्ठके यथा– सप्त कक्ष्या अतिक्रम्य । काञ्चीबन्धनदाम यथा– परिधानाद्बहिः कक्ष्या निबद्धा ह्यासुरी भवेत् । मध्ये– इभस्य बन्धने यथा– हेमकक्ष्या गजाः । उद्योगे लक्षणया यथा– परार्थे बद्धकक्ष्याणां त्वादृशामुद्भवः कुतः । क्रियायां करणे कृत्या यथा– कां कृत्यामकार्षीः, प्रश्नाख्यानयोरिञ्च (चान्द्रसू०) इति क्यप्- वा । देवता मारी नाम, यथा– तानि कृत्याहतानीव । धनादिना यः शत्रोर्भिद्यते स कृत्यः, यत्कौटिल्यः– क्रुद्धलुब्धभीतावमानिताः परेषां कृत्याः । कार्यं च कृत्यम् ॥ १५९ ॥ जनस्य जल्पो जन्यः, मतजनहलात्करणजल्पकर्षेषु (सू०)। अपिशब्दादुत्पातः संग्रामोऽपि (जन्यः) । जननीयः पितरौ च, तथा संज्ञायां जन्याः (सू०) जनीं वहन्तीति । अपिशब्दाज्जघनभवे, शरीरावयवाद्यत् (सू०) । चशब्दाद्वाच्यः, वाच्यशब्दोऽपि गर्ह्यार्थवाची । कलसु साधुः कल्यः, सज्जोऽनुगुणः । दक्षोऽपि (कल्यः) । कल्यं ह्यस्तनं श्वस्तनं वाहः, प्रभातं च । कल्या कादम्बिनी ॥ १६० ॥ आत्मवानर्थनीयोऽर्थे साधुर्वा, अनपायिनीति पाठे धार्मिकोऽर्थ्यः । (अर्थ्यः) धर्मपथ्यर्थेनि (सू०) यत् । पुनाति पुण्यं, अघ्न्यादिः (उ०) । अपिशब्दात्सुकृतं धर्मश्च (पुण्यम्) । अपिशब्दादाहते हेमरूप्ये, रूपादाहतप्रशंसयोः (सू) इति यप् । वदति वदान्यः, वदेरान्यः (उ०)। अपिशब्दाद्दाता, वदन्यश्च– एकदेशविकृतः ॥ १६१ ॥ (न्याय्ये) यथा– मध्यस्थः । अपिशब्दा

न्याय्येऽपि मध्यं सौम्यं तु सुन्दरे सोमदैवते ।
निवहावसरौ वारौ संस्तरौ प्रस्तराध्वरौ ॥ १६२ ॥
गुरू गीष्पतिपित्राद्यौ द्वापरौ युगसंशयौ ।
प्रकारौ भेदसादृश्ये आकाराविङ्गिताकृती ॥ १६३ ॥
किंशारू धान्यशूकेषू मरू धन्वधराधरौ ।
अद्रयो द्रुमशैलार्काः स्त्रीस्तनाब्दौ पयोधरौ ॥ १६४ ॥
ध्वान्तारिदानवा वृत्रा बलिहस्तांशवः कराः ।
प्रदरा भङ्गनारीरुग्बाणा अस्राः कचा अपि ॥ १६५ ॥
अजातशृङ्गो गौः कालेऽप्यश्मश्रुर्ना च तूवरौ ।
स्वर्णेऽपि राः परिकरः पर्यङ्कपरिवारयोः ॥ १६६ ॥
मुक्ताशुद्धौ च तारः स्याच्छारो वायौ स तु त्रिषु ।
कर्बुरेऽथ प्रतिज्ञाजिसंविदापत्सु संगरः ॥ १६७ ॥

दन्तरे युक्ते प्रमाणेवलम्बे च, मन्यते मध्यः । सोमो देवतास्येति सौम्यं, सोमाट्ट्यण् (सू०), सुन्दरे तूपचारात् । चन्द्रजे च (सौम्यः) । दुर्गस्तु– सर्वज्ञाभिषजौ वैद्यावात्मा कामश्च हृच्छयौ । फलकल्याणयोर्भव्यं योग्यं सांप्रतिके त्रिषु ॥ क्रियाचारातिक्रमेऽपि जलाधारेऽपि चाशयः । दैत्याचार्योऽपि धिष्ण्यो ना काषायः सुरभावपि ॥ चन्द्रोदयो वितानेऽपि स्यादाम्नायोऽन्वये श्रुतौ । शीताशिते शिते शैत्यं जाल्यं कुलजकान्तयोः ॥ व्यवायो व्यवधौ च स्यात्कुल्या कुलवधूः सरित् ॥ अथ रान्ताः । निवहो यथा– ग्रामवारः । अवसरो यथा– वारंवारमुदारसंगरमुखे । सेवाक्रमोऽपि यथा– वारस्त्री । वारः सूर्यादिदिवसः । संस्तीर्यते संस्तरः शय्या । संस्तीर्यन्ते दर्भा अत्र संस्तरो यज्ञः ॥ १६२ ॥ गृणाति गुरुः । गीष्पतिर्जीवः (गुरुः) । आद्यशब्दात्स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति । तथा गुरु दुर्वहं, अलघु च । द्वाभ्यां कृतत्रेताभ्यां परं द्वापरं युगम् । संशये द्वौ परौ मुख्यावत्रेत्युभयकोटिस्पृक्त्वात्, पृषोदरादित्वात् (सू०) आत्वम् । भेदो विशेषः, यथा– पलाण्डुप्रकारा गृञ्जनादयः । सादृश्ये यथा– विषप्रकारः पिशुनः । इङ्गितं भावसूचकं चेष्टितम्, आकृतिर्वैवर्ण्यादिः संनिवेशश्च (आकारः) । १६३ ॥ किंचित्कुत्सितं वा शृणाति किंशारुः, इषुः शरः । म्रियन्तेऽस्मिन्दुर्गमत्वान्मरुः, धन्वा निर्जलो देशः । अद्यतेत्ति वाद्रिः । अब्दो मेघः (पयोधरः) ॥ १६४ ॥ वृणोति वृत्रः । कीर्यते करोति वा करः, बलिः– राजग्राह्यम् । मेघोपलस्तु करकः । हस्तिशुण्डापि करः, उपचारात् । प्रदीर्यतेऽनेनेति प्रदरः, नारीरुगतिरजःस्रावः । अस्यन्ते– अस्राः । अपिशब्दाद्बाष्पोऽसृक् चास्रम् ॥ १६५ ॥ कालेऽपीति गवि नरि च काकाक्षिवद्योज्यम् । तनोति तूः– लक्षणं, भ्रनेश्चडूः (उ०) बाहुलकात्, तूं वृणोति छादयति तूवरः । रातेर्डैः (उ०), अपिशब्दाद्वित्ते मेघे च । परिक्रियते परिकीर्यते च परिकरः । समूहारम्भयोः प्रगाढगात्रिकाबन्धे च (परिकरः) ॥ १६६ ॥ मुक्तानां शुद्धिस्तारो नाम गुणः, लक्षणया शुद्धमौक्तिके । चशब्दात्कनीनिकातारकयोश्च तारावत् । अत्युच्चस्वरे रूप्ये च (तारः) । शॄवायुवर्णनिवृतेषु (वा०) इति कर्तरि घञ् । कर्बुरो नानावर्णः (शारः) । प्रतिज्ञायां यथा– सत्यसंगरः । आजौ यथा– संगरो विक्रियाकरः । संविदि यथा– अन्योन्यं वृत्तसंगरौ । आपदि यथा– संगरे शरणं सुहृत्, संगरणं संगिरन्तेऽत्र च संगरः । शमीफले तु संगरम् ॥ १६७ ॥ मन्त्रब्राह्मणात्मको .हि वेदः । गुप्तवादो रहसि कर्त-

वेदभेदे गुप्तवादे मन्त्रो मित्रो रवावपि ।
मखेषुयूपखण्डेपि स्वरुर्गुह्येप्यवस्करः ॥ १६८ ॥
आडम्बरस्तूर्यरवे गजेन्द्राणां च गर्जिते ।
(अभिहारोभियोगे च चौर्ये संनहनेपि च ॥ १६९ ॥)
स्याज्जङ्गमे परीवारः खड्गकोशे परिच्छदे ।
विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् ॥ १७० ॥
द्वारि द्वाःस्थे प्रतीहारः प्रतीहार्यप्यनन्तरे ।
विपुले नकुले विष्णौ बभ्रुः स्यात्पिङ्गले त्रिषु ॥ १७१ ॥
सारो बले स्थिरांशे च न्याय(य्ये) क्लीबं वरे त्रिषु ।
दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम् ॥ १७२ ॥
महारण्ये दुर्गपथे कान्तारः पुंनपुंसकम् ।
मत्सरोन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ॥ १७३ ॥
देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक् प्रिये ।
वंशाङ्कुरे करीरोस्त्री तरुभेदे घटे च ना ॥ १७४ ॥
ना चमूजघने हस्तसूत्रे प्रतिसरोस्त्रियाम् ॥ १७५ ॥

व्यावधारणं (मन्त्रः), मायाबीजादिश्च । मेद्यति स्निह्यति मित्रः । अपिशब्दान्मित्रं सुहृत् । मखादिषु चतुर्ष्वर्थेषु (स्वरुः) । अपिशब्दाद्वज्रे, स्वरति स्वरुः । अन्ये तु सान्तमाहुः, शोभनान्यरूंषि यस्येति, खण्डस्थाने खड्गं पेठुः । अपिशब्दाद्वर्चस्के, अवकीर्यत इति, वर्चस्केवस्करइति (सू०) साधुः ॥१६८॥ आदम्य[डम्ब्य]न्ते भीरवोनेनेत्याडम्बरः । संरम्भेपि, यथा– आडम्बराणि पूज्यन्ते स्त्रीषु राजकुलेषु च ॥ १६९ ॥ परिवार्यतेनेनेति, परिवारोपि । परिच्छदः परिजनादिः (परीवारः) । विस्तीर्यते विष्टरः, वृक्षासनयोर्विष्टरः (सू०) साधुः । दर्भमुष्टिरुपधामः[परिमाणं] तस्य विष्टरत्वं श्राद्धादौ ब्राह्मणासनत्वेनाम्नानात् । पीठाद्यमासनविशेषणम् ॥ १७० ॥ प्रतिह्रियते निवार्यते प्रवेशोनेनात्र च प्रतीहारः । अनन्तरे द्वाःस्थे स्त्रियां प्रतीहारी, अपिशब्दो द्वाःस्थापेक्षः । बिभर्ति बभ्रुः ॥ १७१ ॥ सृस्थिरेति (सू०) कर्तरि घञ् (सारः) । बले यथा– सुसारः, घृतान्मांसं तु सारकृत् । स्थिरांशे यथा– चन्दनसारः, मज्जासारः । न्याय्ये यथा– नैतत्सारम् । वरे यथा– जये धरित्र्याः पुरमेव सारम् । दुष्टमासमन्तादुदरमस्य दुरोदरम् ॥ १७१ ॥ कस्याम्भसोन्तं नाशमृच्छति कान्तारः, कान्ता आरा धारा अत्र(स्य) वा । माद्यति परकृच्छ्रे मदात्सरति वा मत्सरः, तद्वान् मत्सरवान् ॥ १७२ ॥ देवादिभ्यो वृते याचिते, रूपात्पुंसि, यदाहुः– तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः (कात्यः) । श्रेष्ठे यथा– वरं कूपशताद्वापी, अव्ययमित्येके । विवाह्योपि वरः । करोति करिणमीरयति किय[कीर्य]ते च करीरः । चशब्दाद्देशविशेषेपि ॥ १७३ ॥ चमूजघनं सेनापश्चाद्भागः, हस्तसूत्रं विवाहादौ कौतुकं मङ्गलार्थमूर्णामयं मणिबन्धसूत्रं (प्रतिसरः), यागादौ तूपचारात् । नियोज्येपि (प्रतिसरः) ॥ १७४ ॥ कपिले पीतवर्णे पुमान्, तद्वति त्रिषु, हरति हरिः । शीर्यते शर्करा, कर्परांशो मृत्कपालखण्डः । अपिशब्दादिक्षुविकारे शर्करिलदेशे च (शर्करा) । याप्यतेनया [यात्रा], यापनं भोजनादिवर्तनं यथा– प्राणयात्रा । गतिर्यानं यथा– विजययात्रा । देवोत्सवेपि, यान्त्यत्रेति (यात्रा)॥१७५॥ इण इरतेश्च रूपं, इरान्नमलमन्नरसश्च, दुर्गश्च– इरा

यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ।
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ॥
शर्करा कर्परांशेऽपि यात्रा स्याद्यापने गतौ ॥ १७६ ॥
इरा भूवाक्सुराप्सु स्यात्तन्द्री निद्राप्रमीलयोः ।
धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि ॥ १७७ ॥
क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ।
त्रिषु क्रूरेऽधमेऽल्पेऽपि क्षुद्रं मात्रा परिच्छदे ॥ १७८ ॥
अल्पे च परिमाणे सा मात्रं कार्त्स्न्येऽवधारणे ।
आलेख्याश्चर्ययोश्चित्रं कलत्रं श्रोणिभार्ययोः ॥ १७९ ॥
योग्यभाजनयोः पात्रं पत्रं वाहनपक्षयोः ।
निदेशग्रन्थयोः शास्त्रं शस्त्रमायुधलोहयोः ॥ १८० ॥
स्याज्जटांशुकयोर्नेत्रं क्षेत्रं पत्नीशरीरयोः ।
मुखाग्रे क्रोडहलयोः पोत्रं गोत्रं तु नाम्नि च ॥ १८१ ॥
सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च ।
अजिरं विषये कायेऽप्यम्बरं व्योम्नि वाससि ॥ १८२ ॥
चक्रं राष्ट्रेऽप्यक्षरं तु मोक्षेऽपि क्षीरमप्सु च ।
स्वर्णेऽपि भूरिचन्द्रौ द्वौ द्वारमात्रेऽपि गोपुरम् ॥ १८३ ॥

भूवाक्सुरवापः । तननं द्रात्यस्यां तन्द्री, तन्द्रापि । प्रमीला– इन्द्रियग्लानता । धयन्त्येनां धत्ते च धात्री, उपमाता क्षीरदात्री ॥ १७६ ॥ क्षुणत्ति क्षुद्यते च क्षुद्रम् । व्यङ्गा हीनाङ्गी, वेश्या शीलहीनोपलक्षणं, सरघा मधुमक्षिका (क्षुद्रा) । अधनो निःस्वः (क्षुद्रः) । अपिशब्दात्कृपणः (क्षुद्रः) ॥ १७७ ॥ परिच्छदे यथा– महामात्रः । अल्पे यथा– मात्रया विलेपनं ताम्बूलं चोपयुज्य । परिमाणे यथा– मात्राशी सर्वकालं स्यात् । धने कर्णभूषणेऽक्षिनिमेषकाले तालाङ्गे च (मात्रा) । कार्त्स्न्ये यथा– हस्तमात्रमग्निकुण्डम् । अवधारणे यथा– न स्नानमात्रगमनोत्सवभूषणानाम् (शिशु०) । स्वार्थेऽपि यथा– तावन्मात्रम् । चीयते चित्र्यते वा चित्रम् । नानावर्णे च (चित्रम्) । चित्रकं तु तिलकम् । चित्रा सुभद्रानक्षत्रयोः । कलं दुर्बलं त्रायते कलत्रं कलयति वा ॥ १७८ ॥ पाति पीयतेनेन च पात्रम् । नदीकूलान्तरे यज्ञभाण्डे नाट्यानुकर्तरि (पात्रम्) । पतन्ति यान्त्यनेन पत्त्रम्, पर्णेऽपि । निदेश आज्ञा, शासनं शास्यतेनेन शास्त्रम् । शस्यतेनेन शस्त्रम् ॥ १७९ ॥ जटा वृक्षमूलं, अंशुकं पटोत्र, नयति नीयतेनेन नेत्रम् । मन्थानरज्जौ बस्तिनाड्यामक्षिण च (नेत्रम्) । क्षिणोति क्षीयते वा क्षेत्रम् । केदारे सिद्धस्थाने गणितव्यवहारे च (क्षेत्रम्) । क्रोडः सूकरः, तस्य मुखाग्रं घोणा, पुनन्त्यनेन पोत्रं, हलसूकरयोःपुवः (सू०) ष्ट्रन् । गूयते शब्दयतनेन गां त्रायते च गोत्रं, चशब्दात्कुले शैले च । गोत्रा तु भूः, गोसमूहश्च ॥ १८१ ॥ सीदन्त्यत्र सत्त्रं, दम्भे साधने चशब्दात् । अजन्त्यत्राजिरं, विषये रूपादौ । अपिशब्दात्प्राङ्गणे (अजिरम्) । अम्बतेम्ब्यते वाम्बरम् । सुगन्धद्रव्यभेदेऽपि (अम्बरम्) ॥१८२॥ करोतेश्चकतेश्च रूपं (चक्रम्) । अपिशब्दादायुधे रथाङ्गे सैन्ये राष्ट्रे तैलिककुलालाद्युपकरणे च (चक्रम्) । चक्रस्तु चक्रवाके । द्वयोर्गन्धगुणावर्तयोश्चक्रिका । न क्षरत्यक्षरम् । अपिशब्दाद् ब्रह्मपरब्रह्मणोः (अक्षरं) । घस्यते क्षीरम् , चशब्दाद् दुग्धे । अपिशब्दात्प्रभूतेन्द्वोः (भूरिचन्द्रौ), भवति भूरि । अपिशब्दात्पुरद्वारे, गोप्यते गोपुरम् ॥ १८३ ॥

गुहादम्भौ गह्वरं द्वे रहोऽन्तिकमुपह्वरे ।
पुरोऽधिकमुपर्यग्राण्यगारं नगरं पुरम् ॥ १८४ ॥
मन्दिरं चाथ राष्ट्रोऽस्त्री विषये स्यादुपद्रवे ।
दरोऽस्त्रियां भये श्वभ्रे वज्रोऽस्त्री हीरके पवौ ॥ १८५ ॥
तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे ।
औशीरं चामरे दण्डेऽप्यौशीरं शयनासने ॥ १८६ ॥
पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।
व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः ॥ १८७ ॥
अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये ।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ॥ १८८ ॥
मुस्तेऽपि पिठरं राजकशेरुण्यपि नागरम् ।
शार्वरं त्वन्धतमसे घातुकेऽभे नृ(-य)लिङ्गकम् ॥ १८९ ॥

गुह्यते गुहा, भिदादिः (षिद्भिदादीति) । गाहनं गाह्यते वा गह्वरं, निकुञ्जेऽपि । रहो निर्जनं. उपह्वरन्तेऽत्रोपह्वरम् । पुरो यथा– अग्रेसरः । अधिकं यथा– साग्रं शतम् । उपरि यथा– वृक्षाग्रम्, अगत्यग्रम् । भिक्षाभेदेऽपि (अग्रं), यत्स्मृतिः– ग्रासप्रमाणं भिक्षा स्यादग्रं ग्रासचतुष्टयम् । अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः ॥ मुख्ये तूपचारात्, यथा– अग्रहारः । चशब्दः पुरापेक्षः, सर्वतोभद्रादियागे देहेऽपि पुरम्, पिपर्ति पूर्यते च, मन्दन्त्यत्र मन्दिरम् ॥ १८४ ॥ राजते राष्ट्रं, विषयो जनपदः । उपद्रवे यथा– परराष्ट्रभयम् । दृ भये, दृ विदारणे, श्वभ्रे दर्याऽपि । दरोत– ईषदर्थेऽव्ययं दरस्य पदं वा, यथा– दरदलितहरिद्रापिञ्जराण्यङ्गकानि (राजशेखरः) । वजत्येव न प्रतिहन्यते वज्रं, हीरको माणिक्यवर्कं रत्नम् । वज्रोऽशनिश्च ॥ १८५ ॥ तन्यते तन्त्र्यते वा तन्त्रम् । प्रधाने यथा– द्वित्वमतन्त्रम् । सिद्धान्ते यथा– चतुःपीठमिदं तन्त्रम् । सूत्रवाये यथा– तन्त्रवायः । परिच्छदे यथा– तन्त्रपतिः । अत एव स्वमण्डलचिन्ता तन्त्रम् । आयत्तेऽपि यथा– स्वतन्त्रः । शास्त्रप्रक्रियाशब्दव्युत्पत्तिरोधयादि च, यथा– साधारणं भवेत्तन्त्रं यथा श्वेतो धावति (भाष्य०) । उद्यते काम्यत इत्यवगमात्, दण्डो यष्टिः । शयनासनयोः समुदितयोः संज्ञेयम् (औशीरं) । अपिशब्दादुशीरस्येदं (औशीरम्) ॥ १८६ ॥ वाद्यभाण्डे मुरजस्य मुखे, तीर्थविशेषे यथा– पुष्करं दुष्करं गन्तुम् । औषधीविशेषे यथा– पुष्करमूलानि ॥ १८७ ॥ अन्तं रात्यन्तरम् । अवकाशे यथा– अन्तरं देहि (बा० रा०) । अवधौ यथा– मासान्तरे देयम् । परिधाने यथा– अन्तरे शाटका अन्तःपरिधानीया इत्यर्थः (काशिका०) । अन्तर्धौ यथा– पर्वतान्तरिताः स्त्रियः । भेदो विशेषः, यथा– अन्तरज्ञो भव सदा धनस्य च जनस्य च । तादर्थ्ये यथा– ओदनान्तरस्तण्डुलः । छिद्रे यथा– अन्तरं लब्ध्वारिः प्रहरेत् । आत्मीये यथा– अयमभ्य[त्य]न्तरो मम । विनार्थे यथा– अन्तरेण पुरुषकारं न किञ्चित्सिध्यति । बहिरर्थे यथा– अन्तरे चाण्डालगृहा बाह्या इत्यर्थः । अवसरे यथा– अन्तरज्ञः सेवकः । मध्ये यथा– आवयोरन्तरे जाताः पर्वताः सरितो द्रुमाः (महानाट०) । अन्तरात्मनि यथा– अन्तरात्मा, तथा च, दृष्टान्तरं ज्योतिरुपाररास । चशब्दादन्यार्थे यथा– वस्त्वन्तरम् ॥ १८८ ॥ अपिशब्दात्स्थाल्यां (° पिठरं), पिठ अवयवे । राजकशेरुर्जलजकन्दविशेषः (नागरम्) । अपिशब्दाच्छुण्ठी, नगरभवं च (नागरम्) । शर्वर्यां भवं शृणाति वा शार्वरं, घातुकश्चासाविभो हस्ती च ॥ १८९ ॥ गोर एव गौरः । अपिशब्दाद् भल्लातकः (अरुष्करः) । जठति (जायते)

गौरोऽरुणे सिते पीते व्रणकार्यप्यरुष्करः ।
जठरः कठिनेऽपि स्यादधस्तादपि चाधरः ॥ १९० ॥
अनाकुलेऽपि चैकाग्रो व्यग्रो व्यासक्त आकुले ।
उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः स्यादनुत्तरः ॥ १९१ ॥
एषां विपर्यये श्रेष्ठे दूरानात्मोत्तमाः पराः ।
स्वादुप्रियौ च मधुरौ क्रूरौ कठिननिर्दयौ ॥ १९२ ॥
उदारो दातृमहतोरितरस्त्वन्यनीचयोः ।
मन्दस्वच्छन्दयोः स्वैरः शुभ्रमुद्दीप्तशुक्लयोः ॥ १९३ ॥
चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ।
द्रुमप्रभेदमातङ्गकाण्डपुष्पाणि पीलवः ॥ १९४ ॥
कृतान्तानेहसोः कालश्चतुर्थेऽपि युगे कलिः ।
स्यात्कुरङ्गेऽपि कमलः प्रावारेऽपि च कम्बलः ॥ १९५ ॥
करोपहारयोः पुंसि ब(व)लिः प्राण्यङ्गजे स्त्रियाम् ।
स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः ॥ १९६ ॥
वातूलः पुंसि वात्यायामपि वातासहे त्रिषु ।
भेद्यलिङ्गः शठे व्यालः पुंसि श्वापदसर्पयोः ॥ १९७ ॥

जठरं, अपिशब्दात्कुक्षौ । अपिशब्दादोष्ठे हीने दुर्धरे च (अधरः) ॥ १९० ॥ अपिशब्दादवहिते, एकमग्रं चिन्तनीयमस्यैकाग्रः । विविधमग्रमस्य व्यग्रः, विशेषेणागति वा । उपरि यथा– इत उत्तरम् । उदीच्ये यथा– उत्तरे कुरवः । श्रेष्ठे यथा– लोकोत्तरम् । अपिशब्दाद्वाक्ये यथा– निरुत्तरीकृतः । प्रतिवाक्ये यथा– प्रश्नश्चोद्यधिया पृच्छा तस्य भञ्जनमुत्तरम् । अतिशयेनोद्गतमुत्तरम् । नास्त्युत्तरमत्रानुत्तरम् ॥ १९१ ॥ एषामुपर्यादीनां विपर्यये बुध्ने दक्षिणेऽधमे वचनाभावे च (अनुत्तरः) । अनात्मा-त्मनोऽन्यः (परः) । उत्तमोऽत्रोत्तरतः, पूर्वादन्यः शत्रुश्च (परः), पिपर्तीति परः । मधु माधुर्यमस्यास्ति मधुरः, ऊषसुषीतिरः, (सू०) । कृणाति कृन्तति वा क्रूरः ॥ १९२ ॥ उच्चैराराद्युदारः, अनाकुलेऽपि । इतं राति– एति वा– इतरः । स्वेनेर्ते स्वस्य– ईरो वा स्वैरः, स्वादीरेरिणोः (वा०) इति वृध्द्येकादेशौ । शोभते शुभ्रम् ॥ १९३ ॥ आसारो वेगवद्वर्षे सैन्यप्रसरणं तथा । धाराम्बुपाते चोत्कर्षेऽस्त्रौ कटाहे तु कर्परः । बन्धुरं सुन्दरे नम्रे गिरिर्गेन्दुकशैलयोः । चरुः स्थाल्यां हविःपक्तावधीरः कातरे चले ॥ अथ कान्ताः । संयता बद्धाः केशा मौलिः, मूल प्रतिष्ठायां, मूङ् बन्धने वा । द्रुमविशेषः पीलुः । मातङ्गोऽत्र हस्ती. पील गतौ ॥ १९४ ॥ अनेहा कालः क्षणत्रुट्यादिः, कलयति भूतानि कलयत्यायुर्वा कालः । महाकाले मृत्यौ कृष्णवर्णे च (कालः)। अपिशब्दात्कलहे, निरर्थके रणे तूपचारात् (कलिः), कल क्षेपे । अपिशब्दात्पद्माम्भसोः कमलम् । कमला तु श्रीः । कमलते कुत्सितमलति च (कमलम्) । अपिशब्दात्सास्नायां नागविशेषे च, काम्यते कुत्सितं बलति च कम्बलः ॥ १९५ ॥ करो राजग्राह्यः; पूजोपकरणमुपहारः, प्राण्यगजस्त्वक्संकोचः (वलिः) । आद्य ओष्ठ्यादिरन्त्यो दन्त्योष्ठ्यादिरिति विशेषो न गणितः । बल प्राणने, वल संवरणे, दैत्येऽपि बलिः । स्थौल्यादौ रूपात्क्लीबे (बलं), काकहलधरयोस्तु ना पुंलिङ्गः (बलः)॥१९६॥ वातात्समूहे च (वा०), तं न सहत इति– ऊलः। उन्मत्तेऽप्याहुः, वातुलवातलौ च दृश्येते । विविधमालमनर्थोऽस्माद्व्यालः । अड उद्यमे, व्याडोऽपि । स्त्रियां तु व्याली ॥ १९७ ॥

मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम् ।
शङ्कावपि द्वयोः कीलः पालिः स्त्र्यश्र्यङ्कपङ्क्तिषु ॥ १९८ ॥
कला शिल्पे कालभेदे चाली सख्यावली अपि ।
अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि ॥ १९९ ॥
बहुलाः कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु ।
लीला विलासक्रिययोरुपला शर्करापि च ॥ २०० ॥
शोणितेऽम्भसि कीलालं मूलमाद्ये शिफाभयोः ।
जालं समूह आनायो गवाक्षक्षारकावपि ॥ २०१ ॥
शीलं स्वभावे सद्वृत्ते सस्ये हेतुकृते फलम् ।
छदिर्नेत्ररुजोः क्लीबं समूहे पटलं न ना ॥ २०२ ॥

मलयति मलते वा देहं च मलः, विड् गूथं, किट्टं कलङ्कः । स्मृतौ तु— वसा शुक्रमसृङ् मज्जा मूत्रं विट् कर्णविण्नखाः । श्लेष्माश्रु दूषिका स्वेदो द्वादशैते मला नृणाम् ॥ शूल रुजायां, रुग्वातदोषः, यदाहुः— शूलं वर्ततेऽनिलात् । शङ्कौ कीलके (कीलः), अपिशब्दाज्ज्वालायां, कील बन्धे । क्षतौ प्रहरणविशेषे कीला, यद्वात्स्यायनः— कीला उरसि कर्तरी शिरसि विद्धा कपोलयोः । पाल्यतेऽनया पालिः स्त्रीलिङ्गा, अश्रिर्धारा । अङ्के यथा— कपोलपाली, कपोलोत्सङ्ग इत्यर्थः । अङ्कपालीत्यत्राङ्को वक्षः, यच्छाश्वतः— मुखाङ्कनाभिमेढ्रक्ष्मातालमानेति । पङ्क्तौ यथा— पालीयं चम्पकानाम् । प्रान्ते यथा— कर्णपाली, तथा सितपटच्छन्नपालीं कपालीम् । लोकाः कल्पितभोजनेऽप्याहुः ॥ १९८ ॥ शिल्पे गीतादौ, कालविशेषे, यदवोचत्— अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला (पृ० २२) । चशब्दादंशे यथा— चन्द्रकला, निष्कलः । निवृत्त्यां[त्या]श्चाष्टत्रिंशत्कलाः । तालेषु गुरुः कला । आ— अलति भूषयत्याली, आलाति च । अपिशब्दादालिरनर्थः । जलधिजलविकारे वेला, तटेऽप्युपचारात्, वेल चलने । कालेऽवसरः, मर्यादायां यथा— उद्वेलः ॥ १९९ ॥ बहुलाः कृत्तिका नाम नक्षत्रं, बहुत्वं तारकाणां बहुत्वात्, शितौ कृष्णवर्णे, वहन्ति वहुलाः, बहु लाति च । वहति हव्यं वहुलाख्योऽग्निः । बहुलं प्रभूतं प्रायिकं च । बहलशब्दोऽप्यस्ति घनतार्थो बहुत्वार्थश्च । लीङ् श्लेषणे, विलासश्चेष्टालंकारोपलक्षणम्, इष्टजनस्यानुकृतिर्लीलेति भरतोक्तो भेदो नात्र विवक्षितः । क्रिया कायिकः परिस्पन्दः (लीला) । उपलाति— उप्यते वा— उपला शर्करा— अश्मरूपा मृत्, अश्मखण्डिका वा । अपिशब्दादिक्षुविकारः, यथा— सिकतोपला । उपलस्त्वश्मा ॥ २०० ॥ कील्यते बध्यते कीलालम् । मूल प्रतिष्ठायां, मूङ् बन्धने, आद्ये यथा— मूलप्रकृतिरविकृतिः (सांख्यकारिका), मूलं धनम् । शिफा वृक्षजटा, भं नक्षत्रविशेषः (मूलम्) । अन्तिकेऽपि यथा— वृक्षमूलम् । जल धान्ये, आनायो रज्जुवितानः (जालम्) । गवाक्षे यथा— जालान्तरगते भानौ (मनुः) । क्षारको मुकुलवृन्दम् । अपिशब्दाद् दम्भे, इन्द्रजाले च (जालम्) ॥ २०१ ॥ शील समाधौ, स्वभावे यथा— हरणशीलः । शोभने वृत्ते (यथा)— शीलधनः साधुः । सस्ये (फलं) यथा— ओषध्यः फलपाकान्ताः (धन्वतरिः) । हेतुना कृते यथा— अधिश्रयणादेः पाकः फलम् । आयुधाग्रे लाभे फलके, आम्रादौ धान्यादिकणे च (फलम्), मुक्तादौ तूपचारात् । छदिर्गृहाच्छादनं, नेत्ररुजि यथा— तिमिरं काचतां याति पटलं तदुपेक्षया (चरक०) । समूहे यथा— पयोदपटली, पटं विस्तारं लाति पटलम् ॥ २०२ ॥ अधो यथा— पादतलम् । स्वरूपे यथा— तनुतलो-

अधःस्वरूपयोरस्त्री तलं स्यादामिषे पलम् ।
और्वानलेपि पातालं चेलं वस्त्रेधमे त्रिषु ॥ २०३ ॥
कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ।
निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः ॥ २०४ ॥
पर्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु ।
प्रवालमङ्कुरेप्यस्त्री त्रिषु स्थूलं जडेपि च ॥ २०५ ॥
करालो दन्तुरे तुङ्गे चारौ दक्षे च पेशलः ।
मूर्खेर्भकेपि बालः स्याल्लोलश्चलसतृष्णयोः ॥ २०६ ॥
दवदावौ वनारण्यवह्नी जन्महरौ भवौ ।
मन्त्री सहायः सचिवौ पतिशाखिनरा धवाः ॥ २०७ ॥

दरी । पृष्ठेपि यथा- भूतलम् । चपेटेपि यथा- तलप्रहारः । वितस्तौ तलः, यथा- षड्युग्मकस्तलस्तालो वितस्तिः शङ्कुराननम् । तलं च प्रकोष्ठे ज्याघातरक्षार्थं चर्म । चशब्दात्कर्षचतुष्टये (पलं), आमिषे मांसे, पल रक्षणे । अपिशब्दाद्रसातले (पातालं), पतति[पिबति] पातमालाति च । चिल वसने, अधमे चेलट् पचादिः (चेलखेटकटुकेति), यथा- ब्राह्मणिचेली ॥ २०३ ॥ कोः कूलं कुत्सितं वा कूलं कुकूलम् । इतिशब्देन मान्तमव्ययमिति ध्वनितं, यथा- साधुश्चैतः केवलं मूर्खः, केवृ सेचने । एकोत्रासहायः (केवलः) । कृत्स्ने यथा- न केवलं भुवो भर्ता ॥ २०४ ॥ पर्याप्तिः सामर्थ्यं यथा- कुशलं कटकरणे । क्षेमे यथा -कुशलं ते भूयात् । पुण्ये यथा -कुशलक्रयाजकः, कुशान्-लातीति । (कुशलः) शिक्षितत्वेन नैपुण्यं लक्ष्यते । प्रवते प्रवालं, वातेर्वलतेर्वा रूपम् । अङ्कुरोत्र किसलयः (प्रवालम्) । अपिशब्दाद् विद्रुमे वीणादण्डे च (प्रवालः) । स्थूल परिबृंहणे, जडः स्थूलोतीक्ष्णप्रज्ञत्वात् । अपिशब्दात्पीवरे (स्थूलः) ॥ २०५ ॥ करोति कृणोति च करालः । चशब्दान्मृदौ (पेशलः), पीङ् पाने पिश अवयवे वा । अपिशब्दात्केशे ह्रीवेरे वालधौ च (वालः), वाडृ आप्लावे वल संवरणे च । लुड विलोडने, सतृष्णो लौल्यात् ॥ २०६ ॥ कुलं गृहेपि तालाङ्के कुवेरे चैककुण्डलः । स्त्रीभावावज्ञयोर्हेला हेलिः सूर्ये रणे हिलिः ॥ हालः स्यान्नृपतौ मद्ये शकलच्छदयोर्दलम् । तुलिश्चित्रोपकरणशलाकातूलशय्ययोः ॥ तुमुलं व्याकुले शब्दे शष्कुली कर्णपाल्यपि ॥ अथ वान्ताः । दूयन्तेनेनेति, दुन्वोविभाषा (सू०) इति घञ्, यस्कात्यः- दवो वनगतो वह्निर्दावश्च वनमुच्यते । हरो रुद्रः (भवः), भावेपादाने च- अप् । प्राप्तिसंसारसत्ताकल्याणेष्वपि (भवः) । मन्त्री बुद्धिसचिवः, सह- अयते सहायः कर्मसचिवः, सचति समवैति सचिवः । पतिर्भर्ता, शाखी वृक्षविशेषः, धवति धूयते वा धवः ॥ २०७ ॥ अवल्यविः । ह्वयनं हवः, भावेनुपसर्गस्येति (सू०) ह्वः संप्रसारणं, अप् च । हूयतेस्मिन्हवोध्वरः । षट्सु (अर्थेषु) कर्तरि भावे चार्थानुगुण्यात् (घञ्) । सत्तायां यथा- कालभावयोः सप्तमी- गोषु दुह्यमानासु गतः । स्वभावे यथा- भावानुरक्तवनितासुरतैः शपेयम् (घटखर्परः) । अभिप्राये यथा- भावानुवर्ती भृत्यः । तात्पर्येत एव (यथा)- अयमत्र भावार्थः । चेष्टा क्रिया यथा- धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते । लीलापि चेष्टैव (यथा)- भावालसा विलासिन्यः । आत्मनि यथा- स्वं भावं भावयेद्योगी । जन्मनि यथा- नासतो विद्यते भावः (भगवद्गीता) । वस्तुनि च यथा- भावाश्चित्तजया भवन्ति भवता भाव्यन्त एते यथा । रतिवेगे च यथा- प्रमाणकालभावेभ्यो रतावस्थापनम् । प्रवृत्तिनिमित्ते च, भवतोस्मादभिधानप्रत्ययाविति भावः । विभूतियोनित्वप्रसिद्धे स्थगुद्यादौ च, यदाहुः- विभावः स्थायिसंज्ञश्च सानुभावोथ

अवयः शैलमेषार्का आज्ञाह्वानाध्वरा हवाः ।
भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु ॥ २०८ ॥
स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने ।
अविश्वासेपह्नवेपि निकृतावपि निह्नवः ॥ २०९ ॥
उत्सेकामर्षयोरिच्छाप्रसवे मह उत्सवः ।
अनुभावः प्रभावे च सतां च मतिनिश्चये ॥ २१० ॥
स्याज्जन्महेतुः प्रभवः स्थानं चाद्योपलब्धये ।
शूद्रायां विप्रतनये शस्त्रे पारशवो मतः ॥ २११ ॥
ध्रुवो भभेदे क्लीबे तु निश्चिते शाश्वते त्रिषु ।
स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोस्त्रियां धने ॥ २१२ ॥
स्त्री कटीवस्त्रबन्धेपि नीवी(विः) परिपणेपि च ।
शिवा गौरीफेरवयोर्द्वन्द्वं कलहयुग्मयोः ॥ २१३ ॥
द्रव्यासुव्यवसायेपि सत्त्वमस्त्री तु जन्तुषु ।
क्लीबं नपुंसकं षण्ढे वाच्यलिङ्गमविक्रमे ॥ २१४ ॥

सात्त्विकः । व्यभिचारी च पञ्चैते भावभेदा व्यवस्थिताः ॥ पूज्ये च यथा– मान्यो भावेति वक्तव्यः किञ्चिदूनस्तु मारिषः (भरतः) ॥ २०८ ॥ प्रसवनं प्रसूयते च प्रसवः । अपत्ये च (प्रसवः) ॥२०९॥ उत्सेक उद्रेकः, इच्छायाः प्रसव उत्पत्तिः (उत्सवः) । मह इति सप्तमी, षु प्रसवैश्वर्ययोः, षू प्रेरणे च । प्रभावे यथा– महानुभावः । चशब्दाद् भावसूचके, यदाहुः– अनुभावस्त्वभिनयः पश्चादर्थप्रकाशनात् ॥ २१० ॥ जन्महेतुः पित्रादिः, प्रभवत्यस्मात्प्रभवः । प्रथममुपलब्ध्यर्थो देशश्च प्रभवः, यथा– हिमवान् गङ्गायाः ॥ २११ ॥ भविशेषे यथा– औत्तानपादिः (ध्रुवः) । निश्चिते क्लीबं (यथा)– ध्रुवं मूर्खोयम् । शाश्वते यथा– जातस्य च ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च (भगवद्गीता) । कीले निश्चले च (ध्रुवः) । क्वचित्तु ध्रुवा गाने च, यदाह– ध्रुवा हि नाट्यस्य प्रथमे प्राणाः । आत्मात्मीयज्ञातिधनवचनो हि स्वशब्दः, स्यति सीयते वा स्वः । ज्ञातौ यथा– उल्मुकानीव भान्ति स्वाः । आत्मनि यथा– हृदि स्वमवलोकयन् । आत्मीये यथा– स्वदारनिरतः । धने यथा– प्रभूताः स्वा न दीयन्ते ॥ २१२ ॥ स्त्रियाः कटीवस्त्रस्य बन्धनं, यत्कात्यः– नीविराग्रन्थनं नार्या जघनस्थस्य वाससः । परिपणो राजपुत्रादिबन्धकः (नीविः) । अपिशब्दादायव्ययविशुद्धं धनं कारा च (नीविः) । शिनोति शिवा, फेरवा शृगाली । हरीतकी, आमलकी च (शिवा) । शिवस्तु रुद्रः, शिवं भद्रम् । द्वौ द्वौ द्वन्द्वं, द्वन्द्वंरहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु (सू०) इति साधुः । मिथुने च (द्वन्द्वम्) ॥ २१३ ॥ द्रव्यं पारिभाषिकं विशेष्याख्यं, यदाहुः– वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते । द्रव्यमित्युच्यते सोर्थो भेद्यत्वेन व्यवस्थितः ॥ यथा– सत्त्वे निविशतेपैति (का०) । असुषु यथा– उत्क्रान्तसत्त्वो मृगः । व्यवसायोतिशयवद्वीर्यं यथा– सत्त्ववाञ्शीलसंपन्नः । जन्तौ यथा– सत्त्वाहितः । अपिशब्दाद् गुणे बले स्वभावे पिशाचे, आत्मलाभे सत्तायां सारे च (सत्त्वम्), यत्कौटिल्यः– सत्त्ववन्तो मृद्भागाः । क्लीबू अधाष्ट्र्ये, षण्ढे– उभयव्यञ्जने नपुंसकलिङ्गम् ॥ २१४ ॥ क्वापि च– अत्यध्वगातिप्रणतौ प्राध्वौ प्राध्वं च बन्धने । अथ शान्ताः । (वैश्ये) यथा– विप्रक्षत्रियविट्शूद्राः (पृ० ११३) । मनुजे यथा– विशां-

द्वौ विशौ वैश्यमनुजौ द्वौ चराभिमरौ स्पशौ ।
द्वौ राशी पुञ्जमेषाद्यौ द्वौ वंशौ कुलमस्करौ ॥ २१५ ॥
रहःप्रकाशौ वीकाशौ निर्वेशो भृतिभोगयोः ।
कृतान्ते पुंसि कीनाशः क्षुद्रकर्षकयोस्त्रिषु ॥ २१६ ॥
पदे लक्ष्ये निमित्तेपदेशः स्यात्कुशमप्सु च ।
दशावस्थानेकविधाप्याशा तृष्णापि चायता ॥ २१७ ॥
वशा स्त्री करिणी च स्याद् दृग्ज्ञाने ज्ञातरि त्रिषु ।
स्यात्कर्कशः साहसिकः कठोरामसृणावपि ॥ २१८ ॥
प्रकाशोतिप्रसिद्धेपि शिशावज्ञे च बालिशः ।
सुरमत्स्यावनिमिषौ पुरुषावात्ममानवौ ॥ २१९ ॥
काकमत्स्यात्खगौ ध्वाङ्क्षौ कक्षौ च तृणवीरुधौ ।
अभीषुः प्रग्रहे रश्मौ प्रैषः प्रेषणमर्दने ॥ २२० ॥

पतिर्विंश्रभाजमारात् (रघु०) । विड् गूथे, षान्त इत्येके । अभिम्रियतेभिमरः प्राणनिरपेक्षस्तीक्ष्णाख्यः, यो द्रव्यहेतोर्व्याडं हस्तिनं वा योधयति । रणेभिमर इत्येके, स्पश बाधनस्पर्शनयोः । बन्धे तु घञ्, यथा– सेयमुभयतःस्पाशा रज्जुः । राति राशयति वा राशिः । पुञ्जे यथा– धान्यराशिः । मेषवृषाद्या द्वादश राशयः । वनुते वंशः, मस्करो वेणुः । (वंशः) समूहस्तूपचारात् ॥ २१५ ॥ विकाशनं वीकाशः, उपसर्गस्यघञीति (सू०) दीर्घः, विर्विगतार्थे विशेषार्थे च । निर्विश्यते भुज्यते निर्वेशः । भृतौ यथा– प्रतिग्रहजप[य]विक्रय[म]निर्वेशाधिगतैरर्थैः । भोगे यथा– स्र्यन्नपानं निर्वेशः । कुत्सितं नाशयतीति कीनाशः । कीशकीकटकीचकाद्यर्थः की निपात इति **श्रीभोजः** । मर्कटेपि (कीनाशः) ॥ २१६ ॥ अपदिश्यतेपदेशः, पदं स्थानं यथा– त्यक्तापदेशो यतिः । लक्ष्ये यथा– सापदेशः । निमित्ते यथा– केनाप्यपदेशेनागतः । प्रसिद्धौ च यथा– लब्धव्यपदेशः । कौ शेते कुश्यति च कुशम् । चशब्दा-द्दर्भे (कुशः) । फाले तु कुशी, जानपदकुण्डेति (सू०) अयोविकारे ङीष् । दशति दश्यते च दशा । अपिशब्दाद्वर्तिः, पटान्ते तु दशाः पुंबहुत्वे । आशासनमाशा महान्गर्धः । अपिशब्दाद्दिक् (आशा) ॥ २१६ ॥ चशब्दाद्वन्ध्यगवी सुता वश्या च (वशाः) । वश स्वायत्तः, इच्छा यन्त्रणा प्रभुत्वं च । भावे कर्तरि करणे च क्विप् (दृश्), दर्शनेक्षिण च । कृणोति कर्कशः, अमसृणः परुषः ॥ २१८ ॥ प्रकाशते प्रकाशनं च प्रकाशः । अपिशब्दात्प्रकटे– उद्द्योते च (प्रकाशः) । बालते बालिशः, बाडृ आ-प्लावे । **दुर्गस्तु**– कोशोस्त्री कुड्मले खड्गपिधानेर्थौघदिव्ययोः । नाशः क्षये तिरोधाने जीवितेशः प्रिये यमे ॥ नृशंसखड्गौ निस्त्रिंशावंशुः सूर्यंशवः कराः । आश्वाख्या शालिशीघ्रार्थे पाशो बन्धनशस्त्रयोः ॥ लक्ष्यं च– अग्रतो बाहुपाशेन केशपाशेन पृष्ठतः । पार्श्वयोः कर्णपाशेन सर्वतो बन्धनं प्रिया [ये] ॥ अथ षान्ताः । न निमिषत्यनिमिषः । पुरि पुरि शयनात्पूरणात्पालनाच्च पुरुषः ॥ २१९ ॥ मत्स्यानत्ति मत्स्याद्बकः, ध्वाक्षि काङ्क्षायाम् । कषति कक्षः, वीरुल्लता । चशब्दात्पापे पार्श्वे भित्तौ च (कक्षः) पापे यथा– कक्षाय क्रमते कक्षायते, सत्रकक्षकष्टकृच्छ्रगहनेभ्यः(कण्वचिकीर्षायामिति) (वा०) पापे क्रमणे क्यङ् । पार्श्वेङ्गविशेषे यथा– त्व[म]दन्ताङ्कितपालिकक्षरुधिरक्लिन्नाग्रपुङ्खं शरम् । भित्तौ यथा– सप्तकक्षान्तरा राजधानी । ईष उञ्छे, प्रग्रहो वल्गादिः, रश्मिर्मरीचिः । (प्रैषः) प्रादूहोढोढ्येषैष्येष्विति (वा०) वृद्धिः ॥ २२० ॥ पक्ष परिग्रहे । अपिशब्दात्– केशे पक्षः समूहार्थः पक्षः साध्य-

पक्षः सहायेप्युष्णीषः(षं) शिरोवेष्टकिरीटयोः ।
शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे वृषः ॥ २२१ ॥
कोषोस्त्री कुड्मले खड्गपिधानेर्थौघदिव्ययोः ।
द्यूतेक्षे शारिफलकेप्याकर्षोथाक्षमिन्द्रिये ॥ २२२ ॥
ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे ।
कर्षूर्वार्त्ता करीषाग्निः कर्षूः कुल्याभिधायिनी ॥ २२३ ॥
पुंभावे तत्क्रियायां च पौरुषं विषमप्सु च ।
उपादानेप्यामिषं स्यादपराधेपि किल्बिषम् ॥ २२४ ॥
स्याद् वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम् ।
प्रेक्षा नृत्तेक्षणं प्रज्ञा भिक्षा सेवार्थना भृतिः ॥ २२५ ॥
त्विड् शोभापि त्रिषु परे न्यक्षं कात्स्न्र्यनिकृष्टयोः ।
प्रत्यक्षेधिकृतेध्यक्षो रूक्षस्त्वप्रेमण्यचिक्कणे ॥ २२६ ॥
रविश्वेतच्छदौ हंसौ सूर्यवह्नी विभावसू ।
वत्सौ तर्णकवर्षौ द्वौ सारङ्गाश्च दिवौकसः ॥ २२७ ॥

विरोधयोः । बले काले पतत्रे च रुचौ पार्श्वे विकल्पिते ॥ उष्यते उष्णीषः । शुक्रले यथा– वृष्याः प्रयोगाः । मूषिके यथा– वृषदंशः । श्रेष्ठे यथा– पुरुषवृषः । सुकृते यथा– वृषो हि भगवान्धर्मः (नारदः), वर्षति वर्षयते च वृषः ॥ २२१ ॥ कुष्यति कुष्णाति च कोषः, कुड्मले कलिकामध्ये, अर्थौघो भाण्डागारं, दिव्यं शपथः । योन्यां पात्रविशेषेपि यथा– मूत्रकोषः, नेत्रकोषः । लोके तालव्यः शान्तोयम् । अपिशब्दादाकर्षणे, आकर्षणमाकृष्यते– आकर्षत्यास्मिन्वाकर्षः । अक्ष्णोत्यक्षं चक्षुरादि ॥ २२२ ॥ द्यूताङ्गे यथा– स्त्रियोक्षा मृगया पानम् । कर्षे यथा– अक्षः षोडश माषकाः । चक्रं रथकाष्ठोपलक्षणम् (अक्षः) । व्यवहार आयव्ययादिन्यायः, यथा– अक्षपटलम् । कलिद्रुमो विभीतकः (अक्षः) । श्रोतोमूलेपि (अक्षः) । कर्षणं कर्षति कृष्यते वा कर्षूः, वार्त्ता कृषिः, करीषं शुष्कगोमयम् । कुल्या यथा– चतस्रः कर्षूः पितृभ्यः कुर्यात् ॥ २२३ ॥ पुरुषस्य भावः कर्म चेति, भावे (प्राणभृज्जाति)वयोवचनेति (सू०) अञ् । विष्लृ व्याप्तौ । चशब्दाद्गरले (विषम्) । उपादानमुत्कोचः (आमिषम्) । अपिशब्दान्मांसादौ, आमिष्यत आमिषम् । अपिशब्दात्पापे किल्बिषं, किल क्षेपे ॥२२४॥ लोकं धत्ते लोकधातुर्जम्बुद्वीपस्तस्यांशो भूखण्डो नववैलावृतादिः, वर्षणं वर्षं, आज्विधौ भयादीनामुपसंख्यानम् (वा०) । अन्यत्र वर्षयत्याप्याययतीति वर्षः, दुर्गस्तु– वर्षाख्या लोकधातुश्च षण्ढवत्सरवृष्टयः । षण्ढो वर्षवरः । नृत्तादिप्रेक्षणकं, प्रेक्ष्यत इति प्रेक्षा । प्रेक्ष्यतेनयेति प्रेक्षा धीः, प्रेक्षणे च । अतो नृत्तेक्षणप्रज्ञाश्चेति युक्तः पाठः ॥ २२५ ॥ अधिगतोक्षैरध्यक्षो घटादिः । अक्षेष्वायस्थानेष्वधिकृतोध्यक्षः, अधिकान्यक्षीण्यस्य, अध्यक्ष्णोति वाध्यक्षो नियुक्तः । रूक्ष पारुष्ये, अचिक्कणे निःस्नेहे ॥ २२६ ॥ तथा– व्याजसंख्याशरव्येषु लक्षं घोषौ रवव्रजौ । कपिशीर्षं भित्तिशृङ्गेनुतर्षश्चषकः सुरा ॥ दोषो वातादिके दोषा रात्रौ दक्षोपि कुक्कुटे । शुण्डाग्रभागे गण्डूषो द्वयोश्च मूखपूरणे ॥ इतः सान्ताः । हन्ति गच्छतीति हंसः, आद्यदेहहानादुत्तरदेहसंपरिग्रहाच्च हंस आत्मा प्राणो यतिविशेषश्च । विभा त्विड् वसु यस्य विभावसुः । वसति वसन्त्यस्मिन्वत्सः । वत्सं तु वक्षः । सरन्ति सारङ्गाः, सहारङ्गेण गत्या वर्णेन च वर्तन्ते वा । चशब्दान्मृगाश्चातका [हस्तिनो] भ्रमराश्च ॥ २२७ ॥ आदिशब्दात्करुणादौ (रसः) । विप्रे यथा–

शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः ।
पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेपि शेखरे ॥ २२८ ॥
देवभेदेनले रश्मौ वसू रत्ने धने वसु ।
विष्णौ च वेधाः स्त्री त्वाशीर्हिताशंसाहिदंष्ट्रयोः ॥ २२९ ॥
लालसे प्रार्थनौत्सुक्ये हिंसा चौर्यादिकर्म च ।
प्रसूरश्वापि भूद्यावौ रोदस्यौ रोदसी च ते ॥ २३० ॥
ज्वालाभासौ नपुंस्यर्चिर्ज्योतिर्भद्योतदृष्टिषु ।
पापापराधयोरागः खगबाल्यादिनोर्वयः ॥ २३१ ॥
तेजःपुरीषयोर्वर्चो महश्चोत्सवतेजसोः ।
रजो गुणे च स्त्रीपुष्पे राहौ ध्वान्ते गुणे तमः ॥ २३२ ॥
छन्दः पद्येभिलाषे च तपः कृच्छ्रादिकर्म च ।
सहो बलं सहा मार्गो नभः खं श्रावणो नभाः ॥ २३३ ॥

तीक्ष्णरसान् भिक्षुकांश्च रिपौ युञ्जीत । वीर्ये यथा– रसस्यातिरसः सर्पिः । गुणे यथा– रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः । रागे यथा– रसिकः पुरुषादिः । द्रवे यथा– हरीतकीरसः । आद्यदेहधातौ च यथा– रसासृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः । पारदे च यथा– रसवादी । रसा तु भूः । तंसिः सौत्रो भूषणार्थः, वतंसोपि ॥ २२८ ॥ देवभेदे यथा– अष्टौ वसवः । अनलोग्निः, रश्मिस्तेजः, वसति सर्वत्रोष्यते वा । तेजश्च वसु, आहुश्च– वसु रत्नं वसु धनं वसु तेजो निगद्यते । चशब्दाद्वृद्धात्रोः, विधति विधत्ते वा वेधाः । वेधश्च हिंसामाहुः । आशासनमाशीः, आशं(श)सति हिनस्ति च, यदाहुः– आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति । आशीविषः, पृषोदरादित्वात् (सू०) सलोपः ॥ २२९ ॥ लष ईप्सायामित्यस्माल्लसेर्यङन्ताद्वा लालसा । चशब्दाद्वधः (हिंसा) । वडवाख्या प्रसूः । अपिशब्दान्माता (प्रसूः) । गोतोणिदित्यत्रौतोणिदिति पाठाद् द्योशब्दस्य सर्वनामस्थाने वृद्धिः । आद्य ईदन्तो भुवि दिवि च वर्तते, अन्योऽसन्तः क्लीबे द्वयमाह, यथा– रोदोरन्ध्रमजिह्मदत्[न्] । रुणद्धि सर्वं रोदः । रोदसीत्यव्ययमप्यस्ति, यथा– द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च ॥ २३० ॥ इंदमियं वा, अर्च्यतेर्चिः । ज्योतते ज्योतिः, भं तारका, द्योतः प्रकाशः, दृष्टिः कनीनिकामध्यम्, यन्मनुः– तारा नेत्रात्रि[वि]भागः स्याज्ज्योतिस्तत्पञ्चमांशकम् । आगच्छत्यागः । वयते याति [वाति वा] वयः, असुन्, नुमा क्लीबे ॥ २३१ ॥ रूपेपि (वर्चः) । उत्सवे (महः), अकारान्तोपि, मह पूजायाम् । गुणे सत्त्वात्परे यथा– उपष्टम्भकं बलं च रजः । चशब्दाद्धूलौ (रजः) । स्त्रीपुष्पे यथा– रजस्वला । गुणे यथा– गुरुवरणकमेव तमः, ताम्यन्त्यनेन तमः ॥ २३२ ॥ छन्दति छन्दः, पद्ये गायत्र्यादौ । अभिलाषे– अकारान्तोपि यथा– छन्दानुवर्ती । चकाराद्वेदे यथा– युक्तश्छन्दांस्यधीयीत । आदिशब्दाच्चान्द्रायणादि (तपः) । चशब्दात्तरा माघः, अदन्तोपि ग्रीष्मार्थः, यथा– तपेन वर्षा शरदा हिमागमः (शिशु०) । सहते सहः । मार्गो मार्गशीर्षः, द्विः पाठो लिङ्गभेदार्थः । एवं नभसोः– ओकसोः, पयसोस्त्वेकं लिङ्गं क्षीराम्भसोः क्लीबत्वात् । न बभास्ति नभाः, एकं शून्यत्वादन्यो मेघच्छन्नत्वात्, नभ हिंसायां वा ॥२३३॥ उच समवाये, ओकउचःके (सू०) इति– अदन्तोपि । पीङ् पाने, पय गतौ च (पयः) । उब्जेरसुनि साध्यं (ओजः) । विषमसंख्यावाची त्वोजोदन्तः, ओजेनौजः समः पादो युग्युजात्र[र्ध]समस्य

ओकः सद्माश्रयश्चौकाः पयः क्षीरं पयोम्बु च ।
ओजो दीप्तौ बले स्रोत इन्द्रिये निम्नगारये ॥ २३४ ॥
तेजः प्रभावे दीप्तौ च बले शुक्रेप्यतस्त्रिषु ।
विद्वान् विदंश्च बीभत्सो हिंस्रोऽप्यतिशये त्वमी ॥ २३५ ॥
वृद्धप्रशस्ययोर्ज्यायान् कनीयांस्तु युवाल्पयोः ।
वरीयांस्तूरुवरयोः साधीयान्साधुबाढयोः ॥ २३६ ॥
दलेपि बर्हं निर्बन्धोपरागार्कादयो ग्रहाः ।
द्वार्यापीडे क्काथरसे निर्यूहो नागदन्तके ॥ २३७ ॥
तुलासूत्रेश्वादिरश्मौ प्रग्राहः प्रग्रहोपि च ।
पत्नीपरिजनादानमूलशापाः परिग्रहाः ॥ २३८ ॥
दारेषु च गृहाः श्रोण्यामप्यारोहो वरस्त्रियाः ।
व्यूहो वृन्देप्यहिर्वृत्रेप्यग्नीन्द्वर्कास्तमोपहाः ॥ २३९ ॥
परिच्छदे नृपार्हेर्थे परिबर्होव्ययाः परे ।
आङीषदर्थेभिव्याप्तौ सीमार्थे धातुयोगजे ॥ २४० ॥

तु (भरत०)। स्रवति स्रोतः, इन्द्रियमिन्द्रियद्वारम् । रयः प्रवाहो लक्षणया (स्रोतः) ॥ २३४ ॥ तिज निशाने (तेजः) । अपिशब्दादसहनत्वे यद्भरतः– अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेप्यसहनं तत्तेजः समुदाहृतम् ॥ सान्ता यावद्वाच्यलिङ्गाः । विदेःशतुर्वसुः (सू०) । चशब्दादपण्डितात्मज्ञो (विद्वान्) । मान्बधेति (सू०) सन्नभ्यासदीर्घश्च, ततो अप्रत्ययात् (सू०), बीभत्सास्यास्तीति बीभत्सः । चशब्दाज्जुगुप्सितोर्जुनश्च । वक्ष्यमाणाश्चत्वार ईयसुन्नन्ताः ॥ २३५ ॥ प्रशस्यस्यश्रः (सू०), वृद्धस्यच (सू०), ज्यच (सू०) इति ज्यादेशः । युवाल्पयोःकनन्यतरस्याम् (सू०)। अतिशयेनोरुर्वरश्च वरीयान्, प्रियस्थिरास्फिरोर्वेति (सू०) उरोर्वरादेशः । अतिशयेन साधु बाढं च साधीयः, अन्तिकबाढयोर्नेदसाधौ (सू०) ॥ २३६ ॥ इतो हान्ताः । दलं पर्णं, परिवारश्च (बर्हम्) । अपिशब्दान्मयूरपिच्छे (बर्हं), बृह वृद्धौ, बर्ह प्राधान्ये च । उपरागो राहुग्रहणं, भावे ग्रहवृदृनिश्चिगमश्चेति (सू०) अप्, कर्तरि विभाषाग्रहः (सू०) इत्यच् । भूतोपि (ग्रहः) । आपीडो बहिर्निःसृतं दारु, निर्यान्त्यनेन निर्यौति निर्याति च निर्यूहः, यूहिर्लौकिको धातुर्वा । नागदन्तको भित्तिस्थः कीलकः (निर्यूहः) ॥ २३७ ॥ प्रगृह्यतेनेन, प्रेवणिजाम् (सू०), रश्मौच (सू०) इति वा घञ् । परिगृह्यते परिग्रहणं च परिग्रहः, ग्रहवृदृनिश्चिगमश्च (सू०) इत्यप्, परिगृह्णातीति– अच् । शापः शपथः (परिग्रहः) ॥ २३८ ॥ दारेषु तात्स्थ्यात् । चशब्दाद्वेश्मनि, गृह्णन्ति गृहाः, नित्यं बहुत्वे, गेहेकः (सू०) । श्रोण्यां यथा– वरारोहा । अपिशब्दाच्छैलाद्यारोहणेश्वारे च (आरोहः), अधिकरणे भावे च घञ्, कर्तर्यच् । व्यूह्यते रच्यते व्यूहः, अपिशब्दात्सैन्यविन्यासे यथा– चक्रव्यूहः । अंहत्यहिः, अपिशब्दात्सर्पे वप्रे च । अपहन्तेडः (अपेक्षतमसोः) ॥ २३९ ॥ नृपार्हे छत्रचामरादौ, अर्थे वस्तुनि धने वा (परिबर्हः) । इति नानार्थवर्गः । अत ऊर्ध्वमव्ययवर्गो वक्ष्यते, ततः प्रस्तावान्नानार्थाव्ययवर्गस्तावत् । ईषत्पिङ्गलः– आपिङ्गलः । अभिव्याप्तिरभिविधिः– आकुमारं यशः पाणिनेः । सीमार्थो मर्यादा, यथा– आ– उदकान्तात्प्रियं प्रोषितमनुव्रजेत् । धातुयोगजे धात्वर्थेन क्रियया योगजे संबन्धोत्थे द्योतकत्वे, यथा– आरोहति । उपसर्गोपि खुरनखन्यायेनात्रोक्तः ॥ २४० ॥ स्मृतिः सूचनं, यथा– आ एवं

आ प्रगृह्यः स्मृतौ वाक्येऽप्यास्तु स्यात्कोपपीडयोः ।
पापकुत्सेषदर्थे कु धिङ् निर्भर्त्सननिन्दयोः ॥ २४१ ॥
चान्वाचयसमाहारेतरेतरसमुच्चये ।
स्वस्त्याशीःक्षेमपुण्यादौ प्रकर्षे लङ्घनेऽप्यति ॥ २४२ ॥
स्वित्प्रश्ने च वितर्के च तु स्याद्भेदेऽवधारणे ।
सकृत्सहैकवारे चाप्याराद् दूरसमीपयोः ॥ २४३ ॥
प्रतीच्यां चरमे पश्चादुताप्यर्थविकल्पयोः ।
पुनः सहार्थयोः शश्वत्साक्षात्प्रत्यक्षतुल्ययोः ॥ २४४ ॥
खेदानुकम्पासंतोषविस्मयामन्त्रणे बत ।
हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥ २४५ ॥

किलैतत् । वाक्यपूरणे पूर्वोक्तस्यान्यथात्वे द्योत्ये, यथा— आ एवं नु मन्यसे, पूर्वं नैवममंस्थाः— अथ तु मन्यस इत्यर्थः । निपातएकाजनाङ् (सू०) इति प्रगृह्यत्वात्, प्लुतप्रगृह्या अचीति (सू०) प्रकृतिभावः, यदाहु:— ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् (का०) । समुच्चयेऽपिशब्दात्— देवेभ्यश्च पितृभ्य आ (निरुक्त०) । कोपे— आः रक्षस्तिष्ठति । पीडायां— विद्यामातरमाः प्रदर्श्य नृपशून् भिक्षामहे निस्त्रपाः (उद्भट०) । पापे यथा—पापो ब्रह्मा कुब्रह्मः । कुत्सायां— कुपुरुषः । ईषन्मधुरं कामधुरम् । निर्भर्त्सने— धिक् तार्किकान् । निन्दायां— धिक् कृतोऽयम् ॥ २४१ ॥ अन्वाचयो मुख्यसिद्धावप्रधाननिष्पत्तिः, यथा— भिक्षामट गां चानय । समाहारे संहतिप्राधान्ये, यथा— पाणी च पादौ च पाणिपादम् । इतरेतरयोगे संहन्यमानप्राधान्ये, यथा— [प्लक्षश्च न्यग्रोधश्च] प्लक्षन्यग्रोधौ । समुच्चय एकत्रानेकप्रचयः, यथा— गार्ग्यो वात्स्यश्चागतौ, पचति च पठति च चैत्रः । विनियोगतुल्ययोगिताहेतुषु च । विनियोगे— अहं च त्वं च वृत्रहन् संयुज्याव सनिभ्य आ (निरुक्त०) । तुल्ययोगितायां— ध्यातश्चोपस्थितश्च । हेतौ— ग्रामश्च गन्तव्यः शीतं च, शीतात्कथं गम्यत इत्यर्थः । स्वस्तीत्यविनाशनाम[य]— स्वस्ति तेऽस्तु लतया सह वृक्ष । क्षेमे— स्वस्ति प्रजाभ्यः । पुण्ये— काममिदं ते स्वास्ति । आदिशब्दान्मङ्गलादौ— स्वस्ति श्रीकुसुमपुरात् (मुद्राराक्षस०) । प्रकर्षे— अतिवृद्धः । लङ्घनमतिक्रमणं यथा— सर्वान् गुणानेष गुणोऽति भाति, अतिक्रम्य भातीत्यर्थः ॥ २४२ ॥ प्रश्ने— कः स्विदेकाकी चरति । वितर्को नानापक्षावमर्शः— अधः स्विदासीदुपरि स्विदासीत् (वाजसनेयीसंहिता) । भेदो विशेषः, यथा— क्षीरान्मांसं तु पुष्टिकृत् । अवधारणे— भीमस्तु पाण्डवानां रौद्रः । हेतुव्यावृत्ती त्वनयोर्भेदौ— गृह्णीयां चे[वे]दं दुर्जन त्वं तु किं करिष्यसि । सहार्थे— सकृद्यान्ति । एकवारे— सकृद्दंशो निपतति (मनुः) । अपिशब्दात्सदार्थे— सकृद्युवानो गीर्वाणाः ॥ दूरे— आराच्छत्रोः सदा वसेत् । समीपे— संप्रीतान् स्थापयेदारात् ॥ २४३ ॥ प्रतीच्यां— पश्चाद्दृत्ताद्रिः । चरमे— पश्चाद्याति । अप्यर्थः समुच्चयप्रश्नौ । समुच्चये— उत भीम उतार्जुनः । प्रश्ने— उत दण्डः पतिष्यति । विकल्पे— उत पर्वतं भिन्द्या— उत त्रुट्येद्वज्रः । वितर्केऽपि— स्थाणुरुत पुरुषः । पुनरर्थे पौनःपुन्ये— शश्वद्याति । सहार्थे— शश्वद् भुञ्जते । नित्येऽपि— शाश्वतं वैरम् । प्रत्यक्षे— साक्षाद् द्रष्टा साक्षी । तुल्ये— इयं साक्षाल्लक्ष्मीः ॥ २४४ ॥ खेदे— अहो बत महत्कष्टम् । अनुकम्पायां— बत निःस्वोऽसि । संतोषे— बत प्राप्ता सीता । विस्मये— अहो बतासि स्पृहणीयवीर्यः (कु० सं०) । आमन्त्रणे— बत वितरत तोयं तोयवाहा हिमान्तं [नितान्तं] । हर्षे— हन्त जीविताः स्मः । अनुकम्पायां— पुत्रक हन्त मे बालकाः [ते धानाकाः] । वाक्यारम्भे— हन्त ते कथयिष्यामि (भगवद्गीता) । विषादे— हन्त हताः पथिकगेहिन्यः । दाने निश्चये च— हन्तकारः (वा० रा०), हन्त गच्छामः ॥ २४५ ॥ प्रतिनिधौ— अभि-

प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ।
इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु ॥ २४६ ॥
प्राच्यां पुरस्तात्प्रथमे पुरार्थेऽग्रत इत्यपि ।
यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे ॥ २४७ ॥
मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ।
वृथा निरर्थकाविध्योर्नानानेकोभयार्थयोः ॥ २४८ ॥
नु पृच्छायां विकल्पे च पश्चात्सादृश्ययोरनु ।
प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु ॥ २४९ ॥

मन्युरर्जुनतः[नं] प्रति । वीप्सायां– वृक्षं वृक्षं प्रति सिञ्चति । लक्षणे– वृक्षं प्रति विद्योतते विद्युत् । आदि-शब्दादित्थंभूताख्यानादौ– साधुश्चैत्रो मातरं प्रति । भागे– यदत्र मां प्रति स्यात्सोंशो दीयताम् । प्रति-दाने– माषानस्मै तिलेभ्यः प्रति प्रयच्छति । हेतौ– हन्तीति पलायते । प्रकरणं प्रकारः– गौरश्वो हस्तीति जातिः (भाष्य०) । प्रकर्षे– इति पाणिनिः, पाणिनिशब्दः प्रकर्षात्प्रसिद्ध इत्यर्थः । अत एव प्रकारा(शा)दीति पेठुः । आदिशब्दादेवमर्थे– क्रमादमुं नारद इत्यबोधि सः (शिशु०) । मते– इत्यापिशलिः । विवक्षानियमे– तदस्यास्त्यस्मिन्निति मतुप् (पाणिनिसूत्रं) । स्वरूपे– वृद्धिरित्येव या वृद्धिः । समाप्तौ यथा– अ अ इति । प्रत्यक्षे संनिधाववधारणे च ॥ २४६ ॥ प्राच्यां– पुरस्तात्सूर्य उदेति । प्रथमे– पुरस्ताद् भुङ्क्ते । पुरार्थेऽतीते– पुरस्ताद्रामोभूत् । अग्रतोर्थे– पुरस्तात्सेनानीर्याति । अपिशब्दात्पूर्वदेशे काले च– पुरस्ताद् द्वारम्, पुरस्तात्कृतम् । साकल्ये यथा– यावत्कार्यं तावत्कुरु, सकलं कुर्वित्यर्थः । अवधौ– यावद् गन्ता तावत्तिष्ठ । माने– यावद्दत्तं तावद् भुक्तम् । अवधारणे– यावदमत्रं ब्राह्मणानामन्त्रयस्व ॥ २४७ ॥ मङ्गले– अथ परस्मैपदानि । अनन्तरे– स्नातोथ भुङ्क्ते । आरम्भे– अथ शब्दानुशासनम् । प्रश्ने– अथ शक्तोसि भोक्तुम् । कार्त्स्न्ये– अथ क्रतून् ब्रूमः । अधि-कारेपि– अथ स्नानविधिः । प्रतिज्ञायां– गौडोभवानथेति ब्रूमः । अन्वादेशेपि– अथो इमं वेदमध्यापय, अथो एनं छन्दोपि । समुच्चये द्वौ– अथो खल्वाहुः, भीमोथार्जुनः । निरर्थके– वृथा दुग्धोनड्वान् । अविधौ– प्रातिभाव्यं वृथा दानमाक्षिकं सौरिकं च यत् (मनुः) । अनेकार्थे– नानाविधा जनाः । उभ-यार्थे– नानापक्षावमर्शः संशयः । विनार्थेपि– नाना नारीर्निष्फला लोकयात्रा ॥ २४८ ॥ प्रश्ने– को नु धावति । विकल्पेपि– भीमो नु फाल्गुनो नु योद्धा । वितर्के– अहिर्नु रज्जुर्नु । पश्चादर्थे– तमनु धावति। सादृश्ये अनुकारः । लक्षणादौ च– वृक्षमनु द्योतते । तत्त्वाख्याने– साधुश्चैत्रो मातरमनु । भागे– यदत्र मामनु स्यात्तद् दीयताम् । वीप्सायां– वृक्षं वृक्षमनु सिञ्चति । दैर्घ्ये– अनुगङ्गं वाराणसी । प्रश्ने– नन्वधीष्यसे । अवधारणे– नन्वद्य गच्छामः । अनुज्ञायां– नन्वादिश । अनुनयामन्त्रणे– ननु चण्डि प्रसीद मे । वाक्यारम्भादौ च– नन्वपोहः प्रस्तू(सू)यते । आक्षेपे– ननु किमर्थमागतोसि । प्रत्युक्तौ– अकार्षीः कटं चैत्र, ननु करोमि भोः ॥ २४९ ॥ गर्हायां– अपि सिञ्चेत्पलाण्डुम् । समुच्चये– भीमोर्जु-नोपि । प्रश्ने– अपि यासि । इष्टप्रश्नेपि– अपि क्रियार्थं सुलभं समित्कुशम् (कु० सं०) । शङ्कायां– अपि प्रसीदेत् । संभावनायां– पर्वतमपि शिरसा भिन्द्यात् । अपेक्षादौ च– अपि गृह्णीयां चे[वे]दम् । पदार्थे– सर्पिषोपि स्यात्, मात्रा स्तोकं वा । उपमायां आशीविषो वा संक्रुद्धः सूर्यो वाभ्र-विनिर्गतः । भीमोन्तको वा समरे गदापाणिरदृश्यत ॥ विकल्पे– यवैर्व्रीहिभिर्वा यजेत् । द्वे द्वे समुच्चयेत एव– सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम (कु० सं०), न तृतीयेत्यर्थः, वायुर्वाग्र मरुद्वाग्र

गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि ।
उपमायां विकल्पे वा स्रामि त्वर्धे जुगुप्सिते ॥ २५० ॥
अमा सह समीपे च कं वारिणि च मूर्धनि च ।
इवेत्थमर्थयोरेवं नूनं तर्केऽर्थनिश्चये ॥ २५१ ॥
तूष्णीमर्थे सुखे जोषं किं पृच्छायां जुगुप्सने ।
नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने ॥ २५२ ॥
अलं भूषणपर्याप्तिशक्तिवारणवाचकम् ।
हुं वितर्के परिप्रश्ने समयान्तिकमध्ययोः ॥ २५३ ॥
पुनरप्रथमे भेदे निर्निश्चयनिषेधयोः ।
स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा ॥ २५४ ॥
ऊरर्यूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम् ।
स्वर्गे परे च लोके स्ववार्तासंभाव्ययोः किल ॥ २५५ ॥

दहनो वा । अर्धे– सामि संमीलिताक्षी । जुगुप्सिते– सामि कृतमकृतं स्यात् ॥ २५० ॥ सहार्थे– पुत्रेणामा भुङ्क्ते । समीपे– अमा भवोमात्यः । जले– कंजं पद्मम् । मूर्ध्नि– कंजाः केशाः। निन्दासुखयोश्च– कंदर्पः, कंयुः । इवार्थे– अग्निरेवं विप्रः । इत्थमर्थे– एवंवादिनि देवर्षौ (कु० सं०) । उपदेशादौ च– एवं पठ । निर्देशे– एवं तावत् । निश्चये– एवमेतत् । अङ्गीकारे– एवं कुर्मः । तर्के– नूनं शरत्फुल्ला हि काशाः । अर्थनिश्चये– नूनं हन्तास्मि रावणम् ॥ २५१ ॥ तूष्णीमर्थे– जोषमास्स्व । सुखे– जोषमास्ते जितेन्द्रियः । प्रश्ने– किं गतोसि । जुगुप्सने– किंराजा यो न रक्षति, किमःक्षेपे (सू०) इति समासान्ताभावः । प्राकाश्ये– हिमालयो नाम नगाधिराजः (कु० सं०) । संभाव्ये– कथं नाम समेष्यति । स्मृतिः संभावनैव– स नामायं बन्धुः । क्रोधे– ममापि नाम दशानस्य परैः परिभवः । उपगमः सासूयोऽङ्गीकारः– एवमस्तु नाम । कुत्सने– को नामायं सावितुरुदयः । अलीकविस्मययोश्च– दष्टेधरे रोदिति नाम तन्वी, अन्धो नाम पर्वतमारोहति ॥ २५२ ॥ भूषणे– अलंकारः । पर्याप्तौ– अलमस्त्यस्य धनं, बह्वित्यर्थः । शक्तौ– अलं मल्लो मल्लाय । वारणे– अलमतिप्रसङ्गेन । अलंखल्वोःप्रतिषेधयोः (सू०) इति निषेधेपि– आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् (शिशु०), न वक्तव्यमेतदित्यर्थः । वितर्के– चैत्रो हुं मैत्रो हुं । परिप्रश्ने– हुं स त्वं सुहृत् । भयादौ च– हुं राक्षसोयम् । भर्त्सने– हुं निर्लज्जः । आनिच्छायां हुं हुं मुञ्च । त्वां समयास्ते, त्वत्समीप इत्यर्थः । ग्रामं समयास्ते, ग्राममध्य इत्यर्थः ॥ २५३ ॥ अप्रथमे –पुनरुक्तम् । (भेदे) विशेषे– किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा (भगवद्गीता) । निश्चये– निष्पन्नः । निषेधे– निर्मर्यादः । प्रबन्धे– उपाध्यायेन स्म पुराधीयते, अविरतमपाठीत्यर्थः । चिरातीते –पुरापि न नवं पुराणम् । निकटागामिके भविष्यदासन्ने– गच्छ पुरा देवो वर्षति, यावत्पुरानिपातयोर्लट् (सू०), समनन्तरं वर्षिष्यतीत्यर्थः ॥ २५४ ॥ उररीकृत्य पटं, विस्तीर्येत्यर्थः । आज्ञामुररीकृत्य याति, अङ्गीकृत्येत्यर्थः । स्वर्गे– एहि जाये स्वरारोहाव (वाजसनेयीसंहिता) । परलोके– स्वर्गतस्य ह्यपुत्रस्य । वार्तायां– जघान कंसं किल वासुदेवः (भाष्य०) । संभाव्ये– अर्जुनः किल विजेष्यते कुरून् । हेत्वादौ च– स किल कावेरेवमुक्तवान् (बा० रा०) । अलीके– गोत्रस्खलितं किलाश्रुतं कृत्वा । अरुचौ– त्वं किल योत्स्यसे ॥ २५५ ॥ निषेधे– खलु कृत्वा, निषिद्धं करणमित्यर्थः । वाक्यालंकारे– अथो

निषेधवाक्यालंकारजिज्ञासानुनये खलु ।
समीपोभयतःशीघ्रसाकल्याभिमुखेऽभितः ॥ २५६ ॥
नामप्राकाश्ययोः प्रादुर्मिथोऽन्योन्यं रहस्यपि ।
तिरोऽन्तर्धौ तिर्यगर्थे हा विषादशुगर्त्तिषु ॥ २५७ ॥
अहहेत्यद्भुते खेदे हि हेताववधारणे ॥ २५८ ॥

इति नानार्थवर्गः । ३ ।

चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः ।
मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत्समाः ॥ १ ॥
स्राग्झगित्यञ्जसाह्नाय सपदि द्राङ् मङ्क्षु [च] द्रुते ।
बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे ॥ २ ॥

खल्वाहुः । जिज्ञासायां– स खल्वधीते वेदम् । अनुनये– न खलु न खलु मुग्धे साहसं कार्यमेतत् (नागानन्द०) । अभितो ग्रामं वसति, समीप उभयत्र वेत्यर्थः । शीघ्रे– गच्छाभितः । साकल्ये– व्याप्नोत्यभितो रजः, समन्तादित्यर्थः । आभिमुख्ये– आपतन्तमभितोऽरिमपश्यत् ॥ २५६ ॥ नाम्नि– विष्णोर्दश प्रादुर्भावाः, मत्स्यकूर्मादीनि दश नामानीत्यर्थः । प्राकाश्ये– प्रादुरासीत् । अन्योन्यार्थे– मिथः प्रहरतः । रहसि– मिथो मन्त्रयते । अन्तर्धौ– तिरोहितः । परिभूतेऽन्तर्ध्युपचारात्– तिरस्कृतोऽरिः । तिर्यगर्थे– तिरः काष्ठं कुरु । विषादे– हा रमणीनां[यो] गतः कालः । शोके– हा प्रिये जनकराजपुत्रि (उ० रा०) । अर्त्तौ– हा हतोऽस्मि । निन्दायां च– हा श्रोत्रियान् ॥ २५७ ॥ अद्भुते– अहह प्रज्ञाप्रकर्षो राज्ञः । खेदे– अहह हता विरहिणी बाला । दीर्घान्तोऽपि– भिक्षित्वापि बुभुक्षिता यदहहा । हेतौ– अग्निरत्र धूमो हि दृश्यते । अवधारणे– को हि हस्तगतं पादगतं कुर्यात् ॥ २५८ ॥ इत्यव्ययेष्वनेकार्थवर्गः । इति नानार्थवर्गः । ३ ।

चिराय निर्धनो भूत्वा भवत्यह्ना(ह्ना) महाधनः । चिररात्राय जायते [यजते] । चिरस्य भूतले धावति । आद्यशब्दाच्चिरेण चिराच्चिरमपि– चिरंजीवी, चिरंतनः । कान्तं[न्तां] मुहुर्ध्यायाति । पुनःपुनर्वारि पिबेद्भूरि । शश्वद्भक्ति कुशिक्षितः । अभीक्ष्णमास्फालयतीभकुम्भम् । असकृद्भक्ति ॥ १ ॥ स्राक्सरत्यभिसारिका । झगिति कुचतटादेर्नमो मन्मथाय (विद्धशाल०) । यज्वाञ्जसा जयति ब्रह्मलोकम् । अह्नाय सा नियमजं क्लममुत्ससर्ज (कु० सं०) । सपदि प्रदहत्युपेक्षितोऽग्निः । द्राग्विद्रुतं कातरैः । मङ्क्षूदपाति परितः पटलैरलीनाम् (शिशु०) । झटित्याशु तरसादि च– झटिति घटयति विधिरभिमतमभिमुखीभूतः (रत्नावली०), आश्वपेहि मम सीधुभाजनात् , तरसोदिता सह जलेषु । तूर्णं द्रुतं क्षिप्रं शीघ्रं लध्वित्ति क्रियाविशेषणम् । बलवत्पिपासितोऽस्मि । सुष्ठु खल्विदमुच्यते । किमुत ब्रह्मविन्निभिः । सुसिक्त आम्रः फलति, अतिसिक्तश्च । अतीव क्षुत्पिपासि(सार्दि)तः ॥ २ ॥ पृथग्देवदत्तादयं [त्वत्तः पृथङ् नास्ति बन्धुः] । विना ग्रामं वृष्टो देवः [विना वातं विना वर्षम्] । अन्तरेण पुरुषकारं न किंचित्सिध्यति । ऋते कृशानोर्न हि मन्त्रपूतम् (कु० सं०) । हिरुक् कर्मणां[णो] मोक्षः, कर्मक्षये[यो] मोक्ष इत्यर्थः । नाना नारीर्निष्फला लोकयात्रा । अन्तरान्यत्रापि– त्वामन्तरा तामरसायताक्षि, अ(आ)रोगिभावादन्यत्र । यत्समाप्तु प्रगल्भसे तत्पूज्योऽसि । यतो विद्वांस्ततो मान्यः । येन तेनादि च– वितर

पृथग्विनान्तरेणर्ते हिरुङ् नाना च वर्जने ।
यत्तद्यतस्ततो हैताववसाकल्ये तु चिच्चन ॥ ३ ॥
कदाचिज्जातु सार्धं तु साकं सत्रा समं सह ।
आनुकूल्यार्थकं प्राध्वं व्यर्थके तु वृथा मुधा ॥ ४ ॥
आहो उताहो किमुत विकल्पे किं किमूत च ।
तु हि च स्म ह वै पादपूरणे पूजने स्वति ॥ ५ ॥
दिवाह्नीत्यथ दोषा च नक्तं च रजनाविति ॥ ६ ॥
तिर्यगर्थे साचि तिरोऽप्यथ संबोधनार्थकाः ।
स्युः प्याट् पाडङ्ग हे है भोः समया निकषा हिरुक् ॥ ७ ॥
अतर्किते तु सहसा स्यात्पुरः पुरतोऽग्रतः ॥ ८ ॥
स्वाहा देवहविर्दाने श्रौषड् वौषड् वषट् स्वधा ।
किंचिदीषन्मनागल्पे प्रेत्यामुत्र भवान्तरे ॥ ९ ॥
वद्वा(वा) यथा तथैवैवं साम्येऽहो ही इति विस्मये ।
मौने तु तूष्णीं तूष्णीकां सद्यः सपदि तत्क्षणे ॥ १० ।

गिरमुदारां येन मूकाः पिकाः स्युः, नदीं तेन गतः, गमने नदी हेतुः । द्वितयो लक्ष्यते– येन दाता [वोढा] तेन श्लाघ्यः । (ऊने) किंचिद् ब्रूते । पद्भ्यां याति कुतश्चन । प्रायः किंवृत्तात्परौ, क्वचित्– कुत्रचित्– कथंचित् ॥ ३ ॥ अन्योन्यपर्यायावेतौ– कदाचिच्छूरतां याति मरणे कृतनिश्चयः, न जातु कामः कामानामुपभोगेन शाम्यति (मनुः) । सार्धं धनैर्महान् । पुत्रेण साकं याति । सत्रा कलत्रैर्गार्हस्थ्यम् । भ्रात्रा समं युध्यते । पुत्रैः सहास्ते । सङ्गो द्विजिह्वैः सजूरिति सजूर्गतिप्रतिरूपको निपातः । प्राध्वं कुरुध्वं बुधाः, प्राध्वंबन्धने (सू०) इति गतिसंज्ञा– प्राध्वंकृत्य । वृथा दुग्धोनड्वान् । मुग्धे मुधा ताम्यसि ॥ ४ ॥ विकल्पः पक्षान्तरं– स्थाणुराहो पुरुषः, उताहोस्विद् भवेद्राजा नलः परपुरंजयः, किमुत रज्जुः किमुत सर्पः [किं रज्जुः किं सर्पः], किमु खेदयेत्किमु मानयेत् , एकमेव वरं पुंसामुत राज्यमुताश्रमः । आख्यामि तु तत्त्वं ते । न हि न हि महिमानं प्राप्य तुष्यन्ति भूपाः । भीमः पार्थस्तथैव च । इति ह स्माहुराचार्याः । यो वै युवाप्यधीयानः । खल्वादयोऽपि– अहो न(नु) खलु भोः । पूजने– सुस्तुतं, अतिस्तुतम् ॥ ५ ॥ दिवातनं, इतिशब्देन सप्तम्यन्ते दिनार्थेयमिति द्योत्यते । अत्रेप्येवम् । दोषा-मन्यमहः । नक्तंचरः । तथा– उषापि– उषातनो वायुः ॥ ६ ॥ साचि लोचनयुगं नमयन्ती । तिरः काष्ठं कुरु । प्याट् पाठकाः । पाट् पान्थाः । अङ्गानङ्ग, इष्टाह्वाने चैतत् । हे चैत्र । है वातूल । भो भार्गव । हंहो, अरेरे, अयि– हंहो काम, रे चोर, अरे चेट, अयि प्रिये । एते समीपार्थेऽन्योन्यं पर्यायाः– समया ग्रामं, लङ्कां निकषा हनिष्यति (शिशु०) । सम्यान् हिरुक् ॥ ७ ॥ सहसा विदधीत न क्रियाम् (किरातार्जु०) । अग्रार्था एते– पुरःसरः । नासीरधूलिधवलाः पुरतः प्रयान्ति । अग्रतो धावति श्रीः ॥८॥ सोमाय स्वाहा । अस्तु श्रौषट् । व्रीहीं वौषट् । वषडिन्द्राय । पितृभ्यः स्वधा । किंचित्कुञ्चितमूर्धजाः । ईषत्स्मेरः । ब्रूते मनाक्समार्दवम् । अन्यो धनं प्रेत्य गतस्य भुङ्क्ते । अमुत्र भविता यत्ते तच्चिन्तय शुभाशुभम् ॥९॥ पचतीति[स्रवन्ती]वत् । पद्मिनीं[नी] वान्यरूपां[पा] (मेघ०) । यथा चैत्रस्तथा मैत्रः । शारदा-भ्रमिव पेलवमायुः । यथार्क एवं कर्णः । अहो आश्चर्यम् । हतविधिलसि(सि)तानां ही विचित्रो विपाकः (शिशु०) । मुनिस्तूष्णीमास्ते । अकच्प्रकरणेतूष्णीमःकाम्वक्तव्यः(वा०) इत्यज्ञाताद्यर्थे विशिष्टे मौने तूष्णीकां, मौनमात्रे तूष्णीम् । सद्यः पतति मांसेन । सपदि प्रदहत्युपेक्षितोऽग्निः ॥ १० ॥

दिष्ट्या समुपजोषं चेत्यानन्देऽथान्तरेऽन्तरा ।
अन्तरेण च मध्ये स्युः प्रसह्य तु हठार्थकम् ॥ ११ ॥
युक्ते द्वे सांप्रतं स्थानेऽभीक्ष्णं शश्वदनारते ।
अभावे नह्य नो नापि मास्म मालं च वारणे ॥ १२ ॥
पक्षान्तरे चेद्यदि च तत्त्वे त्वद्धाञ्जसा द्वयम् ।
प्रकाशे प्रादुराविः स्यादोमेवं परमं मते ॥ १३ ॥
समन्ततस्तु परितः सर्वतो विष्वगित्यपि ।
अकामानुमतौ काममसूयोपगमेऽस्तु च ॥ १४ ॥
ननु च स्याद्विरोधोक्तौ कच्चित्कामप्रवेदने ।
निष्षमं दुष्षमं गर्ह्ये यथास्वं तु यथायथम् ॥ १५ ॥
मृषा मिथ्या च वितथे यथार्थं तु यथातथम् ।
स्युरेवं तु पुनर्वैवेत्यवधारणवाचकाः ॥ १६ ॥
प्रागतीतार्थकं नूनमवश्यं निश्चये द्वयम् ।
संवद्वर्षेऽवरे त्वर्वागामेवं स्वयमात्मना ॥ १७ ॥

दिष्ट्या पुत्रो जातः । समुपजोषं वर्तते । आवयोरन्तरे जाताः पर्वताः सरितो द्रुमाः (महानाट०) । अन्तरा त्वां च मां च कमण्डलुः । यतो भवन्तमन्तरेणान्यथा भूपतिर्मोहितः, भवन्मध्येनेत्यर्थः । प्रसह्य वित्तानि हरन्ति चौराः ॥ ११ ॥ न सांप्रतं यतः स्त्री नेत्री । हन्त स्थाने प्रश्नः । अभीक्ष्णं वक्ति । शश्वद्याति, अविरतमित्यर्थः । नहि प्रेम प्रयोजनापेक्षम् । अविप्र इव भाषसे, विप्रवन्न ब्रूष इत्यर्थः । नो जानीमः । नैकः सुप्तेषु जागृयात् । मास्म करोः । मा कार्षीः । अलं बाले रोदनेन ॥ १२ ॥ सन्तश्चेदमृतेन किम् । यदि खलास्तत्कालकूटं मृषा । अरे अद्धा पुरुषः । अञ्जसा वक्ति साधुः । प्रादुरासीत् । आविर्भूतः । मतमभ्युपगमः– ओं कुरु, एवं कुरु, परमं तत्रावसम् । एवं बाढमित्यादि च ॥ १३ ॥ एते सर्वतोदिकार्थे– समन्ततो धावति, परितः प्रपतन्ति दुष्कृतां(तो) विपदः, सर्वतः संपदः सताम्, विष्वगञ्चति विष्वद्र्यङ् । इतिशब्दात्समन्तादित्यादि– समन्ताद्भवः सामन्तः । आदावनिच्छायां पश्चादङ्गीकारे– कामं करोमि । अस्तुशब्दोऽसूयापूर्वेऽङ्गीकारे– अस्तुकारः, एवमस्तु को दोषः । चशब्दाद्भवतु नाम ॥ १४ ॥ ननुच कः शब्दः । कामप्रवेदनमिष्टपरिप्रश्नः– कच्चिज्जीवति मे माता । निष्क्रान्ताः समा दुष्टाः समा वत्सरा अत्रेति, तिष्ठद्गुप्रभृतीनि च (सू०) इत्यव्ययीभावादव्ययत्वम्, गर्ह्यमात्रे तूपचारात्, समेन समासो वा– निःषमं वक्ति मूर्खः, कालानुचितमित्यर्थः । एवं दुःषमं वर्तते । सर्वेषां तु यथायथम्, यथास्वी[त्मी]यमित्यर्थः, यथास्वेयथायथमिति (सू०) साधुः ॥ १५ ॥ मृषोद्यम् (उ० रा०) । मिथ्यावादी । तथेति सत्यमनतिक्रम्य– यथातथं वक्ति सभासु विद्वान् । एवमेतत् । आत्मा सर्वं तु पश्यति । विप्रः पुनः पूज्यः । गुरुर्वा वक्ति भीष्मो वा । त्वमेव देव सर्वं जानासि ॥ १६ ॥ प्राक् कृतम् । नूनं हन्तास्मि रावणम् । अवश्यं यातारश्चिरतरमुषित्वापि विषयाः (भर्तृहरि०) । संवत्सरः, संवत्तृतीये । अवरः पारादन्यः– वर्षात्षोडशादर्वाक्, अर्वाक्कालीनः । अङ्गीकारार्थे– आं कुर्मः, एवं कुर्मः । स्वयंभूः, आत्मनेति तृतीयान्तार्थे ॥ १७ ॥ नीचैर्मरुद्वाति । उच्चैरुच्चरितुं चिरम् । सन्तः प्रायो विवेक्तारः, भूम्नि बाहुल्यार्थे । अशीघ्रार्थे– शनैर्याति पिपीलिका । क्रमेपि (शनैः) अद्रुतार्थान्वयात्–

अल्पे नीचैर्महत्युच्चैः प्रायो भूम्न्यद्रुते शनैः ।
सना नित्ये बहिर्बाह्ये स्मातीतेऽस्तमदर्शने ॥ १८ ॥
अस्ति सत्त्वे रुषोक्तावुं(वु) ऊं प्रश्नेऽनुनये त्वयि ।
तर्के स्यात् (हुं तर्के) स्यादुषा रात्रेरवसाने नमो नतौ ॥ १९ ॥
पुनरर्थेऽङ्ग निन्दायां दुष्ठु सुष्ठु प्रशंसने ।
सायं साये प्रगे प्रातः प्रभाते निकषान्तिके ॥ २० ॥
परुत्परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति ।
अद्यात्राह्न्यथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ॥ २१ ॥
तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः ।
उभयद्युश्चोभयेद्युः परे त्वह्नि परेद्यवि ॥ २२ ॥
ह्यो गतेऽनागतेऽह्नि श्वः परश्वस्तु परेऽहनि ।
तदा तदानीं युगपदेकदा सर्वदा सदा ॥ २३ ॥
एतर्हि संप्रतीदानीमधुना सांप्रतं तथा ।
दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ॥ २४ ॥

इत्यव्ययवर्गः । ४ ।

शनैः शनैर्व्युपरमेत् । सनातनः । सनत्सनाच्च– सनत्कुमारः, सनात्कुमारश्च । बहिर्भूतः । वक्ति स्म व्यासः, अवोचदित्यर्थः । अस्तं गतः ॥ १८ ॥ अस्तिक्षीरा स्त्री, अस्ति परलोके मतिरस्यास्तिकः । कोपनोक्तौ– उं सैवास्मि तव प्रिया । रुषेत्येव– ऊं न जानासि स्वार्थम् । अप्ययि साहसकारिणि । स्याद्वादिनो जैनाः । उषातनो वायुः । नमो देवेभ्यः ॥ १९ ॥ अमानुगुण्ये स्मरणे हुं फड् विघ्ननिराकृतौ । अङ्गीकृतौ स्यादर्थे हूं हीनसंबोधने त्वरे ॥ मूर्खोऽपि नावमन्तव्यः किमङ्ग विद्वान् । दुष्ठुवादी खलः । सुष्ठूक्तम् । सीयते क्षीयते सायो निशामुखं, घञ्– सायंतनो वायुः, सायमासीनः संध्यां वन्देत । प्रगेतनो वायुः । प्रातः संध्यामुपासीत । मित्रं निकषास्ते ॥ २० ॥ पूर्वे वर्षे परुत् । पूर्वतरे वर्षे परारि । यति गच्छति वर्तमाने वर्षे– ऐषमः, सद्यःपरुत्परार्यैषमइति (सू०) साधवः । एवमग्रिमाः । अस्मिन्नहन्यद्य, वर्तमानतामात्रेऽप्याहुः– नरो लोकेऽद्य दुर्लभः(बलः), तदद्यत्वेन तथा । पूर्वेऽह्नि पूर्वेद्युः । आदिशब्दादुत्तरेद्युः, अधरेद्युः, अपरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः । द्युर्दिनमिति **श्रीभोजः**, यथा– द्युश्चन्द्रो द्योतते कथम् ॥ २१ ॥ उभयोरह्नोः– उभयेद्युः, उभयद्युः, द्युश्चोभयाद्वक्तव्यः (वा०) । **स्मार्ते** पाक्षिणयिं रात्रिरुदिता । तं हन्तास्मि परेद्यवि ॥ २२ ॥ अतीतेऽह्नि ह्यः– ह्योऽकरोत् । आनागतेऽह्नि श्वः– श्वो गन्ता । श्वोदिनात्परमहः परश्वः, पारस्करादित्वात् (सू०) परःसहस्रादिवत्सुट् । तस्मिन्काले तदा, तदोदाचेति (सू०) तदा, तदानीं च । एतौ तुल्यकालार्थौ । युगपत्प्राप्ताः । एकस्मिन्काले- एकदा मिलन्ति । एकपदे च– अयमेकपदे तया वियोगः (विक्रमोर्वशी०) । सर्वस्मिन्कालेऽर्थे, सर्वैकान्यकिंयत्तदः काले दा (सू०), सर्वस्यसोऽन्यतरस्यांदि (सू०) ॥ २३ ॥ अस्मिन्कालेऽर्थे, इदमोर्हिल् (सू०), एतेतौरथोः (सू०) इत्येतादेशः, (एतर्हि)– भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेववर्त्मनि (रघु०), अधुना, इदानीं च । संप्रत्येव सांप्रतं, स्वार्थेऽण् । प्राच्यां दिशि प्राचि देशे काले वा– प्राग्वसति । प्राच्या दिशः प्राचो देशात्कालाद्वा– प्रागागतः । प्राची दिक् प्राङ् देशः कालो वा– प्राग्रम्यम् । दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्योदिग्देशकालेष्वस्तातिः (सू०), अञ्चेर्लुक् (सू०) । आदिशब्दादुदगवागादि । एवं पूर्वादिभ्यः पुरस्तादधस्तादादि ॥ २४ ॥ इत्यव्ययवर्गः । ४ ।

सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः ।
अनुक्तैः संग्रहे लिङ्गं संकीर्णवदिहोन्नयेत् ॥ १ ॥
लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।
स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च ॥ २ ॥
नाम विद्युन्निशावल्लीवीणादिग्भूनदीह्रियाम् ।
अदन्तैर्द्विगुरेकार्थो न स पात्रयुगादिभिः ॥ ३ ॥

इह लिङ्गसंग्रहवर्गे वक्ष्यमाणलिङ्गानुशासनसहितैः सुब्धातुवृत्त्यादिजातैः (शब्दैः) प्रागनुक्तैर्लिङ्गमुन्नयेदूहेत । लक्षणेन तत्त्वतो ज्ञानार्थं सन्नाद्युपादानम् । लिङ्गशास्त्रेण यथा– स्त्रियामीदूद्विरामैकाच् । सुब्धातुवृत्तिजैर्यथा– अप्रयात् (सू०), ण्यासश्रन्थोयुच् (सू०) । कृद्वृत्तिजैर्यथा– स्त्रियांक्तिन् (सू०), पुंसिसंज्ञायांघःप्रायेण (सू०), नपुंसकेभावेक्तः (सू०) । गोबलीवर्दन्यायेनात्र सुब्धातुवृत्तिवर्जं कृद्वृत्तिरुदाहार्या । तद्धितवृत्तिजैर्यथा– तत्क्रीडायां प्रहरणं चेन्मौष्टादि । समासवृत्तिजैर्यथा– अदन्तैर्द्विगुरेकार्थ इत्यादि । कथमुन्नयेदित्याह– प्रागुक्तसंकीर्णवर्गवत्, वचनमात्रेणेत्यर्थः । उक्तं च प्राक्– प्रकृतिप्रत्ययार्थाद्यैः संकीर्णे लिङ्गमुन्नयेत् (पृ० १८३) । प्रकृत्या यथा– अर्धर्चाःपुंसिच (सू०) । प्रत्ययेन यथा– स्त्रियांक्तिन् (सू०) । अर्थद्वारेण च यथा– मातृस्वस्रादीनाम् । आद्यशब्दात्क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च वक्तव्येति । तथा– अर्थस्य नित्यसमासवचनं सर्वलिङ्गता चेत्यादि ॥ १ ॥ अयं लिङ्गानां प्रागुक्तानां शेषविधिसंज्ञो वर्ग उत्सर्गत्वाद् व्यापको भवत्यपवादैर्यद्यबाधितः स्यात् । यथा– असन्नन्ता अबाधिताः पुंसि, तथा त्रान्तं सलोपधं शिष्टमिति, यथा– चन्द्रमाः, पुरूरवाः, सविमा प्रसवः, भरिमा कल्पः । अत्रापवादः– द्व्यच्कमसिसुसन्नतं तृतीये– इदं यशः, तेजः, नाम, धाम । ईदन्तमूदन्तं चैकस्वरं स्त्रीलिङ्गं भवति– इयं स्त्री, श्रीः, धीः, ह्रीः, भ्रूः, भूः, सूः, द्रूः, जूः । पुंलिङ्गात्प्राक् स्त्रियामित्यधिकारोयम् । स्त्रीध्वजयुक्तानां प्राणिनां संज्ञा च स्त्रियाम्, यथा– इयं माता, स्वसा, प्रसूः, योषित्, इयं गौः सुरभिः, इयं कपिर्वानरी, इयमहिर्भुजंगी, इयं करेणुर्हस्तिनी । दारादौ तु स्त्रीत्वं पुंभूम्नि दाराः (पृ० ९२) इत्याद्यपवादाद्बाध्यते । एवं सर्वत्रोन्नेयम् ॥ २ ॥ एषां नामपर्यायाः स्त्रियाम्– इयं विद्युत्तडिदशनिः, इयं निशा रात्रिः, इयं वल्ली वीरुत्, इयं वीणा परिवादिनी, इयं दिक् ककुप्, इयं भूः कुः, इयं नदी सरित्, इयं ह्रीर्लज्जा । अकारान्तैः शब्दैः सहैकार्थः समाहारो यो द्विगुः स स्त्रियां, यदिष्टिः– अकारान्तोत्तरपदोद्विगुःस्त्रियांभाष्यते, (यथा) त्रयाणां लोकानां समाहारस्त्रिलोकी, पञ्चमूलीशृतं पयः । स द्विगुः पात्राद्युत्तरपदैरदन्तैर्न स्त्रियां, पात्रादिभ्यः प्रतिषेध इति (पात्राद्यन्तस्यन), अतः स नपुंसकमिति क्लीबे– पञ्चपात्रं, चतुर्युगं, त्रिभुवनं, त्रिपुरं, **भाष्ये** तु त्रिपुरी ॥३॥ तल्प्रत्ययान्ताः स्त्रियां, तस्यभावस्त्वतलौ (सू०)– गोर्भावो गोता, अश्वता । ग्रामजनबन्धुसहायेभ्यस्तल् (सू०)– ग्रामाणां समूहो ग्रामता, जनता । देवात्तल् (सू०)– देव एव देवता । समूहे यादिप्रत्ययान्ताः स्त्रियां, पाशादेर्यत् (यः) (पाशादिभ्योयः)– पाशानां समूहः पाश्या । खलगोरथात् (सू०) यत् (यः), इनित्रकट्यचश्च (सू०) चकाराद्यत् (यः)– खलिनी, गोत्रा, रथकट्या । वैराद्यर्थे वुन्नन्तः स्त्रियां (द्वन्द्वाद्वुन्वैरमैथुनिकयोः)– अश्वमहिषयोर्वैरमश्वमहिषिका, काकोलूकिका । अत्रिभरद्वाजयोर्मैथुनप्रयोजने विवाहे वैरमत्रिभरद्वाजिका, वसिष्ठकुशिका । आदिशब्दात् पादशतस्यसंख्यादेर्वीप्सायां वुन्लोपश्च (सू०), दण्डव्यवसर्गयोश्च (सू०)– द्वौ द्वौ पादौ द्विपदिकां ददाति, द्वे द्वे शते दण्डितो

तल्वृन्दे येनिकट्यत्रा वैरमैथुनिकादिवुन् ।
स्त्रीभावादावनिक्तिण्ण्वुल्णच्ण्वुच्क्यब्युजिञङ(इनि)शाः ॥४॥
उणादिषु निरुरीश्च ङ्याबूङन्तं चलं स्थिरम् ।
तत्क्रीडायां प्रहरणं चेन्मौष्टा पाल्लवा णदिक् ॥ ५ ॥
घञो ञः सा क्रियास्यां चेद् दाण्डपाता हि फाल्गुनी ।
श्यैनंपाता च मृगया तैलंपाता स्वधेति दिक् ॥ ६ ॥
स्त्री स्यात्काचिन्मृणाल्यादिर्विवक्षापचये यदि ।
लङ्का शेफालिका टीका धातकी पञ्जिकाढकी ॥ ७ ॥
सिध्रका शा(सा)रिका हिक्का प्राचिकोल्का पिपीलिका ।
तिन्दुकी कणिका भङ्गिः सुरङ्गासूचिमाढयः ॥ ८ ॥

द्विशतिकां ददाति । उपलक्षणत्वाद् वुञन्तोपि, द्वन्द्वमनोज्ञादिभ्यश्च (सू०) इति वुञ्- शैष्योपाध्यायिका । गोत्रचरणाच्छ्लाघादौवुञ् (सू०)- गार्ग्यस्य भावः कर्म चेति गार्गिकया श्लाघते, काठिकया श्लाघते । स्त्रियामित्यधिकृत्य भावे वा कर्तरि च कारके- अन्यादिप्रत्ययान्ताः स्त्रियाम्, आक्रोशेनञ्यनिः (सू०)- अजननिस्ते वृषल भूयात्, अकरणिः । स्त्रियांक्तिन् (सू०)- कृतिः, भक्तिः । रोगाख्यायांण्वुल्बहुलम् (सू०)- प्रवाहिका, विचर्चिका । धात्वर्थनिर्देशेण्वुल्वक्तव्यः (वा०)- कारिका, जीविका । कर्मव्यतिहारेणच्स्त्रियाम् (सू०)- अन्योन्यं व्यावक्रोशनं व्यावक्रोशी वर्तते, व्यावभाषी[हासी], णचःस्त्रियामञ् (सू०) स्वार्थे । पर्यायार्हणोत्पत्तिषुण्वुच् (सू०)- भवतः शायिका, इक्षुभक्षिकोत्पन्ना । व्रजयजोर्भावेक्यप् (सू०)- व्रज्या, इज्या । संज्ञायांसमजेति (सू०) क्यप्- समज्या, निषद्या । हनस्तच (सू०) इति क्यप्- ब्रह्महत्या । ण्यासश्रन्थोयुच् (सू०)- मण्डना, आसना । प्रश्नाख्यानयोरिञ्च (चान्द्रसू०)- कां कारिमकार्षीः, इमां कारिमकार्षम् । षिद्भिदादिभ्योङ् (सू०)- घटा, मृजा, भिदा । अप्रत्ययात् (सू०)- चिकीर्षा, पुत्रीया । कृञःशच (सू०)- क्रिया, इच्छा ॥ ४ ॥ उणादौ न्यन्त ऊदन्त ईदन्तश्च स्त्रियां- अरणिः, धमनिः, हानिः, ज्यानिः, ग्लानिः, अलाबूः, जम्बूः, लक्ष्मीः, तन्त्रीः । ङ्यन्तमाबन्तमूङन्तं चाभिधेयलिङ्गं रूढलिङ्गं च स्त्रियां- पुंस इयं पौंस्नी बुद्धिः, हिमानी, अजा, बलाका, श्वश्रूः, ब्रह्मबन्धूः । मुष्टिः प्रहरणं यस्यां क्रिडायां मौष्टा, पल्लवाः प्रहरणमस्यां पाल्लवा, तदस्यां प्रहरणमितिक्रीडायांणः (सू०), णदिक्- णप्रत्ययोदाहरणमित्यर्थः ॥५॥ दण्डपातोस्यां फाल्गुन्यां वर्तते, श्येनपातोस्यां मृगयायां वर्तते, तिलपातोस्यां स्वधायां वर्तते, घञःसास्यांक्रियेति (सू०) ञः, श्येनतिलयोः पातेञे (सू०) इति मुक्, स्वधास्त्यस्यां स्वधा श्राद्धम् ॥ ६ ॥ अपचयेल्पत्वे यदि वक्तुमिच्छा तदा मृणाल्यादयः स्त्रीलिङ्गाः स्युः । अपचयेपचयस्यानलक्षणानि हि स्त्रीपुंनपुंसकानि । आदिशब्दाद्ब्रह्मणाली, तटी, मठी, छत्त्रिका, गृह्यकाण्डी । काचिदिति यत्र लोके पुंनपुंसकयोः स्त्रीत्वं दृश्यते, न सुखादौ । लङ्का राक्षसपुरी । शेफालिका पुष्पविशेषः । टीका वृत्तिः । धातकी नामौषधिः । पञ्जिका न्यासः । आढकी व्रीहिभेदः, स्वल्पाढकं च ॥ ७ ॥ सिध्रकाशारिके वृक्षभेदौ । हिक्का- ऊर्ध्वं वातप्रवृत्तौ शब्दः । प्राचिका पक्षिविशेषः । उल्का ज्वाला । पिपीलिका वल्मीककृमिः । योत्राप्रसिद्धः प्रागनुक्तो वा स प्रातिपद्येनोच्यते, अतः शनैर्याति पिपीलिक इति पुंस्त्वमनिषिद्धम् । एवं सर्वत्र । तिन्दुकी नाम वृक्षः फलं च । कणिका- अल्पकणः- गोधूमपिष्टं च । भङ्गिर्विच्छित्तिः । सुरङ्गा तिर्यग्भूखातः । सूचिः सीवनी । माढिर्नाम देशः कवचं च ॥८॥ पिच्छा- आचामः । वितण्डा स्वपक्षस्थापनः(नो) हीनो जल्पः ।

पिच्छावितण्डाकाकिण्यश्चूर्णिः शाणी द्रुणी दरद् ।
सातिः कन्था तथासन्दी नाभी राजसभापि च ॥ ९ ॥
झल्लरी चर्चरी पारी होरा लट्वा च सिध्मला ।
लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी ॥ १० ॥
पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।
स्वर्गयागाद्रिमेघाब्धिद्रुकालासिशरारयः ॥ ११ ॥
करगण्डौष्ठदोर्दन्तकण्ठकेशनखस्तनाः ।
अह्नाहान्ताः क्ष्वेडभेदा रात्रान्ताः प्रागसंख्यकाः ॥ १२ ॥

काकिणी नाम माषकचतुर्थभागः, पणचतुर्थभाग इत्येके । काकिनीति सभ्याः । चूर्णिर्भाष्यम् । शाणी निकषः, शाण इत्येके, काणीपाठे संकोचोर्थः । द्रुणी कर्णजलौका । दरद् म्लेच्छजातिः । सातिः प्रावार-विशेषः । कन्था खण्डैः स्यूतं वासः । आसन्दी पीठिका । नाभी तुन्दिः । राज्ञः सभा राजसभा, सभा राजामनुष्यपूर्वेति (सू०) राजनिषेधात्स्त्रीत्वम् ॥ ९ ॥ झल्लरी वाद्यविशेषः । चर्चरी हर्षक्रीडा । पारी पानभाण्डम् । होरा लग्नं जातकं च । लट्वा—अलका भ्रमरकाश्च । सिध्मला पामा मलः श्वित्रं च । लाक्षा जतुः । लिक्षा यूकागर्भः । गण्डूषा— आस्यचुलुकं, गण्डूषोपि । गृध्रसी— ऊरुसंधौ वातरुक् । चमसी मसूरादिपिष्टं स्वल्पचमसश्च । मसी रञ्जनी । इति स्त्रीलिङ्गशेषः ॥ १० ॥ सुरा असुरास्तद्विशेषा-स्तदनुचराश्च पर्यायैः सह पुंसि । सुरा दिवौकसः, सुरविशेषाः—इन्द्रो बिडौजाः शक्रः, आदित्यः सूर्यो रविः, ब्रह्मा स्वयंभूः, विष्णुः शौरिः, रुद्रः शंभुः । विष्णोरनुचराः— चण्डः प्रचण्डः, जयो विजयः, विष्वक्सेनः । रुद्रानुचराः— नन्दी महाकालो भृङ्गी, गणाः प्रथमाः । एवं सर्वत्र । असुराः पूर्वदेवा दैत्या दानवाः, तद्विशेषाः— विरोचनो बलिर्नमुचिः प्रह्लादः । प्राङ् नपुंसकाधिकारात्पुंलिङ्गाधिकारः । एते सभेदाः सपर्यायाः पुंसि । स्वर्गो नाकस्त्रिदिवः । यागः क्रतुः सततन्तुः, तद्विशेषाः— अग्निष्टोम उक्थ्यो-तिरात्रः— अप्तोर्यामः । अद्रिः पर्वतः शैलः, तद्विशेषाः— मेरुर्हेमसानुर्हिमवान् सह्यो विन्ध्यः पारियात्रः । मेघस्तडित्वान् घनः, तद्विशेषः पुष्करावर्तकः । अब्धिः समुद्र उदन्वान्, तद्विशेषः क्षीरोदः । द्रुस्तरुः पादपः, तद्विशेषाः— आम्रस्तालश्चम्पकः । कालः समयः, तद्विशेषाः— क्षणो लवः, मुहूर्तः, मासश्चैत्रः, संवत्सरः । असिः करवालः, तद्विशेषाः— नन्दकश्चन्द्रहासः । शरः सायकः पृषत्कः क्षुरप्रः । अरिर्द्विड-मित्रः ॥ ११ ॥ करः पाणिर्हस्तः । गण्डः कपोलः । ओष्ठो दन्तच्छदोधरः । दोर्बाहुः । दन्तो रदनः । कण्ठो गलः । केशो बालश्चिकुरः । नखः कररुहः । स्तनः पयोधरः । कृतसमासान्ताहःशब्दोत्तरपदाः पुंसि, रात्राह्नाहाःपुंसि (सू०) इति— पूर्वाह्णः, मध्याह्नः, सायाह्नः । द्व्यहः, त्र्यहः, उत्तमाहः, परमाहः, राजाहःसखिभ्यष्टच् (सू०), अह्नोह्न एतेभ्यः (सू०) इत्यह्नादेशः । विषविशेषाः पुंसि— क्ष्वेडो गरलः कालकूटो हलाहलः । पुंसि क्लीबे च प्रागुक्तत्वात्पुंसि प्रचुरप्रयोगार्थं विधिः । एवं सर्वत्र । विषं तु क्लीबे । असंख्यापूर्वाः कृतसमासान्ता रात्रान्ताः पुंसि— अहोरात्रः, दीर्घरात्रः, वर्षारात्रः, अहःसर्वैकदेशसंख्यात-पुण्याच्चरात्रेः (सू०) इत्यच्, नेह— त्रिरात्रं, षड्रात्रम् ॥ १२ ॥ श्रीवेष्टः सर्जरसः कर्चूरः । निर्यासो वृक्षद्रवः । असन्ता अन्नन्ताश्चाबाधिता अनपोदि[हि]ताः पुंसि— पुरोधाः, उशना, मज्जा, प्लीहा । अबाधिता इति किं— इदं यादो जलचरः, इदं लोम, इदं साम । व्यक्तमसिसुसन्नन्तभिन्नपवादो वक्ष्यते । कशेर्वादीनि वर्जयित्वा त्वन्ता रुशब्दान्ताश्च पुंसि— अयं वास्तुर्गृहाधारः, मस्तुः, सक्तुः, धातुः, किंशारुर्धा-न्यशूकः, त्सरुः खड्गादिमुष्टिः, मरुर्धन्वा, ऊरुः सक्थि । नेह— इदं कशेरु जलजः कन्दः, जतु लाक्षा,

श्रीवेष्टाद्याश्च निर्यासा असन्नन्ता अबाधिताः ।
कशेरुजतुवस्तूनि हित्वा तुरुविरामकाः ॥ १३ ॥
कषणभमरोपान्ता यद्यदन्ता अमी अथ ।
पथनयसटोपान्ता गोत्राख्याश्चरणाह्वयाः ॥ १४ ॥
नाम्न्यकर्तरि भावे च घञजब्नङ्णघाथुचः ।
ल्युः कर्तरीमनिज्भावे को घोः किः प्रादितोन्यतः ॥ १५ ॥
द्वन्द्वेश्ववडवावश्ववडवानसमाहृते ।
कान्तः सूर्येन्दुपर्यायपूर्वोयःपूर्वकोपि च ॥ १६ ॥
वटकश्चानुवाकश्च रल्लकश्च कुडङ्गकः ।
पुङ्खो न्युङ्खः समुद्गश्च विटपट्टघटाः खटः ॥ १७ ॥
कोट्टारघट्टहट्टाश्च पिण्डगौड(गोण्ड)पिचण्डवत् ।
गडुः करण्डो लगुडो वरण्डश्च किणो घुणः ॥ १८ ॥

वस्तु पदार्थः ॥१३॥ ककरादिद्वादशाक्षरोपधा अकारान्ताः पुंसि । क– शल्कः, वृकः, श्वेतकः, वराटकः । ष - वृक्षः, कक्षः, निकषः । ण– गणः, शणः, बाणः, कणः । भ– कुम्भः, शलभः । म– आचामः, धूमः, ग्रामः । र– अङ्कुरः, करः, दरः, समीरः । प– सर्पः, सूपः, कलापः, बाष्पः । थ– सार्थः, शपथः, नाथः । न– फेनः, हायनः, स्तनः, जनः । य– तनयः, व्ययः, तन्तुवायः । स– रसः, ह्रासः, कुत्सः, वत्सः । ट– सरटः, पटः, कटः । अपत्यप्रत्ययान्ताः शाखाध्यायिनश्च पुंसि– गार्ग्यः, वासिष्ठः, दाक्षिः, कठः, बह्वृचः, छन्दोगः ॥ १४ ॥ अकर्तरि च कारके संज्ञायां भावे चार्थे घञन्तादयः पुंसि । घञ्– प्र(प्रा)सीदन्त्यस्मिन्नयनमनांसीति प्र(प्रा)सादः, प्रक्रियते प्रकारः, पाकः, त्यागः, अकर्तरिचकारकेसंज्ञायां (सू०) घञ् । अच्– पचः चयः, नयः, पचाद्यच् (नन्दिग्रहीति), एरच् (सू०)। अप्– करः, भरः, स्तवः, लवः, प्लवः, ऋदोरप् (सू०)। नङ्– यज्ञः, यत्नः, प्रश्नः, यजयाचयतविच्छाति (सू०) नङ् । उपलक्षणत्वात्– स्वप्नः, स्वपोनन् (सू०)। णः– न्यदनं न्यादः, नौणचेति (सू०) णः । घः– प्रहरः, निगमः, गोचरः, पुंसिसंज्ञायांघःप्रायेण (सू०)। अथुच्– आनन्दथुः, श्वयथुः, वेपथुः, ट्वितोथुच् (सू०)। कर्तरि ल्युः पुंसि– नन्दयति नन्दनः, रमयति रमणः, नन्दिग्रहिपचेति (सू०) ल्युः । इमनिजन्ताः पुंसि– पृथोर्भावः प्रथिमा, लघिमा, पृथ्वादिभ्यइमनिज्वा (सू०)। भाव इति किं– तरिमा पृथ्वी, च[व]रिमा तपस्वी, औणादिक इमनिच् । भावे कप्रत्ययान्तः पुंसि– आखूनामुत्थानमाखूत्थो वर्तते, सुपिस्थः (सू०) इति योगविभागात्कः । घञर्थेकविधानं (वा०)– प्रस्थः, प्रघ्नः । प्रादित उपसर्गादन्यतः सुबन्ताच्च परात् घुसंज्ञकात्परो यः किप्रत्ययस्तदन्तः पुंसि– निधिः, प्रधिः, आधिः, आदिः, उपसर्गेघोःकिः (सू०), अब्धिः, इषुधिः, कर्मण्यधिकरणच (सू०) इति किः ॥ १५ ॥ समाहारादन्यत्र द्वन्द्वेश्ववडवौ– अश्ववडवाः पुंसि, द्वित्वबहुत्वयोरुदाहरणम् । नेह– अश्ववडवं, विभाषावृक्षमृगेति (सू०) समाहारविकल्पः । सूर्यादिपूर्वः कान्तशब्दः पुंसि– सूर्यकान्तः, भास्वत्कान्तः, इन्दुकान्तः, चन्द्रकान्तः, अयस्कान्तः ॥ १६ ॥ वटको भक्ष्यविशेषः । अनुवाक ऋग्यजुःसमूहः । रल्लकः पक्ष्मकम्बलः । कुडङ्गको वृक्षलतागहनम् । पुङ्खः काण्डमूलम् । न्युङ्ख ओंकाराः षोडश । समुद्गः करण्डकः । विटः कामुकानुचरः । पट्ट उष्णीषादिः । घटो दारुतुला । खटस्तृणम् ॥ १७ ॥ कोट्टो दुर्गः । अरघट्टो महाकूपः । हट्ट आपणः । पिण्डो ग्रासः । गौडो गुडको देशविशेषो वा । पिचण्ड उदरम् ।

दृतिसीमन्तहरितो रोमन्थोद्गीथबुद्बुदाः ।
कासमर्दोर्बुदः कुन्दः फेनस्तूपौ सयू(पू)पकौ ॥ १९ ॥
आतपः क्षत्रिये नाभिः कणपक्षुरकेदराः ।
पूरक्षुरप्रचुक्राश्च गोलहिङ्गुलुपुद्गलाः ॥ २० ॥
वेतालमल्लभल्लाश्च पुरोडाशोपि पट्टिशः ।
कुल्माषो रभसश्चैव सकटाहः पतद्ग्रहः ॥ २१ ॥
द्विहीनेन्यश्च(च्च) खारण्यपर्णश्वभ्रहिमोदकम् ।
शीतोष्णमांसरुधिरमुखाक्षिद्रविणं बलम् ॥ २२ ॥
फलहेमशुल्वलोहं सुखदुःखशुभाशुभम् ।
जलपुष्पाणि लवणव्यञ्जनान्यनुलेपनम् ॥ २३ ॥

गड्डुर्गण्डः (कपोलः) । करण्डः समुद्रः । लगुडो यष्टिः । वरण्डः समूहः । किणो मांसग्रन्थिः । घुणो दारुक्रिमिः ॥ १८ ॥ दृतिर्भस्त्रा । सीमन्तः केशसीमान्तः, शकन्ध्वादित्वात्पररूपम् (वा०) । हरिन्नीलो वर्णः, दिक्पर्यायस्तु स्त्रीलिङ्गः प्रागवचनात् । रोमन्थस्तिरश्चां चर्वितचर्वणम् । उद्गीथ ओंकारः । बुद्बुदोम्बुस्फोटः । कासमर्दो वेसवारभेदः । अर्बुदोद्रिर्व्याधिः संख्याभेदश्च । कुन्दो माघ्यं पुष्पम् । फेनो डिण्डीरः । स्तूपो मृदादिकूटः । यूपो यज्ञे पशुबन्धनकाष्ठम् ॥ १९ ॥ आतपोर्कोद्द्योतः । क्षत्रियपर्याया नाभिः, नेह- इयं नाभिस्तुन्दिः । कणः प्रात विशेषः । क्षुरो नापितभाण्डम् । केदरो रूतकम् । पूरस्तोयोत्प्लवः । क्षुरप्रः काण्डभेदः । चुक्रोम्ललव्यञ्जनम् । गोलो वर्तुलः पिण्डः, यथा भूगोलः । हिङ्गुलुः- रागद्रव्यम्, अकारान्तोयमित्येके । पुद्गलो जीवः ॥ २० ॥ वेतालो भूताविष्टः शवः । भल्लः काण्डभेदः । पुरोडाशो यज्ञे पिष्टपूपः । पट्टिशो नामायुधम् । कुल्माषोर्धस्विन्ना माषादिः । रभसः पौर्वापर्यविचारः । कटाहो द्रव्यपचनभाण्डम् । पतद्ग्रहः- अवरुकवारः ॥ २१ ॥ इति पुंलिङ्गशेषः । द्विहीने तृतीये नपुंसके, उक्तादन्यः शेषो वक्ष्यत इत्यर्थः । खादि सपर्यायविशेषं तृतीये । खमिन्द्रियमाकाशं चोच्यते- खमिन्द्रियं हृषीकं करणं, खं गगनमन्तरिक्षम् । अरण्यं विपिनं कान्तारम् । पर्णं पलाशं दलम् । श्वभ्रं विवरं सुषिरम् । हिमं प्रालेयं तुहिनम् । उदकं पानीयं तोयम् । शीतं शिशिरम् । उष्णं घर्मम् । मांसं तरसं पलम् । रुधिरं रक्तमसृक् । मुखं तुण्डमास्यम् । अक्षि नयनं लोचनम् । द्रविणं धनं स्वापतेयम् । बलं सैन्यमनीकम् ॥ २२ ॥ फलविशेषाः- आम्रं पनसं कापित्थम् । हेम सुवर्णं कार्तस्वरम् । शुल्वं ताम्रमौदुम्बरम् । लोहमश्मसारम् । सुखमुपजोषं शान्तम् । दुःखमाभीलं कृच्छ्रम् । शुभं पुण्यं सुकृतम् । अशुभं पापं दुष्कृतम् । जलपुष्पभेदाः- अम्बुजं कुमुदमिन्दीवरं कह्लारम् । लवणभेदाः- सैन्धवमौद्भिदं विडं रुचकम् । व्यञ्जनभेदाः- व्यञ्जनमुपसेचनं दधि दुग्धमुदश्विन्मस्तु । अनुलेपनभेदाः- [अनुलिप्यते] अनुलेपनं कुङ्कुममग्निशिखं काश्मीरं चन्दनं श्रीखण्डम् ॥ २३ ॥ भयानृ[मृ]तशकृद्वस्त्र(स्तु)चापाभरणलाङ्गलम् । दार्वौषधमृधापत्यहृदयोदरकाकुदम् ॥ पत्तनाजिरशृङ्गाग्रद्वारबर्होडुमानसम् । ध्वान्तं चाव्यक्तलिङ्गं च भणितो यत्प्रयुज्यते ॥ कोटेरन्या शतादिका संख्या तृतीये- शतं सहस्रमयुतं, नेह- इयं कोटिर्लक्षशतम् । शतादिरिति किं- इयं त्रिंशत्, इयं नवतिः । लक्षशब्दस्तृतीये वा, पक्षे स्त्रियां निर्देशात्, यथा- कियती पञ्चसहस्री कियती लक्षाथ कोटिरपि कियती । औदार्योन्नतमनसां रत्नवती वसुमती कियती ॥ इदं लक्षं तदेव प्रयुताख्यमित्यभिधानशेषोपि । असन्तमिसन्नमुसन्तमनन्तं च यद् द्विस्वरं तत्तृतीये- इदं यशस्तेजः पयः सर्पिर्बर्हिर्यजुर्धनुः, इदं नाम रोम नर्म पर्व । अकर्तरि यदनप्रत्ययान्तं तत्तृतीये- साध्यतेनेनेति साधनं, अधिक्रियतेस्मिन्नधिकरणं, पाकः पचनम् । कर्तरि तु मधुसूदनः, रमणः,

कोट्याः शतादिः संख्यान्या वा लक्षा नियुतं च तत् ।
द्व्यच्कमसिसुसन्नन्तं यदनान्तमकर्तरि ॥ २४ ॥
त्रान्तं सनो(लो)पधं शिष्टं रात्रं प्राक्संख्यायान्वितम् ।
पात्राद्यदन्तैरेकार्थो द्विगुर्लक्ष्यानुसारतः ॥ २५ ॥
द्वन्द्वैकत्वाव्ययीभावौ पथः संख्याव्ययात्परः ।
षष्ठ्याश्छाया बहूनां चेद्विच्छायं संहतौ सभा ॥ २६ ॥
शालार्थापि परा राजामनुष्यार्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः ॥ २७ ॥
उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने ।
कोपज्ञकोपक्रमादि कन्थोशीनरनामसु ॥ २८ ॥

मदनः । कथमास्थानमास्थानी, करणं करणी, प्रमाणं प्रमाणी, अधिकरणमधिकरणी, राजधानं राजधानी' ल्युटष्टित्वात्, किं च, कृत्यल्युटोबहुलम् (सू०) इत्यनान्तानां त्रिलिङ्गत्वं स्म[स्व]रन्ति– राजभोजनी क्षैरेयी, राजभोजनः शालिः, राजभोजनं भक्तम्, इध्मव्रश्चनी शस्त्री, इध्मव्रश्चनः परशुः, इध्मव्रश्चनं शस्त्रम्, पलाशशातनी, पलाशशातनः, पलाशशातनम्, पूरणी, पूरणः, पूरणम्, गोदोहनी घटी, गोदोहनो घटः, गोदोहनं भाण्डम् ॥ २४ ॥ केवलं त्रान्तं, सकारनकारोपधं त्रशब्दान्तं च, शिष्टं प्रागुक्तादन्यच्छब्दरूपं तृतीये– पात्रं, अमत्रं, दात्रं, कलत्रं, शस्त्रं, वस्त्रं, शास्त्रं, अन्त्रं, तन्त्रं, यन्त्रम् । शिष्टमिति किं– पुत्रः, औपवस्त्रः, मन्त्रः । संख्यापूर्वं रात्रान्तं तृतीये, रात्राह्नाहाःपुंसीति (सू०) पुंस्त्वं प्राप्तम्– तिसृणां रात्रीणां समाहारस्त्रिरात्रम्, एवं पञ्चरात्रं, षड्रात्रम् । संख्ययेति किं– वर्षारात्रः । पात्रादिभिरकारान्तै-रुत्तरपदैः समाहारे लक्ष्यानुसारेण यो द्विगुः स तृतीये– पञ्चपात्रं, त्रिभुवनं, त्रिपुरदाहमुमापतिसेविनः (किरातार्जु०), चतुर्युगम् । पात्रादीति किं– त्रिलोकी, त्रिवेदी । एकार्थ इति किं– पञ्चकपालः पुरो-डाशः । लक्ष्यानुसारत इति किं– त्रिपुरी, पञ्चमूलीशृतं पयः ॥ २५ ॥ द्वन्द्वस्य यदेकत्वं समाहारोऽव्ययी-भावश्च समासस्तृतीये– इदं पाणिपादं, मार्दङ्गिकपाणविकं, स्त्रीषु कथा वर्तत इदमधिस्त्रि, इदं तिष्ठद्गु कालः, इदमुन्मत्तगङ्गं देशः । संख्याव्ययाभ्यां परः कृतसमासान्तः पथिशब्दस्तृतीये– त्रयाणां पथां समाहारस्त्रिपथं, विरुद्धः पन्था विपथं, कुत्सितः पन्थाः कापथम् । संख्याव्ययादिति किं– धर्मपथः । षष्ठ्यन्तात्परा कृतसमासान्ता छाया तृतीये बहूनां चेत्– गृध्राणां छाया गृध्रच्छायं, वीनां छाया विच्छायं, शलभच्छायं, छायाबाहुल्ये (सू०) इति नपुंसकम् । बहूनामिति किं– वृक्षस्य च्छाया वृक्षच्छाया । षष्ठ्याः परा समासे समूहार्था सभा तृतीये– दासीनां सभा दासीसभं दासीसमूह इत्यर्थः, ब्राह्मणसभं, अशालाच (सू०) इति नपुंसकम् । संहताविति किं– दास्याः सभा गृहं दासीसभा ॥ २६ ॥ राजार्थे-भ्योऽमनुष्यार्थेभ्यश्च षष्ठ्यन्तेभ्यः परा समूहार्था शालार्थापि सभा तृतीये, राजशब्दपरा चेन्न स्यात्– नृपस्य सभा गृहं नृपाणां समूहो वा नृपसभं, ईश्वरसभं, रक्षःसभं, पिशाचसभम् । अराजकादिति किं– राजसभा, सभाराजामनुष्यपूर्वा (सू०) इति नपुंसकम् । इमा दिश इमान्युदाहरणानीत्यर्थः ॥ २७ ॥ उपज्ञायत इत्युपज्ञा, उपक्रम्यत इत्युपक्रमः, तदन्तः शब्दः षष्ठीसमासे तदादिकथने द्योत्ये तृतीये– यथा कस्योपज्ञा कोपज्ञं सर्गः, चन्द्रोपज्ञमसंज्ञकं व्याकरणं, पाणिन्युपज्ञमकालं(लकं) व्याकरणं, कस्योप-क्रमः कोपक्रमं सृष्टिः, नन्दोपक्रमाणि मानानि । तदादित्व इति किं– डित्थोपज्ञो रथः, चैत्रोपक्रमो घटः, उपज्ञोपक्रमंतदाद्याचिख्यासायाम् (सू०) इति नपुंसकम् । उशीनरदेशे या कन्था षष्ठ्याः परा सा संज्ञायां गम्यमानायां तृतीये– सौशमीनां कन्था सौशमिकन्थम् । उशीनरेति किं– दाक्षिकन्था । नाम-

भावे नणकचिद्भ्योऽन्ये समूहे भावकर्मणोः ।
अदन्तप्रत्ययाः पुण्यसुदिनाभ्यां त्वहः परः ॥ २९ ॥
क्रियाव्ययानां भेदकान्येकत्वेप्युक्थतोटके ।
चोचमुक्तं गृहस्थूणं तिरीटं मर्मयोजने ॥ ३० ॥
राजसूयं वाजपेयं गद्यपद्ये कृती कवेः ।
माणिक्यभाष्यसिन्दूरचीरचीवरपञ्जरम् ॥ ३१ ॥
लोकायतं हरितालं विदलस्थालबाह्लव(ह्लिक)म् ।
पुंनपुंसकयोः शेषोऽर्धर्चपिण्याककण्टकाः ॥ ३२ ॥
मोदकस्तण्डकष्टङ्कः शाटकः खर्वटोऽर्बुदः ।
पातकोद्योगचरकतमालामलका नडः ॥ ३३ ॥

स्विति किं- चैत्रकन्था, संज्ञायांकन्थोशीनरेषु (सू०) इति नपुंसकम् ॥ २८ ॥ नणकेभ्यश्चकारानुबन्धेभ्यश्च येऽन्ये भावेऽर्थे कृतस्तथा समूहेऽर्थे भावकर्मणोश्च ये तद्धितास्ते ते प्रत्यया येषां ते शब्दास्तृतीये- समन्ताद्रावः सांराविणं वर्तते, सांकूटिनं वर्तते, अभिविधौभावइनुण् (सू०), अणिनुणः (सू०) इति स्वार्थेऽण् । ब्रह्मणो भवनं ब्रह्मभूयं गतः, भुवोभावे (सू०) इति क्यप् । नणकचिद्भ्योऽन्य इति किं- (न)- प्रश्नः, यत्नः, (ण)- न्यदनं न्यादः, नौणचेति (सू०), (क)- आखूनामुत्थानमाखूत्थः, सुपिस्थः (सू०) इति योगविभागात्कः, (चित्)- श्वयनं श्वयथुः, ट्वितोथुच् (सू०), आसनमासना, भावना, ण्यासश्रन्थोयुच् (सू०) । समूहादौ तद्धिताः खल्वपि- भिक्षाणां समूहो भैक्षं, यौवतं, राजकं, औक्षकं, गोर्भावो गोत्वं, शुक्लस्य भावः कर्म वा शौक्ल्यं, मार्दवं, मानोज्ञकं, स्तेयम् । पुण्यसुदिनाभ्यां परः कृतसमासान्तोऽहःशब्दस्तृतीये- पुण्यं च तदहश्च पुण्याहं, सुदिनशब्दोऽत्र शोभनवाची, यथा- सुदिनासु सभासु कार्यमेतत्, पुण्यसुदिनाभ्यामह्नोवक्तव्यात् (वा०) नपुंसकत्वम् ॥ २९ ॥ क्रियाविशेषणान्यव्ययविशेषणानि च तृतीये- एकवचनान्तानि च भवन्ति- मृदु पचति, शोभनं पचति, पूर्वस्यां दिशि देशे काले वा पुरस्ताद्रम्यं, श्वः शोभनम् । एते शब्दास्तृतीये- उक्थं सामविशेषः, तोटकं वृत्तभेदो दशरूपकभेदश्च, चोचं भुक्तोच्छिष्टा फेला, नारिकेरफलस्य फलत्वात्सिद्धं, उक्तमेकाक्षरं छन्दः, अत्युक्तं च द्व्यक्षरम् । गृहस्य स्थूणा गृहस्थूणम् । तिरीटं शिरोवेष्टनम् । मर्म संधिस्थानम् । योजनं चतुःक्रोशी ॥ ३० ॥ राजसूयवाजपेये यज्ञविशेषौ । कविकर्मण्येते द्वे तृतीये- गद्यं दण्डकबन्धः, पद्यं श्लोकबन्धः । कृतौ कवेरिति किं- गद्या स्त्री, पद्या शर्करा । मणिरेव माणिक्यम् । भाष्यं चूर्णिः । सिन्दूरं चीनपिष्टम् । चीरं वार्क्षी त्वक् । चीवरं मुनिवासः । पञ्जरं पक्ष्यादिबन्धनगृहम् ॥ ३१ ॥ लोकायतं नाम तर्कः । हरितालं धातुभेदः । विदलं दाडिमकणः, फल[ले]स्य सिद्धम् । स्थालं भोजनपात्रम् । बाह्लवं देशः । इति नपुंसकलिङ्गशेषः । अयमिदं वार्धमृचोऽर्धर्चः । पिण्याकं खलिः । कण्टकं लतारोम ॥ ३२ ॥ मोदकं भक्ष्यविशेषः । तण्डकं परिष्कारः, दण्डको वायम् । टङ्कोऽश्मदारणः । शाटकं पटः । खर्वटश्चतुःशतग्रामाणां संग्रहस्थानम् । अर्बुदोऽक्षिरोगः संख्याविशेषश्च, पर्वते तु पुंलिङ्गः । पातको गोहत्यादिः । उद्योग उत्साहः । चरकं शास्त्रविशेषः । तमालं वृक्षभेदः । आमलको धात्रीफलं, वृक्षे त्वामलकी । नडोऽन्तःसुषिरं तृणम् ॥ ३३ ॥ कुष्ठं त्वग्रोगः, द्रव्यं च । मुण्डं शिरः, मुण्डिते तु वाच्यलिङ्गम् । शीधुर्मद्यम् । बुस्तं मांसशष्कुली । क्ष्वेडितं मुखध्वनिभेदः । क्षेमं कुशलम् । कुट्टेन निर्वृत्तः कुट्टिमो मणिभूः । संगमो

कुष्ठं मुण्डं शीधु बुस्तं क्ष्वेडितं क्षेमकुट्टिमम् ।
संगमं शतमानार्मशम्बलाव्ययताण्डवम् ॥ ३४ ॥
कवियं कन्दकर्पासं पारावारं युगंधरम् ।
पूयं (यूपं) प्रग्रीवपात्रीवे यूषं चमसचिक्कसौ ॥ ३५ ॥
अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्नोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत् ॥ ३६ ॥
स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः ।
जातिभेदाः पुमाख्याश्च स्त्रीयोगैः सह मल्लकः ॥ ३७ ॥
मुनिर्वराटकः स्वातिर्वर्णको झाटलिर्मनुः ।
मूषा सृपाटी कर्कन्धूर्यष्टिः शाटी कुटी कटी ॥ ३८ ॥
स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ् क्वचिच्च वुञ् ।
औचित्यमौचिती मैत्री मैत्र्यं वुञ् प्रागुदाहृतः ॥ ३९ ॥
षष्ठ्यन्तप्राक्पदाः सेनाच्छायाशालासुरानिशाः ।
स्याद्वा नृसेनं श्वनिशं गोशालमितरे च दिक् ॥ ४० ॥

नद्यादिमेलः । शतमानं रूप्यपलं, यत्स्मृतिः– द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते । शतमानं तु दशभिर्धरणैः पलमेव च ॥ अर्मोक्षिरुक् । शम्बलः पथिव्ययः (पाथेयं) । अव्ययमलिङ्गमसंख्यम् । ताण्डवं नृत्यम् ॥ ३४ ॥ कवियमश्वमुखबन्धनम् । कन्दं मूलविशेषः । कर्पासं बादरम् । पारं नद्याः परं पार्श्वम् । अवारमर्वाक्पार्श्वम् । युगंधरं रथकाष्ठम् । पूयं क्लिन्नासृक् । प्रग्रीवं वातायनम् । पात्रीवं यज्ञोपकरणम् । यूषं मुद्गादिनिर्यासः । चमसं यज्ञेम्बुप्रणयनम् । चिक्कसं यवपिष्टम् ॥ ३५ ॥ अर्धर्चादिगणे पूर्वैर्घृतादीनां पुंस्त्वं यदुक्तं तन्निश्चितं छान्दसम् । अत इह लौकिके नोक्तम् । अथ प्रमादाल्लोके दृश्यते यदि तल्लिङ्गशेषव[त्वा]दङ्गीकार्यम् ॥ ३५ ॥ इति पुंनपुंसकशेषः । स्त्रीपुंसयोः शेषो वक्ष्यत इति शेषः । अपत्यप्रत्ययान्ताः स्त्रीपुंसयोः– वासिष्ठः– वासिष्ठी, गार्ग्यः– गार्गी । द्विपदादयो जातिविशेषाः स्त्रीपुंसयोः– पुरुषः– पुरुषी, कठः– कठी, कुक्कुटः– कुक्कुटी, मृगः– मृगी, अयं गौः– इयं गौः, अयं कपिः– इयं कपिः, भ्रमरः– भ्रमरी, वरटः– वरटी, उरगः– उरगी, अयमहिः– इयमहिः । एते मल्लकादयः शब्दाः स्त्रीयोगैः सह पुमाख्याः स्त्रीनरलिङ्गा इति ज्ञेयाः ॥ ३७ ॥ ३८ ॥ इति पुंस्त्रीलिङ्गशेषः । सिंहावलोकितेन (न)पुंसीत्येव द्वयोः । भावे कर्मणि च ष्यञन्तः स्त्रीनपुंसकलिङ्गः– यथा– उचितस्य भावः कर्म वा, (गुणवचन)ब्राह्मणादिभ्यःकर्मणि च (सू०) इति ष्यञ्, एवं वैदग्ध्यं– वैदग्धी, सामग्र्यं– सामग्री । चोरस्य भावः कर्म वा चौरिका– चौरिकम् । क्वचिद्ग्रहणान्नेह– शौक्ल्यं, ब्राह्मण्यं, मानोज्ञकं, रामणीयकं, साहायकं, शैष्योपाध्यायिका, गार्गिका, काठिका ॥ ३९ ॥ षष्ठ्यन्तपूर्वपदाः सेनादयः स्त्रीनपुंसकयोः– नृणां सेना नृसेनं नृसेना, शुनां निशा श्वनिशं श्वनिशा, भूतनिशं भूतनिशा, गवां शाला गोशालं गोशाला । एवमितरे छायासुरे उदाहार्ये, यथा– वृक्षस्य वृक्षयोर्वा छाया वृक्षच्छायं वृक्षच्छाया, यवसुरं यवसुरा ॥ ४० ॥ आबन्तोत्तरपदो द्विगुरन्नन्तोत्तरपदो द्विगुश्चापुंसि स्त्रीनपुंसकयोः, नस्य च लुग्भवतीति प्रसङ्गाल्लक्षणानुवादः– तिसृणां खट्वानां समाहारस्त्रिखट्वं त्रिखट्वी,

आवन्तोत्तरपदो द्विगुश्चापुंसि नश्च लुप् ।
त्रिखट्वं त्रिखट्वी च त्रितक्षं च त्रितक्ष्यपि ॥ ४१ ॥
त्रिषु पात्री पुटी वाटी पेटी कुवलदाडिमौ ।
परलिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेपि तत् ॥ ४२ ॥
अर्थान्ताः प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः ।
तद्धितार्थे द्विगुः संख्यासर्वनामतदन्तकाः ॥ ४३ ॥
बहुव्रीहिरदिङ्नाम्नामुन्नेया तदुदाहृतिः ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥ ४४ ॥

त्रयाणां तक्ष्णां समाहारस्त्रितक्षं त्रितक्षी ॥ ४१ ॥ इति स्त्रीनपुंसकशेषः । एते त्रिलिङ्गाः– पात्रो भाजनं, पुट आच्छादनं, वाटो वृतिः, पेटः संहतिः परिच्छदश्च, कुवलं कोलिफलं, दाडिमं विदलम् । इति त्रिलिङ्गशेषः । स्वप्रधान इतरेतरयोगद्वन्द्वे तत्पुरुषे चोत्तरपदस्य यल्लिङ्गं तद्भवति– कुक्कुटमयूर्याविमे, मयूरीकुक्कुटाविमौ, कुलविगोयं, विप्रकुलमिदं, अर्धं पिप्पल्या अर्धपिप्पलीयं, चन्द्रार्धोयं, परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः (सू०) ॥ ४२ ॥ अर्थशब्दान्ताः प्राद्यलमादिपूर्वपदाश्च परोपगाः वाच्यलिङ्गा इत्यर्थः । ब्राह्मणायेयं ब्राह्मणार्था शिखरिणी, ब्राह्मणार्थ ओदनः, ब्राह्मणार्थं पयः, अर्थेननित्यसमासःसर्वलिङ्गताच (वक्तव्या) (वा०), प्रगत आचार्योस्याः प्राचार्या, प्राचार्यः, प्राचार्यं, प्रादयोगताद्यर्थेप्रथमया (वा०), प्रादिभ्योधातुजस्यवाच्योवा (वा०) इत्युत्तरपदलोपः । अतिक्रान्ता खट्वामतिखट्वा, अतिखट्वः, अतिखट्वं, अत्यादयःक्रान्ताद्यर्थेद्वितीयया (वा०) । अवक्रुष्टा कोकिलया चूतकलिकावकोकिला, अवकोकिलः, अवकोकिलं, अवादयःक्रुष्टाद्यर्थेतृतीयया (वा०) । परिग्लानाध्ययनाय पर्यध्ययना, पर्यध्ययनः, पर्यध्ययनं, पर्यादयोग्लानाद्यर्थेचतुर्थ्या (वा०) । निष्क्रान्ता मर्यादाया निर्मर्यादा, निर्मर्यादः, निर्मर्यादं, निरादयःक्रान्ताद्यर्थेपञ्चम्या (वा०) । अलं जीविकायै– अलंजीविका, अलंजीविकः, अलंजीविकम् । प्राप्ता जीविकां प्राप्तजीविका, प्राप्तजीविकः, प्राप्तजीविकम् । आपन्ना जीविकामापन्नजीविका, आपन्नजीविकः, आपन्नजीविकं, प्राप्तापन्नेचद्वितीयया (सू०) । वाच्यलिङ्गा इत्यर्थः । पञ्चसु कपालेषु संस्कृता पञ्चकपालापूपिका, पञ्चकपालः पुरोडाशः, पञ्चकपालं हविः । संख्या सर्वनाम च तदन्ताश्च वाच्यलिङ्गाः– एका, एकः, एकं, तिस्रः, त्रयः, त्रीणि, सर्वा, सर्वः, सर्वम् । संख्यान्ताः– ऊनास्तिस्रो यासां ता ऊनतिस्रः, ऊनत्रयः, ऊनत्रीणि । सर्वनामान्ताः– द्वाभ्यामन्या द्व्यन्या, द्व्यन्यः, द्व्यन्यत् ॥ ४३ ॥ बहुव्रीहिर्वाच्यलिङ्गः– चित्रा गावोस्याश्चित्रगुः स्त्री, चित्रगुर्ना, चित्रगु कुलम् । अदिङ्नाम्नामिति किं– दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा, एवं पूर्वोत्तरा सा विदिक् । गुणादिभिर्योग उपाधिः प्रवृत्तिनिमित्तं येषां ते परगामिनो वाच्यलिङ्गाः । गुणोपाधिः– शुक्ला शाटी, शुक्लः पटः, शुक्लं वस्त्रम् । द्रव्योपाधिः– दण्डिनी स्त्री, दण्डी पुमान्, दण्डि कुलम् । क्रियोपाधिः– पाचिका, पाचकः, पाचकम् ॥ ४४ ॥ कर्तर्यर्थे संज्ञावर्जिताः कृदन्ता वाच्यलिङ्गाः– कर्त्री, कर्ता, कर्तृ, कुम्भकारी, कुम्भकारः, कुम्भकारम् । असंज्ञायामिति किं– ग्रहः, व्याघ्रः । कर्तृकर्मार्थे कृत्या वाच्यलिङ्गाः– वास्तव्या, वास्तव्यः, वास्तव्यं, वसेस्तव्यत्कर्तरिणिच्च (वा०), कर्तव्या, कर्तव्यः, कर्तव्यम् । कर्तरि कर्मणीति किं– स्थातव्यं त्वया, ब्रह्मभूयं, हत्या । असंज्ञायामित्येव– सूर्यः, भिद्योद्ध्यौनदे (सू०) । तेन रक्तमित्यादावर्थेऽणादितद्धितान्ता वाच्यलिङ्गाः– हरिद्रया रक्ता हारिद्री, हारिद्रः, हारिद्रं, लाक्षाभिर्युक्ता लाक्षिकी, लाक्षिकः, लाक्षिकं, कृत्तिकाभिर्युक्ता कार्तिकी पौर्णमासी, कार्त्तिको दिवसः,

कृतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।
अणाद्यन्तास्तेनरक्ताद्यर्थे, नानार्थभेदकाः ॥ ४५ ॥
षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥ ४६ ॥

इति लिङ्गसंग्रहवर्गः । ५ ।

कार्त्तिकमहः । इन्द्रो देवतास्या ऐन्द्री (ऋक्), ऐन्द्रो मन्त्रः, ऐन्द्रं हविः । असंज्ञायामित्येव– श्रवण पौर्णमासी, अश्वत्था पौर्णमासी, संज्ञायांश्रवणाश्वत्थाभ्याम् (सू०) इत्यणो लुप् । नानाविधार्थविशेषा येषां ते वाच्यलिङ्गाः– को ब्रह्मा, कं शिरः, नभः खं, नभाः श्रावणः । नानार्थो विशेषणानि वेत्येके– मूर्खा, मूर्खः, मूर्खं, विदुषी, विद्वान्, विद्वत् ॥ ४५ ॥ ष्णान्ताषट् (सू०) इति षट्संज्ञकाः, तथा युष्मदस्मच्छब्दौ, आख्यातान्यव्ययानि च त्रिलिङ्ग्यां समानि लिङ्गकृतविशेषरहितानीत्यर्थः । षट् स्त्रियः, षड्रसाः, षट् कुलानि, पञ्च स्त्रियः, पञ्च शराः, पञ्चेन्द्रियाणि, त्वं स्त्री, त्वं पुमान्, त्वं कुलं, अहं स्त्री, अहं पुमान्, अहं कुलं, ब्रूते स्त्री, ब्रूते पुमान्, ब्रूते कुलं, नानास्त्रियः, नानादेशाः, नानाकुलानि, उच्चैः स्त्री, उच्चैस्तरुः, उच्चैर्वनं, तत्र पुरि, तत्र देशे, तत्र वने, एवं कति स्त्रियः, कति जनाः, कति खानि । लिङ्गविशेषविधौ पूर्वापरविरोधे परं लिङ्गं भवति । असुरपर्यायाः पुंस्त्व इत्यस्य विषये– नैर्ऋतः, राक्षसः । द्व्यच्कमसिसुसन्नन्तमिति तृतीय इत्यस्य विषये– इदं तेजः, यशः । इहोभयं प्राप्नोति– इदं रक्षः, परत्वात्क्लीबे । इह यत्रोक्तं तल्लक्ष्यतो द्रष्टव्यं, यथा– गोधा पुंध्वजापि स्त्री, तथा पोटा नपुंसकमपि स्त्री । तथाव्यक्ते गुणसंदेहे नपुंसकलिङ्गं प्रयुज्यते– किं तस्या जातं स्त्री पुमान्वा, शक्यं श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् । तथा तयप्प्रत्ययान्तं धर्मवृत्ति स्त्रीनपुंसकयोः– वर्णानां चतुष्टयी, वर्णानां चतुष्टयम्, वेदानां त्रयी, वेदत्रयम् । धर्मवृत्ति तु वाच्यलिङ्गं– त्रय्यः स्थितयः, त्रये लोकाः, त्रयाणि जगन्ति । तथा छान्दसोऽण् स्वार्थे क्लीबे– गायत्र्येव गायत्रं, अनुष्टुबेवानुष्टुभम् । तथा इक्श्तिबन्तः पुंसि– अयं वृद्धिः, अयं पचतिः । तथा दरद् ह्रस्वेकश्च स्त्रियां– इयं दरद्देशः, गृह्यकण्डिका, छत्त्रिका, दण्डिका, नालिका, नासिका । तथा प्रमाणाद्या अजहल्लिङ्गवचनाः– वेदाः प्रमाणं, स्मृतयः प्रमाणं, भूतमियं ब्राह्मणी, विप्राशिषो भद्रम् ॥ ४६ ॥ इति लिंङ्गसंग्रहवर्गः । ५ । [इत्यमरसिंहकृतौ नामलिङ्गानुशासने । सामान्यकाण्डस्तृतीयः साङ्ग एव समर्थितः ॥]

इति श्रीभट्टक्षीरस्वाम्युत्प्रेक्षितेऽमरकोशोद्घाटने सामान्यकाण्डस्तृतीयः समाप्तः ।

APPENDIX I.

An alphabetical list of authors and works quoted by Kshîrasvâmin in his commentary on Amarakosha.

(The figures refer to pages).

अनेकार्थः (अनेकार्थकोशः)–A lexicon, 67.

अभिधानकारः–Author of Abhidhânakosha, 32.

अभिधानशेषः–A supplement to Abhidhânakosha, 235.

अमरमाला–A lexicon, 12, 15, 29.

अश्वतन्त्रम्–A work on horses (by some writer like *S*âlihotra ?) (see Notes), 129.

आचार्याः–A commentator (कोहलः ?), 50.

इन्दुः–Author of a medical Nigha*n*tu, 56, 57, 58, 59, 61, 63, 65, 67, 68, 69, 71, 75, 76, 77, 79, 80, 81, &c.

उत्तररामचरितम्–A drama by Bhavabhûti, 85, 140, 175, 227, 229.

उदीच्याः–The Northern school of grammarians, 185.

उद्भटः–A writer on Rhetoric (of Kâ*s*mere), 224.

उपाध्यायः–A commentator on Amarakosha, 2, 41, 54, 99, 140, 141, 164.

कात्यः–A very ancient lexicographer, (see Introduction), 8, 10, 15, 16, 21, 23, 24, 27, 29, 30, 35, 36, 37, 39, 41, 47, 48, 50, 52, 54, 55, 89, 94, 104, 115, 118, 122, 125, 131, 144, 148, 151, &c.

कादम्बरी–A prose work by Bâ*n*abha*tt*a, 28.

कालिदासः–Author of Raghuvam*s*a, Kumârasambhava, &c., 52, 90.

काव्यादर्शः–A work on Rhetoric by Da*nd*in, 191.

काशिका–A complete commentary on Pâ*n*ini, 35, 47, 118, 215, &c.

काश्मीराः–The Kâ*s*mere recension of Amarakosha, 132.

किरातार्जुनीयम्–A poem by Bhâravi, 179, 210, 228, 236, &c.

कुमारसंभवम्–A poem by Kâlidâsa, 9, 52, 90, 109, 176, 196, 202, 224, 225, 226, 227, &c.

कुमारिलभट्टः–Author of the Mîmâmsâ-Vârttikas, 28, 166, 207.

कौटिल्यः–Author of a work on Artha*s*âstra, 34, 42, 49, 50, 51, 125, 137, 162, 185, 186, 193, 196, 210, 211, &c.

गौडः–A commentator on Amarakosha, 2, 3, 40, 41, 50, 59, 60, 77, 86, 106, 130, 131, 153, 192, 193, &c.

NOTE—References to श्रुति, स्मृति, पुराण, निरुक्त, आगम, ect., are not included in this list.

List of Unverified Quotations, &c.

Page	
11	गन्धर्वौ च हाहा हूहूः
18	जमदग्निर्वै पञ्चममवदानमवाद्यत्
20	ब्रह्मणो ह्येषा पितृप्रसवित्री तनुः
22	अहोरात्राविमौ पुण्यौ
23	जीव्यात्सहस्रं समाः
25	सत्संवित्करणातीता
30	न तां वदेदुषर्तीं (र्गां) पापलोक्याम्
35	व्रीडावनम्रवक्त्रेन्दुः व्रीडादमुं देवमुदीक्ष्य य ईर्ष्युः परवित्तेषु
39	काममपारि मयेन्द्रियकुण्ठैर्यद्यपि दुष्कृत- हालहलौघः

Page	
	सेयं दुःखा च दुरुपपादा च दुःखः सुतो निर्गुणः सर्वं दुःखं विवेकिनः
40	सुगममेव हि मध्यम गांपतेः
47	न हि कोटरसंस्थेग्नौ तरुर्भवतिशाद्वलः राजन्वान्-लोक उच्यते
67,161	अ मा नो नाः प्रतिषेधे
82	दर्भाणां स्थाने शरैः प्रस्तरितन्यम् धान्तो धान्तः काञ्चनस्येव राशिः
88	झिल्लिकार्तिं(र्झां)कृतनाम्
91	अजयद् द्विषतः प्राप्तनयः परमहेलया । स्वप्नेपि मनासि स्पृष्टो न यः परमहेलया ॥
96	या जनित्री त्रिलोक्याः

Page	
98	अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः । नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः ॥
103	पद्भ्यामेव यथातथेति
119	अभिवाद्योपसंग्राह्यः
162	निष्प्रवाणिर्नवः पटः
167	येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम्
175	सूर्यः समेषां समः
178	कुलस्यान्तः प्रभु स्त्रियः
180	प्रिय[या]दर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः । निर्वाणमाप्यते येन सरागेणापि चेतसा ॥
186	संवाहनं स्पर्शसुखम्
188	अकरणिरिह भूयादप्रशस्तस्य धातुः
189	पुलाका इव धान्येषु पुलाककारी विपुलाशयः स्यात्
190	तपो न कल्कोऽध्ययनं न कल्कः
192	विचरेद्युगमात्रदृक्
193	वर्जयेत्कटधूमं तु
195	प्रकीर्णभाण्डामनवेक्ष्यकारिणीम् क्षणे रक्ष्याः कुलस्त्रियः क्षणपरपुरजिद्दत्तशूलप्रहारान्
199	वृत्तदेहः स्नायुसारः
201	यदध्यासितमर्हद्भिस्तद्धि तीर्थम् तीर्थं तद्व्यकव्ययोः एकमेवेदं संविद्रूपम् प्रवृत्तौ च निवृत्तौ च संविदं स्थापयेद्रणे धर्मस्योपनिषत्परा
202	जीवेच्च शरदां शतम् पदमापदि माधवः सूर्यांशवः शशिनि लब्धपदा यथैव नवनखपदलेखालाञ्छितं बाहुमूलम् बाहुप्रमाणं परिधिरच्छिन्नाप्नोतिपत्त्रलः आधिं प्राप्तो यो न मुह्येत्स धीरः अनुबन्धमवस्थां च ज्ञात्वा दण्डं निपातयेत्
203	सिन्धोः परमपूरुषम्
205	पर्ववर्जं व्रजेच्चैनाम्
206	व्याप्तं व्योमनि वर्ष्मणा
207	क्षरस्तेनः कृतं पूर्वम् गर्भस्थेन समः सदा रम्भागर्भमृदुः भर्तृगर्भद्रुहां चैव दुन्दुभ्या किल तत्कृतं पतितया यद् द्रौपदी हारिता
208	जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः
209	दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः । अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥ न शत्रोः प्रत्ययं गच्छेत् समयान्श्रावयेच्छिष्यम्
210	गुणिनां नात्ययं कुर्यात् वाक्पारुष्येऽत्ययः शतम् सर्वस्यैव हि दानस्य प्रहीता गुरुरुच्यते । कन्यायाश्चैव विद्यायाः प्रदाता पूज्यते गुरुः ॥ प्रायेणाकृतकृत्यत्वान्मृत्योरुद्विजते जनः
211	वृषाकपायीमभ्येति सत्वपः किं न गोत्रभिद् सर्वाः क्रिया मन्त्रमूला नृपाणाम् महापातकिनां पुंसां भवेत्प्राणान्तिका क्रिया गुरुदेवक्रियारतः क्रियां विना को हि जानाति कृत्यम् अतो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः विच्छायः पुरुषो भवेत् संक्रान्तच्छाय आदर्शः सप्त कक्ष्या अतिक्रम्य परिधानाद्बहिः कक्ष्या निबद्धा ह्यासुरीभवेत् तानि कृत्याहतानीव
212	वारं वारमुदारसंगरमुखे संगरो विक्रियाकरः अन्योन्यं वृत्तसंगरौ संगरे शरणं सुहृत्
213	आडम्बराणि पूज्यन्ते स्त्रीषु राजकुलेषु च जये धरित्र्याः पुरमेव सारम् वरं कूपशताद्वापी
214	मात्राशी सर्वकालं स्यात्
215	चतुःपीठमिदं तन्त्रम् साधारणं भवेत्तन्त्रम्

Page

दुष्करं पुष्करं गन्तुम्
पर्वतान्तरिताः स्त्रियः
अन्तरज्ञो भव सदा धनस्य च जनस्य चै
अयमभ्य(त्य)न्तरो मम
दृष्ट्वान्तरं ज्योतिरुपारगम

216 प्रश्नश्चोद्यधिया पृच्छा तस्य भञ्जनमुत्तरम्

217 सितपटच्छन्नपालीं कपालीम्
शीलधनः साधुः

218 षड्युग्मकरतलस्तालो वितस्तिः शङ्कुरानननम्
न केवलं भुवो भर्ता
धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते
भावालसा विलासिन्यः
स्वं भावं भावयेद्योगी
भावाश्चित्तजया भवन्ति भवता भाव्यन्त एते यथा

219 उल्मुकानीव भान्ति स्वाः
हृदि स्वमवलोकयन्
प्रभूताः स्वा न दीयन्ते
वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोर्थो भेद्यत्वेन व्यवस्थितः ॥
उत्क्रान्तसत्त्वो मृगः

220 त्यक्तापदेशो यतिः
अग्रतो बाहुपाशेन केशपाशेन पृष्ठतः ।
पार्श्वयोः कर्णपाशेन सर्वतो बन्धनं प्रिया [ये] ॥
त्व[म]द्दन्ताङ्कितपालिकक्षरुधिरक्लिन्नाग्रपुङ्खं शरम्

221 चतस्रः कर्षूः पितृभ्यः कुर्यात्

222 रसस्यातिरसः सर्पिः
रोदोरन्ध्रमजिहदत् [न्]
उपष्टम्भकं बलं च रजः
युक्तश्छन्दांस्यधीयीत

224 सर्वान्गुणानेष गुणोऽतिभाति
सक्रुद्युवानो गीर्वाणाः
आराच्छत्रोः सदा वसेत्
संप्रीतान्स्थापयेदारात्

Page

अहो बत महत्कष्टम्
श्वेत वितरत तोयं तोयवाहा हिमान्तं [नितान्तं]

225 वृद्धिरित्येव या वृद्धिः
नाना नारीर्निष्फला लोकयात्रा
ननु चण्डि प्रसीद मे
आशीविषो वा संक्रुद्धः सूर्यो वाभ्राविनिर्गतः ।
भीमोन्तको वा समरे गदापाणिरदृश्यत ॥

226 सामिसंमीलिताक्षी
नूनं हन्तास्मि रावणम्
जोषमास्ते जितेन्द्रियः
को नामायं सवितुरुदयः
दृष्टेश्वरे रोदिति नाम तन्वी
स्वर्गतस्य ह्यपुत्रस्य
गोत्रस्खलितं किलाश्रुतं कृत्वा

227 आपतन्तमभितोरिमपश्यत्
भिक्षित्वापि बुभुक्षिता यदहहा
अहह प्रज्ञाप्रकर्षो राज्ञः
चिराय निर्धनो भूत्वा भवत्यह्ना (ह्ना) महाधनः
कान्तं [न्तां] मुहुर्ध्यायति
पुनः पुनर्वारि पिबेद्भूरि
शश्वद्वक्ति कुशिक्षितः
अभीक्ष्णमास्फालयतीभकुम्भम्
स्राक्सरत्यभिसारिका
सपदि प्रदहत्युपेक्षितोग्निः
द्राग्विद्रुतं कातरैः
तरसोदिता सह जलेषु
किमुत ब्रह्मविन्निभिः
सुसिक्तं आम्रः फलति
विना वातं विना वर्षम्
त्वामन्तरा तामरसायताक्षि

228 वितर गिरमुदारां येन मूकाः पिकाः स्युः
पद्भ्यां याति कुतश्चन
कदाचिच्छूरतां याति मरणे कृतनिश्चयः
सत्रा कलत्रैर्गार्हस्थ्यम्
सङ्गो द्विजिह्वैः सजूः